CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि

प्रणेता

पं० वासुदेव द्विवेदी शास्त्री

सम्पादकः

डॉ० कपिलदेवपाण्डेयः

सार्वभौम संस्कृत प्रचार संस्थानम्, वाराणसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

S-3 डा० उर्मिला शर्मा महोदयाभ्यः सादर
समर्पितमिदं महाकाव्यम्

रेवानन्द-द्विवेदी (ब्रह्मचारी)
११-३-२००६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृत प्रचार पुस्तक माला सं०-६५

॥ अद्यापि ॥

☆

लेखकः
पं० वासुदेव द्विवेदी शास्त्री

☆

सम्पादकः
डॉ० कपिलदेवपाण्डेयः

☆

सार्वभौम संस्कृत प्रचार संस्थानम्
वाराणसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक :

सार्वभौम संस्कृत प्रचार संस्थानम्

डी० ३८/११०, हौजकटोरा

वाराणसी-२२१००१

फोन : (०५४२) २४१३०१२

☆

आवृत्ति : प्रथम

संख्या : ५०० प्रतियाँ

कार्तिकी पूर्णिमा वि० सं० २०६१

(दिनाङ्क-२६.११.२००४ ई०)

☆

मूल्य : २०१/- अजिल्द

२५१/-सजिल्द

☆

मुद्रक :

आनन्दकानन प्रेस

डी० १४/६५, टेढ़ीनीम

वाराणसी-२२१००१

फोन : २३९२३३७, २३९१३२६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समर्पणम्

राहुकेतुबुधयोगभोगतो
वार्धकेऽतिकृशितेऽपि विग्रहे।
साहसेन बलिना मयाऽधुना
पूरिता कृतिरियं कथञ्चन॥

एकोनविंशशतकेऽष्टनवत्युपेते
मार्गेऽसितेऽन्तिमतिथौ शुभवासरे च।
दैव्या गिरः सुललितो मधुरो मयाऽयं
प्रत्यर्पितो लघुनवः कुसुमोपहारः॥

ईषद्दृशापि बिबुधैर्यदि वीक्षितेयं
मन्दस्मितेन च कदाचन चुम्बितेयम्।
आस्वादिता यदि मनाग् रसनाञ्चलेन
नूनं भवेदियमशेषसुखप्रदा मे॥

'*विद्यानिवास*'इति विश्रुतपुण्यनाम्नां
श्रीमिश्रपादविदुषां चरणाम्बुजेषु।
दैव्या गिरः कृतिमिमां महतादरेण
श्रद्धानतेन शिरसा च समर्पयामि॥

सुधियां श्रेयसे भूयात् प्रेससे स्यात्सचेतसाम्।
लोकानां भूयसे भायान्मङ्गलाय कृविर्मम॥

— वासुदेव द्विवेदी शास्त्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



आचार्य वासुदेव द्विवेदी शास्त्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्पादकीयं निवेदनम्

आजीवनं संस्कृतसेवाऽनुष्ठानपरं सुरभारतीसमर्चनसमर्पितविग्रहं पण्डितप्रवरं श्रीवासुदेवद्विवेदिशास्त्रिवर्यं को न वेत्ति संस्कृतविज्जनः।

असौ उत्तरप्रदेशान्तर्गतस्य देवरियामण्डलस्य भवानीछापरं नामाख्यं ग्रामं सप्तत्यधिकैकोनविंशे (१९७०) वैक्रमाब्दे रविवासर-समन्वितायां फाल्गुन-शुक्लैकादश्यां तिथौ स्वजनुषा धन्यतामनैषीत्। कुलक्रमागतां संस्कृतविद्यामध्येतुं ग्रामस्य समीपे विद्यमाने संस्कृविद्यालये प्रवेशं समवाप्य प्रारम्भिकीं शिक्षामधिगतवान्। ततश्चोच्चतरमध्ययनं विधातुं बिहारप्रान्तस्य हथुआनामके स्थने स्थिते श्रीछत्रधारीसंस्कृत-महाविद्यालये लब्धप्रवेशोऽसौ साहित्याचार्यपरीक्षामुत्तीर्य संस्कृत-विद्यायाः केन्द्रभूतां वाराणसीं प्राप्तवान्। तत्र राजकीयसंस्कृतमहाविद्यालये (सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालय इति) वेदाध्ययनमारब्धवान्। परमाध्यवसायपूर्वकं पारम्परिकमध्ययनं विधाय परीक्षोपाधिम् उच्चश्रेण्यां सम्प्राप्यापि परमप्रियमध्ययनकार्यं हित्वा मातृभूमेः भारतस्य दासताबन्धमुक्तये समारब्धेऽसहयोगान्दोलने भागमग्रहीत्। संस्कृतसेवायां संस्कृतिसमुन्नयने च तन्मनस्तथानुरक्तं यत् आजीविकायाश्चिन्तां सन्त्यज्य परिवारपोषणाय वार्तामपि तिरस्कृत्य संस्कृतभाषासाहित्यप्रचार-प्रसारार्थमाजीवनं सेवाव्रतमङ्गीकृतवान्। भारतस्य स्वातन्त्र्यप्राप्तिदिवसे (१५ अगस्त १९४७ खैष्टाब्दे) सुरभारत्याः सेवाव्रतरूपं संकल्पं चरितार्थयितुं तेन काशीं स्वकार्यजातस्य केन्द्रं परिकल्प्य "सार्वभौम-संस्कृतप्रचारकार्यालय" इति संस्थायाः स्थापना व्यधायि या परवर्तिनि काले "सार्वभौमसंस्कृतप्रचारसंस्थानम्" इति अपरं नाम प्राप्तवती। तन्माध्यमेन त्यागतितिक्षातपोनिष्ठेन द्विवेदिवर्येण लोकजीवनं विधातुं तेन प्रयतितम्। सार्वभौमत्वं साधयितुमस्य संस्थानस्य तेन अशेषे भारते प्रान्तात्प्रान्तं, नगरान्नगरं ग्रामाद् ग्रामं पर्यटता स्वकीयेन वाक्कौशलेन सहज-सरल-सुमधुर-संस्कृत-सम्भाषणेन सुरभारत्याः भृशं प्रचारे व्यधायि। द्विवेदिवर्येण सर्वत्र क्लेशं सोढ्वापि सीमितसाधनैरप्यसीमितोत्साहैः तत्तन्मण्डलेषु प्रतिग्रामं भ्रमित्वा तत्तस्थलानां संस्कृति-सभ्यता-भोजन-पानाचार-व्यवहारवेशभूषा-जीवनपद्धत्यादीनां विषये यत् किमपि अनुभूतं, विविधं यत्किमपि दृष्टं तत्सर्वम् एकस्मिन् काव्ये निबद्धुं विचारः तस्य मनसि समुपाजायत। परन्तु दौर्भाग्यात् तेष्वेव दिनेषु द्विवेदिमहोदयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृदयरोगेण पीडितः सन् काशीहिन्दूविश्वविद्यालयस्य गहनचिकित्साकक्षे प्रविष्टोऽभवत्। किमपि लेखनात् पठनात् चिन्तनात् विचारणात् केनचित् सह वार्तालापात् वा भृशं वारितः सन्नपि स्वसंकल्पितं देशभ्रमणविवरणरूपं यात्राकाव्यं लेखितुं चिकित्सालय एव प्रवृत्तः चिकित्सकदृग्भ्यः निलीनो भवन्।

कविना स्वकीयरचनायाः नाम तथाविधं कर्तव्यं येन नाम्नैव वर्ण्यविषयानुमानं परिज्ञानं वा जायेतेति आचार्यकुन्तकानुसारेण द्विवेदिमहोदयेनापि वर्ण्यविषयानुरूपं नाम कर्तुं बहु विचारितम्। बिल्हणकविविरचितस्य संस्कृतसाहित्यरसिकेषु सुतरां प्रसिद्धस्य "चौरपञ्चाशिका" इति नामकस्य लघुकाव्यस्य सर्वेषु श्लोकेषु प्रथमं पदम् "अद्यापि" इति तेन अनुकरणं कृतम्। चिकित्सालये त्रिवारं वसताऽपि सम्पूर्णभारतभुवः दर्शनस्य वर्णनं प्रतिपद्यं "अद्यापि" इति प्रथमपदप्रयोगपूर्वकं वसन्ततिलकाछन्दोनिबद्धैः विविध-विषयसंवलितैः पञ्चाशत्संख्याधिकैः श्लोकैः पूरितं व्यरचि काव्यमिदं "अद्यापि" इत्यभिधानम्। मध्ये मध्ये व्याख्यानपरो गद्यभागोऽपि दत्तो वर्तते। जिज्ञासुपाठकानां ज्ञानसंवर्द्धनाय टिप्पणीरूपेण सूचनाः अपि निवेशिताः सन्ति। ग्रन्थेऽस्मिन् प्रस्तावना-वन्दना-प्रकरणसहितम् ऊनत्रिंशत् अध्यायाः सन्ति येषु सम्पूर्णं भारतं द्विवेदिमहाभागेन भ्रमणैः परिवीक्षितम्।

सम्पूर्णस्यापि ग्रन्थस्य बहुशः संशोध्य लेखनकार्येण यत्स्वरूपं विहितं तदर्थं डॉ० शरदिन्दुकुमारत्रिपाठी न केवलं धन्यवादभाजनं प्रत्युत भूरिशः आशीर्वादार्हः श्रीमता विमर्शपाण्डेयेन सपत्नीकेन (श्रीमती सोनालीपाण्डेया) ग्रन्थस्यास्य प्रकाशने सम्पूर्णमार्थिकं सहयोगं प्रदाय संस्कृतजगतः महान् उपकारः कृतः अतोऽसौ हार्दाशीर्भिः भूष्यते। प्रकाशनकर्मणि आनन्दकाननमुद्रणालयः पं० प्रभाकरकुमार-ओझा च धन्यवादार्हा। स्वीयऽस्वास्थ्यदशायामेव किमपि लिखितुं न क्षमः द्विवेदिमहोदयः अस्य ग्रन्थस्य सम्पादनदायित्वं मह्यं समर्प्य २६ मई २००४ दिनाङ्के ११.४५.२०वादने शिवसायुज्यं प्राप्तवान्। मयापि गुरोरादेशः यथाशक्ति पालितः इति शम्।

सम्पादकः
कपिलदेवपाण्डेयः
फ्लैट सं० ३, प्रिया अपार्टमेन्ट
कमच्छा, वाराणसी-२२१०१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्तज्ञ्यविज्ञापनम्

मम परमपूज्यानां पितामहानां पण्डितवर्यवासुदेवद्विवेदिशास्त्रि-महाभागानामन्तिमं ग्रन्थम् "अद्यापि" इति काव्यं प्रस्तुवन्नहमत्यन्तं प्रसीदामि। कृतिरेषा पञ्चषष्टिसंख्यका चास्ति तेषाम्। पितामहाः सार्वभौम-संस्कृत-प्रचार-संस्थानस्य नैकशास्त्रमर्मज्ञान् मन्त्रिणः **डॉ० कपिलदेवपाण्डेयमहोदयान्** स्वाभिन्नहृदयान् अभिमन्यन्ते स्म। आवश्यकतायां सत्यां यदा कदापि पाण्डेयाः पितामहैराहूयन्ते स्म तदा सकलं स्वीयकार्यजातं प्रविहाय ते संस्थानीयकार्यक्रमेषु यथापेक्षितं साहाय्यमन्वतिष्ठन्त। ग्रन्थस्यास्य सम्पादनं प्रकाशनभारजातं च पितामहानामस्वास्थ्यवशात् तदनुरोधेन च पाण्डेयैः सहर्षं स्वीकृत्य निष्ठया तदनुष्ठितम्। तस्मादहं सादरं शतशस्तान्नमामि। पाण्डेयमहाभागा मे पितामहा एवेति साम्प्रतं मन्ये।

पाण्डेयपरिवारस्यैकम् अद्वितीयं प्रशस्तं योगदानमवश्य-मुल्लेखनीयमेव, यदस्य ग्रन्थस्य सकलं प्रकाशनव्ययं तदीयद्वितीयसुतेन **श्री विमर्शपाण्डेयेन** (एम.एस-सी., अमेरिकायां कार्यरतेन) तथा तदीयभार्यया **श्रीमत्या सोनालीपाण्डेयया** निर्व्यूढ्य पञ्चपञ्चाशत्सहस्र-मुद्राराश्यात्मकम् (५५,०००/-) आर्थिकयोगदानं विहितम्। तदर्थं हार्दं कार्तज्ञ्यं शुभकामनां च तेषु निवेदयामि।

मदीयाः पितृपादाः श्रीविद्यानन्दद्विवेदिनः ब्रह्मचारिणोऽपि पाण्डेय-परिवाराय कृतज्ञतामित्थं ज्ञापयन्ति पद्यमुखेन—

अद्यापि काव्यं सुमनोहरं यद् विद्वन्मनोज्ञं सरसं विशिष्टम्।
वैदर्भिरीत्या रचितं हि तातैर्बुधैरवश्यं पठनीयमेतत्॥
प्रकाशितं काव्यमिदं सुविज्ञैः पाण्डेयपादैर्निजवित्तयोगैः।
सम्पादितं चापि विशिष्टबुद्ध्या नूनं प्रशस्तानुभवेन साकम्॥
तस्मात् कृतज्ञोऽस्मि सदैव तेषां लब्ध्वा विशिष्टं सहयोगमेवम्।
शतायुषस्ते भगवन्! भवेयुः स्वस्थाः सुपुष्टाश्च यशस्विनः स्युः॥

विद्वच्चरणचञ्चरीकः
श्रीनिवासद्विवेदी शास्त्री
(सञ्चालकः)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकरणानुक्रमणिका

क्र.सं.	विषयः	पृष्ठ सं.
१.	प्रस्तावना	१
२.	देवदेवीनां वन्दनीयपुरुषाणां च वन्दना	१४
३.	असमप्रदेशीयानि संस्मरणानि	४५
४.	अरुणाचलप्रदेशीयानि संस्मरणानि	६१
५.	उत्कलप्रदेशीयानि संस्मरणानि	६३
६.	उत्तरप्रदेशीयानि संस्मरणानि	७९
७.	कश्मीर (जम्मू) प्रदेशीय-संस्मरणानि	१६६
८.	गुर्जरप्रदेशीयानि संस्मरणानि	१९३
९.	दिल्लीप्रदेशीयं संस्मरणम्	२०३
१०.	नागाप्रदेशीयानि संस्मरणानि	२२४
११.	पञ्चनदप्रदेशीयानि संस्मरणानि	२३१
१२.	बिहार (मिथिला, छोटानागपुर) प्रदेशीयानि संस्मरणानि	२४६
१३.	मणिपुरप्रदेशीयं संस्मरणम्	२८४
१४.	मध्यप्रदेशीयानि संस्मरणानि	२९०
१५.	महाराष्ट्रप्रदेशीयानि संस्मरणानि	३१७
१६.	राजस्थानप्रदेशीय-संस्मरणानि	३२९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१७. बङ्गप्रदेशीयानि संस्मरणानि ३४१
१८. हरियाणाप्रदेशीयानि संस्मरणानि ३६५
१९. हिमाचलप्रदेशीयानि संस्मरणानि ३७३
२०. दक्षिणभारतीयप्रदेशानां संस्मरणेषु
आन्ध्रप्रदेशीयानि संस्मरणानि ३८१
२१. कर्णाटकप्रदेशीयानि संस्मरणानि ४०३
२२. केरलप्रदेशीयानि संस्मरणानि ४११
२३. तमिलनाडुप्रदेशीयानि संस्मरणानि ४२५
२४. पाण्डिचेरीप्रदेशीयानि संस्मरणानि ४४३
२५. सामान्यतः समस्तदक्षिणभारतवर्तिनां वृत्तानां संस्मरणम् ४५२
२६. सर्वप्रदेशसामान्यानि संस्मरणानि ४६४
२७. नेपालदेशीयानि संस्मरणानि ४९१
२८. पर्वतपरिभ्रमणसम्बन्धीनि संस्मरणानि ४९९
२९. वनपरिभ्रमण-सम्बन्धीनि संस्मरणानि ५०४
परिशिष्ट-१-लेखकस्य जन्मभूमि-वंश-परिवार-परिचयः ५०७
परिशिष्ट-२-सम्पादकस्य परिचयः ५१६

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि

प्रस्तावना

जाता स्पृहा मम कदा सुरगीः - प्रचारे
प्रारब्धमेतदखिलञ्च कथं किमर्थम्।
आलेखि पुस्तकमिदं खलु किंदशायां
प्रस्तूयतेऽत्र सकलं प्रथमं मया तत्॥ १॥

सृष्टिः समस्तजगतः खलु काममूला
कामात्मिका च निखिला मनुजप्रवृत्तिः।
सर्वे जनाः कमपि काममुपाश्रयन्तो
जीवन्ति वृद्धिमुपयान्ति सुखं लभन्ते॥ २॥

केचिद् धनार्थमथ केऽपि यशोऽर्थमन्ये
वेत्तुं च धर्ममथ तत्त्वमनाद्यनन्तम्।
केचित् स्वदेशजनताहितकाम्यया वा
केचिच्च विश्वहितकामनया प्रवृत्ताः॥ ३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्थञ्च येऽध्ययनकर्मरता युवान-
स्तेषामपीह विविधाः प्रभवन्ति कामाः।
विद्या पदं बहुधनं प्रभुता प्रतिष्ठा
साहित्य-देश-जगदुन्नतिसाधना च॥ ४॥

कामाः शुभाश्च सकलाः स्वपरोदयार्थाः
कार्या अवश्यमिति भारतधर्मनीतिः।
ये त्वेषणाविरहिता अथ लक्ष्य-हीनाः
शून्या भविष्यविषये मनुजा जडास्ते॥ ५॥

यस्यास्ति नो विविदिषा विविधागमानां
नोच्चैः पदं जिगमिषा न यशोऽभिलिप्सा।
नो यस्य काप्यनुपमा हृदये चिकीर्षा
धिक् तस्य जीवनमथापि जिजीविषा च॥ ६॥

इत्थं स्थिते मम मनस्यपि सेयमेका
वाञ्छोदिताऽध्ययनकालत एव तीव्रा।
स्वं जीवनं यदपहाय धनार्जनेच्छाम्
अभ्युन्नतौ सुरगिरः समुपाहरेयम्॥ ७॥

देशस्य सर्वविधमङ्गलसाधनायै
विश्वे समत्व-ममता-परिवृद्धये च।
संसाधकं सुरगिरोऽध्ययनं विदित्वा
जातो मदीयहृदये खलु निश्चयोऽयम्॥ ८॥

सम्मेलनेषु च पुनर्बहु धावतो मे
संशृण्वतश्च विदुषां बहुभाषणानि।
दैव्या गिरश्च बहु चिन्तयतो विशेषान्
विश्वास एष सुदृढः प्रबलश्च जातः॥ ९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मादधीत्य कतिचिद्विषयान् स्वमत्या
आलोड्य संस्कृतगिरो बहु वाङ्मयं च।
चिन्तां धनार्जनकृते च विहाय सर्वां
प्रावर्तिषं निजसमीहितसिद्धयेऽहम्॥ १०॥

यद्यप्यनन्तसुखभोगमये युगेऽस्मिन्
वित्तं विना तु निजजीवनमप्यशक्यम्।
किं वा पुनर्भरणपोषणभारभर्तु-
र्वक्तव्यमस्ति परिवारवतो जनस्य॥ ११॥

माता च मे बहुविधं खलु मामवादीत्
सेवां कुरुष्व, धनतो भव मा वितृष्णः।
को वान्यथा तव सुता-सुतवृन्दशिक्षा-
संस्कारजीवनसमृद्धिसहायकः स्यात्॥ १२॥

किन्त्वेक एव भगवद्दयया तनूजो
जातो ममेति विगता खलु सापि चिन्ता।
भार्या च पुत्रभरणं कृतवत्यशेषं
तस्मात् कुटुम्बभरणादभवं विमुक्तः॥ १३॥

भार्या भवन्ति कतिचिद् यदपि प्रतीपा
या भूरिवित्तसुखभोगपराः पतीनाम्।
कार्ये शुभेऽपि न भवन्ति सहायिकास्ता
भार्या परं मम न तादृगभूत् सुदैवात्॥ १४॥

पाश्चात्यविद्वत्सु सुकरातमहोदयस्य टाल्स्टायमहोदयस्य च जीवनं तयोः पत्नीकारणात् बहु कष्टमयमासीत् इति तयोः जीवनचरितात् परिज्ञायते। सुकरातमहोदयस्य पत्नी केवलं तस्य दार्शनिकचिन्तने निरतत्वात् तदुपरि बहु कुपिता तिष्ठति स्म। गृहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च आगते तस्मिन् तं बहु भर्त्सयति स्म। एकदा गृहमागते तस्मिन् सा पूर्वं कटुवाग्भिर्बहु भर्त्सितवती पश्चात् च मलिनजलपूर्णां हण्डिकां तस्य शिरसि प्रक्षिप्तवती। ततः सुकरातेन किञ्चिद्विहस्य कथितं—'यो गर्जति स वर्षति न' इति मया श्रुतमासीत्। 'परमद्य गर्जनान्तरं वर्षणमपि जातम्' इति कथयित्वा प्रसन्न एव स तूष्णीं स्थितः।

एवमेव टाल्स्टायमहोदयोऽपि धनार्जननिरपेक्षः धनपिशाचिन्या आत्मनः पत्न्याः सदा कोपभाजनं भवति स्म तिरस्कारभाजनञ्च। एकदा तु स तस्याः कर्कशेन स्वभावेन दुःखितः वाग्वाणैश्च भृशं विद्धो रुग्णावस्थायामपि गृहं परित्यज्य अन्यस्थानं गतवान्, न च पुनः कदापि गृहम् आगतवान्।

भारतीयविदुषां पत्न्यस्तु एतद्विरुद्धं प्रायेण भोगनिःस्पृहाः सत्यः पतीनां सहायिका एव दृश्यन्ते। यथा—नवद्वीपनिवासिनः श्रीरामनाथतर्कसिद्धान्तस्य पत्नी तथा च दार्शनिकशिरोमणेः श्रीवाचस्पतिमिश्रस्य पत्नी 'भामती'।

नो रम्यवस्त्र - वरभूषण - भोगलिप्सा
न स्वादुभोजन - पयोदधिलोभलेशः।
नो वा प्रसाधनरुचिः खलु सा मदर्थे
सामान्यजीवनमयापयदादरेण ॥ १५ ॥

तस्मादशेषविधबन्धन - पूर्णमुक्तः
स्वच्छन्दमेव सकलं समयं व्यनैषम्।
प्रीतो यथोपनत-भोजन-पान-मानैः
दैव्या गिरः परिचरन् परितः प्रचारे ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किञ्चात्र पूर्वतनपण्डिततल्लजानां
यास्त्यागतोषमयजीवन - पुण्यगाथाः।
ज्ञाताः श्रुताश्च पठिताश्च तदप्यशेषं
सत्प्रेरणाप्रदमभूद् बहु मत्प्रवृत्तौ[1]॥ १७॥

१. एतद्विषये विशेषपरिज्ञानाय निम्नाङ्किता ग्रन्था अवलोकनीयाः—

१-'नवद्वीपमहिमा' (बंगला) लेखकः—कान्तिचन्द्र लाहिड़ी,

२-"Panditas and Elephants." by **Lord Letten Cal.**

३-Indian panditas in the land of snow. by **Sharat Chandra das.** K. L. Mukhopadhyay - calcuta-1

४-काशी की पाण्डित्य-परम्परा, लेखकः—पद्मभूषण आचार्य बलदेव उपाध्याय, प्रकाशक-विश्वविद्यालय-प्रकाशन, वाराणसी, मूल्य-६००/-

अन्ये च अनेके विविधभाषासु प्रकाशिताः पण्डित-जनजीवन-चरितसम्बन्धिनो ग्रन्थाः द्रष्टव्याः। एतेषां संग्रहः मदीये संस्थाने विपुलमात्रायां वर्तते।

एवं दृढं निजमतं परिकल्प्य, भूत्वा
मानापमान - सुखदुःख - समानभावः।
भक्त्या यथामति यथाबलमद्य यावत्
सेवा कृता सुरगिरो विविधैः प्रकारैः॥ १८॥

एतन्मदीयमखिलं भ्रमणं समन्तात्
कर्तुं कृतं यदपि देवगिरः प्रचारम्।
लब्धास्तथापि विविधा अपरेऽपि लाभा
एका क्रिया बहुविधार्थकरीव जाता॥ १९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टाः प्रदेश-जन-संस्कृति-वेश-भूषा
आकर्णिताश्च पठिताश्च विभिन्नभाषाः।
लब्धा असंख्यसुजनाः सुहृदोऽप्यनेके
सर्वं व्यलोकि च महाद्भुतदृश्यजातम्॥ २०॥

तिक्तं सदैव कतिचित् खलु भुञ्जतेऽन्नं
मिष्टं सदैव कतिचिच्च परे मनुष्याः।
सौभाग्यतो मम बहुभ्रमणप्रसङ्गात्
पर्य्यायतो ननु रसद्वयमप्यवाप्तम्॥ २१॥

स्थानं नवं, नवजना, नवदृश्यजातम्
वार्ता नवा, नवनवा विविधोपचाराः।
यात्राक्रमे नवनवाऽनुभवा नवाऽशाः
सर्वं नवं नवमभून्मम नित्यमेव॥ २२॥

नो जाति-वर्ण-गत-भोजन-पानभेदः
नैवाग्रहः क्वचन नो कटुता कथञ्चित्।
नाऽडम्बरं न खलु कृत्रिमता च काचित्
तस्मादभूत् सुखमयं भ्रमणं सदा मे॥ २३॥

एवं सदा विदधतो भ्रमणं समन्तात्
नित्यं सभासु वदतो लिखतश्च काले।
पञ्चाशतोऽप्यधिकसंख्यकवत्सराणां
कालो गतः खलु महान् मम जीवनस्य॥ २४॥

नैव व्यधायि किमपि स्वकुटुम्बकार्यं
वृद्धिः कृता न भवने, न धने, न भूमौ।
सेवा गिरो, निखिलभारतदर्शनं यत्
तेनैव जीवनमभून्मम पूर्णकामम्॥ २५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

या काचन क्वचन मद्भ्रमणप्रसङ्गे
बाधाऽथवाप्यसुविधाऽपि समागता मे।
दूरीकृताः करुणया सकलाः सुहृद्भिः
कस्य प्रवाससमयः सुखदोऽखिलः स्यात्॥ २६॥

आसीदियञ्च हृदि मे प्रबला समीहा
यद् वृत्तमेतदखिलं लिखितं करोमि।
लब्धस्तथापि समयो न तथाविधो मे
नक्तन्दिवं भ्रमण - भाषण - तत्परस्य॥ २७॥

अद्योत्कलेषु, तमिलेषु पुनः परश्वः,
पश्चाच्च पञ्चनद - गुर्जर - केरलेषु।
अत्रैषमः खलु परारि च तत्र गन्ता
सन्तोष एव भ्रमणान्न कदापि मेऽभूत्॥ २८॥

दृष्टा न बङ्गधरणी न च पाण्डिचेरी
दृष्टश्च नो पशुपतिर्मिथिला न दृष्टा।
नागामहीं मंणिपुरञ्च कदा नु गन्ता
इत्थं सदैव हृदि मे भवति स्म चिन्ता॥ २९॥

किन्त्वद्य मे हृदयरोगजुषश्चिकित्सा-
गारे च दैववशतो वसतोऽविरामम्।
जाता ममेयमधुना लिखितुं प्रवृत्तिः
दुःखेऽप्ययं सुखकरः समयो मयाप्तः॥ ३०॥

जीवामि वा कति दिनानि, कदा म्रियेयं
रोगोऽयमेकपलमात्र - विनाशकारी।
तच्चिन्तया लिखितमेतदशक्ततायां
क्षम्यास्तदत्र यदि केऽपि भवन्ति दोषाः॥ ३१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृद्रोगपीडिततयाऽतिकृशे शरीरे
चिन्तातुरे मनसि विक्लवतामुपेते।
यद् यत्स्मृतावुपगतं लिखितं तदत्र
कृत्वाऽतिसाहसमतित्वरया कथञ्चित्॥ ३२॥

हृद्रोगपीडितजनैरधिकं न वाच्यं
चिन्त्यं न लेख्यमथ चाऽप्यधिकं न पाठ्यम्।
इत्थं प्रबोध्य बहुधा भिषजां वरिष्ठै-
रग्रे न लेखितुमहं बलवन्निरुद्धः॥ ३३॥

नाहं तथापि मम निश्चितमेकवारं
स्वीयं विचारमशकं परिहातुमेनम्।
नेत्राणि तेन परिहृत्य चिकित्सकानां
युक्तक्षणेषु कृतवान् लिखितुं प्रयासम्॥ ३४॥

एतेषु संकट - दिनेषु 'प्रियंवदा'ख्या
सेवारता मम सदैव कनिष्ठपौत्री।
मां वारयन्त्यपि मुहुर्लिखनादथाभूत्
ज्ञात्वा मनो मम कदापि सहायिका च॥ ३५॥

मम रोगावस्थायां काशीहिन्दुविश्वविद्यालयस्य चिकित्सालये हृदयरोगविभागे मया सह मम प्रियंवदानाम्नी कनिष्ठपौत्री (साहित्याचार्या, शिक्षाशास्त्रिपरीक्षोत्तीर्णा च) मम सेवायामहर्निशं संलग्नाऽऽसीत्। इयं यदा कदा मम लेखनेऽपि साहाय्यं करोति स्म। इदानीं सा दाम्पत्यधर्ममवलम्ब्य स्वपतिगृहेऽपि (ग्रा०+पो०- आदम-पुर, जिला-सीवान, बिहार) यदा कदा निवासं करोति। तथापि ज्ञानार्जनार्थं मम सेवार्थं च सा बाहुल्येन वाराणस्यामेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिष्ठति, संस्थानस्य सञ्चालनेऽपि सहयोगं ददाति। अग्रे चापि दातुं धृतव्रताऽस्ति।

अस्याः कृतेः किमथ नाम करोमि भव्यं
चेतश्चमत्कृतिकरं विषयानुरूपम्।
एतद्विचिन्तनपरस्य निमील्य नेत्रे
एकं पुरातनपदं स्मृतिमागतं मे॥ ३६॥

वक्रोक्तिजीविते आचार्यकुन्तकेन अभिहितम्—कविना स्वकीयरचनाया नाम तथाविधं कर्तव्यं येन नाम्नैव वर्ण्यविषयस्यानुमानं परिज्ञानं वा जायेत, यथा—

"आस्तां वस्तुषु वैदग्ध्यं काव्ये कामपि वक्रताम्।
प्रधान-संविधानाङ्कनाम्नापि कुरुते कविः"॥

एतदनुसारेण मयापि वर्ण्यविषयानुरूपं नाम कर्तुं बहु चिन्तितम्।

विख्यात-बिह्लणमहाकविना स्व-चौर-
पञ्चाशिके'ति विदिते रमणीयकाव्ये।
पद्येषु यत्खलु पदं प्रथमं प्रयुक्तम्
"अद्यापि" तेन बहु मे हृदयं प्रसन्नम्॥ ३७॥

बिह्लणकविविरचितं "चौरपञ्चाशिका" नामकं लघुकाव्यं संस्कृतसाहित्यरसिकेषु सुतरां प्रसिद्धं वर्तते। एतस्य पञ्चाशत्पद्यात्मके पूर्वभागे सर्वेष्वपि पद्येषु 'अद्यापि' इति पदं सर्वप्रथममुपन्यस्तं वर्तते। उत्तरभाग-स्थितेष्वपि एकपञ्चाशत्पद्येषु, ऊनपञ्चाशत्पद्येषु तदेव पदं प्रथममुपन्यस्तम्। पूर्वभागस्य प्रथमं पद्यं यथा—

अद्यापि तां कनकचम्पकदामगौरीं
फुल्लारविन्दवदनां तनुलोमराजिम्।
सुप्तोत्थितां मदनविह्वललालसाङ्गीं
विद्यां प्रमादगलितामिव चिन्तयामि॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"अद्यापि" बिह्लणकृतायाः चौरपञ्चाशिकाया एकस्य लघुपदस्य मया अनुकरणं ग्रहणं वा कृतं, परन्तु चौरपञ्चाशिकायाः प्रत्येकं पद्ये यत्सौन्दर्यं यच्च लालित्यं लभ्यते तत्तु अत्र सर्वथा सुदुर्लभमेव।

श्रीबिह्लणः कविकुले क्व महाकवीन्द्रः
स्वल्पाक्षरैः परिचितः क्व च वा जनोऽयम्।
"अद्यापि" किन्तु पदमेकमवाप्य मूलं
चन्द्रं ग्रहीतुमिव मेऽयमहो प्रयासः॥ ३८॥

नैवात्र कोऽपि कमनीयकवित्वलेशः
नालङ्क्रिया न च गुणो न च काऽपि रीतिः।
जानन्त्विदं सततपर्यटकस्य कस्या-
प्येकस्य बालिश-विशृङ्खल-वाग्विलासम्॥ ३९॥

अद्यावधि भ्रमणकालत एव यद् यद्
जातं श्रुतं च घटितञ्च विलोकितञ्च।
तेष्वेव रोचकतया नहि विस्मृतं यत्
किञ्चित्तदङ्कितमिह प्रमुदे बुधानाम्॥ ४०॥

रम्यं भवेदिह किमप्यथवाऽप्यरम्यं
यन्नीरसं भवतु भूरि रसान्वितं वा।
यद् वा प्रियं खलु भवेदथवाऽप्रियं वा
नो हीयतां किमपि यत् प्रणयात् प्रदत्तम्॥ ४१॥

सर्वत्र नैव सुलभं भ्रमणं समेषां
नो वा प्रवृत्तिरथवा न च कोऽपि हेतुः।
सौभाग्यमाप यदि कोऽपि तथाविधश्चेत्
तल्लेख्यमेव खलु तेन परोपकृत्यै॥ ४२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्यप्यनन्तसुविशालभवेऽत्र कूपे
मण्डूकवत् खलु लघु भ्रमणं ममैतत्।
तल्लेखनाय यदयं विहितः प्रयत्नो
दोषो न तत्र न च वा लघुतेति मन्ये॥ ४३॥

इत्थं मया विरचिताः कविताश्चिकित्सा-
गारे त्रिवारमवशं वसता कथञ्चित्।
यद् यच्च विस्मृततयेह मया विसृष्टं
स्वस्थो भवामि यदि तल्लिखितुं यतिष्ये॥ ४४॥

एतत्तु दुःखमधिकं मम, वर्जितं यद्
हृद्रोगपीडिततया भ्रमणं भिषग्भिः।
सम्पूर्णभारतभुवः खलु दर्शनस्य
आशा च मे मनसि दुर्बलतामुपेता॥ ४५॥

अद्यापि किन्तु न दिनानि गतानि मन्ये
भूयोऽपि येषु भविता भ्रमणं मदीयम्।
जीर्णे वयस्यपि च रुग्णतमेऽपि देहे
आशास्यते किमु पुनर्न पुनर्नवत्वम्॥ ४६॥

अद्यापि सिन्धुलहरीषु भयङ्करीषु
उत्तुङ्गशैलशिखरेषु सकण्टकेषु।
निम्नोन्नतासु वनभूमिषु च प्रकामं
वृद्धोऽपि यौवन इव भ्रमितुं समीहे॥ ४७॥

अन्तेऽन्यपण्डितजनेष्वपि दूरयात्रा-
दीर्घप्रवासरसिकेषु ससाहसेषु।
स्व - स्व - प्रवासरमणभ्रमणादिवृत्त-
स्योल्लेखनाय खलु नम्रनिवेदनं मे॥ ४८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एषा कृतिस्तु मम केवलमल्पयात्रा-
संस्मारकं विवरणं तदपि स्वदेश्यम्।
ग्रन्थो भवेद् यदि तु देश्यविदेश्ययात्रा-
वृत्तात्मकः स तु विशेषमुदावहः स्यात्॥ ४९॥

ग्रन्थान् विलिख्य विपुलान् विविधान् स्वयात्रा-
वृत्तान्तवर्णनपरान् महतो लघूंश्च।
संवर्द्धयन्तु कवयो नव-देवभाषा-
साहित्यकीर्तिमतुलामिति याचना मे॥ ५०॥

कस्यापि पुण्यनरजन्मजुषो जगत्ये-
कत्र स्थितिर्मृतिरिवेति बुधा वदन्ति।
तस्मादवाप्य समयं सुविधां च लब्ध्वा
कर्तव्य एव कृतिना भ्रमणप्रयासः॥ ५१॥

केचित् लिखन्ति यशसेऽथ धनाय केचित्
तोषाय केऽपि कतिचिज्जनताहिताय।
एतन्मया तु लिखितं सकलं बुधाना-
मुद्बोधनाय जगतो भ्रमणं विधातुम्॥ ५२॥

छात्रो भवन्नकरवं भ्रमणादिकं यन्
नो तस्य मास-तिथि-वासर-वर्षलेखः।
पश्चात्तु यद् यदखिलं भ्रमणादि जातं
सर्वस्य तस्य समयोऽपि निरूपितोऽत्र॥ ५३॥

इत्थं कथञ्चन कथञ्चन दैवयोगात्
सम्पूर्णतामधिगतेऽद्य लघुप्रबन्धे।
एतत्कवित्वरचना - गुरुभार-मुक्त-
स्तृप्तोऽभवं प्रमुदितश्च परः कृतार्थः॥ ५४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकोनविंशशतकेऽष्टनवत्युपेते
मार्गेऽसितेऽन्तिमतिथौ शुभवासरे च
दैव्या गिरः सुललितोपवने मयायं
प्रत्यर्पितो लघुनवः कुसुमोपहारः ॥ ५५ ॥

"अद्यापि" इत्यमृतहृद्य-पदान्वितानि
नृत्यद् - वसन्ततिलका - रवझङ्कृतानि।
एतानि मञ्जुपद-पद्य - कदम्बकानि
नित्यं भवन्तु कविमानस - चुम्बकानि ॥ ५६ ॥

✯

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २ :

देवदेवीनां वन्दनीयपुरुषाणां च

वन्दना

ईशवन्दना—

यद् दिव्यतत्त्वमजमेकमनाद्यनन्तं
सृष्टि-स्थिति-प्रलयकारणमद्वितीयम् ।
तन्नैव वेत्तुमथ वर्णयितुं समर्थो
भक्त्याहमज्ञ इव तत् प्रणमामि नित्यम्॥ १ ॥

देव-देवी-वन्दना—

देवत्रयी त्रिविधशक्तिमयी, तदंशाः
श्रीरामकृष्णसुगतप्रमुखावताराः ।
देवीत्रयी विभव-बुद्धि-बलस्वरूपा
सर्वानिमान् निखिलविश्वभृतो नमामि॥ २ ॥

धरणी-धर्म-वन्दना-

धर्मो न जातु धरणीमपहाय तिष्ठेद्
धर्मं विना न च धरण्यपि जातु जीवेत्।
धर्मस्तथा च धरणी तदुभौ समेतौ
लोकस्य धारणकरौ सततं प्रणम्यौ॥ ३ ॥

धर्मः धरणी चेति उभावपि शब्दौ धारणर्थक-धृधातोः समुत्पन्नौ, उभौ परंस्परं धारकौ तथा उभावपि मानवसमाजस्य धारकौ। तस्मात् मानवसमाजेन उभावपि प्रणम्यौ, परिपालनीयौ संवर्द्धनीयौ च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारतदेशवन्दना—

नमोऽस्तु सुरवन्दित - भारताय
यद् बाह्यतो विविध-वेष-वचांसि धत्ते।
आभ्यन्तरे वहति यस्य परन्तु पुण्या
धारा चिरन्तनतमा जगदेकतायाः॥ ४॥

भारतीय-संस्कृति-वन्दना—

नमोऽस्तु निजसंस्कृतये समस्तं
या सुन्दरं शिवमयञ्च जगद् विधातुम्।
अभ्रान्त - सत्य - शिव - मार्ग - गवेषणार्थं
हित्वाग्रहं बहुविधा उररीचकार॥ ५॥

भारतस्य भारतीयसंस्कृतेश्च स्वरूपविषये महत्त्वविषये च निम्नाङ्कितमहानुभावानां ग्रन्था अवलोकनीयाः—

१. योगिराज अरविन्दः—"भारतीय संस्कृति के आधार"

२. डॉ० एस० राधाकृष्णन्—(१) भारत की अन्तरात्मा (२) भारतीय संस्कृति, कुछ विचार (३) प्राच्य धर्म और पाश्चात्त्य विचार।

३. स्वामी विवेकानन्द—'विवेकानन्दग्रन्थावली'

ग्रन्थत्रयवन्दना—

मस्तिष्करूपमिह भारतमद्वितीयं
नेत्रस्वरूपमिह रामचरित्रकाव्यम्।
हृद्रूपहृद्यमथ भागवतं पुराणं
ग्रन्थत्रयं तनुजुषां शरणं नमामि॥ ६॥

भगवद्गीतावन्दना—

यस्या बलेन तिलकश्च तथैव गान्धी
स्वातन्त्र्यशंखमधमद् विजयं च लेभे।
लघ्वीमपि प्रबल-साहस-शक्ति-मूर्तिं
गीतां नमामि शिरसा जगदेकधात्रीम्॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऋषिमुनिवन्दना—

ये लोकजीवनमुपेक्ष्य तृणाय मत्वा
मानं धनं च विपिनेषु सदा तपन्तः।
विद्याः सदा नवनवा उदभासयंस्तान्
प्रज्ञाकरान् ऋषिमुनिप्रवरान्नमामि॥ ८॥

ऋषीणां मुनीनां च व्यक्तित्वविषये कृतित्वविषये च निम्नाङ्किता ग्रन्था अवलोकनीयाः—

१. "भारतीय संस्कृति में ऋषियों का योगदान" लेखक—डॉ० जगतनारायण दुबे, प्रकाशन–दुर्गा पब्लिकेशन्स, दिल्ली–११००५३, मूल्य–२५०/-

२. "भारतात्मा मुनिऋषिगण" (बंगला), लेखक—श्रीशान्तिरंजनदास, प्र०—प्रोग्रेसिव बुक फोरम, ३३ कॉलेज रोड, कलकत्ता–९, मूल्य–२०१/-

३. Risis in ancient India by. C. B. Pandey, Pub. Sundeep Prakashan, Delhi, Price-400/-

४. Risis in Indian art and literature, by Sivarama murty. Puet- Kanak Publications, New Delhi. Price-250/-

महर्षिवसिष्ठवन्दना—

नमो बहुवरिष्ठवसिष्ठनाम्ने
सत्प्रेरणाप्रदगिरोऽप्रतिमाय धाम्ने।
यस्यातुलेऽपरिमिते पुरुषार्थवादे
ब्रह्मेन्द्र-रुद्र-हरयोऽपि भवन्ति मर्त्याः॥ ९॥

योगवासिष्ठस्य मुमुक्षुव्यवहारप्रकरणे चतुर्थसर्गादारभ्य अष्टमसर्गपर्यन्तं महर्षिणा वसिष्ठेन महता समारम्भेण पुरुषार्थवादस्य प्रतिष्ठापनं दैववादस्य च निराकरणं कृतम्। तत्रैव चतुर्थे सर्गे महर्षिणा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिपादितं यन् मर्त्या एव पुरुषार्थबलेन ब्रह्म-विष्णु-रुद्र-शक्रादि-पदं भजन्ते इति। उपर्युक्ताः सर्वेऽपि अध्यायाः सर्वैरपि पठनीयाः प्रचारणीयाश्च। पुरुषार्थवादस्य ईदृशं महत्त्वं संस्कृतसाहित्यस्य कस्मिंश्चिदपि अन्यस्मिन् ग्रन्थे प्रतिपादितं नोपलभ्यते।

शुकदेव-शुकनास-वन्दना—

नमोऽस्तु मुनये शुकदेवनाम्ने
तन्मन्त्रिणे च नमनं शुकनासनाम्ने।
याभ्यामपूर्व - हितकृद् - वचनोपदेशै-
रुन्मीलितानि नयनानि जगज्जनानाम्॥ १०॥

धर्माध्यात्मशक्तिसदाचारादिसम्बन्धे श्रीशुकदेवस्य महत्त्वपूर्णा लोककल्याणकारिण उपदेशाः श्रीमद्भागवतमहापुराणे प्रसिद्धाः सन्ति।

एवमेव बाणभट्टविरचितायाः कादम्बर्याः पूर्वभागे यौव-राज्याभिषेकात् पूर्वं मन्त्रिप्रवरेण शुकनासेन चन्द्रापीडाय राज्यलक्ष्मी-यौवनमदादिभ्यः सम्भाव्यमान-दोषाणां विषये ये अनुपमा उपदेशाः प्रदत्तास्तेऽपि लोकानां कृते परमकल्याणकारिणः, सरल-काव्यशैल्यां निबद्धतया अतिशयप्रभावशालिनश्च। अतः समाजस्य कृते उभावपि नमस्करणीयौ मुनिमन्त्रिणौ।

पाणिनि-वन्दना—

तस्मै मुनिप्रवरपाणिनये नमोऽस्तु
भाषाविदां जगति शीर्षपदे स्थिताय।
स्वीयाद्भुतामित - मति - प्रतिभा - बलेन
यः शब्दशास्त्रजलधिं चुलुकञ्चकार॥ ११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जैन-बौद्ध-विद्वद्वन्दना—

सद्धर्म - संयमन - योगतपोधनेभ्यः
शास्त्रैकचिन्तन - समर्पित - जीवनेभ्यः।
कष्टातिकष्ट-सहने सततोद्यतेभ्यः
भूयो नमोऽस्तु जिन-बुद्धविदां वरेभ्यः॥ १२॥

भारते विदेशेषु च ये जैना विशेषतो बौद्धाश्च आचार्या अभूवन् तेषां सद्धर्मप्रचारस्य, संयम-योग-तपःसाधनायाः, विविधशास्त्राणां चिन्तने, निर्माणे, सम्पादने, अनुवादे, उद्धारे च जीवनसमर्पणस्य तथा ज्ञानार्जनाय ज्ञानप्रचाराय च विश्वभ्रमणे विविधकष्टातिकष्टानां सहनस्य, घोरायामापदि असहायावस्थायां च मृत्योरालिङ्गनस्य च ये अनन्ता अद्भुताश्च वृत्तान्ता उपलभ्यन्ते तेषामध्ययनेन तेषु आचार्येषु महती श्रद्धा जायते बलवती प्रेरणा च लभ्यते, कष्टसहनस्य। तेषामाचार्याणां जीवनवृत्तविषये विशेषपरिज्ञानाय निम्नांकिता ग्रन्था अवलोकनीयाः—

१. 'बौद्ध-संस्कृति' लेखक-महापण्डित राहुल सांकृत्यायन, प्रकाशक-आधुनिक पुस्तक भवन, ३०-३१ कलाकार स्ट्रीट, कलकत्ता-७, पृष्ठ-४८५।

२. "तिब्बत में बौद्धधर्म" लेखक—म०प०राहुल सांकृत्यायन प्रकाशक-किताब महल, इलाहाबाद, पृष्ठ-६८, मूल्य-१४

३. Indian Buddhist Pandits, by Labrsony N. Tsonarsa.

दिव्यपुरुषवन्दना—

ये केऽपि दिव्यपुरुषा जगतीतले स्वै-
र्दिव्योपदेश - चरिताऽचरण - प्रभावैः।
सम्पूर्ण - मानवसमाज - हितान्यकुर्वन्
ते माननीयपुरुषाः खलु वन्दनीयाः॥ १३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वैदिकाः ऋषयः, वाल्मीकिव्यासप्रभृतयो मुनयश्च (आर्यधर्मोपदेशकाः) बुद्धः (बौद्धधर्मप्रवर्तकः) महावीरः (जैनधर्मप्रवर्तकः) लाओत्से (ताओ-धर्मप्रवर्तकः) कनफ्यूशस् (कनफ्यूशियन-धर्म-प्रवर्तकः) हजरतमूसा (यहुदीधर्म-प्रवर्तकः) ईसा मसीहः (क्रिश्चियनधर्म-पवर्तकः) हजरत मुहम्मदः (इस्लामधर्मप्रवर्तकः) गुरुनानकः (सिक्खधर्मप्रवर्तकः। एवं सूफी-वहाई-धर्मप्रवर्तकाः, चैतन्य-कबीर-रामकृष्णपरमहंस-आर्यसमाजसंस्थापकः श्रीस्वामिदयानन्द-प्रभृतयश्च स्वकीयैरुपदेशैराचरणैश्च सर्वलोकहितान्यकुर्वन्। अत एते सर्वेऽपि सर्वेषां मानवानां कृते माननीया वन्दनीयाश्च।

तत्त्वविद्-वन्दना—

तेभ्यो नमोऽस्तु निगमागम-तत्त्वविद्या-
विज्ञान - तर्क - परिशोधितबुद्धिमद्भ्यः।
येऽज्ञान - गाढतमसावृत - जीवलोकं
चक्रुः प्रकाशपरिपूतमखण्डमेकम्॥ १४॥

अस्मिन् पद्ये देश-जाति-धर्म-सम्प्रदायनिर्विशेषं सर्वेऽपि तत्त्वचिन्तकाः सत्यान्वेषिणश्च प्रणम्यन्ते। एतादृशेषु सर्वे शास्त्रनिर्मातारः, भाष्यकाराः, निबन्धकाराः, आचार्याः, दार्शनिकाः, अध्यात्मवादिनः, लोकायतिकाः, वैज्ञानिकाः, राजनैतिकाः, समाज-धर्म-अर्थशास्त्रिणः सुधारवादिनश्च अन्तर्भवन्ति।

आचार्यभरतवन्दना—

तस्मै नमोऽस्तु मुनये भरतीय भूयो
यो जीवनं रसमयं जगतो विधातुम्।
नानाविधा नटन - नर्तन - गीत - नृत्त-
वाद्यादि-कोमलकलाः सकलाः ससर्ज॥ १५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा हि नाट्यशास्त्रे अभिनवभारत्यां च नाट्ये रसस्यैव मुख्यता स्वीकृता वर्तते। "नहि रसादृते कश्चिदर्थः प्रवर्तते" "तेन रस एव नाट्यम्" "नाट्यात् समुदायरूपाद् रसाः" यदि वा नाट्यमेव रसाः "रससमुदायो हि नाट्यम्" इत्यादिभिर्वचनैरिदं सिद्धं भवति यत् नृत्यगीतवाद्यादिसंवलितेन नाट्येन दर्शकाणां जीवनं रसमयं भवत्येव। पुनश्च नाट्यशास्त्रे नाट्यस्य अपराण्यापि फलानि उक्तानि। यथा—

दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतद् भविष्यति॥

नाट्यशास्त्र. प्र. अ. श्लो.–११६

विनोदकरणं लोके नाट्यमेतद् भविष्यति।

नाट्यशास्त्र. प्र.अ.श्लो.–१२३

आचार्यचाणक्यवन्दना—

आचार्यवर्य्यममित - प्रतिभानवद्य-
प्रज्ञा - प्रकर्ष - परिसीमित - मेरुशृङ्गम् ।
साम्राज्यदायिनमपि स्वयमात्मतृप्तं
श्रीविष्णुगुप्तमृषिवर्यमहं नमामि॥ १६ ॥

प्रायेण बहवो भारतीया अपि जनाः भारतं केवलं धर्मिकमाध्यात्मिकञ्च देशं मन्यन्ते, एतेनैव च ते आत्मनो गौरवं महत्त्वञ्च ख्यापयन्ति। परन्तु कस्यापि राष्ट्रस्य जीवनं राजनीतिं विना, कृषिं विना, व्यापारं विना, युद्धं विना, शासनं विना च न सुरक्षितं तिष्ठति न वा सुसमृद्धमेव भवितुमर्हति। परमसौभाग्यस्यायं विषयो वर्तते यदस्माकं पूर्वजेषु यथा धर्माध्यात्मशास्त्रयोरनेके पारदृश्वानो महान्त आचार्या अभूवन् तथैव राजनीतिशास्त्रप्रणेतारोऽपि भूयांस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आचार्या अभूवन् इति महाभारतादिग्रन्थानामवलोकनेन ज्ञायते। तेष्वेव कौटिल्य-चाणक्यनाम्ना प्रसिद्धस्य आचार्य-विष्णुगुप्तस्य नाम साम्प्रतं शीर्षण्यरूपेण परिगण्यते। तेन प्रणीतं कौटिलीयमर्थशास्त्रं समस्तेषु राजनीतिग्रन्थेषु प्रमुखं स्थानमलङ्करोति।

अयं चन्द्रगुप्तं सम्राट्पदे अभिषिच्य तस्य प्रधानमन्त्री भूत्वापि स्वयं तृणनिर्मिते कुटीरे साधारणं जीवनं यापयति स्म इति मुद्राराक्षसस्य अध्ययनात् प्रमाणीभवति। त्यागस्य, तेजस्वितायाः, अप्रतिमबुद्धेः, आत्मसम्मानस्य, अपराजेयपौरुषस्य च प्रतिमूर्तिराचार्यचाणक्यः सर्वेरपि भारतीयैः सदा वन्दनीयः। तस्य अर्थशास्त्रं च सर्वैरपि पण्डितैः पठनीयमेव। तत्रापि विशेषतो वाराणसीस्थ-विद्वत्प्रवरश्रीविश्वनाथशास्त्रिदातार-सम्पादितं सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयद्वारा प्रकाशितमर्थशास्त्रं पद-पदार्थ-भाषा-भाव-तत्त्व-बोधदृष्ट्या अत्यन्तं महत्त्वपूर्णम्। इदं नूनमेव द्रष्टव्यं विद्वद्भिः।

भगवत्पादशङ्कराचार्यवन्दना—

यस्तेजसा प्रखरया च धिया समस्तं
विश्वं चकार चकितं नतमस्तकं च।
तं भूतले मतिमतामभिवन्द्यमेकम्
आचार्यशङ्करगुरुं प्रणमामि नित्यम्॥ १६॥

कविवर-वन्दना—

तेभ्यो नमोऽपरविधिभ्य इदं कविभ्यो
येषां कवित्व-कमनीय-रसप्रवाहे।
स्नाता जना मलिनतामपनीय शश्वद्
दीव्यन्ति सत्य-शिव-सुन्दररूपभाजः॥ १७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मानवसमाजस्य कृते कवीनां, काव्यानां, कवितानां, गीतानाञ्च महत्त्वपूर्णोपयोगिताविषये आधुनिकगभीरचिन्तकानां निबन्धकाराणाञ्च निबन्धाः पठनीयाः। तेषु निम्नाङ्किताः प्रामुख्यं भजन्ते—

योगिराज-अरविन्दः, कवीन्द्रवीन्द्रनाथठाकुरः, आचार्यश्रीहजारीप्रसादद्विवेदी, महीयसी महादेवी वर्मा, श्रीसुमित्रानन्दपन्तः, डॉ० विद्यानिवासमिश्रः, डॉ० शिवमंगल सिंह "सुमनः", डॉ० शिवप्रसाद सिंहः, आचार्यजानकीवल्लभशास्त्री, डॉ० नगेन्द्रः तथा प्रभाकर माचवे इत्यादयः।

रचनावैवित्र्यप्रवीणकविवन्दना—

वृत्तैः शताधिकविधैः स्वरवर्णभिन्नैः
शब्दार्थयोर्विविधरम्यतरैः प्रयोगैः।
नानाविधैश्च रुचिरै रचनाप्रकारैः
शब्दार्थसाधक-कविप्रवरान् नमामि॥ १८॥

संस्कृतभाषायाः चित्रविचित्रासु चमत्कारिकीषु रचनासु निम्नाङ्किता रचना अन्तर्भवन्ति—

(१) एकाक्षर-द्व्यक्षरादि-रचनाः (२) चित्रबन्धकाव्यम् (३) यमककाव्यम् (४) अनुप्रासकाव्यम् (५) अनेकार्थककाव्यम् (६) विलोमकाव्यम् (७) मणिप्रवालकाव्यम् (८)अनुकरणकाव्यम् (९) विज्ञप्तिकाव्यम् (१०) अभिलेखकाव्यम् (११) समस्यापूर्तिकाव्यम् (१२) प्रश्नोत्तरकाव्यम् (१३) विरुदावलीकाव्यम् (१४) दण्डककाव्यम् (१५) कूटकाव्यम् (१६) भाषाश्लेषकाव्यम् (१७) धातुकाव्यम् (१८) व्याकरणविषयाणां मनोरञ्जकरूपेण उपस्थापकं सभ्यालङ्करणादिकाव्यम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूक्तिकाराणां वन्दना—

ये बाल-वृद्ध-वनिता-जन-मानसानां
विज्ञाय मर्म निखिलं प्रकृतेश्च तत्त्वम्।
सर्वान् दिशन्ति भुवि शाश्वततत्त्वशिक्षां
तान्नौमि विश्व-जनदेशिक-सूक्तिकारान्॥ १९॥

धर्मशास्त्रं नीतिशास्त्रञ्चेति द्वयमपि शास्त्रं लोकोपकाराय लिखितं शास्त्रकारैः। परन्तु एतद् द्वयमपि शास्त्रं न सर्वथा निर्दोषं, न वा निर्विवादं न च सर्वांशतः सर्वोपकारकञ्च। परन्तु सूक्तयः प्रायेण सर्वा अपि देश-काल-जाति-धर्म-निरपेक्षा मानवमात्रस्य कृते उपदेशप्रदा हृदयाह्लादकारिण्यश्च भवन्ति। अतः सूक्तिकाराः शास्त्रकारेभ्योऽपि विशेषसम्मानभाजो भवितुमर्हन्ति। संस्कृतसूक्तिकारातिरिक्तं पाली-प्राकृतापभ्रंश-भाषाणां, भारतीयभाषाणां तथा इंग्लिश-अरबी-फारसीप्रभृतिवैदेशिकभाषाणामपि ये सुविख्याताः सूक्तिकाराः सन्ति तेऽपि सर्वे सर्वथा सम्माननीयाः सन्ति।

विष्णुशर्मवन्दना—

वन्द्यः स शिक्षकवरः खलु विष्णुशर्मा
यो मासषट्कसमये नृपतेस्तनूजान्।
भाषां प्रशिक्ष्य परिपाठ्य च नीतिविद्यां
भव्यं ददौ नवमुदाहरणं बुधेभ्यः॥ २०॥

हितोपदेशे राजानं प्रति विष्णुशर्मा कथयति—

"देव! महाकुलसम्भूता एते राजपुत्राः, तन्मया नीतिं ग्राहयितुं शक्यन्ते। अतोऽहं षड्मासाभ्यन्तरे तव पुत्रान् नीतिशास्त्राभिज्ञान् करिष्यामि"॥ —प्रस्तावना

अद्यापि एका एतादृशी पाठशाला सञ्चालनीया, एकः पाठ्यक्रमो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्धारणीयः तथा तस्य अध्यापकः विष्णुशर्मा इति उपनाम्ना विभूषयितव्यः अथवा सर्वासु पाठशालासु विष्णुशर्मोपनामकः एकैकः प्राथमिकः शिक्षको नियोक्तव्य इति मे हार्दिकी इच्छा वर्तते।

भाषाधर्मप्रचारकवन्दना—

ये पण्डिता अविगणय्य समस्तकष्टं
देशेषु दूरतर-दूरतमेषु गत्वा।
प्राचारयन् निजक-संस्कृति-धर्म-भाषाः
सम्पूर्णमानवहिताय नमोऽस्तु तेभ्यः॥ २१॥

बहुप्राचीनकालादेव बहवो ब्राह्मण-बौद्ध-जैनविद्वांसो भारताद् बहिर्वर्तिषु दूरदेशेषु गत्वा भाषा-साहित्य-धर्म-संस्कृति-सभ्यतादि-विषयाणां प्रचारं, तन्माध्यमेन च तत्रत्यजनतायाः सुमहदुपकारं विहितवन्तः इति वृत्तं बहुषु पुस्तकेषु वर्णितं वर्तते। तज्जिज्ञासुभिः पाठकैः निम्नाङ्कितानि पुस्तकानि द्रष्टव्यानि—

१. "बौद्ध-संस्कृति" लेखक-महापण्डित राहुल सांकृत्यायन, प्रकाशक-पुस्तक भवन, कलाकार स्ट्रीट, कलकत्ता-७

२. Indian Panditas in the land of snow, by Sharat chandra Das, Publication-K.L.Mukhopadhyay, Calcutta, Price-10/-

३. Indian Missionariers in the land of gold, by- Upendra Thakur, Publication-K.P. Jayosawal Resarch Institute. Patna.

सत्याय प्राणदातॄणां वन्दना—

ये यातना अपि नृशंसतरा अमृष्यन्
प्राणानपि प्रियतरानददुः प्रसन्नाः।
सत्यात् परं न विमुखा अभवन् कदाचित्
तान् विश्ववन्द्यपदपद्मयुगान् नमामि॥ २२॥

* मध्यकाले यूरोपीयदेशेषु सुकरात (४६८-३९९ ई०पू०),

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्यारदानो (१५२८-), ब्रूनो (१५४८-१६००), गैलीलियो (१५६४-१६४८), जोन काल्विन, (१५०९-१५६४), जॉन विक्लिफ (१३२०-१३८४), जॉन हस (१३७३-१४१५) प्रभृतय ईदृशा अनेके दार्शनिकाः, गणितज्ञाश्च जन्म गृहीतवन्तो ये ईसाई-धर्मस्य विज्ञान-विरुद्धानि मतानि खण्डयित्वा विज्ञान-बुद्धि-तर्कसम्मतांश्च सिद्धान्तान् स्थापयित्वा सम्पूर्णमानवजातेः सुमहदुपकारं कृतवन्तः। एतेन कारणेन ते ईसाईधर्माधिकारिभिः भृशं दण्डिताः, कारागारेषु निक्षिप्ताः, जीवन्तः प्रज्वालिताः, विषं पायिताः, मृत्युदण्डेन च मारिताः, तथापि ते सत्यानुसन्धानात्, सत्यकथनात्, मिथ्या-धार्मिकसिद्धान्तविरोधाच्च कदापि विरता न अभूवन्।

एतद्विषये विशेषपरिज्ञानाय निम्नाङ्किते पुस्तके द्रष्टव्ये—

१. "धर्म के नाम पर" ले. गीतेश शर्मा, प्र० समायोजन, १९ जवाहरलाल नेहरू रोड, कलकत्ता, ७०००८७, मूल्य-१५०/-

२. "धर्म के नाम पर" ले. आचार्य चतुरसेन, प्र० सन्मार्ग प्रकाशन दिल्ली-७, मूल्य-७५/-

साधुसन्तवन्दना—

येऽज्ञान-वैर-दुरितैरति दह्यमानं
सद्बोध-शान्ति-सलिलैर्जगदभ्यसिञ्चन् ।
तान् सर्वजीव-जनता-गुरुमित्रभूतान्
सत्साधु- "सन्त"पुरुषान् जगतो नमामि॥ २३॥

अस्मिन् श्लोके प्रसिद्धत्वात् "सन्त" इति हिन्दीशब्दस्य प्रयोगो विहितः। विश्वस्य सन्तपुरुषाणां विषये द्रष्टव्यं पुस्तकम्—

१. "विश्व के सन्त महापुरुष" ले. डा० देवराज, प्रकाशक-काशी हिन्दू विश्वविद्यालय, मूल्य-५१/-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२. "विश्व-धर्म-दर्शन" ले. बिहारीलाल वर्मा, प्रकाशक-बिहार राष्ट्रभाषा परिषद्, पटना-४, मूल्य-३३१/-

देवोपमपुरुषाणां वन्दना—

गाम्भीर्य - शान्ति - मधुरस्मित - सौम्यभावैः
नृणां सदा सकलतापमपाहरन्ति।
आप्याययन्ति च मनः सरसैर्वचोभिः
ते केऽपि देवमनुजाः खलु वन्दनीयाः॥ २४॥
ये सर्वदा परहितानि समाचरन्ति
स्वीयं सुखं च सुविधां ददते परेभ्यः।
यस्मै न कोऽपि जगतीह परोऽप्रियो वा
ते केऽपि देवमनुजाः खलु वन्दनीयाः॥ २५॥

गुणसम्मानकर्तॄणां वन्दना—

ये जातिवादमवधूय गुणैकनिष्ठा
निम्नान् जनानपि गुणैः सममानयन्त।
ते सर्व एव ऋषयो मुनयो बुधा वा
श्रद्धानतेन शिरसा सततं प्रणम्याः॥ २६॥

कर्मणा उत्कृष्टानां शूद्रादीनां सम्मानं तथा कर्मणा निकृष्टानां ब्राह्मणादीनां तिरस्कारम् उद्दिश्य लिखितानि बहूनि वचनानि शास्त्रेषु उपलभ्यन्ते।

महाभारते धर्मव्याधकथाप्रसङ्गे कौशिकेन ऋषिणा धर्म-व्याधस्य ज्ञानं श्रुत्वा तस्मै ऋषित्वपद-प्रदानस्य कथा वर्णिता वर्तते।

ज्योतिषशास्त्राचार्येण वराहमिहिरेण म्लेच्छानामपि यवन-ज्योतिर्विदां कृते "ऋषिवत्तेऽपि पूज्याः स्युः" इति कथयित्वा बहुसम्मानः प्रदर्शितो वर्तते। एतादृशाः सर्वेऽपि वन्दनीया एव।

(बृहत्संहिता अ०-२, श्लोक-१४)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतस्य संस्कृतपण्डितानाञ्च सम्मानकर्तॄणां
मुस्लिममहीपतीनां वन्दना—

विख्यातमुस्लिममहीपतयो विदेश्या
ये भारतीयविबुधान् सुरभारतीं च।
सम्मानदानविभवैः सममानयन् प्राक्
ते धन्य-धन्यतर-धन्यतमाः प्रणम्याः ॥ २७ ॥

एतद्विषयपरिज्ञानाय निम्नाङ्किता ग्रन्था अवलोकनीयाः—

१. The Contribution of Muslims to Sanskrit literature, Vol 1st, 2nd, by J. B. Chaudhuri.

2. Muslims patronage to Sanskrit learning Vol. 1st, 2nd by J. B. Chaudhuri, Publication-Prachya Vani Mandir 3, Padaraficon 3 Great Calcutta-9

३. हिन्दु-मुस्लिम सांस्कृतिक एकता का इतिहास, ले. रामफल सिंह प्र. राज पब्लिशिंग हाउस, पुराना सीलमपुर, पूर्व-दिल्ली-११००३१, मूल्य-१००/-

४. Indo-Arab Relations, By S. MazbulAhannad, Indian Council for cultural relations, new Delhi.

वैदेशिक-संस्कृतविद्वद्-वन्दना—

ह्वेनसाङ् तथाऽलबेरुनी अथ मैक्समूलर-
दाराशिकोह इति नैकबुधा विदेश्याः।
तान्नौम्यहं सुरगिरं समधीत्य कष्टात्
तस्या महत्त्वमभितः समघोषयन् ये ॥ २८ ॥

एतेषां तथा मेगास्थनीज, फाहियान, इत्सिंग-प्रभृतीनाञ्च विशिष्ट-व्यक्तित्वकृतित्वपरिज्ञानाय निम्नाङ्किता ग्रन्था अवलोकनीयाः—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१. "भारत में विदेशी यात्री" ले. के. सी. खन्ना, प्र०-नेशनल बुक ट्रस्ट आफ इण्डिया, नई दिल्ली, मूल्य-६/-

२. "यात्रा-विवरण" प्र. नागरी-प्रचारणी-सभा-काशी, मूल्य-३३/-

३. Hsuan Tsang, by - Bilahu thich minh chau, pub - Vietnam Buddhist, Institute, Nha - Trang Vietnam, Price-41/-

४. F. Maxmueller, प्रकाशक-शकुन्तला पब्लिशिंग हाउस, चित्रकार धुरन्धर मार्ग, खार बम्बई, मूल्य-२४/-

५. "सिर्रे अकबर" (५० उपनिषदों के फारसी व्याख्याकर्ता शाहजादा मुहम्मद दाराशिकोह का जीवनचरित जानने के लिए पठनीय)।

अन्येषामाधुनिकतमानामपि वैदेशिकसंस्कृतविदुषां परिचय-ज्ञानाय निम्नांकिता ग्रन्था अवलोकनीयाः—

१. Indian Studies Abroad. Asia Publising House. N. Delhi.

२. Sanskrit and allied Indological Studies in Europe. by Dr. V. Raghavan, Univercity of Madras.

एवंविधानि अन्यान्यपिं बहूनि पुस्तकानि संस्थाने संगृहीतानि सन्ति।

संस्कृतोद्धारक-वन्दना—

कष्टेन येऽतिमहता बहुदूरदेशान्
गत्वाऽऽनयन् लिखितसंस्कृतपुस्तकानि।
सम्पाद्य तानि च पुनः सुलभान्यकार्षुः
तान् भारती-वरसुतान् प्रणमामि नित्यम्॥ २९॥

एतादृशेषु महापुरुषेषु महापण्डित राहुलसांकृत्यायन, डा. के. पी. जायसवाल, डा. रघुवीर इत्येतेषां नामानि विशेषरूपेण उल्लेखनीयानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्ति। एतेषु सांकृत्यायनमहोदयेन जायसवाल-महोदयेन वा आनीतानां पुस्तकानां संग्रहः 'पटना' स्थिते "के. पी. जायसवाल रिसर्च इन्स्टीट्यूट" नामके संस्थाने सुरक्षितो वर्तते। डॉ० रघुवीरमहोदयैः आनीतानि पुस्तकानि तैरेव, दिल्लीनगरे संस्थापिते "सरस्वती-विहार" नामके संस्थाने सुरक्षितानि सन्ति।

सरस्वतीविहारस्य पूर्णसंकेतः—

International Academy of Indian Culture J 22, Hauz. Khas Enclave, New Delhi -16

अनुवादकवन्दनां—

ये केऽपि च कृतधियः कवयोऽन्यभाषा-
ग्रन्थाननूद्य विविधान् जगतो विभूतीः।
दैव्या गिरो वरनिधिं समवर्द्धयन्त
तेभ्यो नमो नव-नवामृतपायकेभ्यः॥ ३०॥

केषाञ्चित् सुविख्यातानामन्यभाषाग्रन्थानां तथा वन्द्यानां तदनुवादकानाञ्च नामानि अधस्तादुल्लिख्यन्ते—

१. "आरव्ययामिनी" अरेबियन्-नाइट्स-ग्रन्थस्य बंगीय-जगद्बन्धुकविकृतः अनुवादः।

२. "ओमरखैय्याममम्" ईरानदेशस्य सुप्रसिद्धसूफीकवेः श्रीउमरखैय्यामस्य "रुबाइयाँ उमरखैय्याम" इति कृतेरयमनुवादः डा० वीरेन्द्रकुमार भट्टाचार्येण कृतः। सचित्राया अस्याः कृतेर्मूल्यम्-३०/- प्राप्तिस्थानञ्च-पुस्तक-भण्डार, विधानसरणी, कलकत्ता।

३. "सादिनः पुष्पलोकः" फारसीभाषायाः विश्वप्रसिद्धकवेः श्री शेखसादी महोदयस्य "गुलिस्ताने सादी" इत्यस्याः कृतेरयं ५८५ पृष्ठात्मकः पद्यानुवादः डॉ० धर्मेन्द्रनाथमहोदयेन कृतः। स च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"निखिलभारतीयभाषापीठ, नई दिल्ली" द्वारा प्रकाशितः। मूल्यम्-८०/-

४. "सांस्कृतं कुराणम्" सम्पूर्णकुरानपुस्तकस्य अनुष्टुप्छन्दोबद्धोऽनुवादः। अनुवादकः - हरियाणाप्रान्तीययमुनानगरनिवासी डॉ० सत्यदेववर्मा, प्रकाशकः-इण्डियन बुक गैलरी, दिल्ली। मूल्यम्-३७५/-

५. "उकरा" सावजूसयूस 'नामकेन अरबदेशीयज्योतिर्विदा लिखितस्य' गोलीयरेखागणितस्य 'उकरा' इत्याख्यस्य नयनसुखोपाध्यायेन गद्यात्मकोऽनुवादो विहितः। स चायं द्विनवतिपृष्ठात्मको ग्रन्थः 'उकरा' इति नाम्नैव वाराणसीस्थ-संस्कृतविश्वविद्यालयेन प्रकाशितः। मूल्यम्-२४/-

६. "हयत" अरबीयज्योतिषशास्त्रग्रन्थोऽयं १६१पृष्ठात्मकः केनापि भारतीयज्योतिर्विदा संस्कृतेऽनूदितः। मूल्यम्-६/-

७. "अस्ताचलीयम्" शेक्सपीयर, मिल्टन, वर्ड्सवर्थ, कीट्स, शेली, टेनिसन्-प्रभृतीनां द्वादशानामांग्लविदुषां ५९ पृष्ठात्मकः कासाञ्चिद् विशेषहृदयग्राहिरचनानां श्रीमदाचार्यगोविन्दचन्द्रपाण्डेयमहोदयैर्विहितोऽनुवादः। स च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाशितः। मूल्यम्-२०/-

८. "आङ्गलरोमाञ्चम्" (English Romantic Lyrics) कीट्स, शेली, वर्ड्सवर्थ, बर्नस, लैम्प, बायरन्, ब्राउनिंग, बारवाल, ब्रायन्ट इति नवानां सुविख्यातपाश्चात्त्यकविविरचितानामुत्कृष्टकवितानां डा० हरिहर वी. त्रिवेदी तथा श्रीलक्ष्मीनारायण ओ. जोशी इत्येताभ्यां महानुभावाभ्यां संस्कृतानुवादो विहितः। प्राप्तिस्थानम्-चौखम्भा ओरियन्टालिया, वाराणसी, मूल्यम्-१५/-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

९. "ललितामाधवम्" पश्चात्त्यमहाकवेः टेनिसनमहोदयस्य (Gareth and Lynette) इति नामकस्य काव्यस्य गद्यानुवादोऽयम् आन्ध्रप्रदेशस्य गुन्टूरनिवासिना श्री के. ए. पी. वाई. दीक्षितमहोदयेन कृतः।

१०. "द्वादशी रात्रिः" अथवा यत्तवेप्सितम्, 'विश्वविख्यातेन श्रीशेक्सपीयरमहाकविना प्रणीतस्य' (Twelfh Night or what you wish) इति नामकस्य नाटकस्यायमनुवादः उत्कलप्रदेशस्य ब्रह्मपुरनिवासिना श्रीअनन्तत्रिपाठिशर्म्मणा कृतः।

संस्कृतप्रशंसकवन्दना—

ये पण्डिता निजगिरा सुरभारतीं तत्-
साहित्यमप्यथ हृदा नितरामशंसन्।
विश्वे तयोश्च बहुमानमवर्द्धयन् ये
ते सर्व एव विबुधा नितरां प्रणम्याः॥ ३१॥

देशवासिनां संस्कृतप्रशंसकानां विषये द्रष्टव्यानि पुस्तकानि—

१. "संस्कृत-शिक्षा के सम्बन्ध में मूर्धन्य मनीषियों के विचार"

२. "विभिन्न भाषाओं की संस्कृत-महत्त्व-सूचक पुस्तकों की सूची" प्रकाशक-सार्वभौम संस्कृत प्रचार संस्थानम्, वाराणसी।

३. विदेशवासिनां संस्कृतप्रशंसकानां विषये द्रष्टव्यं पुस्तकम्- "संस्कृत और विदेशी विद्वान्" प्रकाशक-सार्वभौम संस्कृत प्रचार संस्थानम्, वाराणसी।

क्रान्तिवादिनां पण्डितानां वन्दना—

ये 'पण्डिता' अपि सनातनरूढिवादान्
उत्कृत्य कर्कशतरैर्निजतर्कशस्त्रैः।
प्रातिष्ठिपन्नभिनवान् सबलं विचारान्
ते सर्व एव मम वीरबुधाः प्रणम्याः॥ ३२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतादृशाः केचन महाप्रज्ञाः पण्डिता अधो निर्दिश्यन्ते। एतेषां ग्रन्थाः प्रबन्धाश्च प्रबुद्धैः विद्वद्भिः अवश्यमेव अध्येतव्याः परीक्षणीयाश्च—

१. महामहोपाध्याय पं० रामावतार शर्मा, विशिष्टग्रन्थः "परमार्थदर्शनम्" प्रकाशक—मोतीलाल बनारसीदास, देहली, मूल्यम्–१५०/–

२. श्रीविद्याभास्करमणिशंकर उपाध्यायः, विशिष्टग्रन्थः "ईश्वर-स्वरूपम्" प्रकाशक–महाराजा सयाजीराव विश्वविद्यालय, बड़ौदा दुष्प्राप्य।

३. स्वामी महेश्वरानन्दगिरिः विशिष्टग्रन्थाः—चतुर्णामपि वेदानामेकैकशतमन्त्राणां भागवतपुराणस्थद्विशतश्लोकानां च विशिष्टा व्याख्या तथा चातुर्वर्ण्यभारतसमीक्षाग्रन्थस्य तृतीयः खण्डः।

४. श्रीसंगमलालपाण्डेयः, प्रयागविश्वविद्यालये दर्शन-विभागाध्यक्षः। विशिष्टः ग्रन्थः "देशशक्तिचतुष्टयम्" प्रथमो भागः।

शिल्पकलाविद्-वन्दना—

सर्वानहं गुणनिधीनपरान् विधींस्तान्
वन्दे समस्तरमणीयकलाविदग्धान्।
स्थापत्य - शिल्प - गृहवास्तु - कलादिभिर्ये
ख्यातिं परामगमयन् जगति स्वदेशम्॥ ३३॥

एतद्विषयपरिज्ञानाय निम्नलिखिताः ग्रन्था अवलोकनीयाः—

१. "भारतीय स्थापत्य" ले. डा० द्विजेन्द्रनाथ शुक्लः, प्रकाशक–हिन्दी समिति–उत्तरप्रदेश, लखलनऊ, मूल्यम्–१६/–

२. "भारतीय वास्तुकला का इतिहास" ले.– कृष्णदत्त वाजपेयी, हिन्दीसमिति, हिन्दीभवन, लखनऊ, मूल्यम्–८/–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३. ''सम्मेलन-पत्रिका'' (कला-अंक) प्रकाशक-हिन्दी साहित्य सम्मेलन, प्रयाग, मूल्यम्-७०/-

वैज्ञानिकवन्दना—

तेभ्यो नमांसि मम देशविदेशवासि-
वैज्ञानिकप्रवर-यान्त्रिक - पण्डितेभ्यः।
ये सर्वदा जगदिदं भगवत्स्वरूपं
सम्पूजयन्ति निजजीवनधूपदीपैः॥ ३४॥

एतद्विषये निम्नलिखिता ग्रन्था अवलोकनीयाः—

१. ''प्राचीन भारत के वैज्ञानिक कर्णधार'' लेखक-स्वामी सत्य-प्रकाश सरस्वती, प्रकाशक-पुस्तकालयन, अंसारीरोड नई दिल्ली, मूल्यम्-३२५/-

२. ''भारतीय भौतिकविज्ञान'' लेखक-भि- वेलणकर, प्रकाशक-केशव भिकाजी दबले, मुम्बई-४, मूल्यम्-३०/-

३. ''अन्तर्राष्ट्रिय परिप्रेक्ष्य में प्राचीन भारतीय विज्ञान'' लेखक-डॉ० विजयलक्ष्मी शर्मा, प्रकाशक-राधाकृष्ण प्रकाशन, अंसारी मार्ग, दरियागंज, नई दिल्ली, मूल्यम्-१४०/-

४. ''प्राचीन भारत में विज्ञान और शिल्प'' लेखक-श्यामनारायण कपूर, प्रकाशक-साहित्य-निकेतन, शिवाला रोड, कानपुर, मूल्यम्-२९५/-

५. Technical Literture in Sanskrit, by- S. V. Iyar, Univercty of Keral, Price-13.50/-

* आधुनिकभारतीयवैज्ञानिकानां विषये द्रष्टव्यं पुस्तकम्—

Science and Scientists in India, by Nenkumar Jain, Publication-Indian Book gallery Delhi, Price-65/-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आधुनिकवैदेशिकऋषिवन्दना—

गैलेलियो - प्रभृति - न्यूटन - कान्ट - गेटे-
रूसो - मुखान् नवनवर्षिवरान्नमामि।
येषां सुनिर्मलमति - प्रतिभा - प्रकाशे
तत्त्वानि नूतनतमानि बभुर्बहूनि॥ ३५॥

एतेषां तथा 'डार्विन, फ्रायड, मार्क्स, नीत्से प्रभृतीनामन्येषां च नवतत्त्वान्वेषकाणां परिचयज्ञानाय निम्नलिखिता ग्रन्था अवलोकनीयाः—

१. ''चिन्तना के पश्चिमी पंख'' लेखक-डा० सत्यनारायण शर्मा, प्रकाशक-किरणवेला प्रकाशन मन्दिर, रांची, मूल्यम्-३०/-

२. ''प्रसिद्ध-वैज्ञानिक'' लेखक-विलियम ओख्विर स्टीबेन्स, अनु०-सत्यप्रकाश त्रिपाठी, एम. एस-सी., प्रकाशक-इण्डियन प्रेस, इलाहाबाद, मूल्यम्-६१/-

अत्यन्तदुष्करकार्यकर्तॄणां वन्दना—

येऽन्तस्तले जलनिधेर्गगने, गिरीणां
शृङ्गेषु, चन्द्रमसि च न्यदधुः पदानि।
अन्वेषणां विदधिरे च बहुस्थलानां
तान्नौम्यहं प्रबलसाहसशक्तिसिन्धून्॥ ३६॥

विश्वस्य अनेके साहसिका जनाः समुद्रेषु एकक्रोशादपि अधिकदूरवर्तिनि अतिगम्भीरे अन्तस्तले प्रविविशुः, अनेके अनन्ते अन्तरिक्षे उड्डयनं चक्रुः, भूयांसः गिरीणां दुर्गमेषु शिखरेषु विशेषतश्च हिमालयस्य सर्वोच्चतमे गौरीशंकरशिखरे आरोहणं चक्रुः, केचन चन्द्रलोकमपि प्रापुः, अन्ये च बहूनामज्ञातानां देशानां तथा दक्षिणोत्तरध्रुवयोश्च अन्वेषणं कृत्वा समस्तमपि जगत् सर्वेषां कृते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिचितं सुगमं कार्यक्षमं च सम्पादयामासुः। एतेषु अभियानेषु अनभ्यासात्, प्रतिकूलपरिस्थितेः कारणात्, साधनाभावात् भूयांसो वैज्ञानिकाः श्रमिकाश्च मार्ग एव मृत्युं प्राप्ताः। तथापि अपरे अनेके साहसं कृत्वा स्वकीयं लक्ष्यं पूरितवन्तः, विजयश्रियं प्राप्तवन्तः, मानवानां महान्तमुपकारं कृतवन्तश्च। अतस्ते सर्वेऽपि नूनमेव विश्ववासिनां कृते सर्वथा अभिनन्दनीयाः वन्दनीयाश्च।

येऽसीमपौरुष - मति - प्रतिभा - प्रकर्षैः
दासीमिव स्ववशगां प्रकृतिं नु चक्रुः।
येऽचिन्त्यमानमपि दृक्पथतामनैषुः
ते नूनमीश्वरसमाः पुरुषाः प्रणम्याः॥ ३७॥

ये केऽपि दुर्लभ-सुदुर्गम-दुष्कराणां
संसाधने जगति वस्तु-मही-कृतीनाम्।
नाजीगणन् प्रियतमान्यपि जीवितानि
तेऽपूर्वसाहसभृतः पुरुषाः प्रणम्याः॥ ३८॥

भारतीयस्वातन्त्र्यसंग्रामसैनिकानां वन्दना—

हित्वापि गेहधनभूमिकुटुम्बवर्गं
सोढ्वापि कष्टमविसह्यमसूंश्च दत्त्वा।
येऽमोचयन् परवशां निजमातृभूमिं
तान् बाल-वृद्ध-युवकान् सततं नमामि॥ ३९॥

भारतीयस्वातंत्र्यसंग्रामस्य इतिहासं ये पठितवन्तः सन्ति, तैरिदं सम्यग् ज्ञायते यत् स्वातंत्र्यसंग्रामस्य सञ्चालकानां, कार्यकर्तॄणां, सत्याग्रहिणां, स्वयंसेवकानाञ्च उपरि वैदेशिकैः कियन्तः कीदृशाश्च घोरा अत्याचाराः कृताः, कियतां च बालकानां विद्यार्थिनां तरुणानां वृद्धानां च भयंकरयातनानन्तरं मृत्युदण्डानन्तरं च भारतीयैः स्वतंत्रता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लब्धा। तदेतस्मिन् स्वातंत्र्ययुद्धे ये केऽपि आत्मानं समर्पितवन्तस्ते सर्वेऽपि ज्ञाता अज्ञाता वा जनाः अस्माकं सततमेव वन्दनीयाः स्मरणीयाश्च।

भारतमहत्त्वसंगायक-वन्दना—

श्रीमद्रवीन्द्र[1] - अरविन्द[2] - नरेन्द्र[3] - राधा-
कृष्णन्[4] मुखान् भरतभूतिलकान् नमामि।
ये भारतीयमहिमानममोघतर्कैः
प्रास्थापयन् निखिल-विश्व-सुधीसमाजे॥ ४०॥

१. रवीन्द्रनाथ टैगोर, २. योगिराज अरविन्द, ३. स्वामी-विवेकानन्द (नरेन्द्र इति पूर्वावस्थाया नाम) ४. डॉ० सर्वपल्ली राधाकृष्णन्। एभिः स्वकीयेषु ग्रन्थेषु, एवमेव अनेके वैदेशिका अपि विद्वांसो मुक्तकण्ठेन भारतस्य गौरवं समुदघोषयन्, भारतस्य निन्दकानामालोचनामपि व्यदधुः। तेषु केचन विख्याताः विद्वांसो निम्नलिखिताः सन्ति यैः विस्तरेण भारतगौरवगाथा कीर्तिता।

१. एफ. मैक्समूलर (ग्रन्थ-"भारत की विश्व को देन")
२. ए. एल. वासम (ग्रन्थ-"अद्भुत भारत")

संस्कृतसमर्थक-वन्दना—

सर्वान् वरिष्ठजननेतृमनीषिवर्यान्
न्यायाधिपांश्च निखिलान् शिरसा नमामि।
निर्भीकया निजगिरा प्रबलैश्च तर्कैः
प्रातिष्ठिपन् सुरगिरं जगतः पुरो ये॥ ४१॥

एतद्विषये अवलोकनीया ग्रन्थाः—

१. "संस्कृतशिक्षा के सम्बन्ध में मूर्धन्य मनीषियों के विचार" प्रकाशक-सार्वभौम सं०प्र०स०, वाराणसी, मूल्यम्-३/-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२. "संस्कृत आयोग का प्रतिवेदन" भारत-सरकार,

३. संस्कृतशिक्षायाः पक्षे उच्चतमन्यायालयस्य निर्णयः।

विद्वत्सम्मानकर्तॄणां वन्दना—

सम्मान - वित्त - वसनाऽभरणादिदानै-
रर्चन्ति ये धनिजनाः सुधियोऽग्रगण्यान्।
प्रोत्साहयन्ति च परान् नवलेखकान् ये
सर्वेऽपि ते सुकृतिनो जगतः प्रणम्याः॥ ४२॥

एषु दिनेषु साहित्यसेवायां लब्धप्रसिष्ठा अनेके संस्कृतविद्वांसो विभिन्नैः पुरस्कारैः प्रतिवर्षं सम्मानिता भवन्ति। तत्र महामहिमराष्ट्रपतिद्वारा तथा अकादमीसंस्थाभिर्ये पुरस्काराः प्रदीयन्ते तेषां सर्वोऽपि व्ययो राजकीयकोषेणैवोह्यते। परन्तु अन्ये केचन पुरस्कारास्तादृशाः भवन्ति ये केषाञ्चित् महनीयपुरुषाणां स्मृतौ सञ्चालिताभिः संस्थाभिः प्रदीयन्ते। तादृशाः केचन महनीयाः पुरस्काराः संस्थाश्च अधस्तादुल्लिख्यन्ते—

१. ज्ञानपीठपुरस्कारः, (द्रव्यराशिः ७५०००/-) एष पुरस्कारः "भारतीय-ज्ञानपीठ", १८ इन्स्टीट्यूशनल एरिया, लोदी-रोड, नई दिल्ली,-११०००३ द्वारा प्रदीयते।

२. साहित्य अकादमी पुरस्कारः (द्रव्यराशिः ५०,०००/- भारतीय भाषाओं के प्रत्येक कवि के लिए)।

३. सरस्वतीपुरस्कारः (द्रव्यराशिः-३,०००००/-)

४. वाचस्पतिपुरस्कारः (द्रव्यराशिः-७५,०००/- केवलं संस्कृत रचनायाः कृते), एतौ द्वावपि पुरस्कारौ "के० के. बिड़ला फाउण्डेशन" १०वीं मंजिल, १८-२० कस्तूरबागांधी मार्ग नई दिल्ली।

५. विश्वभारती पुरस्कारः, उ.प्र. संस्कृत संस्थानम्, लखनऊ।

६. वाणी-अलङ्करणपुरस्कारः (१५०.०००/-) एष पुरस्कारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरामकृष्णडालमिया वाणीन्यास, ४ सिन्धिया हाउस, कनाट प्लेस, नई दिल्ली द्वारा प्रदीयते।

७. श्रीहनुमानप्रसादपोद्दारस्मृतिसेवाट्रस्ट पुरस्कारः, दुर्गाकुण्ड, वाराणसी, द्रव्यराशिः-२१०००/-

सम्पादकवन्दना—

सम्पादकान् निखिलदैनिकपत्रिकाणां
तान्नौमि ये प्रतिदिनं जनतां स्वलेखैः।
सङ्केतयन्त्युपदिशन्ति विनिर्दिशन्ति
सम्प्रेरयन्ति निगदन्ति च सत्यवार्ताः॥ ४३॥

संस्कृतपत्रसम्पादकवन्दना—

न ग्राहकाः न पठका न च लेखका वा
संशोधका न च न चापि धनं, तथापि।
ये पत्रिकाः सुरगिरः परिचालयन्ति
तेभ्यो ममाऽपरिमिता नतयो लसन्तु॥ ४४॥

सैनिकवन्दना—

अभ्रंलिहेषु शिखरेषु महीधराणा-
मत्युग्रशीतपवनाहति - दुःसहेषु।
ये सैनिका अनिशमुग्रतपस्तपन्ति
देशस्य रक्षणकृते प्रणतोऽस्मि तेभ्यः॥ ४५॥

श्रमिकवन्दना—

यन्त्रादि-शिल्प-कृषिकर्मसु दुष्करेषु
वन्दे निरन्तररतान् श्रमजीविनस्तान्।
ये स्वेदविन्दुनिचयैरनिशं स्रवद्भिः
सम्पादयन्ति जगतः सुखसाधनानि॥ ४६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाखड़ानांगल, हीराकुण्ड, दामोदरघाटी, रिहन्द, कोसी, चम्बलप्रभृतिषु जलविद्युत्परियोजनासु, कोयला-लौह-अभ्रक-मृत्तिकातैल-पेट्रोलियम्-सुवर्ण-ताम्र-यूरेनियम-प्रभृति-खनिज-पदार्थानामुत्पादनेषु, वस्त्र-कर्गज-शर्करा-सीमेन्ट-इस्पात-इंजन-वायुयान-समुद्रयानप्रभृतिवस्तूनां निर्मात्रीषु उद्योगशालासु, कृषिद्वारा विविधानामन्नानां, चाय-कॉफी-कपास-जूट-मूँगफली-इक्षुप्रभृति-वस्तूनामुत्पादने च सहस्रसहस्रसंख्यायामहोरात्रं श्रमिकाः कठोरं परिश्रमं कुर्वन्ति। तदा देशस्य समृद्धिर्भवति, जनता च सुख-सुविधा-दीनामुपयोगं कुर्वती सानन्दं जीवति विकासं च कुरुते। एतासु पातालसदृशीषु गभीरतमासु खनिषु ये कार्यं कुर्वन्ति तेषु बहवः प्रतिवर्षं मृत्युमपि गच्छन्तीति श्रमिकजीवनं कियत् कष्टकरमिति सरलतया ज्ञातुं शक्यते। तादृशाः श्रमिका अवश्यं वन्दनीया इत्यहं मन्ये।

खनिषु कार्यकर्तॄणां श्रमिकाणां वन्दना—

यं घोरखातमवलोक्य खनिप्रदेशे
अद्यापि भीतहृदयं परिकम्पते मे।
तत्रैव ये मृतिमुखे निजमर्पयित्वा
श्राम्यन्ति ते परमसाहसिका नमस्याः॥ ४७॥

संस्कृतसमालोचकवन्दना—

येऽदूदुषन् सुरगिरोऽध्ययनं च तां च
स्वीयप्रबन्धनिचयेष्वथ तेऽपि नम्याः।
एते निजैरनुचितैरुचितैश्च वादैः
उन्मीलयन्ति नयनानि सुधीजनानाम्॥ ४८।

संस्कृतभाषायाः संस्कृतशिक्षायाश्च आलोचनायां लिखिताः केचन ग्रन्था अधस्तात् निर्दिश्यन्ते—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१.The Dynamic Brahmin, by B. N. Ncair pub-Popular book Depot, Bombay-7 Price-15/-

२. The English works of Raja Ram Mohan Ray. Voll 2ns, Pub-Casmic Publication, Ansari Road New Delhi, Price-125/

आश्रयदातृवन्दना—

मासाधिकान्यपि दिनानि गृहे स्वकीये
ये मां निवेश्य सुविधा-शतदानमानैः।
जाताः सहायकवरा मम कार्यसिद्धौ
तानत्युदारहृदयान् नृमणीन्नमामि ॥ ४९ ॥

एतादृशेषु उदारहृदयेषु सत्पुरुषेषु निम्नाङ्कितं महानुभावाः विशेषरूपेण उल्लेखनीयाः सन्ति—

१. आचार्य केशवचन्द्रमिश्रः—प्राचार्यः-मदनमोहनमालवीय-महाविद्यालयः, भाटपाररानी, देवरिया, उ०प्र०।

२. पं० परशुरामत्रिपाठी—एडवोकेट, दीनदयालनगर, देवरिया, उ०प्र०।

३. पं० श्रीपतिशर्मा 'वैद्यः'—धन्वन्तरि औषधालयः, रायगंज, गोरखपुर।

४. पं० शिवशंकरत्रिवेदी—सदस्यः—उ० प्र० संस्कृत अकादमी, सुन्दरबाग, लखनऊ।

५. पं० चन्द्रबली द्विवेदी—प्राचार्यः अग्रवाल संस्कृत महाविद्यालय, टेढ़ीनीम, वाराणसी।

६. आ० रामचन्द्रत्रिपाठी—प्राचार्यः संस्कृतमहाविद्यालय तथा आयुर्वेदिक कालेज, सिवान, बिहार।

७. स्वामीश्रीविद्यानन्दगिरिः—प्राचार्यः श्रीविश्वनाथसंस्कृत-महाविद्यालयः, बेलारोड, दिल्ली।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

८. श्री के० लक्ष्मण शास्त्री—संस्कृतविद्यालयनिरीक्षकः, आन्ध्रप्रदेश, आदर्शनगर, हैदराबाद।

९. श्री बद्रीनारायण झंवर—शिक्षाप्रेमी एवं समाजसेवी, ४, गंगालेन, कालकत्ता-१२

१०. श्री गोपालदत्तपाण्डेयः—प्राध्यापकः नैनीताल डिग्री-कालेज नैनीताल।

११. डॉ० रामलखनशर्मा—उत्तरप्रदेश संस्कृत समितिः छितवापुर रोड, लखनऊ।

यैः कैरपि, क्वचन मद्भ्रमणप्रसङ्गे
प्राप्ता रुजा कठिनताऽसुविधा च काचित्।
वित्ताद्यभाव इति वा; तदिदं समस्तं
दूरीकृतं करुणया प्रणतोऽस्मि तेभ्यः॥५०॥

१-यैः पर्याप्तबहुमूल्यौषधप्रदानेन सहायता कृता तेषां परिचयः—

(क) श्री पं० गयाप्रसाद शास्त्री, डी० एस-सी० ए० साहित्याचार्यः, आयुर्वेद-वाचस्पतिः, भिषग्रत्नम्, मुरलीधर बाग, हैदराबाद।

(ख) श्री बा० बा० नटराज शास्त्री, आयुर्वेदमार्तण्डः, भिषक्शिरोमणिः त्रिचिरापल्ली, मद्रास।

२-मम अस्वास्थ्यदशायां यैर्महती सेवा सहायता च कृता—

(क) श्री पण्डित सीतावर पन्त वैद्य, नैनीताल

(ख) श्री वी० डी० गुण्डप्पा, संचालकः गोखले इन्स्टीट्यूट ऑफ पब्लिक अफेयर्स, वसवगुडी, बैंगलोर।

(ग) श्री डॉ० विश्वनारायण शास्त्री, असमसर्वकारस्य प्रकाशनाधिकारी, गोहाटी, असम।

३-यैः परिचयपत्रप्रदानेन मयि महती अनुकम्पा कृता तेषां परिचयः—

(क) श्री एम० सौन्दर राजन् ऐयंगरः-सेक्रेटरी-सेन्ट्रल कौन्सिल ऑफ एजुकेशन, श्रीरंगनिलयम्, गगनमहल रोड, हैदराबाद।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ख) श्री डा० वी० राघवन्, संस्कृत-विभागाध्यक्षः मद्रास-विश्वविद्याालयः, मद्रास्।

(ग) श्री डा० के० कुंचुण्णि राजा, रीडर-संस्कृत विभागः, मद्रास-विश्वविद्यालयः, मद्रास।

(घ) श्री के० लक्ष्मण शास्त्री, डाइरेक्टर-राज्य सूचना विभाग, हैदराबाद।

(ङ) श्री एल. एस. पार्थसारथिः (रिटायर्ड डिस्ट्रिक्ट जज) मदुरै।

यैः स्वकीय ''मोटरकार''द्वारा मम भ्रमणे महत् सौविध्यं सम्पादितम्—तेषां परिचयः—

(क) श्री वी० रामकृष्णरावः, राज्यपालः, केरल।

(ख) श्री एम० सौन्दर राजन् ऐयंगरः, हैदराबाद।

(ग) श्री बा० बा० नटराज शास्त्री, त्रिचिरापल्ली।

(घ) श्री डा० पी० के० नारायण पिल्लै, त्रिवेन्द्रम्।

(ङ) श्री रामबर्मपरीक्षित तम्बुरान, (कोचीनमहाराजः) केरल।

यात्रा-सहायकाः

सेवासौविध्यदृष्ट्या प्रमुखसहायकाः मम एतासु यात्रासु मदीया अनेके शिष्याः कर्मचारिणश्चापि काले-काले अल्पकालिकरूपेण सहायका अभूवन्। यथा **श्रीसन्तोषकुमारशुक्लः, श्रीकामेश्वर-शुक्लः, श्रीभारद्वाजपाण्डेयस्तथा शंभुशरणपाण्डेयश्च।** परन्तु उत्तरप्रदेश-बिहार-असम-उत्कल-मध्यप्रदेश-दिल्ली-हिमांचल-आन्ध्रप्रभृतिषु प्रदेशेषु यो मम सर्वाधिकं सर्वात्मना च साहाय्यं, सेवां, सौविध्यञ्च उपकल्पितवान् स वर्तते स्वभावतो निःस्वार्थसेवावृत्तिः-

आचार्यसुरेन्द्रमोहनत्रिपाठी (संस्थानस्य प्रमुखप्रचारकः)

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्तरभारतीय-यात्रा-संस्मरणानि

असम-उत्कल-उत्तरप्रदेश-कश्मीर-जम्मू-
गुर्जर-दिल्ली-नागालैण्ड-पञ्चनद (पंजाब)-
बङ्ग-बिहार (मिथिला-छोटानागपुर)-
मणिपुर-मध्यप्रदेश-महाराष्ट्र-
राजस्थान-हरयाणा-हिमाचल-
प्रभृतिप्रदेशैः सम्बद्धानि
संस्मरणानि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ३ :

असमप्रदेशीयानि संस्मरणानि

असमप्रदेशस्य पुराणेषु वर्णितं प्राचीनं नाम कामरूपमिति वर्तते। भगवतः शंकरस्य नेत्राऽग्निना दग्धः कामदेवः अत्रैव जन्म गृहीतवान् इति हेतोरस्य प्रदेशस्य नाम कामरूपमिंति प्रसिद्धम्। अस्यैव प्राग्ज्योतिषपुरं राजधानी आसीत्। प्राचीनकामरूपप्रदेशस्य विषये विशेषपरिज्ञानाय निम्नलिखिता ग्रन्था अवलोकनीयाः—

१. प्रकामकामरूपम् (काव्यम्) ले० मनोरंजनशास्त्री, प्रकाशक-असमसंस्कृत बोर्ड, गोहाटी, मूल्यम्-२०/-

२. प्राचीनकामरूपपरिचयः (निबन्धः) लेखक-डॉ० अशोक चटर्जी शास्त्री, प्रकाशक-परिमल पब्लिकेशन्स, शक्तिनगर, दिल्ली-७, मूल्यम्-१००/-

३. कामरूप-शासनावली, (असमिया) लेखक-श्रीपद्मनाथ-भट्टाचार्य, प्रकाशक-रङ्गपुर साहित्य परिषद्, रङ्गपुर, असम।

काजीरंग—

अद्यापि वन्यबहुजन्तुविराजिकाजी-
रंगस्थलं सुविपुलं चकितः स्मरामि।
यत्र स्थिता महिष - खड्ग - वराह - हस्ति-
संघा ददत्यमितविस्मय-भीति-हर्षान्॥ १॥

असमप्रदेशे ब्रह्मपुत्रस्य मिकिरपर्वतमालायाश्च मध्ये खाजीरंगनामकं वन्यपशुक्षेत्रं वर्तते। अस्मिन् वन्यक्षेत्रे शताधिका गेंडकाः, शताधिकाः वन्यमहिषाः, वन्यगजाः, वन्याः शूकरास्तथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरिणा अपि नानाविधा विहरन्ति। एतत् क्षेत्रं शासनद्वारा सुरक्षितं वर्तते। वहवो जना अस्य क्षेत्रस्य वन्यपशूनाञ्च अवलोकनार्थमा-गच्छन्ति। औत्सुक्येन मयापि तत्सर्वमवलोकितम्। तेषां पशूनां मध्ये केषाञ्चिद् दर्शनेन विस्मयः केषाञ्चिद्दर्शनेन भीतिः, केषाञ्चिद् हरिणगजादीनां दर्शनेन च महती प्रसन्नता भवति स्म।

अद्यापि तान्यसमवाक्परिगुम्फितानि
पद्यैस्तथाऽमरगिरः सुविभूषितानि।
लोकेऽङ्कियेति गदितानि निजैर्विशेषै-
रद्यापि मन्मनसि मोदमुपानयन्ति॥ २॥

असमप्रदेशीयनाट्यसाहित्ये "अंकियनाट" इति नाम्ना प्रसिद्धानि कानिचित् नाटकानि भवन्ति। असमियाभाषानिबद्धैः पाठैः गीतैश्च सह मध्ये-मध्ये प्रसंगानुसारिणां मनोहारिणां च श्लोकानामपि श्लाघनीयः समावेशो भवति एतादृशेषु नाटकेषु। १. कालियदमन, २. रामविजय, ३. रुक्मिणीहरण, ४. केलिगोपाल, ५. पारिजातहरण, ६. पत्नीप्रसाद, ७. भोजनविहार, ८. भूमिलोटावा, ९. अर्ज्जुनभञ्जन, १०. पिम्परागोचोवा, ११. रासझुमुरा, १२. चोरधरा, १३. कोटोरा-खेलोवा, १४. भूषणहेणेवा, १५. जन्म-यात्रा, १६. उद्धवसंवादः, इति षोडशनाटकानि "अंकिया-नाट" इति नामके ग्रन्थे प्रकाशितानि सन्ति। एतानि सर्वाण्यपि नाटकानि श्रीकृष्ण-चरितमाधारीकृत्य प्रणीतानि वर्तन्ते।

श्लोकेषु केचन श्लोका नितान्तं मधुरा मनोरञ्जकाश्च दृश्यन्ते। यथा एकः श्लोकः श्रीकृष्णस्य बालस्वभावविषयकः—

नीतं क्व च नवनीतं, केन च पीतं पयः, क्व मे मुरली।
इति समुदीर्य लुठन्तं, भूमौ बालं नमामि गोपालम्॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोहाटी—

अद्यापि तान् बहुकृतज्ञतया स्मरामि
गौहाटिवासि - विदुषोऽप्यधिकारिणश्च ।
ये मन्त्रिवाससुख - भोजन - पान - यात्रा-
वित्तादिचिन्तनपरा नितरामभूवन्॥ ३ ॥

७-९. ४. ६४ दिनांकेषु अहं दार्शनिकसम्मेलनावसरे समायोजिते संस्कृतसम्मेलने भागं ग्रहीतुं विहारप्रदेशस्य सीतामढ़ीनगरं गतवानासम्। तत एव प्रस्थाय १२.४.६४ गोहाटी (गुवाहाटी) नगरं सम्प्राप्तः। इयं मम असमप्रदेशस्य प्रथमा यात्रा आसीत्। अत्रागत्य येषां गृहेषु मया स्थितं यैश्च मम सर्वविधं साहाय्यं विहितं सुखसौविध्यं च सम्पादितं तेषां परिचयः क्रमशः अधस्ताद् दीयते—

१. **श्री पं० वासुदेवमिश्रः**—फैन्सीबाजार, गोहाटी। एते मम ग्रामसमीपवासिनः 'फैन्सीबाजार' समीपे एकां विपणीं चालयन्ति स्म। गोहाटीस्टेशनतः सर्वप्रथमं तेषामेव गृहं गतवान्, दिन-द्वयं च तत्र स्थितवानहम्।

२. **श्रीतीर्थनाथशर्मा**—एम. ए. भरलूमुख, गोहाटी। एते "प्राग्ज्योतिषकालेजस्य" प्रधानाचार्याः आसन्। एतेषामपि गृहे अहं कानिचिद् दिनानि न्यवसम्।

३. **श्रीविश्वनारायणशास्त्री**—एम. ए., सा० न्या०, मी० शास्त्री, हिलसाइड, गोहाटी। एते असमप्रशासने प्रकाशनविभागस्य सेक्रेटरीपदे विराजमानाः आसन्। नागालैण्ड-मणिपुर-यात्रया निवृत्तोऽहं यदा अस्वस्थो जातस्तदा तैः स्वयमेवाहं स्वगृहं नीतः। तत्राहं स्वस्थो भूत्वा सुखपूर्वकं बहूनि दिनानि न्यवसं प्रचारकार्यं च अकरवम्। एभिस्त्रिभिरपि मम प्रचारकार्ये महान् सहयोगः कृतः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याप्यहं सहृदयं सुविशालचित्तं
गोहाटिवासि - विबुध-त्रितयं स्मरामि।
स्नेहावधान - मधुराशन-पान - यानै-
र्ये मत्प्रवाससमये सुखदा अभूवन्॥ ४॥

एतदतिरिक्तं गोहाटीविश्वविद्यालये संस्कृतविभागाध्यक्षाः डॉ० मुकुन्दमाधवशर्माणः, कटनकालेजे संस्कृतविभागाध्यक्षाः प्रो० रजनीकान्त-देवशर्माणः, मुनिकुलाश्रमस्य प्राचार्याः, श्रीविपिनचन्द्र-गोस्वामिमहोदयाः तथा अन्येऽपि केचन विद्वांसः स्नेहसहयोगप्रदानेन स्वस्वगृहे आतिथ्य-प्रदानेन असमियाभाषासाहित्यसमर्पणेन च मम यात्रायां बहूपकारकाः सहायकाश्च अभूवन्।

अद्यापि संस्कृतसमुन्नतिदत्तचित्तं
श्रीतीर्थनाथविबुधं सततं स्मरामि।
यो मां सदा सुरगिरं वदितुं शिशूनां
पाठालयेष्ववपि बलान्नयति स्म नित्यम्॥ ५॥

* श्रीतीर्थनाथशर्म्मणां पूर्वं परिचयः प्रदत्तः। तेषां गृहे निवासकाले ते मां प्रातः जागरयित्वा नित्यक्रियानन्तरं च अल्पाहारं कारयित्वा मां स्वयानेन बालविद्यालयेषु संस्कृते भाषणं कर्तुं प्रतिदिनं नयन्ति स्म। यदा कदाचित् मम अनिच्छायामपि ते मां बलान्नयन्ति स्म। ते कथयन्ति स्म—'भवदीयं सरलसंस्कृतभाषणं श्रुत्वा यदा बहवो बालकाः संस्कृताध्ययने प्रवृत्ताः भविष्यन्ति तथा ये कक्षायां संस्कृतं पठन्ति तेऽवश्यमेव संस्कृते स्वयोग्यतां वर्धयितुं प्रयतिष्यन्ते।'

चेरापूँजी—

अद्यापि मेऽसम-सुविश्रुत-रम्य-"चेरा-
पूंजी'पुरेऽविरत - वर्षण - केलि - भूमौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नक्तन्दिवं नभसि सञ्चरतां घनानां
धीरध्वनिः श्रवणयोरनुगुञ्जतीव॥ ६॥

असमप्रदेशे शिलाङ्नगरात् ३६ मीलंदूरे अवस्थितम् एकं चेरापूँजीनामकं स्थानं पर्वतीयं भवति यत्र सदा अहोरात्रं वर्षा भवति। शिलाङ्नगरे निवसता मया एकदा कौतुकवशात् तत्र यात्रा कृता। तत्रत्यं च जीवनस्य सर्वाधिकमद्भुतं मनोहरं दृश्यं दृष्ट्वा महान् विस्मयः परमानन्दश्च अजायत। तरुलतादिभिः सर्वत्र श्यामायमानाः पर्वतीय-प्रदेशाः, नभसि श्यामघनघटानां सुमहदाडम्बरं, मेघानाम-विरामं गर्जनं तर्जनं वर्षणं, महान्तो जलप्रपाताः, वर्षाबाहुल्येन स्थले-स्थले जायमाना जलाशयाश्चेति चेरापूँजीस्थानस्य विशिष्टानि आकर्षणानि सन्ति यानि अद्यापि स्मृतानि मनो मोदयन्ति।

अद्यापि सिन्धुसम-तुङ्ग-तरङ्गभङ्गं
श्रीब्रह्मपुत्रनदमुद्धतमुत्तितीर्षोः ।
नौकानिमज्जन-भयाकुलितं मदीयं
चेतो बिभेति नितरां परिकम्पते च॥ ७॥

कस्मिंश्चिदपि जलाशये नद्यां वा तरणस्य मम कला नाऽयाति। अतः नौकाद्वारा गमने मम महती भीतिर्जायते। अतो यथासम्भवमहं नौकायात्रां परिवर्जयामि। परन्तु दीक्षान्तभाषणार्थं कमलाबाडीक्षेत्रे गमनाय यदा ब्रह्मपुत्रनदे नौकारोहणं नितान्तमनिवार्यं जातं तदा मम चेतसि महती चिन्ता भीतिश्च सञ्जाता। तथापि अन्यसाधनाभावात् लोकलज्जाभयाच्च अत्यन्तं बिभ्यतापि मया नौकारोहणं विहितमित्येष प्रसंगोऽत्र विवक्षितः। २०.८.६५ दिनांके इयं मम प्रथमा बृहति नदे बृहन्नौकायात्रा आसीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

डिब्रूगढ़—

अद्याप्यसौ असमिया-सुकविस्तफज्जुल्
आली स्मृतो मम मनो हरति प्रकामम्।
येन स्ववेश्म - कविताकलनञ्च मन्दा-
क्रान्तेति तत्-प्रियपदेन युतं व्यधायि॥ ८॥

* असमयात्रायां ३०.४.६४ दिनांके मया डिब्रूगढ़े योगिराज-श्रीवसुमहोदयानां विद्वज्जनमण्डिते प्रतिष्ठिते आश्रमे स्थानं सर्वविधं सौविध्यं च सम्प्राप्तम्। तदनन्तरं तत्रत्ये डिब्रूगढ़महाविद्यालये भाषणं जातं यत्र तस्य महाविद्यालयस्य असमियाप्राध्यापकैः श्रीतफज्जुल आली-महोदयैः सह स्नेहपूर्णः परिचयः सञ्जातः। ते स्वभाषा-पाण्डित्येन सह संस्कृतप्रणयिनोऽप्यासन्। संस्कृतभाषायाः छन्दो-रूपेण प्रसिद्धः "मन्दाक्रान्ता"-शब्दस्तेषामतीव प्रिय असीत्। अतएव तैः स्वस्य असमियाकवितासंग्रहस्य तथा स्वनिवासस्य च नाम मन्दाक्रान्ता इति कृतमासीत्। तेषामेकः कवितासंग्रहः 'अनुष्टुप्' इति नाम्ना अपि प्रकाशितो विद्यते।

डिमापुर—

अद्यापि तं खलु डिमापुर-पान्थशालाऽ-
वासं स्ववर्गरहितं नहि विस्मरामि।
यत्राऽस्त्रधारि - बहुभीषण - नागलोकै-
र्भीतः कथं कथमपि क्षणदामनैषम्॥ ९॥

नागाप्रदेशे मणिपुरप्रदेशे च गमनाय प्रथमं गोहाटीतः डिमापुरस्टेशनपर्यन्तम् आगन्तव्यं भवति। अहं ९.५.६४ दिनाङ्के सायं डिमापुरं प्राप्तवान्। रात्रौ च तत्रैव राजकीयपान्थशालायां स्थितः। परन्तु तत्र स्ववर्गीयजनानामभावात् भीषणकायानां शस्त्रधारिणाञ्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नागाजनानां बाहुल्यात् शंकित इव भीत इव च यथाकथञ्चित् निशामतिवाहितवान्। अस्मादृशानां कृते भोजनमपि तत्र अनुकूलं दुर्लभमेवासीत्। समस्ते आपणे आहिण्डमाने एको वृद्धो मारवाड़ीजनो मिष्टान्नविक्रेता लब्धः यो मम भोजनस्य व्यवस्थां कृतवान्, मां वाराणसीनिवासिनं पण्डितं ज्ञात्वा समादृतवांश्च।

डिम्बापुरं जनमुखात् प्रथितं हिडिम्बा-
वासस्थलं तदधिकारगतं च बुद्ध्वा।
दृष्ट्वाऽधुनापि च तथाविधमर्त्यजातान्
नूनं घटोत्कचयुवा स्मृतिमेति सद्यः॥ १०॥

इदं डिमापुर (डिम्बापुर) क्षेत्रं पुरा हिडिम्बाया अधिकारे आसीत् या पाण्डवेन भीमेन सह विवाहिता बभूव। अतएव इदं स्थानं हिडिम्बापुरमिति कथ्यते स्म। पश्चात् अयमेव शब्दः अपभ्रंशरूपेण डिम्बापुर-डिमापुरनाम्ना विख्यातिं गतः। अस्या एवं पुत्रः घटोत्कच आसीत् यस्य भीषणताया वर्णनं महाभारतस्य आदिपर्वणि १५५तमे अध्याये विहितं वर्तते। डिमापुरे तादृशानेव भीषणान् नागाजनान् दृष्ट्वा महाभारते वर्णितं घटोत्कचस्य स्वरूपं मम सदा स्मृतिपथमायाति स्म।

शिलाङ्—

अद्यापि विस्मरति तन्न मनो मदीयं
वृत्तं शिलाङ्नगरभ्रमणेऽद्भुतं यत्।
आसायमन्थसदनेन विनैव चायं
पीत्वा दिनानि गमितानि मया सदैव॥ ११॥

शिलाङ्नगरं खलु असमप्रदेशस्य सुप्रसिद्धं रमणीयं पर्वतीयं नगरमस्ति। साम्प्रतञ्च इदं मेघालयस्य राजधानी वर्तते। अत्राहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रमणप्रसङ्गेन १८.४.६४ दिनाङ्के सम्प्राप्तः, पण्डितप्रवरश्रीत्रिपुरानाथ-स्मृति-तीर्थमहोदयानां च गृहे पूर्वपरिचयाभावेऽपि तेषां सौजन्यवशात् निवास-भोजन-पानादि-सर्वविधं सौविध्यं प्राप्तवान्। एतेषां गृहे प्रातः प्रातराशं गृहीत्वा नगरस्य दूरदूरतरवर्तिषु भागेषु वनाञ्चलेषु च भ्रमणं, शिक्षणसंस्थानामवलोकनं, विद्वज्जनैः सह मिलनं तथा यदा कदाचित् तत्रत्यैः पर्वतीयैः सह मिलनं तथा यदा कदाचित् तत्रत्यैः पर्वतीयैः जनैः सह सम्भाषणं मम दैनिकं कार्यमासीत्। अस्मिन् कार्यक्रमे बहुधा मार्गे भोजनप्राप्तेरभावात् चायमेव पीत्वा मया आसायं भ्रमणं विधीयते स्म। १. अन्धस्-ओदनम्।

नलवाडी—

अद्यापि मान्य-नलवाडिनिवासि-विद्व-
द्वर्यान् स्मरामि वचनामृतवर्षिणस्तान्।
येषां शुभैः पठन-पाठन-लेखनाद्यै-
र्दैव्या गिरोऽसमभुवि प्रथिता प्रतिष्ठा॥ १२॥

असमप्रदेशे कामरूपमण्डले गोहाटी-समीपवर्ति नलवाडी नामकमेकं लघुनगरं वर्तते; यत्र असमप्रदेशस्य सर्वश्रेष्ठः संस्कृतमहाविद्यालयो विराजते। तत्र मम गमनकाले तस्य महाविद्यालयस्य अध्यक्षपदं विद्वद्वर्य्याः श्रीमनोरञ्जनशास्त्रिणो विभूषयन्ति स्म। एषां शास्त्रिमहोदयानां महाविद्यालयस्य चास्य असमप्रदेशे संस्कृतभाषायाः प्रचारे प्रतिष्ठापने च सुमहद् योगदानं वर्तते। अस्मिन् नगरे त्रैलोक्यनाथगोस्वामी, प्रो० प्रबोधचन्द्रगोस्वामी, श्रीदेवेन्द्रनाथभट्टाचार्याः, डॉ० हरेकृष्णगोस्वामी, कविराज-श्रीनारायणगोस्वामी चेत्यादयः अन्येऽपि अनेके संस्कृतविद्वांसः संस्कृतप्रणयिनश्च मया दृष्टाः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याप्यहम् "असम"वासिमुखे सकार-
स्थाने हकारकथनं सततं स्मरामि।
साहित्य - संस्कृति - सभेति - पदप्रयोगे
हाहित्य - हंकृति - हभेति पदं वदन्ति॥ १३॥

असमप्रदेशे तत्रत्यजलवायुप्रभावेण सकारस्य स्थाने हकार-वर्णस्य प्रयोगः प्रचलति। अतः तत्रत्याः विद्वांसोऽपि एवमेव प्रयोगं कुर्वन्ति। यदा मया सर्वप्रथमं गौहाटीनगरे "असम-साहित्य-सभा" इति शब्दानां स्थाने "अहम-हाहित्य-हभा" तथा "सार्वभौम-संस्कृत-प्रचार-सभा" इति स्थाने "*हार्वभौम-हंकृत-प्रचार-हभा*" इति उच्चारणं श्रुतं तदा आदौ मम शब्दस्य ज्ञानमेव न जातं न वा अर्थस्य। पश्चात् शनैः शनैः सर्वोऽपि भ्रमो दूरीभूतः।

अद्यापि मे सलिलमज्जनकोमलाङ्ग्य-
स्ता रोटिका मनसि संमुदमावहन्ति।
याः पिष्टपाकपटुतारहितेन पक्त्रा
पक्त्वा निमज्ज्य च जले समुपाहृता मे॥ १४॥

इदं वृत्तं गोहाटीनगरनिवासकालिकं वर्तते। असमप्रदेशस्य प्रथमयात्रायामहं सर्वप्रथमं कतिचिद् दिनानि "असम-संस्कृत-परिषदः" सचिवपदमलङ्कुर्वतां श्रीशिवनाथशास्त्रिमहोदयानामावासे कृतनिवास आसम्। तदानीं तेषाम् "आद्या" नामक एकश्छात्रः पाककार्यं करोति स्म। स रोटिकापाचने पटुर्नासीदिति ज्वलितां कठोरां च रोटिकां जले निमज्जनेन मृदुलां कृत्वा मह्यं भोक्तुं ददाति स्म। तादृशीं रोटिकां दृष्ट्वा स्पृष्ट्वा च पूर्वं मम बहुविस्मयोऽभवत् परं यदा यथार्थता ज्ञाता तदा मे बहु हास्यमायातं, तस्य कुशलतां दृष्ट्वा च प्रमोदमपि अन्वभवम्। इदानीमपि च तत् स्मृत्वा चर्चित्वा च मुदितो भवामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि विस्मयकरं यददर्शि वृत्तं
गोहाटि-सम्मिलित-संस्कृत-शिक्षकाणाम् ।
सन्मत्स्यभक्षणकृते सुमहान् विवादः
शूद्रस्य पाचनविधेश्च महान् विरोधः ॥ १५ ॥

एकदा गोहाटीनगरे असमप्रदेशस्य त्रिंशत्संस्कृतविद्यालयानां शिक्षकवर्गस्य एकं प्रशिक्षणशिविरमायोजितमासीद् दशदिवसात्मकं तत्रत्ये "सोनारामहाईस्कूल"स्य प्राङ्गणे। अस्मिन् शिविरे मुख्यप्रशिक्षकरूपेण अहं वाराणसीतः समागत आसम्। २.८.८२ दिनाङ्के कक्षाया उद्घाटनं जातम्। उद्घाटनसमारोहे आचार्य-मनोरञ्जनशास्त्री, डॉ० विश्वनारायणशास्त्री, पं० तीर्थनाथशर्मा, पं० विपिनचन्द्रगोस्वामी, डॉ० नरेन्द्रनाथशर्मा चेत्यादयः प्रमुखा विद्वांसः सम्मिलिता अभूवन्। दशदिनपर्यन्तं तत्र विभिन्नविद्यालयेभ्यः समागतैः शिक्षकैः सह निवासेन मम महान् आनन्दो जातः प्रादेशिक-भाषा-गीत-कवितादीनां श्रवणेन च। शिविरेऽस्मिन् द्वयं वृत्तं मम दृष्टौ किञ्चिदद्भुतमिव संवृत्तम्। एकन्तु इदं यत् उत्तममत्स्यानामभावे शिक्षकैः एकस्मिन् दिने भोजनस्य बहिष्कारः कृतः? द्वितीयञ्च इदं यत्-भोजनालये शूद्रस्य पाचकस्य विरोधः कृतः।

अद्यापि तेष्वसमवर्ति-सुरम्य-चायो-
द्यानेषु पत्रपरिकल्पन-तत्पराणाम्।
एणीदृशां हरितवस्त्रतया समस्तं
क्षेत्रं विभाति मम चायमयं समन्तात्॥ १६ ॥

चायपत्राणाम् उत्पादनस्य व्यापारस्य च कृते असमप्रदेशः समग्रे देशे सुप्रसिद्धो वर्तते। तत्र सुविस्तृतक्षेत्रेषु सुबहूनि चायोद्यानानि (चाय बागान) चाल्यमानानि सन्ति, येषु प्रायेण सहस्राधिकाः महिलाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चायपत्राणां चयनस्य कार्यं कुर्वन्ति। चायपत्राणि हरितवर्णानि भवन्ति। तत्र यदा चायचयनरता महिला अपि हरितशाटीधारिण्यो भवन्ति तदा समस्तं क्षेत्रमेव चायपत्रमयं प्रतिभातीति मया बहुशो विलोकितम्, आनन्दानुभवश्च कृतः।

माजुली—

अद्यापि भाषणकृते मम माजुलीयां
यात्रां स्मरामि सफलां सततं प्रसन्नः।
यस्यामलभ्यत मया खलु कृष्णकान्त-
श्छात्रो मदीयतरणेर्नवकर्णधारः॥ १७॥

असमसंस्कृतसमितेः. दीक्षान्तसमारोहे दीक्षान्तभाषणं कर्तुमहं शिवसागरमण्डलान्तर्गतं माजुलीस्थानं गतवानासम्। वाराणसीतः १६.८.६५ दिनांके प्रस्थाय २०.८.६५ दिनांके माजुलीं प्राप्तवान्। तत्र मम दिनत्रयात्मके निवासकाले समारोहसंयोजकेन मम परिचर्यायां द्वौ मैट्रिकुलेशनकक्षायाश्छात्रौ नियोजितौ। तयोरेकः कृष्णकान्तशर्मा संस्कृतप्रणयी आसीत्। मदीयं संस्कृतभाषणं, संस्कृते सार्वकालिकं वार्तालापं च श्रुत्वा तस्यापि मनसि संस्कृताध्ययनं कर्तुं संस्कृते च भाषणलेखनादियोग्यतां प्राप्तुं बलवती हार्दिकी च इच्छा समजायत। तदर्थञ्च स वाराणस्यां मम समीपे स्थित्वा अध्ययनं कर्तुं स्वनिश्चयं प्रकटीकृतवान्। मया च तस्य अभिभावकैः सह वार्तां कृत्वा तथा तस्य विद्यानुरागं, सौम्यं स्वभावं, सेवाभावनां च दृष्ट्वा वाराणस्यामागमनाय स्वीकृतिः प्रदत्ता। पुनश्च असमियाजनाः सर्वदैव उभयोरपि सन्ध्ययोः ओदनमेव भुञ्जते न तु कदाचित् रोटिकाम्। उत्तरप्रदेशे तु एतद्विपरीतम् ओदनेन सह रोटिकाऽपि अवश्यमेव भुज्यते सर्वैः जनैः। अतएव प्रायेण असमियाजनाः रोटिका-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्षणभयात् उत्तरप्रदेशे स्थातुं न वाञ्छन्ति। का पुनः रोटिकानिर्माणस्य वार्ता। परन्तु कृष्णकान्तशर्मा वाराणस्यां मया सह निवासार्थं न केवलं रोटिकाभक्षणं प्रत्युत रोटिकानिर्माणमपि स्वीकृतवान्। ततः परं स शीघ्रमेव वाराणसीमागत्य मया सह स्थित्वा च अध्ययनमारब्धवान्। अनन्तरं हिन्दूविश्वविद्यालयात् व्याकरणशास्त्रे आचार्यपरीक्षामुत्तीर्य वाचस्पतिपदवीं च लब्ध्वा आदौ दिल्लीस्थिते "लालबहादुरशास्त्री-केन्द्रियसंस्कृत-विद्यापीठे" अध्यापको जातः। ततः परं सम्प्रति हिन्दूविश्वविद्यालयस्य "संस्कृतविद्याधर्म-विज्ञान-संकाये" सांख्य-योगविभागे प्राध्यापकपदे विराजते। आदावेव एनं दृष्ट्वा "नूनमयं मम संस्थानस्य भावी कर्णधारो भविष्यतीति" या आशा मम हृदये बद्धमूला जाता सा इदानीं फलवती जायमाना दृश्यते, अग्रे च इतोऽप्यधिकं कार्यकरी भविष्यतीति मे बलवती आशा वर्तते। एतेन अहं सदा निश्चिन्तः सन्तुष्टः प्रसन्नश्च तिष्ठामि।

अद्यापि शङ्करमुखोद्गतगीतकानि
तान्यङ्कियेति गदितानि च नाटकानि।
कर्णामृतानि नयनोत्सववर्द्धकानि
चेतः स्मृतानि मदयन्ति विमोहयन्ति॥ १८॥

असमप्रदेशस्य साहित्यसंस्कृतिनिर्मातृषु वैष्णवभक्तेषु नववैष्णवधर्म-प्रवर्तकस्य महापुरुषश्रीशंकरदेवस्य तथा तत्प्रमुखशिष्यस्य माधवदेवस्य च "वरगीत" नाम्ना प्रसिद्धानि भक्तिगीतानि सरसमधुराणि असमप्रदेशे सर्वत्र नर-नारीभिः श्रद्धापूर्वकं गीयन्ते। तानि मयाऽपि असमभ्रमणसमये स्थाने स्थाने श्रुतानि सुमहांश्च आनन्दोऽनुभूतः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा असमप्रदेशे वरगीतानां विशिष्टं स्थानं वर्तते तथैव भक्तिप्रधानानाम् ''अंकिया'' नाम्ना प्रसिद्धानां नाटकानामपि विशिष्टं स्थानं वर्तते। एतेषु नाटकेषु प्रयुक्तानि नृत्य-गीत-वाद्यादीनि अत्यन्तं विलक्षणानि चित्ताकर्षकाणि च भवन्ति। एतद्विषयकविशेषपरिज्ञानाय निम्नाङ्कितं पुस्तकं द्रष्टव्यम्—

''अंकिया नाट'' इति।

स्मृत्वाऽधुनाप्यसमसंस्कृतिचेतनाया-
श्चिह्नं बिहूत्सवमहं मुदितो भवामि।
यस्याद्भुतैर्विविध - नर्तन - गीत - वाद्यै-
र्मोमुद्यतेऽसममही निखिला सदैव॥ १९॥

प्रायः सर्वेष्वेव प्रदेशेषु केचन परम्परागता विशिष्टा उत्सवा व्यापकरूपेण महता समारम्भेण च मान्यन्ते। तथैव असमप्रदेशे ''बिहू''उत्सवस्य मान्यता, प्रधानता सर्वाधिका लोकप्रियता च वर्तते। अयमुत्सवः ''रंगाली, कंगाली, भोगाली'' इति नामभिः त्रिविधो भवति। एतेषु चैत्र-वैशाखयो रंगाली, आश्विन-कार्तिकयोः कंगाली तथा पौषमाघयोः भोगाली उत्सवः समायोज्यते। एतेष्वपि रंगाली उत्सवः वसन्तोत्सव इव अधिकमाह्लादमयो भवति। तस्मिन्नवसरे यत् ''हुचरी'' नामकं लोकगीतं युवकैः युवतीभिश्च सम्मिल्य गीयते, गीतेन सह नृत्यं च यद् भवति तत् अत्यन्तं मनोरञ्जकं हृदयहारि च भवति। असमभ्रमणकाले मया इदं सर्वं साक्षात् दृष्टं, श्रुतं, समास्वादितं च, यस्य मधुरा स्मृतिरद्यापि मुहुर्मुहुर्जागर्ति।

अद्यापि मे लवणजीरकमिश्रितानां
मध्येऽपि रुच्य-बहुवस्तु-समन्वितानाम्।
हैयङ्गवीन - हृद - मज्जन - कोमलानां
स्वादः सदा स्मृतिमुपैति स रोटिकानाम्॥ २०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१४-४-६४ दिनाङ्के असमप्रदेशीय-दाङ्मण्डलस्य मुख्यालयं तेजपुरं गतवान्। अत्र एकः शोणितपुर प्राच्यसंस्कृतविद्यालयो वर्तते। इदमेव शोणितपुरं बाणासुरस्य राजधानी आसीदिति ज्ञात्वा कौतूहल-वशात् तद् द्रष्टुमहं तत्र गतवान्। विद्यालयस्य सञ्चालकैः शिक्षकैः छात्रैश्च मिलित्वा, तत्रत्यां पठन-पाठन-पद्धतिं च ज्ञात्वा नितान्तं सन्तुष्टोऽभवम्। प्रसङ्गवशादन्येऽपि तत्रत्याः संस्कृतानुरागिणो मिलिताः, संस्कृतप्रचारविषयिणी च विविधा वार्ता संजाता।

प्रसङ्गवशादत्रैव इदं मया ज्ञातं यत् तेजपुरात् किञ्चिद्दूरवर्तिनि ढकियाजली नामके एकस्मिन् ग्रामे एकेन नेपालीविदुषा स्वगृह एव एकः विद्यालयः सञ्चाल्यते। अतस्तद्विद्यालयावलोकनार्थं ग्रामीण-वातावरणस्यानुभवार्थं च अहं तत्र गन्तुं निश्चयं कृतवान्, प्रस्थितश्च। तत्र च पण्डितमहोदयाः सपरिवारा मिलिताः। आवयोरुभयोरपि आकस्मिकरूपेण परस्परं मिलनात् महती प्रसन्नता जाता। अनेके ग्रामवासिनोऽपि मां वाराणसीतः समागतं ज्ञात्वा महीयसीं श्रद्धामादधाना मां द्रष्टुं समागताः।

अनन्तरं कुशलप्रश्ने जाते, मया आतिथ्ये च गृहीते सपत्नीकाः पण्डितमहोदया मां कथितवन्तः "श्रीमन्! भवता तु नगरेषु ओदनं, सूपं, शाकं, शष्कुली, पायसं, मोदकाश्चेति प्रायेण सर्वदा भुज्यन्ते एव। परन्तु अद्याहं तत्सर्वं परित्यज्य किमपि ग्रामीणं भोजनं कारयितुमिच्छामि। मम पत्न्या अपि अयमेवाभिलाषो वर्तते। अत्र यथा वा अनुमन्यते भवता।" ततो मया तयोरनुरोधः सहर्षं स्वीकृतः तदर्थं च अनुमतिः प्रदत्ता। ततः परं तैर्यद् भोजितं तस्यैव अस्मिन् श्लोके चर्चा वर्तते। मम सम्पूर्णे असमभ्रमणे अयं दिवसः, अयं परिवारः, अयं ग्रामः, इदं भोजनम्, अत्रत्यो निवासः, अत्रत्यं वातावरणञ्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सविशेषमाकर्षकं, स्मरणीयं, परमाह्लादकरं, सर्वत्र चर्चाया विषयीभूतञ्च आसीत्।

भिन्नेऽपि रूप-वसनाभरणाशनादौ
नेफानिवासि-गिरिवासि-जनैः समं मे।
जातः प्रियः परिचयोऽथ च बन्धुता यै-
रद्यापि तान् मिलितुमिच्छति मानसं मे॥ २१॥

शिलाङ्गनगरे तत्पार्श्ववर्तिषु क्षेत्रेषु च परिभ्रमतो मम नेफा (उत्तर-पूर्वीयसीमा) प्रदेशस्य खासी-जयन्तिआ-गोरा-मिशिमी-डफला—प्रभृतिगिरिवासिनो बहवो जना मिलन्ति स्म। तेषां रूपाणि, वेषभूषाः, आभरणानि, भोजन-पानानि, आचार-व्यवहारादीनि सर्वथा भिन्नानि भवन्ति स्म। तैः सह अस्माकं किमपि सामञ्जस्यं न भवति। तथापि तैः सह वार्तां कर्तुं, तेषां परिचयं प्राप्तुं, तेषां विचारान् ज्ञातुं, तैः सह सौहार्दं च स्थापयितुं मम हार्दिकी इच्छा भवति स्म। अतो मया तैः सह सम्पर्कं साधयितुं प्रयासः कृतः तत्र सफलता च लब्धा। तेषु अनेके मम सुहृदो जाताः। अनेके मां स्वगृहेऽपि आमन्त्रयन्ति स्म, चायपानादिना च सस्नेहं सभाजयन्ति स्म। यद्यपि मम एष व्यवहारः तत्रत्येभ्यो मम सुहृद्भ्यः पण्डितेभ्यो न रोचते स्म तथापि तैः सह सम्बन्धो मम बहु आह्लादजनको भवति स्म, तेषां जीवनस्य विविधता वेषभूषादीनां विचित्रता चापि मम हृदयाकर्षणस्य एकं प्रधानं कारणमासीत्।

इदानीं बहूनि वर्षाणि मम व्यतीतानि तैः सह विच्छिन्न-सम्बन्धस्य। तथापि तेषां सद्व्यवहारस्य स्मरणं कृत्वा तैः सह पुनर्मिलितुं मम हृदये बलवती समीहा साम्प्रतमपि जागर्त्येव।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिवसागर—

अद्यापि तस्य शिवसागरवर्ति-"राधा-
नाथ फुकन्"-बुधवरस्य सदा स्मरामि।
यत्पत्रंलेखनबलेन मदीययात्रा
नागाप्रदेशनगरेषु सुखावहाभूत्॥ २२॥

असमप्रदेशस्य एकस्यां यात्रायां शिवसागरनाम्नि नगरे श्रीराधानाथफुकन्महोदयानां गृहे गमनस्य, तेषां परिचयस्य, तैः सह विविधविषयेषु सुमधुरवार्तालापस्य च मया शुभावसरः प्राप्तः। तस्यामेव यात्रायां नागाप्रदेशमपि गन्तुं मम योजनाऽऽसीत्। फुकन्महोदयैः सह वार्त्तालाप-प्रसङ्गे मया ज्ञातं यत् तेषां जामाता एव तदानीं नागाप्रदेशस्य मुख्य आयुक्त (हाई कमिशनर) आसीत्। अतो मया अनुरोधे कृते तैः स्वजामातुः समीपे पत्रं लिखितं, येन मम निवासे, यथेच्छं भ्रमणे च महत् सौविध्यं जातम्। अन्यथा तेषु दिनेषु नागाप्रदेशे अवस्थानं भ्रमणञ्च महत्कष्टकरमासीत्, घातकञ्च अपरिचितानां जनानां कृते।

अस्मिन् यात्राक्रमे अहं १०.५.६४ दिनाङ्के नागाप्रदेशस्य राजधानीं कोहिमानगरं प्राप्तः, तत्र च कञ्चित् कालमहं भीतभीतः शंकितश्च यापितवान्।

असमप्रशस्तिः—

श्रीब्रह्मपुत्रनदराज-विराजितो यो
झङ्कारितो मधुर-शङ्करदेवगीतैः।
श्रीशक्तिपीठमहितो विविधैश्च लोकैः
संसेवितो विजयतामसमप्रदेशः॥ २३॥

✯

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ४ :

अरुणाचलप्रदेशीयानि संस्मरणानि

अद्यापि रम्यमरुणाचलसुन्दरीणां
वस्तुत्रयं कथमपीह न विस्मरामि।
कण्ठे विभिन्नविपुलाऽभरणानि, सज्जा
केशेषु चाऽप्यभिनवा, वदने प्रसादः॥ १॥

अरुणाचलप्रदेशः (पूर्वं नेफाइतिनाम्ना ख्यातः) भारतस्य पूर्वोत्तरसीमावर्ती अन्तिमः केन्द्रशासितः प्रदेशः अस्ति। अयं कामेंग, सुबनसिरी, सिआंग, तवांगप्रभृतिषु दशसु मण्डलेषु विभक्तो वर्तते। एतस्मिन् प्रदेशे "मोन्या-खोआ-डाफला"—आदिगिश्मी-सिंगफो-तांगसाप्रभृतयोऽनेके पर्वतीया जना निवसन्ति। तेषु पुरुषापेक्षया नारीणां वेषः, केशविन्यासरचना, नानाविधानि वस्त्राणि, सुबहूनि आभरणानि तथा तासां प्रसन्नं मुखमण्डलं चेति सर्वमपि विशेषमाकर्षणं सौन्दर्यञ्चावहति।

वोमदिला—

अद्यापि चीनजनपातकसाक्षिभूतं
तं विस्मरामि नहि वोमदिलाप्रदेशम्।
वृत्तानि यत्र घटितानि मम स्मृतानि
चेतो दहन्ति दलयन्ति विषादयन्ति॥ २॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वं "नेफा" इति नाम्ना ख्यातस्य अरुणाचलप्रदेशस्य पश्चिमे कामेंगमण्डले एकं "वोमदिला" नामकं स्थलं भवति। इदम् असमप्रदेशस्य तेजपुरनगरात् (प्राचीनं नाम शोणितपुरम्) पूर्वोत्तरदिशायामवस्थितं वर्तते। अयं प्रदेशः वोमदिलाक्षेत्रञ्च भारतान्तर्गतं वर्तते। परन्तु पञ्चशीलसिद्धान्तानुसारं भारतेन सह मैत्र्या उद्घोषणां कृत्वापि चीनदेशेन लोभवशादस्य क्षेत्रस्योपरि आक्रमणं कृत्वा भारतेन सह विश्वासघातः कृत इति विषयः सर्वविदितो वर्तते। एतस्य प्रसङ्गस्य विस्तृतरूपेण परिज्ञानाय वोमदिलायुद्धस्य प्रधानसेनापतिपदं निर्वहता श्री वी०एन० कौलमहोदयेन लिखितं— (Untold Story) इति पुस्तकमवश्यं द्रष्टव्यम्। चीनदेशस्य आकस्मिकेन आक्रमणेन, तस्य सैनिकानां साधनानाञ्च बाहुल्येन अस्मिन् युद्धे भारतस्य पराजयो जात इति अस्या घटनाया अयमविस्मरणीयो विषादपूर्णः पक्षः अस्ति, यस्य स्मरणेन अध्ययनेन च क्षणं यस्य कस्यापि भारतीयस्य हृदये घोरः प्रतिक्रियाभावो जागर्ति। असमभ्रमणकाले मया तेजपुरनगरात् तत्रत्याधिकारिणां सहयोगेन एतादृशेषु बहुषु स्थानेषु भ्रमणस्य सुदुर्लभोऽवसरः सम्प्राप्तः।

✯

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ५ :

उत्कलप्रदेशीयानि संस्मरणानि

कटक—

अद्याप्यहं कटक - दैनिकवृत्तपत्र-
सम्पादकस्य वचनं सततं स्मरामि।
यः संस्कृतस्य विषयेऽखिललोकभाषा-
पत्रेषु पण्डितवरान् लिखितुं न्यगादीत्॥ १॥

प्रचारप्रसङ्गे अहं २५.११.५८ दिनाङ्के उत्कलप्रदेशस्य सुप्रसिद्धं कटकनगरं सम्प्राप्तः। तत्र 'समाज'नामकस्य दैनिकपत्रस्य सम्पादक-महोदयानां सभापतित्वे संस्कृतपण्डितानां संस्कृतानुरागिणां चैका सभा समायोज्यत। बहूनि महत्त्वपूर्णानि भाषणानि जातानि, परं तत्र यत् सर्वाधिकं महत्त्वपूर्णं भाषणमासीत् तदासीत् सभापतिमहोदयस्य। तेन कथितम्—"प्रायः सर्वेऽपि जना मातृभाषायाः पत्राणि पठन्ति, तत एव च सर्वमवगन्तव्यं वृत्तजातं सर्वान् ज्ञातव्यविषयांश्च अवगच्छन्ति। परं मातृभाषायाः पत्रेषु कोऽपि पण्डितः संस्कृतविषये किमपि न लिखति इति हेतोः सर्वसाधारणजनाः संस्कृतशिक्षासम्बद्धैर्विषयैः तत्समस्याभिश्च सर्वथा अपरिचितास्तिष्ठन्ति। अतः संस्कृतपण्डितैः मातृभाषाणां समाचारपत्रेषु पत्रिकासु वा लेखाः लेखनीया येन सर्वेऽपि जनाः संस्कृतसम्बद्धान् सर्वानपि ज्ञातव्यविषयान् जानीयुस्तथा तत्सम्बन्धे च स्वकीयं कर्तव्यमपि अवगच्छेयुः।" सभापतिमहोदयः एतदर्थं मां बहुधा प्रैरयत् प्राबोधयच्च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वारेषु भित्तिषु कपाटयुगे गवाक्षे
सर्वत्र काञ्चन कलात्मकतां निरीक्ष्य।
अद्यापि चिन्तयति मे मतिरुत्कलेति
प्रान्तीयनाम परिशीलनतो यथार्थम्॥ २॥

सुद्युम्नसुतस्य उत्कलस्य नाम्ना अस्य प्रदेशस्य 'उत्कल' इति नाम जातमिति एका प्रसिद्धिरस्ति। परन्तु अस्मिन् प्रदेशे सर्वत्र कलात्मकतां विलोक्य "उत्कृष्टा कला यत्र स उत्कलः" इति व्युत्पत्तिगतोऽर्थ एव मे शोभनः प्रतिभाति। तदिदं सर्वेऽपि उत्कलयात्रिणः प्रत्यक्षीकर्तुं शक्नुवन्ति।

अद्यापि तं परमविस्मयकारि - हीरा-
कुण्डाभिधं सलिलबन्धमनुस्मरामि।
यत्र प्रविश्य मनुजोऽन्यविधातुरेतां
सृष्टिं परामिव विलोक्य विमोमुहीति॥ ३॥

उत्कलप्रदेशे संभलपुरनगरस्य निकटे महानद्यां "हीराकुण्ड" इति नामकः सुविशालतमः सलिलबन्धो निर्मितो वर्तते। अयं संसारस्य सर्वापेक्षया सुविशालतमो बन्धः (बाँध) कथ्यते।

उत्कलयात्राप्रसङ्गे अहं राजगांगपुरात् सम्भलपुरं गतवान् आसम्। तत्र मदीयाः सुहृदः एके डॉ० कुञ्जबिहारीमिश्रनामानो विश्रुता विद्वांसः "गंगाधरमेहेर कालेजस्य" प्राचार्या आसन्। तत्र तेषामेव समायोजकत्वे बहुषु स्थानेषु भाषणादिप्रचारकार्यं जातम्। अनन्तरं श्रीमिश्रमहोदयानामेव प्रेरणया मम हीराकुण्डबाँधयोजनाया अवलोकनस्यापि कार्यक्रमो निर्धारितः। हीराकुण्डबन्धस्य समीपवर्तिनि बुर्लास्थाने बन्धस्य एके प्रधाना अधिकारिणो वसन्ति स्म, ये डॉ० मिश्रमहोदयानां शिष्या आसन्। २५.८.६७ दिनाङ्के अहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमिश्रमहोदयस्य पत्रमादाय 'बुर्ला' स्थानं गतवान्, अधिकारिणं मिलितवान्, तेन च सह भोजनं कृतवान्, कारयानेन च १० वादने बन्धस्यावलोकनार्थं प्रस्थितः। १० वादनात् त्रिवादनपर्यन्तं मया विश्रम्य विश्रम्य बन्धस्य विशालाया यन्त्रशालाया अवलोकनं कृतम्। तत् सर्वं दृश्यजातं मम अपरा सृष्टिरिव प्रतीयमानमासीत्। सर्वत्र स्वल्पं स्वल्पं दृष्टिपातेनापि मम शिरःपीडा जाता। तस्मादहं तमधिकरिणं निवर्तनाय निवेदितवान्। पुनः आवां बुर्लामागतौ। तत्र च चायपानेन किञ्चिद् भोज्यग्रहणेन च श्रान्तिमपनीय पुनः सायं सम्भलपुरं समागतः।

बन्धस्य परमं विस्मयावहम् अदृष्टपूर्वम् अविस्मरणीयं च दृश्यं दृष्ट्वा मम मनसि इयं भावना उत्पन्ना यत् भारतीयशिल्पिनां बुद्धिकौशलं कर्मकौशलं च परिज्ञातुं प्रत्येकं जनेन एतादृशानि स्थानानि अवलोकनीयानि।

कोणार्क—

अद्यापि हृन्नयनयोरतिमोहनं तत्
कोणार्कमन्दिरवरं सततं स्मरामि।
यस्याद्भुताऽमरकलाकृतयो जगत्याः
कौतूहलानि जनयन्ति नवागतानाम्॥ ४॥

उत्कलप्रदेशस्य कोणार्कनामकं सूर्यमन्दिरं शिल्पकलादृष्ट्या अद्वितीयं विश्वप्रसिद्धञ्च वर्तते। इदं स्थानं पुरीतः दशसु क्रोशेषु वर्तते यत्र सर्वदैव शतशः सहस्रशश्च देशवासिनो वैदेशिकाश्च पर्यटका अवलोकनार्थमागच्छन्ति। मन्दिरस्य विपुलो भागः सम्प्रति ध्वंसावशेषरूपेण अवस्थितो वर्तते इति दृष्ट्वा मनसि महत् कष्टं जायते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरी—

तन्मन्दिरस्य सुविशालतमं स्वरूपम्
दीर्घो महान् परिसरो बहुभृत्यवर्गः।
भूयान् प्रसादनिवहो बहवोऽर्चकाश्च
अद्यापि तत् सकलमेव मुदं विधत्ते॥ ५॥

श्रीजगन्नाथमन्दिरस्य विशालता, विस्तीर्णता, भव्यता, शिल्प-सौन्दर्यञ्चेति सर्वमपि सर्वथा अद्भुतमवर्णनीयं च विद्यते। मन्दिराभ्यन्तरे च अपरमेकं नाट्यमन्दिरं वर्तते यत्र कीर्तनं, भजनं, नृत्यं, गीतञ्चेति सर्वमपि भक्तिभावभरितं मनोरञ्जनं सर्वदैव प्रचलति, यात्रिणां मनांसि आह्लादयति च। एतदतिरिक्तं तत्रैकं भोगमन्दिरमपि विद्यते यत्र विपुलमात्रायां भगवतो भोगसामग्री निर्मीयते प्रसादरूपेण च भक्तजनेभ्यो वितीर्यते। पुर्याः स्थायिनिवासिनोऽपि बहवो मन्दिरात् प्रतिदिनं प्रसादं गृह्णन्ति। अतस्तत्र प्रतिदिनं प्रभूतमात्रायां प्रसादनिर्माणं भवति। तदनुसारमेव च प्रसादनिर्मातॄणां पाचकानां भृत्यानां च भूयसी संख्या भवति। पुनश्च प्रधानमन्दिरे उपमन्दिरेषु च अर्चकानां या संख्या भवति सापि न्यूना न भवति। मन्दिरस्य पुष्पलतामण्डपादिमण्डितः परिसरोऽपि सुमहानेव। एवं च मया मन्दिरे सर्वत्र या विशालता, विपुलता, भव्यता चावलोकिता सा स्मृतिगता अद्यापि मनो मोहयति प्रसादयति च।

एतदतिरिक्तं माधुर्ये सुविख्यातेन शिखरिणीच्छन्दसा निबद्धस्य श्रीजगन्नाथाष्टकस्य सदैव गीयमानानि उत्कलशैल्या स्तोत्राणि यन्मनोरञ्जयन्ति स्म स खलु अपर एव एको महान् लाभ आसीत् अविस्मरणीयः पुरीनिवासस्य।

अद्यापि मे प्रखरवाक्पतिराजमिश्र-
श्चिन्तामणिर्बुधवरः स्मृतिमेति शश्वत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

य: शब्दशास्त्रविषये सततं सुधीनां
सिंहो यथा सदसि गर्जति तर्जति स्म॥ ६॥

पुरीनिवासकाले मम तत्रत्यैर्बहुभिर्विद्वद्भिः सह परिचयो जातः, तेषां पाण्डित्यमवलोकितम्, तेषामध्यापन-भाषण-लेखनादि-कौशलमपि काले-काले प्रत्यक्षीकृतम्। परन्तु पुर्यां निवासिनां श्रीपण्डितचिन्तामणिमिश्रमहोदयानां स्वरूपं सर्वथा अनितरसाधारणमासीत्। व्याकरणशास्त्रस्य गहनमध्ययनं, शास्त्रचर्चासु प्रगल्भता, स्वाभिमानः, प्रतिपक्षिणां पक्षेषु निर्ममः प्रहारः, परेषामौद्धत्यस्य असहनम्, सततं शास्त्रावगाहनप्रवणता चेति तेषामनेके असाधारणा गुणा आसन् ये मया अनेकधा प्रत्यक्षमनुभूताः। अतएव तेषां पुनः पुनः स्मरणं जायते।

यस्यार्थदान - बहुवस्त्र - समर्पणैश्च
यात्रा ममाऽतिशिशिरेऽपि सुखप्रदाऽभूत्।
अद्यापि साधुजनभूषण - रामचन्द्र -
दासं सदा बहुकृतज्ञतया स्मरामि॥ ७॥

पुर्यां जगन्नाथमन्दिरस्यैव समीपे ''बलरामकोट''नामक एको महनीयो मठो वर्तते यस्य अधीश्वराः साधुशिरोमणयः श्रीरामचन्द्रदासमहाराजा आसन्। एतेषां शिष्यो ब्रह्मचारी अयोध्यादासोऽपि मम सुपरिचित आसीत्। अतः पुरीनिवासकाले मया अस्मिन् मठेऽपि कानिचिद् दिनानि यावद् उषितम्। अनन्तरं प्रदेशस्य अन्येष्वपि नगरेषु भ्रमणस्य मम कार्यक्रम आसीत्। परन्तु दिने दिने वर्द्धमानं शैत्यं मम अन्यनगरेषु भ्रमणे बाधकं भवति स्म। परन्तु शैत्यबाधानिवारणाय श्रीमहन्तमहोदयैस्तथाविधानि प्रभूतानि वस्त्राणि प्रदत्तानि, मार्ग-व्ययार्थं च द्रव्यव्यवस्था विहिता येन मम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यात्रा भयङ्करे शिशिरेऽपि सुखप्रदा जाता। अतः सर्वदैव कृतज्ञतया अहं बहुशस्तेषां स्मरणं करोमि। इदानीं तच्-शिष्या अयोध्यादास-महोदया एव मठाधीशाः, हिन्दुसमाजस्य च सेवायां सदा तत्परा नेतारः।

अद्यापि पावनपुरीनगरस्थ - लोक-
भाषाप्रचारसमितेर्युवकान् स्मरामि।
उच्चैःश्रवा इव नु ये निजतीव्रगत्या
व्याप्तुं समग्रजगतीमपि बद्धकक्षाः॥ ८॥

उत्कलेषु एका "लोकभाषाप्रचारसमिति"नाम्नी संस्था विराजते या विविधैः प्रकल्पैः संस्कृतप्रचारकार्ये संस्कृतभाषायाः लोकभाषात्वसम्पादने च बद्धपरिकरा वर्तते। १३.३.१९८३ दिनाङ्के अस्याः स्थापना अभूत्। प्रधानकार्यालयश्च पुर्यामेव "बड-ओडियामठे"सञ्चालितो वर्तते। अस्याः प्रचारकेन्द्राणि न केवलम् उत्कलेषु न वा केवलं भारते अपितु केषुचित् विदेशेष्वपि कार्यं कुर्वन्ति। पुस्तकान्यपि नानाविधानि प्रकाशितानि, पत्रिका चाप्येका प्रकाश्यतेऽनया संस्थया। एवं बहुविधैः कार्यकलापैः संस्कृतं सेवमानाया अस्या संस्थायाः संस्थापकाः सञ्चालकाः मार्गदर्शकाश्च सन्ति एके तरुणतपस्विनः डॉ० सदानन्ददीक्षितमहोदयाः। पुर्यां निवासकाले एतान् तथा एतेषां महोत्साहसम्पन्नान् सुबहून् प्रचारकान् दृष्ट्वा सम्मिल्य च मे महान् प्रमोदः समजायत।

अद्यापि विस्मयमुपैम्यहमुत्कलानां
श्रद्धां विलोक्य परमां भगवत्प्रसादे।
ते तत्प्रसादकणमात्रमपि प्रमादाद्
भूमौ पतेदिति न सोढुमहो समर्थाः॥ ९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्कलप्रदेशे सर्वत्रैव प्रसादविषयिणी एतादृशी श्रद्धा विलोक्यते। अतएव भोजनानन्तरं हस्तप्रक्षालनपि तादृशे स्थाने विधीयते यत्र पतितानामन्नकणानामुपरि कस्यापि पादनिक्षेपो न भवेत्। इदं मया प्रायः सर्वत्रैव दृष्टम्।

इदञ्च श्रूयते यत्तत्रैकदा गोस्वामितुलसीदासमहाभागा अपि जगन्नाथपुरीं गताः। परं तैः निवासभोजनादिव्यवस्था कतिचित्क्रोश-दूरवर्तिनि एकस्मिन् ग्रामे एव कृता येन पुर्य्यां कश्चन अतिचारो न भवेत्। स ग्रामः सम्प्रति तुलसीपुरनाम्ना प्रसिद्धो वर्तते। इदं कौतूहलं शमयितुमना अहमपि तत्र गतवान् एकदिनं च तुलसीपुरे स्थितवान्।

पुर्य्यां यथैव खलु कश्चन भेदभावो
भक्तेषु दृष्टिपथमेति न भोजनादौ।
देशेऽखिले प्रचलितास्तु तथैव रीति-
रद्यापि तत् प्रतिदिनं परिकल्पयामि॥ १०॥

हिन्दुसमाजे भोजनपानादिषु भेदभावः प्रायः सर्वत्र समान एव दृश्यते। परन्तु पुरीं समागताः सर्वेऽपि भक्तजनाः वर्णजातिभेदभावं परित्यज्य श्रद्धया सम्मिलितरूपेणैव भोजनपानादिकं विदधतीति हिन्दु-समाजस्य कृते परमं प्रमोदावहं दृश्यम्। इदं देशे सर्वत्र समानरूपेण प्रचलितं भूयादिति मया प्रतिदिनमत्र परिकल्प्यते स्म।

अद्यापि पावनपुरीनगरे द्विजाद्या
आदाय पण्यगतमोदन-सूप-शाकम्।
भेदं विहाय सकलैः सह भुञ्जते यत्
तन्मे प्रियं मतमदः सततं स्मरामि॥ ११॥

इदमपि जगन्नाथपुर्या एकमद्भुतम् अकल्पितपूर्वं च दृश्यं दृष्ट्वा प्रायेण सर्व एव यात्रिणः चकित-चकिताः भवन्ति यत् तत्र मन्दिर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समीपस्थे एव विशाले परिसरे शताधिकासु बृहतीषु लघ्वीषु च हण्डिकासु ओदनं, सूपं, शाकञ्च प्रचुरमात्रायां विक्रीयते। तत एव सर्वे यात्रिणः तत्सर्वं हण्डिकासु क्रीत्वा स्वमावासञ्च आनीय भुञ्जते। अत्र कोऽपि जातिगतो भेदभावो न दृश्यते। तद् अद्भुतमिव प्रतिभाति स्म पुरातनानां जनानां कृते, तत्र समागतानां तीर्थयात्रिणां कृते च। मयापि तदानीमेतत्सर्व्वं प्रियमपि विचित्रमिवैवानुभूतमिति तत् साश्चर्य-मिदानीमपि स्मरामि।

अद्यापि विस्मयभये मम, नाविकानां
बालान् विचिन्त्य सुलघूनपि, सागरे ये।
उत्तालताल - सम - तुङ्ग - तरङ्ग - भङ्गैः
खेलन्ति खे गतभया उडुपाधिरूढाः॥ १२॥

इदमद्भुतं दृश्यं ये साक्षान्नावलोकयन्ति ते कथनेन कल्पयितुं न शक्नुवन्ति। लघवो बालकाः लघ्वीषु नौकासूपविश्य ताः सागरे चालयन्ति। यदा च सागरे उत्तालास्तरङ्गा उद्भवन्ति उपरि च गच्छन्ति तदा ताः नौका अपि तरङ्गैः सहोपरि गच्छन्ति। परं तस्यां भीषणावस्थायामपि नौकाः न पतन्ति, न परिवर्तन्ते, न वा जलेन पूर्यन्ते न च तत्र स्थिता बालका एव भीता भवन्ति। पुनः तरङ्गैः सहैव नौका अधस्तादागच्छन्ति। अयं क्रमः सदैव सागरे प्रचलति। इदं स्मारं स्मारं मनसि अद्यापि मे विस्मयभये जायेते।

अद्यापि तद् विविध-वस्तु-सुयोग-दिव्यं
पुर्य्याः प्रसिद्ध-कृशरान्नमहं स्मरामि।
यत् तस्य सुष्ठु पचनेऽतिविलम्बहेतो-
र्नव्या जना अतितरां विकला भवन्ति॥ १३॥

पुर्य्याः कृशरान्नं नितरामद्भुतं भवति। तत्र बहूनि पौष्टिकानि स्वादिष्ठानि वस्तूनि शुष्कफलानि च निक्षिप्यन्ते, शनैः शनैश्च पाचनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवति। अतएव तन्निर्माणे भूयान् कालो गच्छति। मम संस्थाने यदा पुर्याः सुप्रसिद्धाः विद्वांसः श्रीचिन्तामणिमिश्रमहोदया आगच्छन्ति स्म तदा तेषां कृशरान्ननिर्माणे होराद्वयं याति स्म। तावत् पर्यन्तं वयं प्रतीक्षमाणा बुभुक्षिता विकलाश्च भवामः स्म। इदं खलु उत्कलप्रान्ते मया बहुत्र अनुभूतम्।

अद्यापि धार्मिककथासु च मन्दिरेषु
यज्ञोत्सवेषु च पुरोहितवर्गहस्ते।
ग्रन्थान् विलोक्य सकलानपि ताडपत्रे
श्रद्धा भवत्यति पुरातनपण्डितेषु॥ १४॥

उत्कलप्रदेशे प्रायः सर्वत्रैव सर्वाणि धार्मिककार्याणि ताडपत्रेषु लिखितैरेव ग्रन्थैः सम्पाद्यन्ते। येषां पण्डितानां गृहे ताडपत्रमयानि पुस्तकानि न भवन्ति, न ते श्रद्धेया भवन्ति। अतः सर्वेषामपि पण्डितानां गृहे अद्यापि पूजा-पाठ-कथा-सम्बद्धानि पुस्तकानि तादृशान्येव भवन्ति। पुर्य्याः श्रीजगन्नाथमन्दिरे प्रचुरमात्रायामिदं दृश्यं दृष्ट्वा महती श्रद्धा जायते। संस्कृतपुस्तकानि प्रायेण उडियालिप्यां भवन्ति।

पुरी—

अद्यापि विस्मृतमिदं न पुरीस्थवृत्तं
यन्मन्दिरेऽशनकृते विनिमन्त्रिता ये।
भुक्त्वात्र ते बहुविधान् खलु सूप-शाकान्
गत्वा पुनर्निजगृहान् सलिलं पिबन्ति॥ १५॥

भोजनस्य मध्ये अन्ते च जलं पेयं भवति स्वाददृष्ट्या, पाचनदृष्ट्या, स्वास्थ्यदृष्ट्या च। परन्तु एकदाहं यदा जगन्नाथमन्दिरस्य कस्मिंश्चिदुत्सवे भोजनार्थमामन्त्रितस्तदा इदं दृष्ट्वा मम परं कौतूहलं जातं यत् तत्र भोजनेन सह जलपानस्य कृते काऽपि व्यवस्था नासीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वे जलपात्रं विनैव भोजनार्थमुपविष्टा आसन्। पृष्टे सति ज्ञातं यत् तत्रत्या भोक्तारः गृहमेव गत्वा जलं पिबन्ति हस्तप्रक्षालनं च कुर्वन्ति। यद्यपि जलपानाय व्यवस्था मदर्थं कृता परं तत्रत्यानां कृते एष एव नियमः पालनीयो भवति। इदं दृश्यं मम सर्वथा अदृष्टपूर्वम् अननुभूतपूर्वं च आसीत्।

पुर्यां सुदूरतरमुच्छलदन्तरङ्गे
तीरेऽम्बुधेर्भयवशाद् धृतनाविकेन।
अस्नायि नूतनतया प्रथमं मया यत्
अद्यापि तन्मनसि भावयते भयं मे॥ १६॥

१५.११.५८ दिनाङ्के कलकत्तानगरादहं प्रस्थितः कटके भुवनेश्वरे च परिभ्रमन् सायं जगन्नाथपुरीं प्राप्तः। रात्रौ सदाशिवसंस्कृत-महाविद्यालये तत्रत्यैः पण्डितैर्विद्यार्थिभिश्च स्नेहात् सभाजित; आतिथ्येन सन्तर्पितश्च तत्रैव सुखं शयनमकार्षम्। प्रातः नित्यक्रियाभिर्निवृत्तः स्नानार्थं समुद्राभिमुखं प्रस्थितवान्। समुद्रदर्शनस्य समुद्रे स्नानस्य च अयं मे प्रथमः शुभावसर आसीत्। समुद्रः कीदृशो भवतीति चिन्तयन्नहं यावदग्रे गतवान् तावन्मया पुरतः किञ्चिद्दूरे हरितायमानः बृहदाढकीक्षेत्रमिव विशालः परिसरो दृष्टः। पूर्वं मया स परिसरो हरितवर्णं वनं वा, कदलीकदम्बकं वा, विशालम् आढकीक्षेत्रं वा इत्येवानुभूतम्। परं किञ्चित् समीपतरं गते मया ज्ञातमिदं यदयमेव समुद्रो वर्तते। समुद्रतटं सम्प्राप्य महदाश्चर्यं, महती प्रसन्नता, सुमहत् कौतूहलञ्च सञ्जातम्। काव्येषु लिखितं पठितञ्च समुद्रवर्णनं तस्मिन् दिने साक्षात्कृतमिति महान् सन्तोषो जातः।

अनन्तरं स्नानार्थं जलप्रवेशावसरे महती भीतिरजायत। यदा दूरादुच्छलन्तस्तरङ्गाः तटं व्याप्नुवन्ति स्म तदा तीरस्थिताः सर्वे जना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्तव्यस्ताः निर्वस्त्रा दूरे क्षिप्ताश्च भवन्ति स्म। इदं सर्वं दृष्ट्वा अहं बलवद्भीत आसम्। परं तत्रत्याः केचन नाविका द्रव्यं गृहीत्वा स्नानार्थिनां हस्तं च धृत्वा तान् स्नापयन्ति स्म। ततश्च मयापि द्रव्यं दत्त्वा नाविकस्य हस्तं च दृढं धृत्वा भीतभीतेन यथाकथञ्चित् स्नानं विहितम्। तत् स्मृत्वा इदानीमपि काचिद् भीतिर्जायते एव।

ब्रह्मपुर—

अद्यापि ब्रह्मपुरवासि-सुधीजनानां
तत् स्वागतं किमपि नव्यमहं स्मरामि।
येषां गृहेषु "उपमा इडली च दोषा"
भुक्तान्यभुक्तचर - दक्षिणभोजनानि॥ १७॥

उत्कलप्रदेशस्य गंजाममण्डलस्थिते ब्रह्मपुरनगरे अहं २०.११.५८तमे दिनाङ्के सम्प्राप्तः तत्रत्ये च महाविद्यालये स्थितः। तत्र लोकसभासदस्यानां सुप्रतिष्ठितानां विदुषां श्रीमदनन्तशर्मत्रिपाठि-महोदयानां सहयोगेन प्रचारकार्यं सम्पादितम्।

गंजाममण्डलं खलु आन्ध्रप्रदेशसन्निहितं भवति। अतएव ब्रह्मपुरस्य आपणेषु विदुषां गृहेषु च आन्ध्रप्रदेशीयं भोजनम् उपमा, इडली, डोसा, साम्भर, इत्यादिकञ्च विपुलमात्रायां लभ्यते। मया सर्वप्रथमं तत्रैव एतेषां भोज्यवस्तूनामुपयोगः कृतः। तत्रापि "इडली" स्वरूपेण स्वादेन च मम सविशेषमाकर्षकमासीत्।

भुवनेश्वर—

अत्युच्च - शृङ्गवर - शोभित - लिङ्गराज-
देवालयं प्रथममेव निरीक्ष्य दूरात्।
जातोत्कलेषु मम पावनधारणा या
साद्यापि चेतसि विराजत एव नित्यम्॥ १८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१२.११.५८ दिनाङ्के कलकत्तानगरात् प्रस्थाय द्वितीयदिनेऽहं प्रातर्भुवनेश्वरं प्राप्तवान्। तत्र दूरादेव मदीया दृष्टिः स्थापत्यकलायाः परमोत्कृष्टरूपेण विराजमानस्य श्रीलिङ्गराजमन्दिरस्य शिखरोपरि निपतिता। शिल्पकलादृष्ट्या अत्यद्भुतं शिखरमिदं सप्तमे खृष्टाब्दे उत्कलप्रदेशस्य तदानीन्तनेन राज्ञा ललाटेन्दुकेशरीमहाभागेन निर्मितमासीत् यत् कीर्तिपताकेव भुवनेश्वरस्य गौरवं दिग्दिगन्ते विख्यापयति। शिखरमेव दृष्ट्वा मदीये हृदये उत्कलान् प्रति गरीयसी श्रद्धा समुदपद्यत। अनन्तरं पार्श्ववर्तिभिरनेकैर्मन्दिरैः परिवेष्टितस्य श्रीलिङ्गराजमन्दिरस्य दर्शनं परिक्रमां च विधाय तत्रत्यैः विद्वद्भिः सह मिलित्वा, तत्रत्ये संस्कृतविद्यालये संस्कृतप्रचारगोष्ठ्यां च संस्कृतप्रचारविषयिणीं चर्चां सम्पाद्य भुवनेश्वरस्य कार्यक्रमः समापितः। उत्कलप्रदेशस्य इयं मम प्रथमा यात्रा आसीत्।

ब्रह्मेत्युपाधिममितप्रतिभान्वितं श्री-
गौरीकुमारविबुधं प्रमुदा स्मरामि।
यस्योत्कलांग्लसुरवाक्षु विलक्षणा वाग्-
धाराधुनापि मम मोहयतीव चित्तम्॥ १९॥

भुवनेश्वरसंस्थायाः, उड़िया-साहित्यअकादमीसंस्थायाः सम्पादकः "श्रीगौरीकुमारब्रह्मा" महोदयः एकः अद्वितीयो वक्ता आसीत्। उत्कलभाषायां, संस्कृतभाषायाम् आंग्लभाषायाञ्च तस्य निरर्गला वाग्धारा सर्वानपि श्रोतॄन् मन्त्रमुग्धान् करोति स्म। मया तस्य भाषणम् उत्कलीये सम्भलपुरनगरे २०.८.६७ दिनाङ्के, संस्कृतभाषणं तथा भुवनेश्वरे २८.१२.८५ दिनाङ्के आंग्लभाषणं कटकनगरे श्रुतम्। संस्कृतमाध्यमेन विविधहास्यरससामग्र्या उपस्थापनेऽपि तस्याद्भुतं कौशलमासीत्। एतेन कारणेन ब्रह्मामहोदयो मया वाराणस्यां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतविश्वविद्यालये समायोजिते स्वसंस्थाया विशेषाधिवेशने सानुरोधमामन्त्रितो, यत्र तस्य ललितं मधुरं धारा-प्रवाहमण्डितं च भाषणं श्रुत्वा सर्वे पण्डिता आश्चर्यचकिता अभूवन्। एतस्य अनेका रचना अपि प्राकाश्यं प्रख्यातिञ्च गताः सन्ति।

मुक्तिप्रदामथ पुरीं समुपेत्य चेतो
हृष्टं, परन्तु मम केवलवाक्प्रचारे
सक्तस्य मुक्तिरिह जन्मनि वा सुलभ्या?
अद्यापि तां मम मनो न जहाति चिन्ताम्॥ २०॥

भुवनेश्वरे भ्रमणं समाप्य १५.११.५८दिनाङ्के अहं रात्रौ श्रीजगन्नाथपुरीं सम्प्राप्तः। चिरप्रतीक्षिता आसीत् मम पुरीयात्रा। मोक्षदायिकासु पुरीषु इयमन्यतमा। इदञ्चाप्येकं ममात्रागमनेच्छायां विशिष्टं कारणमासीत्। परन्तु शमदमादिसाधनेभ्यो रहितस्य जनस्य केवलं संस्कृतप्रचारद्वारा मुक्तिर्लब्धुं शक्यते न वा? इति संशयस्तदानीमपि मम मनसि घूर्णमान आसीत्, इदानीमपि च स तदवस्थ एव। अमरवाणीप्रचारेण अमरत्वं सुलभं स्याद् परं मुक्तिस्तु सदुर्लभैव।

राउरकेला—

अद्यापि तं दिवसमेकमभूतपूर्वं
स्मृत्वा भवामि मुदितश्च सुविस्मितश्च।
यस्मिन् दिगम्बरसुधी-गृहिणी सुशीला
संभोज्य भूरि चरणौ समवाहयन्मे॥ २१॥

उत्कलप्रदेशस्य सम्प्रति 'इस्पातनगर' नाम्ना प्रसिद्धं 'राउरकेलानगरं सर्वविदितं वर्तते। तत्रत्ये एव उच्चाङ्गलविद्यालये संस्कृताध्यापकाः श्रीदिगम्बरमहापात्रमहोदया मम चिरपरिचिताः सुहृदः। एते न केवलं विद्यालयशिक्षकाः अपितु संस्कृतप्रचारे, संस्कृत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिक्षणशिविराणां सञ्चालने, संस्कृतकाव्यलेखने, ललित-सरलगीत-निर्माणे,. चित्रकलायां, हास्यविनोदादिषु च नितरां प्रवीणा वर्तन्ते। एभिरेव गुणैरेते विदेशेष्वपि सम्यक्तया संस्कृतप्रचारं कृतवन्तः।'

एकदा राउरकेलासमीपवर्तिनि व्यासाश्रमे सञ्चाल्यमानस्य गुरुकुलस्य वार्षिकोत्सवे सम्मिलितुं ३.३.८१ दिनाङ्के व्यासाश्रमं प्राप्तः। तत्र च दिनत्रयं स्थित्वा सभाकार्यं च सम्पाद्य ३.६.८१ दिनाङ्के राउररकेलास्थाने महापात्रमहोदयानां गृहं प्राप्तः। तत्र महता स्नेहेन, मधुरालापैः, उत्कलप्रदेशीयभोजनपानादिभिश्च मम अतितरामाह्लादकमातिथ्यं विहितम्। परं सर्वाऽपेक्षया अविस्मरणीयमातिथ्यं मम इदमासीत् यत् भोजनानन्तरं मयि विश्राम्यति महापात्रमहोदयानां श्रद्धामयी पत्नी आगत्य मम पादयोः संवाहने संलग्ना, बहुधा निवार्यमाणापि च "कदा पुनरीदृशं सौभाग्यं लप्स्यते" इति उत्कलीयभाषायां कथयन्ती संवाहनात् शीघ्रं विरता न अभवत्। एतादृशमातिथ्यं मया सम्पूर्णे भारतेऽपि न कुत्रापि प्राप्तमिति इदं वृत्तं मम जीवनस्य अभूतपूर्वा घटना वर्तते।

वेदव्यास—

अद्यापि उत्कलभुवो महनीयवेद-
व्यासाश्रमं सुविमलं सततं स्मरामि।
यत्रादिवासिजन - बालक - शिष्यवर्गे
स्थित्वा सुखं त्रिचतुराणि दिनान्यनैषम्॥ २२॥

उत्कलप्रदेशस्थ-राउरकेलानगरान्नातिदूरवर्तिनि वेदव्यास-नामके स्थाने "वैदिकगुरुकुल आश्रम" नाम्ना एकं बृहत् गुरुकुलं विराजते यस्य वार्षिकोत्सवे सम्मिलितुमहं ४.३.८१ दिनाङ्के तत्र सम्प्राप्तः। गुरुकुलेऽस्मिन् जातिनिर्विशेषं सर्वेऽपि हिन्दुबालकाः ग्रामवासिनो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वनवासिनश्च गुरुकुलपद्धत्या पाठ्यन्ते। तत्र वनवासिनामपि छात्राणां मुखात् अष्टाध्यायीं, काशिकां, महाभाष्यञ्च श्रुत्वा मे महदाश्चर्यमभूत् महानानन्दश्च। तैः सह त्रिचतुराणि दिनानि उषित्वा, शयित्वा, भुक्त्वा, पीत्वा, आलप्य, भ्रमित्वा च परमं प्रमोदमन्वभवम्।

अद्यापि तानि जयदेवकवित्वगीत-
स्पर्धीनि नूतनतया श्रुतिमागतानि।
नानोत्कलीयकविनिर्मित - गीतकानि
श्रोतुं पुनः पुनरभीप्सति मानसं मे॥ २३॥

उत्कलेषु जयदेवविरचितं सुप्रसिद्धं गीतगोविन्दकाव्यमनुसृत्य अन्यैरपि कविभिरनेकानि गीतकाव्यानि लिखितानि। तेषु केषाञ्चित् काव्यानां काव्यकर्तृणाञ्च नामानि अधस्तात् दीयन्ते—

१. कविचन्दरायदिवाकरमिश्रप्रणीतम्-'अभिनवगीतगोविन्दम्'
२. कविनित्यानन्दविरचितम्—"श्रीकृष्णलीलामृतम्"।
३. यतीन्द्ररघूत्तमविरचितम्—"मुकुन्दविलासकाव्यामृतम्"।
४. अनादिमित्रविरचिता—"केलिकल्लोलिनी"।
५. कमललोचनखड्गराय-विरचितम्—"गीतमुकुन्दम्"।
६. नारायणभंजविरचितम्—"रुक्मिणीपरिणयकाव्यम्"।

एवमेव गीतबहुलानि नाटकान्यपि अनेकानि उत्कलवासिभिः कविभिः विरचितानि। कटके, भुवनेश्वरे, पुर्य्याञ्च निवसता मया इमानि पुस्तकानि दृष्टानि। गीतानि च तत्रत्यानां विदुषां विद्यार्थिनां च सुमधुरध्वनिभिः समाकर्णितानि।

अथ च प्रकाशितपुस्तकातिरिक्तम् उड़ियालिप्यां लिखितेषु अप्रकाशितपुस्तकेष्वपि बहूनि गीतपुस्तकानि मया दृष्टानि पुरीस्थ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सदाशिवसंस्कृतमहाविद्यालयस्य पुस्तकालये। तेषु गीत-पुस्तकेषु एकस्मिन् पुस्तके मया एकमत्यन्तं मनोहरं गीतं दृष्टम्। तदिह गीतरसिकानां कृते अधस्तादुल्लिख्यते—

रमते शरदागमसमये
मम सखि! मानसमधिकमये! रमते०-
प्रमुदितकुमुदे प्रभवतिकुमुदे प्रसरदमृतनिकरे,
शुचि-रुचि-सघने शोभितगगने राजितरजनिकरे॥
रमते शरदागमसमये०—
विदलितनलिने मञ्जुलपुलिने यामुन-विमल-जले।
विचकिलकलिते सौरभमिलिते कुसुमित-विपिनतले॥
रमते शरदागमसमये०—
अवसर-उचिते व्रजभुवि रचिते मनसिज-नृपति-जये।
युवजनमहिते पंकविरहिते निर्जितजलदचये॥
रमते शरदागमसमये०—
इह मम वलते रतिरतिललिते निशि निशि किरणसिते,
यामुनविपिने व्रजजनसुपिने वनमालिनि दयिते॥
रमते शरदागमसमये०—

आशासे, गीतमिदं नूनमेव गीतरसिकानां कृते प्रमोदावहं स्यात् इति।

उत्कलप्रशस्तिः—

नीलाचलाद्रि - परिसेवित - शीर्षभागः
प्रक्षाल्यमानचरणो जलधेस्तरङ्गैः।
देवत्रयीवरकृपा - परिपाल्यमानः
सौन्दर्यधाम भुवि विश्रुतमुत्कलोऽयम्॥ २४॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ६ :

उत्तरप्रदेशीयानि संस्मरणानि

अयोध्या—

अद्यापि बाल्यसमये सततं समन्ताद्
गेहे बहिः पथि पथि भ्रमतां कपीनाम्।
आक्रोश-धावन - पलायन - युद्ध - लिप्सा-
द्युच्छृङ्खलानि चरितानि सदा स्मरामि॥ १॥

इदं मम सर्वप्रथमस्य अयोध्यानिवासस्य बाल्यकालीनाया: छात्रावस्थाया: संस्मरणं विद्यते यदाऽहं स्वमातापितृभ्यां सह अयोध्याया एकस्मिन् संस्कृतविद्यालये पठन्नासम्। अत्र निवासकाले मम सदैव वानरैः सह सङ्घर्षः प्रचलति स्म।

अद्यापि साधुजन - भोजन - पाचनार्थं
पात्राणि यानि सुबृहन्ति विलोकितानि।
येषु प्रविश्य च जनाः खलु मार्जयन्ति
पात्राणि, तानि ननु विस्मयमावहन्ति॥ २॥

उत्तरप्रदेशीय-संस्कृताध्यापक-सम्मेलने भागग्रहणार्थमहं २६.११.७६ दिनाङ्के अयोध्यां प्राप्तवान् आसम्। सम्मेलनस्य सर्वेषु कार्यक्रमेषु समाप्तिं गतेषु अयोध्याया बृहत्सु मठेषु भ्रमणस्य, मठाधीशैः सह मिलनस्य तथा तैः सह संस्कृतचर्चायाः कार्यक्रमाः प्रचलिताः। अस्मिन् क्रमे कतिपयेषु बृहन्मठेषु असंख्यसाधूनां सामूहिकभोजनस्य (भण्डारा) कार्यक्रमं दृष्ट्वा, तदनु विशालानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूपौदनपाकपात्राणि च इदम्प्रथमतया दृष्ट्वा मम सुमहदाश्चर्यं जातम्। पात्राणि तथा विशालानि आसन् यथा भृत्यास्तेषु प्रविश्य हस्ताभ्यां पादाभ्यां च तेषां मार्जनं कुर्वन्ति स्म।

अद्यापि भूरि जनयन्ति कुतूहलं मेऽ-
योध्यानिवासि - नवभक्त - सखीजनास्ते।
ये रूप-शील-वसनाभरणेङ्गितानि
योषेव बिभ्रति, कदापि न च त्रपन्ते॥ ३॥

अयोध्यायां केचन ईदृशा रामभक्ता भवन्ति येषां समाजः 'सखीसमाज' इति कथ्यते। ते स्त्रीरूपेण भगवतः उपासनां कुर्वन्ति। तेषां वस्त्राणि, आभरणानि, आहार-विहारादीनि, इङ्गितानि च महिलासदृशानि भवन्ति, परं न तत्र काञ्चित् त्रपामनुभवन्ति। मम परिचितेषु तेषु एकः कृष्णवर्णः स्थूलकायश्च भक्त आसीत्, तम् अनेके "महिषीसखी" इति कथयित्वा उपहसन्ति स्म। इदं सर्वं मम महत् कुतूहलं जनयति स्म इति तत् कदापि विस्मृतिं न याति।

किमधिकम्, नामान्यपि तेषां स्त्रीलिङ्गानि एव भवन्ति। यथा— रूपकला, दिव्यकला, अनुरागकला इत्यादीनि।

अद्यापि राममयकीर्तन-गीत-घोषैः
श्रीरामरामसहितैरभिवादनैश्च।
रामायणप्रवचनैश्च पुरं समस्तं
श्रीरामनाममयमेव सदा विभाति॥ ४॥

अयोध्यायां यः कोऽपि जनो यदा कदा वा, येन केनापि वा मार्गेण प्रवेशं करोति तस्य कर्णौ रामनाम्ना परिपूरितौ भवतः। अत्र रामस्यैव कीर्तनानि भवन्ति, रामस्यैव गीतानि गीयन्ते तथा घोषा अपि रामस्यैव उच्चार्यन्ते। यथा—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१. तू राम भजन कर प्राणी, तेरी दो दिन की जिन्दगानी।

२. राम राम रटते रहो जब तक घट में प्राण।

किमधिकम्, अत्र नमस्कारोऽपि रामशब्देनैव विधीयते। जनाः कथयन्ति—*राम राम भाई, राम राम,*

जय श्रीराम जय श्रीराम, सीताराम सीताराम, इत्यादि।

एवं मठे मठे, मन्दिरे मन्दिरे, भवने भवने च सदा रामायणस्य पाठो भवति, प्रवचनानि च जायन्ते। रामलीलाया आयोजनं भवति। रामसम्बधीनि नाटकानि अभिनीयन्ते। रामनामाङ्कितानि वस्त्राणि धार्यन्ते। बहुभिः शरीरेऽपि रामनामानि अङ्कितानि क्रियन्ते। एवं सम्पूर्णमपि नगरं राममयं दृष्टिगोचरीभवति।

अद्याप्यहं तमृषितुल्यतपस्विनं त्या-
गानन्द - नामकमतिप्रणतः स्मरामि।
संस्थाप्य यो गुरुकुलं गिरमध्ययोध्यं
दैवीं जनस्य वदने वदने व्यतानीत्॥ ५॥

४.३.१९५७ दिनाङ्के एकदा अहमयोध्यां सम्प्राप्तः। तन्निकटवर्तिन्येव एकस्मिन् सुबृहति वृक्षलता-कुसुमकुञ्ज-मण्डिते परिसरे श्रीस्वामित्यागानन्दमहोदयाः गुरुकुलं संस्थाप्य संस्कृत-शास्त्राणां संस्कृतभाषायाश्च संरक्षणे प्रचारे च संलग्ना आसन्। सर्वेऽपि गुरुकुलच्छात्राः प्रायेण संस्कृतभाषयैव व्यवहरन्ति स्म। तथैव अन्ये छात्रा अपि स्वामिमहोदयानां प्रेरणया सदा संस्कृतभाषया व्यवहरन्तः क्षेत्रेऽस्मिन् संस्कृतसमाजस्यादर्शभूता आसन्। साधारण-समाजे चापि लोकभाषामिव संस्कृतं वदन्ति स्म। ८.३. दिनाङ्के सम्पन्ने गुरुकुलस्य वार्षिकोत्सवेऽपि सम्मिलितोऽहं स्वामिमहोदयानां त्यागतपोमयं जीवनं, ब्रह्मचारिणां च भाषण-सङ्गीत-नाटकादिकौशलं दृष्ट्वा महतीं प्रसन्नतामन्वभवम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि दाशरथि - पावन - जन्मभूमौ
भग्नानि मन्दिरशतानि विलोकितानि।
अस्वच्छता च परितो बहुभिक्षवश्च
सर्वं मदीयहृदयं सततं दुनोति॥ ६॥

भगवतः श्रीरामचन्द्रस्य जन्मभूमौ अयोध्यानगर्यां शताधिकानां लघुलघुमन्दिराणां नग्नभग्नावस्था, संकीर्णासु वीथींषु नालिकासु च अस्वच्छता, स्थले स्थले भिक्षु-भिक्षुकीणां च समुदायस्य भिक्षाटनञ्चैतादृशी स्थितिः सर्वथा अशोभनीया लज्जावहा च भवति। अतः अयोध्याया मठाधीशैः, प्रतिष्ठितैः नागरिकैः, सामाजिकैः जनैः प्रशासनेन च तथा प्रयासः कर्तव्यो येनेयं विश्वप्रसिद्धा धर्मनगरी आदर्शरूपतां प्राप्नुयात्, हिन्दुसमाजस्य च प्रतिष्ठा वर्धेत।

अद्यापि संस्कृतगिरं खलु राष्ट्रभाषां
कर्तुं प्रचण्डपवनोपमशक्तिमूर्तिम्।
निर्भीकवाचमवधूतसमं सदा श्री-
कालीप्रसादसुहृदं हृदये बिभर्मि॥ ७॥

अस्यामेव शताब्द्यां संस्कृतं राष्ट्रभाषा भवेदिति महाबलवतीमाकांक्षां हृदये धारयन्तः "संस्कृतम्" साप्ताहिकपत्रस्य सुप्रसिद्धाः सम्पादकप्रवराः श्रीकालीप्रसादमिश्रमहोदयाः संस्कृत-जगति सुविख्यातााः संस्कृतपक्षधरा आसन्। ते स्वभावेन महामनस्विनः स्वाभिमानिनश्च आसन्। संस्कृतपक्षे निर्भीकवक्ता तादृशो दुर्लभ एवासीत्। स्वकीयसंस्कृतपत्रद्वारेण तैः सम्पूर्णे देशे, उत्तरदक्षिणयोः संस्कृतविद्वत्समाजे च महती क्रान्तिरुत्पादिता प्रबलं च साहसं प्रदत्तम्। आवयोः हार्दिकं सौमनस्यं, साम्मनस्यं, सौहार्दं, साहचर्यं च आसीदिति ते यथापूर्वं मम हृदये विराजन्त एव इदानीमपि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि विस्मृतिमसौ नहि यात्यपूर्वो
विख्यातदार्शनिकवर्यगृहे निवासः।
यत्रालभे निशि सुधाऽशनपानसौख्यं
प्रातश्च पात्रपरिमार्जनकर्मकष्टम्॥ ८॥

अयोध्यायां "दार्शनिकसार्वभौम" इति विरुदेन विख्याता एके श्रीवासुदेवाचार्यनामानो वैष्णवा आसन् विद्वांसः। एकदा तेषामाश्रमे निवासस्य मयावसरः सम्प्राप्तः। दिने साधारणमातिथ्यं विधाय रात्रौ मम भोजनाय तैः विशेषव्यवस्था कृता। परं भोजननिर्माणं मयैव कर्तव्यमभूत्। ततोऽहं तेषामाग्रहानुसारं संयाव-शष्कुली-शाकादि-निर्माणं कृत्वा सम्यक् भोजनं च सम्पाद्य रात्रौ सुखं सुप्तवान्, परं प्रभाते यदा प्रसन्नमुद्रायामुत्थितस्तदा इदं ज्ञात्वा मम घोरं कष्टमभूद् यत् पाकपात्राणि सर्वाणि मयैव मार्जनीयानि भविष्यन्ति। तदर्थं तत्र कोऽपि भृत्यो नासीत्। मठस्थाः सर्वे "स्वयं दासास्तपस्विनः" आसन्। ततो मया विवशतया सर्वाणि पात्राणि मार्जितानि, पाकस्थानं प्रक्षालितम्, अवशिष्टवस्तूनि च यथास्थानं स्थापितानि। तदनन्तरं मम ततो मुक्तिर्जाता। तदिदं पात्रमार्जनं मम यात्राकालीनं प्रथमं वृत्तमासीदेतादृशम्। ततः परमन्यत्र कुत्रापि एतादृशी स्थितिर्नागता।

अद्यापि संस्कृतविदां समितौ "अयोध्या"-
पुर्यां निशम्य मम साधुविरुद्धवाचः।
मद्भावि - ताडनभयादतिवेपमानं
भीतं सभापतिमहं सदयः स्मरामि॥ ९॥

अयोध्यायां हनुमानगढ़ीसंस्कृतमहाविद्यालयस्य उद्घाटनसमारोहे मया स्वभाषणे साधूनां जीवनचर्याया आलोचना कृता तथा तेषां केवलं "भण्डारा एवं डोलडाल" इति कृत्यद्वये एव कालयापनस्य निन्दा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विहिता। तत्र उपस्थिते महति साधुसन्तसमाजे मदीयमीदृशं भाषणं शृण्वानाः सभापतयः श्रीवेदान्तीजीमहोदया नितान्तं भयभीता जातास्तथा मां तत्प्रसङ्गं परित्यक्तुं सङ्केतितवन्तः। सभाया अवसाने तैरेकान्ते कथितम्—प्रायेण अधिकाः साधवोऽशिक्षिताः संस्कृत-ज्ञानरहिताश्चासन्। यदि ते भवदीयभाषणस्याशयं ज्ञातवन्तोऽभविष्यन् तर्हि सुमहत्संकटं समापतिष्यत्। साधुसमुदाये एवं न कदापि वक्तव्यम्। एते आचार्यनरेन्द्रदेवं तथा मालवीयमहोदयञ्चापि न परित्यक्तवन्तः इति।

अलीगढ़—

ये मुस्लिमाः सुरगिरः खलु पुस्तकानां
उर्दूगिराऽनुवदनं प्रतिषेधयन्ति।
उत्पादयन्ति च मिथो बत वैमनस्यम्
अद्यापि तन्मम मनश्चकितं विधत्ते॥ १०॥

सुविख्यातेन दिल्लीनिवासिना उर्दूकविना श्रीसागरनिजामी-महोदयेन अभिज्ञानशाकुन्तलस्य उर्दूपद्यानुवादो विहितः, समीक्षायै च बहुभ्यः उर्दूसाहित्यकारेभ्यः प्रदत्तः। तासां समीक्षाणामेकः लघु-संग्रहोऽपि तेन प्रकाशितः। अस्मिन् संग्रहे इदं दृष्ट्वा मम महान् विस्मयो जातो यत् कतिपयैर्मुस्लिमकविभिरिदमनुवादकार्यं नाऽन्वमन्यत।

यदा मया कालिदाससाहित्यप्रदर्शन्या आयोजनावसरे अयमनुवादः तत्समीक्षापुस्तकं च अवलोकितं तदा इदं सर्वं वृत्तं मया ज्ञातम्। परन्तु यदा अनेकैः पूर्वतनैरद्यतनैश्च मुस्लिमविद्वद्भिः संस्कृते रचना कृता क्रियते च तदा अनुवादलेखने को दोषः?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्यायालयस्य शिखरेष्वधिरोहणं मे
नाद्यापि विस्मृतमिदं बहुकष्टसाध्यम्।
यत्कारणाद् भृशमजायत ताडनं मे
शिक्षा च मेऽसमयमेव गता समाप्तिम्॥ ११॥

१९४७ तमे वत्सरे यदाऽहं काशिकराजकीयसंस्कृतमहाविद्यालये (इदानीं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः) अधीयान आसं तदा कांग्रेसद्वारा स्वतन्त्रतायाः आन्दोलनं संचाल्यते स्म। अस्मिन्नेव प्रसङ्गे महाविद्यालस्य छात्रैः सह अहमपि वाराणस्याः न्यायालयस्य उपरि ध्वजारोहणार्थं गतवान् आसम्। परन्तु आरोहन्तो वयं सर्वेऽपि सैनिकैरवरुद्धाः, आरूढाश्च पातिताः तथा ताडिताश्च। परन्तु एतावता मम आन्दोलने शैथिल्यं नागतम्, अपितु वृद्धिरेव संजाता। एतेन कारणेन अहं वेदाचार्यपरीक्षाया अन्तिमं खण्डं दातुं नापारयम्, शिक्षाक्रमश्च मम मध्य एव भग्नो जातः।

अद्यापि राजपदभाक् बलदेवदासो
बिड्लामहोदयवरो हृदि राजते मे।
यन्नव्यशब्दरचना विदुषां न केषां
चेतश्चमत्कृतिमयं कुरुते स्म सद्यः॥ १२॥

विश्वविख्याता भारतीया उद्योगपतयः श्रीराजाबलदेवदास-बिड्लामहोदया वृद्धावस्थायां प्रायेण महमूरगंजस्थिते स्वकीये भवने निवासं कुर्वन्ति स्म। तेषु दिनेषु प्रतिदिनं प्रातः वाराणसेयाः संस्कृतविद्वांसस्तेषां निवासस्थले आगच्छन्ति स्म, तेषां गोष्ठी भवति स्म, विविधशास्त्रेषु चर्चा भवति स्म तथा तत्र श्रीबिड्लामहोदया अपि सोत्साहं भागं गृह्णन्ति स्म। अवसाने च तस्मिन्नवसरे समागतेभ्यः सर्वेभ्यो विद्वद्भ्यो दक्षिणां ददति स्म। एतदतिरिक्तं ते नूतनसंस्कृत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शब्दानां रचनां कृत्वापि विदुषां मनोरञ्जनं कुर्वन्ति स्म। यथा—अनुनासिक (चश्मा) आलंकर्ता (अलकतरा) इत्यादि।

आगरा—

अद्यापि तत् प्रबलवादविवादलग्नं
ख्याताऽऽगरानगरवर्ति - सदः स्मरामि।
यत् संस्कृतं भवतु सन्धिसमासयुक्तं
नो वेति वादविषये रणभूमिरासीत्॥ १३॥

२४.१२.४७ दिनाङ्के आगरानगरे अ.भा. संस्कृतहासम्मेलनं समायोजितमासीत्। इदं दिनत्रयं प्राचलत्। अस्मिन् समारोहे संस्कृतस्य गद्यपद्यमयीषु रचनासु सन्धिसमासयोर्व्यवहारो भवेन्नवा इति विषये महान् विवादः समभूत्। समारोहस्य संयोजकः आचार्य-श्रीश्यामकुमारः सन्धिसमासवर्जनस्य प्रबलः पक्षधरः आसीत्। तस्मात् सारल्यार्थमपरेऽपि बहवो विद्वांसः पक्षस्यास्य समर्थनं कृतवन्तः। परं कतिपये विद्वांसः पक्षस्यास्य समर्थनं न कृतवन्तः प्रत्युत कतिपये विद्वांसः पक्षस्यास्य घोरविरोधिनः आसन्। आचार्यश्री-श्यामकुमारः स्वपक्षस्य समर्थनाय तत्स्वरूपनिरूपणाय च एकं पुस्तकं प्रकाशितवान्—"कीदृशं संस्कृतम्" इति। अस्मिन् पुस्तके संस्कृतशिक्षणं सरलं सुबोधं च कर्तुमनेके उपायाः प्रदर्शिताः सन्ति।

अद्यापि "ताजमहले"ति जगत्प्रसिद्धं
तद् दम्पतिप्रणयपीठमहं स्मरामि।
यत्रागता युवतयो युवकाश्च सौधं
दृष्ट्वा क्षणं स्वमपि किञ्चन विस्मरन्ति॥ १४॥

इदं ताजमहलनामकं विश्वप्रसिद्धसौधं शाहजहाँनृपतिना स्वप्रेयस्याः मुमताजबेगममहोदयायाः स्मारकरूपे निर्मापितम्। इदं सौधं शिल्पकलादृष्ट्या न केवलं भारतस्य अपितु विश्वस्य एकं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परमाश्चर्यकरं दर्शनीयस्थलं वर्तते। आगरानिवासकाले अहमत्र द्वित्रिवारमागतः परं सदा अतृप्त एव निवृत्तो भवामि स्म।

एतत्स्थानावलोकनसमये संस्कृतभाषायाः दम्पतिप्रणय-सम्बन्धिन्यः कविताः, उर्दूभाषायाश्च "इश्क-मुहब्बत" सम्बन्धीनि पद्यानि गजलगीतानि च बलादिव मुखान्निःसरन्ति रसिकजनानाम्।

आजमगढ़—

अद्यापि आजमगढ़े नगरे तदीशा-
वास्येतिनामभवनं सततं स्मरामि।
एतेन वैदिकपदेन नु यत्र "रेक्सा"-
सञ्चालकाः परिचिता निखिला अभूवन्॥ १५॥

उत्तरप्रदेशस्य पूर्वाञ्चलवर्तिनि आजमगढ़नगरे चन्द्रदत्त-त्रिपाठिनामानः एके विश्रुतयशसः सुसम्पन्नाः संस्कृतप्रणयिनश्च वैद्यप्रवरा आसन्। तेषां संस्कृतानुरागवशात् अनेकवारं तदीयगृहे मम गमनं भवति स्म। एतैः स्वकीयगृहस्य नामं "ईशावास्यम्" इति कृतमासीत् तथा च इदं नाम नगरस्य सर्वे यानचालकाः सम्यग् जानन्ति स्म। एकदा एकः रेक्साचालकः अस्य शब्दस्य अर्थं मामपृच्छत्। यदा च मया अर्थो बोधितस्तदा तेन महती प्रसन्नता प्रकटीकृता। एवमेव यदि सर्वे संस्कृतज्ञाः स्वगृहस्य नाम संस्कृते अकरिष्यन् तदा एतेनापि संस्कृतस्य किञ्चित् प्रचारः अभविष्यत्। अत्राहं २२.२.७१ दिनाङ्के समागत आसं दिनत्रयं च स्थितः।

अद्यापि तद् हरिजनेतिकुलोद्भवानां
विद्यार्थिनां गुरुकुलं बहुशः स्मरामि।
यत् तत्र शौचसमयेष्वददुः क्षुरप्रं
छात्रास्तदेतदभवत् परमं विचित्रम्॥ १६॥

एतत्संस्थानस्थापनात् पूर्वं छात्रावस्थायामेव अहमेकदा माननीयैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीपण्डितगोपालशास्त्रिदर्शनकेशरिमहोदयैः सह आजमगढ़नगरं गतवान्। तत्र नगरपालिकाध्यक्षैः स्वामिश्रीसत्यानन्दमहोदयैः तद्द्वारा सञ्चालितस्य हरिजनगुरुकुलस्य निरीक्षणार्थं, समुचितपरामर्शदानार्थं च संस्कृतशिक्षणविषये आवामाहूतौ स्वः। दिने आवाभ्यां सर्वमवलोकितम्, शिक्षणपद्धतिः दृष्टा, छात्राश्च परीक्षिताः, स्वकीया विचाराश्च प्रकटीकृताः। तत्र गमनं सर्वथा सन्तोषकरमासीत्। परं तत्र एकं विचित्रं वृत्तमवलोकितम्। यदा आवां सायंकाले जलपात्रमादाय शौचं कर्तुं क्षेत्रं प्रति प्रस्थितौ तदा एकश्छात्रः आगत्य आवयोर्हस्ते एकैकं क्षुरप्रं (खुरपा) दत्तवान्। तेन आवयोर्महदाश्चर्यं जातम्। अभिप्रायश्च तस्य नावगतोऽस्माभिः। अनन्तरमस्माभिर्ज्ञातं यत्— क्षुरप्रेण भूमौ गर्तं कृत्वा तत्रैव विड्विसर्जनं कर्तव्यं मृत्तिकया च स गर्तः पुनराच्छादनीय इति तत्रत्या इयं रीतिर्वर्तते। इदं श्रुत्वा आवाभ्यां क्षुरप्रः गृहीतः परन्तु अनभ्यासात् तस्य प्रयोगो न सहज आसीदावयोः कृते। आगमनकाले मार्गे इयमेव चर्चा प्रचलति स्म। गृहे जनाः विहस्य कथितवन्तः—'भवतोः ज्ञाने एका महती वृद्धिर्जाता अस्यां यात्रायाम्!'

उत्तरकाशी—

दिष्ट्या मयोत्तरदिशो भ्रमणप्रसङ्गे
श्रीमद्गुमानिकविहास्यकृतिः श्रुता या।
अद्यापि सा स्मृतिगता वदनं सहास्यं
प्रोक्ता च तत् परिसरं मुखरं करोति॥ १७॥

२०.१०.७८ दिनाङ्कमारभ्य उत्तरप्रदेशीयसंस्कृतपाठशालाप्रधान-निरीक्षकाणां श्रीमतां डॉ० उमाशंकरमिश्राणां सुस्निग्धं साहचर्यमधिगत्य हरिद्वारे, ऋषिकेशे उत्तरकाश्यां तथा तत्पार्श्ववर्तिषु क्षेत्रेषु च भ्रमणस्य भूयान् हर्षप्रदोऽवसरः सम्प्राप्तः। अस्मिन् भ्रमणे विविध-प्राकृतशोभावलोकनेन, विदुषां समागमेन, तत्क्षेत्रीय-सुमधुर-गीत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कवितादि-रसास्वादनेन च यः खलु प्रभूत आनन्दोऽनुभूतस्तदतिरिक्तं तत्रत्यपण्डितानां मुखात् कूर्माञ्चलीय-"गुमानी" कवेर्या अनेका मनोरञ्जककविता आकर्णिताः स एकः अपर एव महदानन्दप्रदो विषय आसीत्।

गुमानीकवेरनेकासु कवितासु हिन्दीसमस्यानां पूर्तिर्भवति या विशेषरूपेण मनो रञ्जयति। यथा—

दुष्कृतिनां प्रकृतिः किल घोरा
मानसबुद्धिरतीव कठोरा।
वाक् सुधया सदृशी रसपूरा
"मुंह में राम बगल में छूरा"॥
कामार्दिता या कटुकान् कषायान्
न चेत् पिबेत् किं वद वैद्य देयम्।
निबोध हंसी - मधुर - प्रचारे
"वहाँ वनप्सा-शरबत पिला दे"॥

अद्यापि तानतिबलानपि सौम्यभावान्
स्मृत्वा शुनः प्रमुदमावहते मनो मे।
आरुह्य यद्वपुषि यद्वदनं च धृत्वा
स्मेरानना गतभियः शिशवोऽप्यखेलन्॥ १८॥

अस्यामेव यात्रायां मया अपरमपि एकं दृश्यमवलोकितं यन्मम कृते सुमहदानन्दप्रदं कौतुकवर्द्धकं च आसीत्। जीपयानेन गच्छता मया ग्रामेषु स्थले स्थले अनेके हृष्टपुष्टा बृहत्कायाः कुक्कुराः, किञ्चिद् भयंकरा इव प्रतीयमाना दृष्टाः, परं स्वभावेन ते तथा सरला आसन् यथा लघुलघुबालका अपि तेषां मुखं धृत्वा, शिरः धृत्वा, पृष्ठोपरि च आरुह्य निर्भयं सुखं च खेलन्ति स्म। मम तु तेषां समीपे गमनमपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुष्करमासीत्। इदं लघु अपि दृश्यं मत्कृते परमं मोदावहमजायत। इदानीमपि च तत् स्मृतं प्रभूतं मुदं जनयति।

तस्याः सुरम्यभुव उत्तरकाशिकाया
वासः कथं नु खलु विस्मृतिमेतु, यस्याः।
अद्यापि कर्णकुहरे निकषा वहन्ती
स्रोतस्विनी कलकलध्वनिमातनोति॥ १९॥

२५.१०.७८ दिनाङ्के उत्तरप्रदेशीयसंस्कृतपाठशालाप्रधान-निरीक्षकमहोदयैः सह अहं दिने दशवादने हरिद्वारात् प्रस्थाय सायं षड्वादने उत्तरकाशीं प्रासवान्। तत्रत्यस्य संस्कृतमहाविद्यालयस्य निरीक्षणं श्रीमिश्रमहोदयैः कर्तव्यमासीदिति आवां तत्रैव निवासमकरवाव। उत्तरकाश्याः विविधतरुलतापुष्पराजिविराजितं पर्वतीयं दृश्यं मत्कृते प्रथमदृष्टत्वात् परमाकर्षकं परमानन्दप्रदं च आसीत्। परं सर्वापेक्षया रमणीयम् अविस्मरणीयं च आसीत् विद्यालयस्य समीपे एव प्रवहन्त्या गङ्गायाः कलकलध्वनिश्रवणं, यदद्यापि मम कर्णयोरनुगुञ्जति। उत्तरकाश्या विद्यालये दिनत्रयं निवासस्य अयं मे सुमहान् अविस्मरणीयश्च लाभ आसीत्।

ऋषिकेश—

अद्यापि दिव्यमृषिकेशमहं स्मरामि
यत्रानिलो वहति "सात्त्विकजीवनस्य"।
गङ्गाप्रवाह इव गर्जति यत्र गीता-
द्यध्यात्मशास्त्रवचसां च सदा प्रवाहः॥ २०॥

अध्यात्ममन्त्रजपयोगसमाधिविद्या-
भूमिं भृशं तमृषिकेशमहं स्मरामि।
यत्र स्थितेन बहु "लक्ष्मणनामझूला"-
दोलासुखं प्रतिनिशामुखमन्वभूवम्॥ २१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकाञ्चीकामकोटिपीठाधीश्वरैः समायोजिते अ.भा. विद्वत्सम्मेलने सहयोगं कर्तुमहं १५.८.७३ दिनाङ्के ऋषिकेशं गतवानासम्। तत्र बहवो विद्यालयाः, मठाः, आश्रमा मन्दिराणि चेति अनेकानि दर्शनीयस्थलानि दृष्टानि। परं तत्र 'लक्ष्मणझूला' नामको यः सेतुः सर्वदा दोलायमानस्तिष्ठति स सविशेषमाकर्षकः कौतुककरश्च भवति स्म दर्शकाणां कृते। तस्य अवलोकनाय तदुपरि आरुह्य दोलनाय च भूयांसो यात्रिणः प्रतिदिनं सायंकाले विपुलसंख्यायामागच्छन्ति आनन्दमनुभवन्ति मनोरञ्जनं च कुर्वन्ति। बहवस्तत्र छायाचित्रमपि मित्रादिभिःसह गृह्णन्ति।

कमालपुर—

अद्यापि विश्रुत-कमालपुराभिधाने
ग्रामे घनैर्नभसि सङ्कुलिते समन्तात्।
यद् भूरि - केकिकुल - मञ्जुल - नर्तनानां
दृष्टं "कमाल" बहु मोदयते स्मृतं तत्॥ २२॥

मया भ्रमणकाले तेषु तेषु वनेषु पर्वतेषु च काले काले मयूर-मयूरीणां बहुवारं बहूनि नृत्यान्यवलोकितानि, परन्तु उत्तरप्रदेशस्य फैजाबादमण्डलान्तर्गते कमालपुरनामके ग्रामे तत्समीपवर्तिषु क्षेत्रेषु च यन् नृत्यमवलोकितं तद् ग्रामस्य नामानुरूपं "कमाल" एवासीत्। तादृशं बहूनां मयूराणां सङ्घबद्धं नृत्यं कदापि नावलोकितमासीत्। तेषां मयूराणामुपरि प्रहारः तेषामुत्पीडनं वा सर्वथा वर्जितमासीत् तस्मिन् क्षेत्रे।

ग्रामोऽयं मम संस्थायाः प्रथमवरिष्ठप्रचारकस्य श्रीसुरेन्द्रमोहन-त्रिपाठिनो जन्मभूमिरस्ति। अत्राहं तस्यैव कन्याया विवाहोत्सवे सम्मिलितुं समागत आसम्। अत्रायं ममागमनस्य अतिरिक्तो महान् लाभ आसीत् यः सदैव मम स्मृतिगतो मनो मोदयते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कांगडी—

अद्यापि तद् गुरुकुलं किल कांगडीस्थं
नित्यं विराजतितमां स्मृतिमन्दिरे मे।
यद् देश-वेदमत-संस्कृतिरक्षणाय
वीरान् ददौ सुबहुशो विदुषश्च शश्वत्॥ २३॥

हरिद्वारनिवासकाले मम सर्वाधिकं प्रियं दर्शनीयं च आकर्षणकेन्द्रञ्चासीत् हरिद्वारनिकटवर्तिनि कांगडीस्थाने चाल्यमानो गुरुकुलसंस्कृतमहाविद्यालयः। एष विद्यालयः १९०२तमे ईशवीयवत्सरे सुप्रसिद्धहिन्दुसमाजसेविना श्रद्धेयस्वामिश्रद्धानन्द-महोदयेन स्थापित आसीत्। आरम्भे अस्य मुख्यमुद्देश्यं संस्कृतभाषायाः प्रचारस्तथा आर्यसमाजपद्धत्या वेदादिशास्त्राणां शिक्षणमासीत् परन्तु पश्चात् शनैः शनैः आधुनिकविषयाणामपि शिक्षाया व्यवस्था जाता। इदानीन्तु महाविद्यालयोऽसौ विश्वविद्यालयरूपं बिभर्ति, भारतस्य शिक्षासंस्थासु च सुमहद् वैशिष्ट्यमावहति। प्राचीन- नवीनशिक्षातिरिक्तं देशसेवाया-इतरक्षेत्रेषु अपि अस्य गुरुकुलस्य असाधारणं योगदानं वर्तते। अनेन संस्थानेन तादृशा अनेके विशिष्टाः वीराः स्नातका निर्मिता ये देशे वेदालङ्काररूपेण विद्यालङ्काररूपेण च सुविख्याताः सन्ति। शिक्षा, साहित्यं, राजनीतिः, इतिहासः, लेखनम्, सम्पादनम्, समाजसेवा, राष्ट्रियस्वतन्त्रतान्दोलनञ्चेत्यादिषु क्षेत्रेषु च किमपि तत् क्षेत्रं न वर्तते यत्र गुरुकुलस्नातकानां नेतृत्वं, वर्चस्वं, समर्पणं वा न स्यात्। इदं गुरुकुलं, तस्य मनोहरं सुपरिवृतं च परिसरं, तस्य आचार्यान्, ब्रह्मचारिणः, शिक्षणपद्धतिं जीवनपद्धतिं च दृष्ट्वा मम हृदयं नितरां मोमुहीति स्म। इदानीमपि च द्रष्टुं मोनुहीति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कानपुर—

अद्यापि तानि शिशुमन्दिरबालकानां
वक्त्राम्बुजानि मुदितानि न विस्मरामि।
येऽनुत्सुका अपि परं सरला मनोज्ञाः
श्रोतुं मदीयकवितास्त्वरिता अधावन्॥ २४॥

कर्णपुरं नाम उत्तरप्रदेशस्य एकं विशालं नगरं वर्तते। अत्र ९.१२.६५ दिनाङ्के अहं संस्कृतसाहित्यपरिषदो वार्षिकाधिवेशने भागग्रहणार्थं गतवान् आसम्। तस्मिन्नेव प्रसङ्गे तत्रत्ये भारतीय-शिशुमन्दिरे संस्कृतकविसम्मेलनमायोजितमासीत्। तस्मिन्नवसरे संस्कृतकवितापाठं सर्वथा दुरवबोधं मत्वा भारतीयशिशुमन्दिरस्थाः सर्वे छात्रा उदासीना विमुखा अन्यमनस्काश्च भूत्वा यत्र तत्र उपविष्टा आसन्। परं मया यदा स्वीयायाः बालकवितावल्याः कविताः श्राविताः तदा सर्वे छात्रा धावित्वा श्रवणार्थं समागताः प्रसन्नमुखाश्च आनन्देन सर्वाः कविताः श्रुतवन्तः, पुनः पुनः पठनाय च आग्रहं कृतवन्तः। तदानीमिदं सर्वैरनुभूतं यत्-यदि बालकानां समाजे सरलाः ललिताः रागबद्धा लघु-लघुकविताः श्राव्येरन् तदा बालकेषु संस्कृते सरलतयैव अभिरुचिरुत्पादयितुं शक्यते।

खजुरी—

अद्यापि तस्य खजुरीस्थितपाठशाला-
भव्योत्सवस्य मम विस्मरणं न जातम्।
यत्रागमन् विविध - संस्कृतरम्यगीता-
न्याकर्ण्य भूरि मनुजा वरयात्रिकाश्च॥ २५॥

६.३.६७ दिनाङ्के बलियामण्डलस्य खजुरीग्रामस्थितेन संस्कृतविद्यालयेन समायोजिते संस्कृतसम्मेलने उद्घाटनभाषणं कर्तुं स्वकीयैः गायकवादकसहयोगिभिः सह गतवान् आसम्। संयोगवशाद्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यालयस्य समीप एका वरयात्राऽपि समागता आसीत् यस्यामनेके प्रसिद्धा गायका नर्तकाश्च सम्मिलिता अभूवन्। सभायाः आरम्भस्य वरयात्रायाश्च नृत्यगीतानामेक एव काल आसीत्। संस्कृतसभाया आयोजकस्य इयं महती चिन्ता आसीत् यत् यदि सभायामागता जनाः वरयात्राया नृत्यगीतादिकं श्रोतुं गमिष्यन्ति तदा अस्माकं सभा जनशून्या भविष्यति। अनेन हेतुना अन्येऽपि केचन विद्वांसो मया चिन्ताऽन्विता दृष्टाः। परन्तु तद्विपरीतमेव सर्वं संवृत्तम्। यदा अस्माकं संस्थानस्य गायकवरः—श्रीविद्यार्थीजी तारस्वरेण गजल-कौवाली-कजली-पुरबीप्रभृतिरागबद्धानि संस्कृतगीतानि गातुं प्रारब्धवान् तदनुरूपः तबलावाद्यस्य च ध्वनिः समुद्भूतः तदा वरयात्रायाः सर्वेऽपि सदस्याः वरयात्रायाः सभां परित्यज्य अस्माकं सभायामागताः। ते कथितवन्तः—"हिन्दीभोजपुरीगीतानि तु अस्माभिः सदैव श्रूयन्ते। अद्य वयं संस्कृतगीतानि श्रोष्यामः।" अनया घटनया तत्र बहवो जनाः प्रभाविता अभूवन्। वरयात्रायाः मुख्यो जन आगत्य अस्मान् उपालब्धवान्—भवद्भिः मम सभायाः शोभायाश्च उत्सादनं कृतमिति।

गाजीपुर—

अद्यापि मार्गगत-सूचनयोपलब्धां
गाजीपुरीय-सुरवाक्समितिं स्मरामि।
ग्राम्या निरक्षरजना अपि यत्र दैवीं
श्रोतुं गिरं सुभृशमाकुलिता अभूवन्॥ २६॥

एकदा छात्रावस्थायामहं वाराणसीतो रेलयानेन स्वगृहं गच्छन्नासम्। तन्मध्ये औड़िहारस्टेशने मया एकस्मिन् विज्ञापनपत्रे पठितं यत् तस्मिन्नेव दिने सायं पञ्चवादने गाजीपुरनगरे स्नातकोत्तरमहाविद्यालयस्य भवने एकं संस्कृतसम्मेलनं भविष्यतीति। इदं पठित्वाहं ग्रामस्य मार्गं परित्यज्य गाजीपुरं प्रस्थितः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथासमयं च सभायामुपस्थितः। तदानीं सभायाः संयोजकाः वैद्यवर्याः श्रीमन्तः गणेशदत्तशास्त्रिमहोदयाः सभायामुपस्थितान् ग्रामवासिनो जनान् अपृच्छन्—"*आप लोग संस्कृत में भाषण सुनना चाहते हैं या हिन्दी में?*" ततः सर्वैरेकस्वरेण कथितम्—"*हमलोग इतनी दूर से संस्कृत में भाषण सुनने के लिए आये हैं। हिन्दी में तो हम लोग बराबर सुनते ही रहते हैं। आज संस्कृत में सुनेंगे।*" इदं श्रुत्वा सर्वेऽपि तत्र उपस्थिता विद्वांसः संस्कृत एव भाषणस्य व्यवस्थां कृतवन्तः। ग्रामीणाश्च जना भाषणं श्रुत्वा बहुप्रसन्ना अभूवन्, सभां च प्रशंसन्तो गृहं प्रति प्रस्थिताः।

गोरखपुर—

अद्याप्यहं प्रथित-गोरखनाथपीठ-
प्रख्यात - दिग्विजयनाथ - महन्थवर्यान्।
नित्यं स्मराम्यखिलशक्तिमयीव येषां
तेजस्विता स्मृतिगताऽपि तनोति तेजः॥ २७॥

१९४५ तमे खृष्टाब्दे अहं सनातनधर्मसभया आयोजिते संस्कृतसम्मेलने भाषणार्थं गोरखपुरमागत आसम्। वैद्यवर्यश्री-श्रीपतिशर्म-महोदयानां सभासंयोजकानां गृहे अहमतिष्ठम्। तदानीमेव एकस्मिन् दिनेऽहं श्रीगोरखनाथमठं द्रष्टुं तथा तस्य तदानीन्तनान् अध्यक्षान् महन्थश्रीदिग्विजयनाथमहोदयान् मिलितुं मठं गतवान्। दिने रात्रौ च तैः सह संस्कृतशिक्षाविषयिणी हिन्दुसमाजविषयिणी च विविधा चर्चा जाता। तदानीं तेषां सुविशालं शरीरं विलोक्य, ततः परं च तेषां गभीरां वाणीं श्रुत्वा, तदनु च चर्चाप्रसङ्गे तेषामपरिमेयं मनोबलं, दृढतरं संकल्पं, कल्पनातीतां क्रियाशक्तिं, सर्वत्र अपूर्वां तेजस्वितां च दृष्ट्वा अहं नितरां प्रभावितो जातस्तथा तेषां व्यक्तित्वं कृतित्वं च संस्मृत्य अधुनापि प्रभावितो भवामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि गोरखपुरस्य तपस्विवर्यौ
तौ दक्षिणोत्तरदिशोः सुधियौ स्मरामि।
याभ्यां विना व्यवहितिं विविधैरुपायैः
सेवा सदा सुरगिरोऽप्रतिमा व्यधायि॥ २८॥

गोरखपुरमण्डलस्य उत्तरभागस्थिते घुघुलीनामके स्थाने श्रीनारंगसंस्कृतमहाविद्यालयस्य संचालकाः श्री पं० बलदेव-उपाध्यायमहोदयाः तथा दक्षिणभागस्थिते ढरसीनामके स्थाने एकस्य संस्कृतविद्यालयस्य संचालकाः श्रीसूर्यलालमिश्रमहोदयाश्चेति इमौ परमतपस्विनौ विद्वांसौ संस्कृतभाषाप्रचारे उत्त्थाने च आजीवनं संलग्नौ आस्तामिति तौ सदाऽहं श्रद्धया स्मरामि।

अद्यापि गोरखपुरस्य नतोऽस्मि "गीता-
प्रेसाभिधं" जगति भारतकीर्तिपीठम्।
यन्निर्मलैर्मुनि - महर्षि - गिरां प्रकाशै-
रालोकितं सकलविश्वमिदं करोति॥ २९॥

विश्वप्रसिद्धमिदं संस्थानम्। श्लोकश्च स्पष्टार्थः। अस्य संस्थानस्य प्राणभूतानां स्वनामधन्यानां श्रीहनुमानप्रसादपोद्दारमहोदयानां प्रशस्तिविषये मया एकं पद्यं लिखितम्। तच्चेदम्—

नमोऽस्तु ते श्रीहनुमत्प्रसाद-
पोद्दार संसारहितावतार।
येन त्वया लोकगिरा वितीर्णो
गृहे गृहे ज्ञानमयः प्रदीपः।

(पद्यमिदं-नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायत - पत्र - नेत्र।
येन त्वया भारततैल-पूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः॥)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति व्यासप्रशस्तिमनुकृत्य लिखितं वर्तते।

अद्यापि तन्मिथुनसङ्गमभङ्गकारि
वृत्तं स्मृतं किमपि मे ह्रियमातनोति॥
एकस्य पण्डितजनस्य यदा गृहेऽहं
प्राप्तो निशार्धसमयेऽसमयेऽविकल्पः॥ ३०॥

गोरखपुरजनपदस्य इदं वृत्तं वर्तते। एकदाऽहं रात्रौ सार्धद्वादश-वादनसमये रेलयानात् छितौनीस्टेशनमवतीर्य कानिचित् पदानि गत्वा एकस्य मम सुपरिचितस्य पण्डितस्य गृहं सम्प्राप्तः। सोऽयं समयः कस्यापि सुपरिचितस्यापि गृहे गमनाय समुचितो नासीत्। परं विकल्पाभावादहं तत्र गतवान्। यदाऽहं गृहं प्राप्तस्तदा सर्वत्र नीरवता अन्धकारश्च आसीत्। पण्डितमहोदयाश्च पत्न्या सह सानन्दं शयाना आसन्। द्वारे स्थितोऽहं यदा तान् नामग्राहमाहूतवान्, कपाटं च खटखटायितवान्, तदा ते क्षणं विरम्य स्वकीयम् अस्तव्यस्तं वस्त्रं सम्भालयन्तः बहिरागताः कच्छं बध्नन्तश्च। तदानीं ते मां दृष्ट्वा प्रसन्नता-मेव व्यक्तीकृतवन्तः, मम भोजनपानादिविषये पृष्टवन्तः, शयनस्य च व्यवस्थां कृतवन्तः। ततः प्रातःकाले मिलितास्ते रात्रौ पत्न्या सह शयनस्य वार्तां कथितवन्तस्तथा "भवन्त; संस्कृतप्रचारे पति-पत्न्योः सङ्गमे कथं बाधामुपस्थापयन्ति" इति मामुपालब्धवन्तः।

इयमीदृशी घटना मम प्रचारकालस्य प्रथमा तथा एकैव च आसीत्। तां स्मृत्वा किञ्चित् लज्जामपि अनुभवामि तथा मुदितोऽपि भवामि।

किं भक्षयिष्यति भवान्नु सकर्मकं वा
किं वा द्विकर्मकमकर्मकमेव किं वा।
स्मृत्वैवमेकविबुधस्य गिरो विचित्रा
अद्यापि मन्मनसि कौतुकमावहन्ति॥ ३१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकदाऽहं गोरखपुरमण्डलस्य ग्रामाञ्चलवर्तिनि एकस्मिन् विद्यालये प्रचारार्थं गतवान्। तत्र भोजनप्रसङ्गे तत्रत्येन हास्य-विनोदप्रियेण प्रधानाध्यापकेन पृष्टम्—विद्वन्! भवन्तः अकर्मकं भोजनं कुर्वन्ति, सकर्मकं, द्विकर्मकं वा? किं भवते रोचते? इति। परन्तु एतत्प्रश्नस्य अभिप्रायज्ञानाभावात् मया किमपि नोत्तरितं प्रोक्तं च एतेषां शब्दानामभिप्रायं स्पष्टीकर्तुम्। ततः पण्डितमहोदयेन विहस्योक्तम्—अकर्मकं-दधि-चिपुटान्नं भवति, सकर्मकम् ओदनं द्विदलं शाकं च भवति तथा द्विकर्मकम् ओदनं रोटिका च भवति।

घनघटा—

अद्यापि तं घनघटा इति नामधेयं
ग्रामं स्मरामि बहु शुक्लमहोदयानाम्।
यत्रातिवर्षणरताभिरहं घटाभि-
र्जातो दिनत्रयमहो बलवन्निरुद्धः॥ ३२॥

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतयो दिवङ्गता आचार्यश्रीबदरीनाथशुक्लमहोदयाः भारतस्य विद्वत्समाजे सर्वमान्या विख्यातकीर्तयश्च विद्वांसः आसन्। श्लोके चर्चितः घनघटाग्रामः, बस्तीमण्डलान्तर्गतः तेषामेव जन्मभूमिरस्ति। अत्र समायोजिते श्रीभागवतपुराणसप्ताहमहोत्सवेऽहमपि गतवान् आसम्। महोत्सवस्य आरम्भिकाणि चत्वारि दिनानि निर्बाधं सकुशलं सानन्दं च व्यतीतानि। परन्तु अवशिष्टेषु चतुर्षु दिनेषु अहोरात्रं तथा अविरता घोरा वृष्टिर्जाता झञ्झावातश्च महता बलवता च वेगेन तथा प्रावहत् यथा सर्वोऽपि कार्यक्रमो दिनचर्याश्च सर्वा अस्तव्यस्ता जाताः। ततः परावर्तनमपि दिनत्रयं सर्वथा अवरुद्धं जातम्। परं मम मनसि तु एतदेव चिन्तयतो महान् प्रमोदो भवति स्म यत् घनघटाग्रामस्य महोत्सवे घनघटानामागमनं सर्वथा सामयिकमेव। स उभयोर्घन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घटयोः समागमस्य गाढालिङ्गनस्य च अद्भुतः प्रसङ्गो मम अद्यापि विस्मृतो न भवति, स्मृतश्च महन् मनोरञ्जनं विदधाति।

चिउटीडाँड़—

अद्यापि तं द्विजवरं सरलस्वभाव-
मत्यद्भुतं सहृदयं सततं स्मरामि।
यः कालिदासकवितैकपदानुकृत्या
चेतो मदीयमकरोच्चकितं नितान्तम्॥ ३३॥

२६.५.६२ दिनाङ्कस्य इयं घटना अस्ति। उत्तरप्रदेशस्य आजमगढ़मण्डलान्तर्गते चिउटीडाँड़ ग्रामे काचित् संस्कृतसभा भवितेति विज्ञापनपत्रद्वारा ज्ञात्वा अहं निमन्त्रणपत्रं विनापि तस्मिन् ग्रामे प्रातःकाले समुपस्थितः। परं तत्र सभायाः किमपि लक्षणं न दृष्टं, पश्चाच्च इदमपि परिज्ञातं यत् सभाया निर्धारिततिथौ परिवर्तनं जातं, पुनश्च सभा कदा भविष्यतीत्यपि निश्चितं नासीत्। इदं सर्वं दृष्ट्वा श्रुत्वा च क्षणं किंकर्तव्यविमूढोऽहं संजातः। मां तथाविधं दृष्ट्वा एकेन किञ्चित्संस्कृतज्ञेन वयस्केन ब्राह्मणबन्धुना अहं स्वगृहं नीतः भोजनपानादिना सत्कृतश्च। तेन किञ्चिन्मम मनोव्यथा अपगता शान्तिश्च लब्धा। परं द्वितीयं सङ्कटमिदमासीद् यद् ततो दूरवर्ति बसयांनस्थानं गन्तुं किमपि साधनं नासीत्। इदं मे चिन्ताया द्वितीयं कारणमजायत। ततो मां चिन्तामग्नमवलोक्य स ब्राह्मणबन्धुरवदत्— "भगवन्! चिन्तां मा करोतु। मम तु सुपुष्टः पृष्ठदेशः अस्त्येव। एकदा मया महापण्डित-राहुलसांकृत्यायनस्य विशालो विस्तरबन्धः स्वपृष्ठे संस्थाप्य सुदूरं प्रापितः। भवन्तं तु अहं विस्तरबन्धसहितं स्वपृष्ठे संस्थाप्य वोढुं समर्थोऽस्मि। आगच्छतु, मां "पादार्पणानुग्रहपूतपृष्ठं करोतु" इति। रघुवंशीयश्लोकस्य इदमेकं चरणं श्रुत्वा मम महदाश्चर्यमजायत। ततोऽहं चकितया दृशा यदा तस्य मुखं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रष्टुमारब्धवान् तदा तेन कथितम्—"आश्चर्यं मा करोतु। ममायं स्वभावो वर्तते। एतेन अहं महत्सुखमनुभवामि सौभाग्यं च परममात्मनो मन्ये"।

इयं लघ्वी घटना मम सुदीर्घयात्राया एकं सर्वाधिकं विस्मयकरं वृत्तमासीत् यस्य कुत्रापि पुनरावृत्तिर्न जाता।

जोशीमठ—

अद्यापि तं तरु - लता - सुम - राजिरम्यं
वेदाङ्गपाठ - परिचिन्तनभव्यपीठम्।
आचार्यवर्य - गुरु - शिष्यगणैरुपेतं
जोशीमठं परमपावनमानतोऽस्मि॥ ३४॥

बदरीनाथधामतः पूर्वमेव जोशीमठनामकमेकं सुप्रसिद्धं दर्शनीयं च स्थानं भवति परं समयाभावाद् गमनकाले वयं तत्र न अवतीर्णाः, तदतिक्रम्य एव होराद्वयेन बदरीनाथधाम प्राप्तं। एतस्मिन् स्थाने पूर्वयोजनानुसारं दिनत्रयं स्थित्वा सम्मेलनस्य च कार्यजातं सुष्ठु सम्पाद्य चतुर्थे दिने परावर्तनकाले अपराह्णवेलायां पुनः महता औत्सुक्येन सह जोशीमठं प्राप्ताः।

अस्य स्थानस्य किञ्चिद् विशिष्टं महत्त्वं वर्तते। भगवता आद्य-शङ्कराचार्येण भारतस्य चतुर्षु दिग्भागेषु स्थापितानां मठानां मध्ये उत्तरभागे स्थापितो बदरीनाथधाममठः ज्योर्तिमठः, (जोशीमठ) एव विराजते। वयं बसयानादवतीर्य मठमेव गताः तत्रैव च अतिथिरूपेण स्थिताः। अनन्तरं तस्यैव मठस्य सुविशाले महामण्डपे सायं आचार्यश्रीबदरीनाथशुक्ल-महोदयानामध्यक्षतायां विद्वत्सम्मेलनं सम्पन्नं, पर्वतीयक्षेत्रे संस्कृतप्रचाराय विविधा योजनाश्च प्रस्ताविताः स्वीकृताश्च। तस्मिन् समये मठस्याचार्यपादाः केनापि हेतुना सभायामुपस्थिता न आसन्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्य स्थानस्य द्वितीयं विशिष्टं वस्तु वर्तते श्रीबदरीनाथवेद-वेदाङ्गसंस्कृतमहाविद्यालयः। एष विद्यालयो वाराणसीनिवासिभि-र्विद्वद्वरेण्य-श्री पं० गोपालशास्त्रिदर्शनकेशरीमहोदयैरत्र १९५८ तमे ईसवीयाब्दे अष्टाध्यायीपद्धत्या संस्कृतव्याकरणशिक्षणार्थं स्थापित आसीत्। स इदानीञ्चापि पूर्वापेक्षया विकसितरूपेण प्रचलति स्वरूपे विशिष्टां रमणीयताञ्चावहति।

इमं तपोवनरूपं विद्यालयं बहोः कालाद् द्रष्टुं मम बलवत्या-काङ्क्षा परं दूरवर्तितया बहुव्ययसाध्यतया च सा समीहा तत्कालावधि मम हृदय एव विलीना स्थिता आसीत्। परन्तु भगवतो बदरीनाथस्य दयया अस्यां यात्रायां परिपूर्णतां गतेति आत्मानं कृतकृत्यं मन्ये।

देवरिया—

अद्याप्यहं देवरियानगरस्थ - विद्वद् -
वृन्दं ससज्जनगणं प्रणतः स्मरामि।
आवास - वित्त - सहयोग - सुख - प्रदानै-
र्ये येऽभवन् मम सदा प्रथमे सहायाः॥ ३५॥

मम संस्कृतप्रचारस्य भाटपारानन्तरं द्वितीयं केन्द्रं देवरियानगरमासीत्। अत्राहं प्रायेण छात्रावस्थायां तथा प्रचारकार्ये प्रारब्धेऽपि अनेकधा आगच्छामि स्म, कतिपयदिनानि निवसामि स्म तथा संस्कृतप्रचारविषये विविधाश्चर्चाः करोमि स्म। तेषु दिनेषु प्रायेण अहं देवरियाया राधाकृष्णसंस्कृतमहाविद्यालये निवसामि स्म। तदानीं तत्रत्या वेदाध्यापकाः श्री पं० विन्ध्येश्वरीप्रसाद-त्रिपाठिमहोदयाः स्वपाकालये मम भोजनव्यवस्थां कुर्वन्ति स्म। ते मयि नितान्तं स्नेहवन्तः एके सहृदया विद्वांसः आसन्। मम उपानत् यदा भग्ना भवति स्म तदा ते एव नवीनां क्रीणन्ति स्म। अतस्ते यदा कदा परिहासमुखेन पृच्छन्ति स्म—"*कहिये, जूता चाहिए?*"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन् विद्यालये स्थितस्तेषां च आतिथ्यसुखमनुभवन्नहं यत्र तत्र प्रचारकार्यं करोमि स्म। अनन्तरं देवरियान्यायालयस्य विशिष्टा अधिवक्तारः श्री पं० परशुरामत्रिपाठिमहोदयाः सुप्रसिद्धाः संस्कृतानुरागिण आसन्। अतः प्रचारमाध्यमेन तैः सह परिचये जाते ते मां स्वकीय एव परिवारे निवासाय सम्मतिं प्रदत्तवन्तः। ततश्च तदारभ्याहं तेषामेव गृहे परिवारसदस्य इव सदा तिष्ठामि स्म।

एतदतिरिक्तं देवरियानगरनिवासिषु विद्वत्सु येषां मम सहयोगिषु सहायकेषु प्रमुखं स्थानमासीत् ते आसन्—श्री पं० कमलाकान्त-शुक्लमहोदयाः, पं० श्रीहर्षधरमहोदयाः, श्री पं० रामानुजत्रिपाठि-महोदया आयुर्वेदाचार्याः, श्रीवक्रतुण्डद्विवेदिनः आयुर्वेदाचार्याः *बाबू मथुराप्रसादजी लोटावाले* प्रभृतयः।

अद्यापि मज्जनपदस्थित - पाठशाला-
स्वाद्यप्रचारसमये गमिताननेकान्।
सन्मित्रलाभ - मधुराशन - पान - गोष्ठी-
वार्ता-विहारसुखदान् दिवसान् स्मरामि॥ ३६॥

१९४७ तमात् खृष्टीयवर्षात् पूर्वं मया सर्वप्रथमं स्वकीयजनपदे एव संस्कृतप्रचारकार्यं प्रारब्धम्। तत्र देवरियाजनपदस्य बहुषु संस्कृतविद्यालयेषु आंग्लविद्यालयेषु च बहुधा सायकिलद्वारा एव यात्रा विहिता। अस्मिन् क्रमे भाटपाररानी-वैकुण्ठपुर-हाटा-सलेमपुर-लार-बरहज-बैतालपुर-पण्डितके रामपुर-हतवा बाजार-भटनी-कुबेरनाथ-बडहरी-सोहनाग-तेलिया-लक्ष्मीपुर-कसया-कटिभाडी-पडरौना-रामनगर-वासी-छितौनी-सेवरही-कप्तानगंज-लक्ष्मीगंज-मठियाशुक्ल-रामकोला-फाजिलनगर-रामपुर कारखंना-प्रभृतिस्थानेषु भ्रमणं कृतम्।

ततः गोरखपुरजनपदस्य गोरखपुर-घुघुली-शिशवाबाजार-गोला-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ढरसी – सोहगौरा – पिपराइच – हरपुर – मुंडेराबाजार – सिकरीगंज-प्रभृतिस्थानेषु भ्रमणं विहितम्। अस्यां यात्रायां यथा सुख-सौविध्यपूर्णानि आमोद-प्रमोदमयानि च दिनानि व्यतीतानि तथा तत्रत्यविदुषां यादृशः सहयोगः सौहार्दं च प्राप्तं तत् सर्वं स्मारं स्मारं महान्तमानन्दमनुभवामि तेभ्यश्च कृतज्ञतां प्रकटीकरोमि।

देवबन्द—

अद्यापि "दारुलउलूम" इति प्रसिद्धं
स्थानं कृतज्ञमनसा सततं स्मरामि।
यत्पुस्तकालयपतिर्महता श्रमेण
साहाय्यदानमकरोन्मम कार्यसिद्धौ॥ ३७॥

उत्तरप्रदेशस्य सहारनपुरमण्डले अस्त्येकं 'देवबन्द' नामकं लघुनगरं यत्र दारुल-उलूमनाम्ना अरबीभाषायाः एका विश्वप्रसिद्धा महती शिक्षासंस्था विराजते। अस्याः संस्थायाः पुस्तकालयोऽपि अरबी-फारसी-उर्दू-भाषाणां साहित्यस्य एकः सुसमृद्धतमः ग्रन्थागारो विद्यते। अस्मिन् पुस्तकालये आसु भाषासु कियतां संस्कृतग्रन्थानामनुवादा वर्तन्ते इति परिज्ञानार्थमहं १४.११.४७ दिनाङ्के देवबन्दं गतवान्। पुस्तकालयाध्यक्षं च मिलित्वा तं स्वकीयं प्रयोजनं निवेदितवान्। पुस्तकालयाध्यक्षः, यस्य नाम अहं सम्प्रति न स्मरामि, विशिष्टो विद्वान्, उदारहृदयः सहृदयश्च आसीत्। स सहायकान् आहूय मम कार्यं साधितवान्। यद्यपि अरबीलिप्यां लिखितानां संस्कृतग्रन्थानां वाचने तेषां काठिन्यं भवति स्म, तथापि अन्येषां मौलवीमहानुभावानां सहयोगेन एतदपि काठिन्यं सर्वथा अपगतम्। अतः एतां संस्थां प्रति तथा तं पुस्तकालयाध्यक्षमहोदयं प्रति च अद्यापि अहं हार्दिकीं कृतज्ञतामावहामि। अत्रैव मया उर्दूभाषा-शिक्षणायापि प्रेरणा प्राप्ता शुभारम्भश्च विहितः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राहं १४.११.४७ दिनाङ्के आगतवान् दिनद्वयं च स्थितः।

नैनीताल—

अद्यापि मत्स्मृतिगतोऽतिसुरम्यनैनी-
तालस्थितो ह्रदवरः प्रमुदं प्रसूते।
यद्वर्तिवर्तकगणाः सह सञ्चरन्तः
कुर्वन्ति यात्रिजन-मानस-मोदवृद्धिम्॥ ३८॥

२३.६.६६ दिनाङ्के अहं नैनीतालं गतवान् तथा ३.७.६६ पर्यन्तं तत्र नैनीतालस्नातकोत्तरमहाविद्यालयस्य प्राचार्याणां डॉ० श्रीगोपालदत्त-पाण्डेयमहोदयानामावासे स्थितः। एतेषु दिनेषु तत्र बिडला-बालिकाविद्यालयः, भारतीय-शहीदसैनिकविद्यालयः श्रीराम-संस्कृतपाठशाला चेति विविधासु संस्थासु प्रचारकार्यं वर्गसञ्चालनं च सम्पादितवान्। अस्य स्थानस्य सर्वाधिकं सुखप्रदं कार्यं भवति अत्रत्ये ताले नौकाविहारः। यदा च नौकाभिः सह सङ्घबद्धाः वर्तकाः, कूजन्तः, क्रीडन्तश्च, विहरन्ति तदा नौकारूढानां जनानां हृदयं कौतुकेन आनन्देन च परमप्रफुल्लितं भवति।

अद्यापि तत् स्मयकरं मम रम्य-नैनी-
तालेऽवलोकितमहो नवनाटकं यत्।
एको युवाऽतिविलपन् खलु यत्र दृष्टः
कादम्बरी - स्मरण - चिन्तन - मूढचेताः॥ ३९॥

अत्रैव वसता मया एकस्मिन् दिने एकः कादम्बरीनामकः अभिनयो दृष्टः परमकौतुकावहः। अभिनये मुख्यपात्रमेको युवक आसीत्। स खलु अनेकदिवसेभ्यो रोगशय्यायां स्थितो व्याकुलो मोहाविष्टः प्रलापनिरतश्चासीत्। चिकित्सका अनेके समागताः परं रोगस्य निदानं कर्तुं नाशक्नुवन्। ततः चिकित्सा कथं विधीयेत? अन्ते युवकेन स्वयमेव स्वकीयो रोगो ज्ञापितः। तेन कथितम्—"मया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कादम्बरीग्रन्थे कादम्बर्याः महाश्वेतायाश्च यद् अद्भुतं वर्णनं पठितं तेनैव ममायं रोगो जातः। अनन्तरं स स्वकीयशय्यायाः शिरोभागे गोपायित्वा स्थापितं तयोः चित्रं चिकित्सकेभ्यः स्वहितचिन्तकेभ्यश्च दर्शितवान् तथा कादम्बरीग्रन्थे तयोः रूपलावण्यवर्णने बाणभट्टेन यत् कौशलं प्रदर्शितं तत्सर्वं स नितान्तं भावाभिभूतः सन् अवर्णयत्। एतावन्मात्रमिदं नाटकमासीत् परं दर्शकानां कृते नितान्तं कौतुककरं मोदावहं च अजायत। तस्मिन् दिने बहूनां दर्शकानां हृदये कादम्बरीविषये बाणभट्टविषये च महती जिज्ञासा समदृश्यत।

नैमिषारण्य—

पुण्येषु नैमिषवनेषु महामुनीनां
त्यागं तपश्च सुविचिन्त्य महाद्भुतं तत्।
उत्साह - साहसं - मनोबल - गौरवाणा-
मद्यापि चेतसि वहन्ति सहस्रधाराः ॥ ४० ॥

उत्तरप्रदेशसंस्कृतअकादमी (लखनऊ) द्वारा आहूताः सार्वभौम-संस्कृतप्रचारसंस्थानस्य बालप्रचारकाः आसन्। ते च २६.४.९१ दिनाङ्कत आरभ्य ३०.४.९१ पर्यन्तं तत्र स्थित्वा राजभवने तथा अन्येषु च स्थानेषु भाषण-संगीत-कवितापाठ-सम्भाषणादि-विविध-कार्यक्रमद्वारा प्रचारं सम्पादितवन्तः। अस्मिन्नेव क्रमे नैमिषारण्य-स्यापि यात्रा आयोजिता आसीत्। अत्रागत्य वयं सर्वेऽपि तत्रत्यानि, पुण्यस्थानानि, पुरातनानि मन्दिराणि, ऋषिकुलम्, "पौराणिक तथा वैदिक-अध्ययन एवं अनुसन्धांन संस्थान" नामकं संस्थानं, तथैव अन्यानि च दर्शनीयस्थानानि दृष्टवन्तः।

इदमेव च तत् पुराणप्रसिद्धं तीर्थस्थानं वर्तते यत्र काले काले सहस्राधिका ऋषयो मुनयश्च समवेत्य महर्षेः शौनकस्य नेतृत्वे सहस्रदिनात्मकानि सत्राणि अनुतिष्ठन्ति स्म, पुराणकथाः शृण्वन्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रावयन्ति स्म, ज्ञान-विज्ञानचर्चां कुर्वन्ति स्म, सदा च सर्वेषां लोकानां कल्याणं तदुपायांश्च चिन्तयन्ति स्म। नैमिषारण्ये स्थित्वा यदा मया त्यागतपोमूर्तीनां, नानाविधविद्याविष्कारकाणां, लोक-कल्याणैकनिष्ठानां, लोकमङ्गलकामनया अहर्निशं पर्यटतां, लोकानां कष्टानि च दृष्ट्वा महत् कष्टमनुभवताम् ऋषिमहर्षीणां चरित्राणि चिन्त्यन्ते स्म तदा मम मनसि ऋषिमहर्षीन् प्रति महीयसी श्रद्धा समुदेति स्म हृदये च वेदेषु उपनिषत्सु शास्त्रेषु पुराणेषु च वर्णितानां तेषाम़गणनीयगुणानां परोपकाराणां च मुहुर्मुहुः स्मरणं भवति स्म, पुरातनभारतस्य च चित्राणि स्मृतिपटले युगपदेव अवतरन्ति स्म। इदानीन्तनास्तु वयं सर्वे ऋषि-वंशजा अपि ऋषीणां गौरव-पूर्णमितिहासं न विद्मो न वा तद्विषये चिन्तयाम इति खेदस्य विषयो वर्तते।

पडरौना—

खेतानवंशमुकुटो नररत्न - राधा -
कृष्णाभिधो हृदि सदैव विराजते मे।
यद्दत्त - यत्तनय - लेखसमर्पिते मे
संस्थाऽधुनापि भवने खलु चाकसीति॥ ४१॥

उत्तरप्रदेशस्य देवरियाजनपदे पडरौनानामकं नगरं वर्तते। तत्र खेतानवंशोद्भवा अनेके धनाधिपतयो विद्यानुरागिणो मारवाड़ीजना निवसन्ति। तेष्वेव श्रीराधाकृष्णखेतानमहोदया एके विशिष्ट-व्यक्तित्वसम्पन्ना लोकसम्मानिताश्च उद्योगपतयः आसन्। संस्कृतेऽपि एतेषां महीयसी अभिरुचिरासीत्। मया यदा देवरियासंस्कृत-सम्मेलनस्य वार्षिकमधिवेशनं समायोज्यते स्म तदा तत्र सर्वश्रेष्ठाय एकस्मै पण्डिताय तथा एकस्मै सुयोग्याय छात्राय च शीतकालीनं वस्त्रं तथा द्रव्यं च ते ददते स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतेषां परिवारेण वाराणस्यां हौजकटोरा-सम्भागे एकः खेतान-संस्कृतविद्यालयः सञ्चाल्यते स्म, यस्य सञ्चालकाः प्रधानाचार्याश्च पं० बालकृष्णपंचोलीमहोदया आसन्। परन्तु यदा खेतानपरिवारे चतुर्धा विभाजनं जातं तदा कस्यापि परिवारस्य विशेषसहयोगाभावात् विद्यालयः समाप्तिं गतः परन्तु भवनं केषाञ्चित् छात्राणां निवासस्य कृते उपयुज्यमानमासीत्।

एष्वेव दिनेषु मया वाराणस्यां सार्वभौमसंस्कृतप्रचारकार्यालयः सञ्चाल्यते स्म। परं तस्य कृते किमपि स्वकीयं भवनं नासीत्। तेन कार्यालयस्य कार्यकलापाः सम्यक् न प्रचलन्ति स्म। अतः संस्थायाः कृते एकस्य स्वतन्त्रभवनस्य महती आवश्यकता आसीत्। तदर्थं च अहं तथा मदीयाः केचन सुहृदो हितचिन्तकाश्च सुभृशं प्रयतमाना आसन्।

तदानीं पडरौनानगरे श्री पं० मातादीनशर्मा इति नामक एकः मारवाड़ीसंस्कृतविद्वान् निवसति स्म। सं छात्रावस्थात एव मम परिचितः, मयि श्रद्धालुः, मम परमहितचिन्तकश्च आसीत्। स एव खेतानविद्यालयस्य भवनं रिक्तं दृष्ट्वा तद्भवनं मम संस्थानाय दातुं श्रीखेतानमहोदयं निवेदितवान्, सम्यग् बोधितवान्, स्वीकारितवान् तथा इदं वृत्तं मां सूचितवान्। परन्तु एतदर्थं जिलाधीशस्य स्वीकृतिरावश्यकी आसीत्। संयोगवशात् तदानीं वाराणस्या जिलाधीशाः श्रीमहेशप्रसादमहोदया आसन् ये संस्कृतविद्वांसः, संस्कृत-हितैषिणस्तथा ममापि पूर्णपरिचिता एवं हितैषिणोऽप्यासन्। मम संस्थाया उपर्यपि तेषां पूर्णा कृपादृष्टिरासीत्। अतस्तैः शीघ्रमेव तद्भवनस्य मम संस्थाया नाम्ना लेखनाय स्वीकृतिः प्रदत्ता। अनन्तरं कलिकत्तानगरे अस्य भवनस्य संस्थाया नाम्ना पञ्जीकरणं जातम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तच्च श्रीखेतान-महोदयानामेव पुत्रेण श्रीराजेशखेतान इति नाम्ना सुप्रसिद्धेन अधिवक्त्रा सम्पादितम्।

एवं च अस्य भवनस्य संस्थानाय हस्तान्तरीकरणे पण्डित-श्रीमातादीनशर्मणः श्रीराधाकृष्णमहोदयस्य तथा श्रीराजेशखेतान-महोदयस्य सुमहद् योगदानं वर्तते। तदर्थमहं तेषां त्रयाणामपि सदैव हार्दिकीं कृतज्ञतामावहामि भूरिशः।

अस्मिन् प्रसङ्गे वाराणस्या विश्वविद्यालयप्रकाशन-संस्थाया अध्यक्षाः शिक्षासमाजसेविनः श्रीपुरुषोत्तममोदीमहोदया अपि सविशेषं स्मरणीयाः सन्ति येषां सहयोगं विना एतद्भवनप्राप्तिः सर्वथा असम्भवा आसीत्।

यतः श्रीराधकृष्णखेतानमहोदयाद् ऋते भवनस्य अन्येऽपि स्वामिनः आसन्। तेषां स्वीकृतिं विना भवनस्य प्राप्तिः सुदुर्लभा आसीत्। परन्तु श्रीमोदीमहोदयानां प्रयासेन सर्वेषां स्वीकृतिः प्राप्ता। ततो दुष्करमपि इदं कार्यं सुकरं जातम्। परन्तु अस्य भवनस्य सर्वे स्वामिनः पृथक् पृथक्, दूरे दूरे च निवसन्ति स्म। अतः मोदी-महोदयस्य पत्रं गृहीत्वा सर्वेषां सविधे गमनं तथा तेषां लिखित-स्वीकृतिपत्रग्रहणं नाम एकमपरमपि महत् कठिनं कार्यमासीत्। परन्तु इदमपि कार्यं मम पुत्रेण ब्रह्मचारी इत्युपनामकेन डॉ० विद्यानन्द-द्विवेदिना बहु परिश्रम्य, परिधाव्य च सम्यक् सम्पादितमिति तस्यापि नाम सादरं समुल्लेखनीयमस्ति। एवं-प्रकारेण अस्य महायज्ञस्य सम्पूर्तिरभूत्।

प्रयाग—

अद्यापि कुम्भसमये विमले त्रिवेणी-
तीरे निवासमधिकं सुखदं न मन्ये।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्रागतानुपशताधिकसम्प्रदायान्
वीक्ष्याऽभवन्मम सदैव समाजचिन्ता: ॥ ४२ ॥

प्रयागे हरिद्वारे च मया बहुधा कुम्भमेलावसरे तत्रैव बहूनि दिनानि निवास: क्रियते स्म। तत्र च निवासकाले बहूनां तपस्विनां साधुमहात्मनां दर्शनेन, सभासम्मेलनादिषु यज्ञानुष्ठानादिषु च गमनेन, बहुविधविचित्रवस्तूनां क्रीडाकौतुकानामवलोकनेन, यदा कदाचिद् द्रव्यसम्मानादिलाभेन च प्रत्यहमेव भूयानान्दोऽनुभूयते स्म, परं तत्र पृथक् पृथक् समवस्थितानि शताधिकानि साम्प्रदायिकानि जातिगतानि च संघटनानि दृष्ट्वा हिन्दुसंघटनविषये मम महती चिन्तापि जागर्ति स्म। कथम् अनया भावनया हिन्दुसमाजे एकता सम्भवतीति ?

अद्यापि कुम्भसमये घटितां सभां तां
दैव्या गिरोऽद्भुततमां नहि विस्मरामि।
यस्या समस्तविधगौरवमण्डिताया
मन्ये कदापि तुलना भविता न भूय: ॥ ४३ ॥

अरविन्दाश्रमस्य श्रीमातुर्जन्मशताब्दीमभिलक्ष्य सञ्चाल्यमानेषु शतं संस्कृतसम्मेलनेषु सम्पन्नेषु प्रयागे कुम्भमेलावसरे एकाधिकशततमं सम्मेलनं २४.१.७९ दिनाङ्के समारब्धम्। विश्वसंस्कृतसम्मेलननाम्ना अनुष्ठितं सम्मेलनमिदं संस्कृतसम्मेलनानामितिहासे सर्वापेक्षया अभूतपूर्वमासीत्। सुविस्तृतस्य सुविशालस्य च पटमण्डपस्य अधस्तात् विश्वहिन्दुपरिषद: सुसज्जिते सुबृहत्तमे च रङ्गमञ्चे सम्मेलनकार्यमुपक्रान्तम्। कुम्भमेलाकारणात् विश्वहिन्दुपरिषदोऽधिवेशनकारणाच्च सम्मेलने असंख्या जना उपस्थिता आसन्। तद् दृश्यं कदापि विस्मर्तुं न शक्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिन्दीगिरः सुरगिरश्च विदेशवाचां
यत्र त्रिवेणिसदृशो वहति प्रवाहः।
अद्यापि मे सुबहु कामयते मनस्त-
पुण्य-प्रयागनगरभ्रमणानि भूयः॥ ४४॥

प्रयागे गङ्गया सह यमुनासरस्वत्योः नद्योः सङ्गमो भवति यः त्रिवेणीसङ्गमः कथ्यते। एतत् त्रिवेणीकारणात् प्रयागस्य महत्त्वमधिकं भवति। स तीर्थराज इत्युच्यते। परं प्रयागस्य एकमपरमपि वैशिष्ट्यं वर्तते यत् अत्र यथा त्रिविधा जलधारा प्रवहति तथैव त्रिविधा वाङ्मयी धारापि प्रवहति। तत्र प्रथमा धारा भवति संस्कृतभाषाया या प्रयागस्य सुप्रतिष्ठितात् डॉ० गङ्गानाथझा शोधसंस्थानात् प्रवहति। संस्थानमिदं (सम्प्रति केन्द्रीय-संस्कृत विद्यापीठनाम्ना प्रसिद्धं) हस्तलिखित-मुद्रितसंस्कृतग्रन्थानां विशालेन संग्रहेण, अनुसन्धान-विभागस्य सञ्चालनेन, बहूनां विविधानां च गौरवशालिनां ग्रन्थानां प्रकाशनेन, प्रख्यातयशसां विदुषामभिनन्दनेन, अद्यापि-विविध-कार्यक्रमाणामायोजनेन च संस्कृतक्षेत्रे महनीयां कीर्तिमुपस्थापयति।

एतदतिरिक्तं प्रयागक्षेत्रमितोऽपि बह्वोः कालात् पूर्वत एव संस्कृतशिक्षाक्षेत्रे विशिष्टां ख्यातिं भजमानं वर्तते। अत्र श्रीरामदेशिक-संस्कृतमहाविद्यालयः, श्रीमहानिर्वाणवेदविद्यालयः, श्रीधर्मज्ञानो-पदेशसंस्कृतमहाविद्यालयः, श्रीसच्चाबाबा-अध्यात्म-संस्कृत-महाविद्यालयश्चेति अनेके महाविद्यालयाः स्वस्वशास्त्रनिष्णातैः पण्डितैर्मण्डिता अस्य नगरस्य गौरवं वर्द्धयन्ति। अहं स्वप्रचारकाले एतेषां विद्यालयानां विविधेष्वायोजनेषु बहुधा भागं गृह्णामि स्म। तस्मात् तत्रत्येन संस्कृतसमाजेन मम सर्वदैव घनिष्ठः सम्बन्धः समवर्तत।

अत्र द्वितीया धारा प्रवहति हिन्दीभाषाया या हिन्दीसाहित्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्मेलनात् प्रवर्तते। इदं संस्थानं समस्ते देशे हिन्दीभाषायाः देवनागरवर्णमालायाश्च प्रचारार्थं १९१० तमे संवत्सरे संस्थापितमभूत्। एतत्सम्मेलनस्य प्रथमाधिवेशनं महामनसां मालवीयमहोदयानां साभापत्ये सुसम्पन्नमजायत, सचिवपदे च राजर्षिश्रीपुरुषोत्तमदास-टण्डनमहोदया व्यराजन्त। टण्डनमहोदयानां सञ्चालकत्वे नेतृत्वे च सम्मेलनमिदं समस्ते देशे देशाद्बहिर्भागेषु च विविधानां सभासम्मेलनानामायोजनं कृत्वा, परीक्षाः सञ्चाल्य, प्रचारोपयोगीनि पुस्तकानि प्रकाश्य, त्रैमासिकशोधपत्रिकायाश्च प्रकाशनं विधाय हिन्दीभाषायाः तन्माध्यमेन राष्ट्रस्य च महतीं सेवां समपादयत्।

वैदेशिकीषु भाषासु अस्माकं देशे सर्वत्र आङ्गलभाषायाः वर्चस्वं प्रचारश्च सर्वाधिको विद्यते। तत्सम्बद्धानि संस्थानानि प्रतिष्ठानानि च महानगरेषु भूयांसि विराजन्ते, भाषाक्षेत्रे महतीं च सेवां सम्पादयन्ति। परन्तु प्रयागक्षेत्रे उपर्युक्तसंस्थाद्वयसमानं किमपि विशिष्टं, विशालं, सुविख्यातं च आङ्गलभाषायाः प्रतिष्ठानं नास्ति। तथापि तत्रत्ये विश्वविद्यालये, अन्येषु च केषुचित् महाविद्यालयेषु, शिक्षण-प्रशिक्षणक्षेत्रे, शोधक्षेत्रे, प्रकाशनक्षेत्रे च आङ्गलभाषायाः कीर्तिमानं स्वीकर्तव्यं भविष्यत्येव। अतो भाषात्रिवेण्यां तत्प्रवाहस्यापि कश्चन विशिष्टः परिचयो महत्त्वं च परिदृश्यते एव।

बलरामपुर—

शाकं विनाऽतिथिवरं कथमाशयानि
सूपौदनं सदनमागतमेकवारम्।
इत्थं विचिन्तनपरं विवुधं यदैक्षम्
अद्यापि तन्मनसि मे कुतुकं तनोति॥ ४५॥

एकदाऽहं छात्रावस्थायां वाराणसीतः बलरामपुरं गतवानासं प्रचारार्थं भ्रमणार्थं च। अत्र एकस्य आंग्लमहाविद्यालयस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृताध्यापकानां पं० राजकिशोरपाण्डेयमहोदयानां निवासस्थाने मम स्थितिरासीत्। प्रातःकाले स्नानादिकं कृत्वा चिन्तामग्नं पण्डितमहोदयं दृष्ट्वा अहं पृष्टवान्—"महोदय, किमिति इदानीं भोजननिर्माणकाले भवन्तः एवं चिन्तानिमग्ना दृश्यन्ते?" तैर्विहस्य कथितम्—"किं ब्रवीमि! वार्ता इयमस्ति यत् अहं कदापि पृथक् शाकनिर्माणं न करोमि। द्विदले एव किमपि शाकं निक्षिप्य तेनैव कार्यं साधयामि। परन्तु अद्य भवन्तः अतिथयः समागताः। तत्रापि मान्या आदरणीयाश्च। तत् कथं भवन्तं शाकरहितं भोजनं कारयानि इत्येव चिन्तयन्नस्मि।" इदं श्रुत्वा मम महत् कौतुकं जातं हास्यं च उदपद्यत।

व्रजभूमि—

सर्वं प्रियं मधुमयं व्रजवर्ति वृत्तं
भाषा ततोऽप्यतितरां मधुरा प्रसिद्धा।
लाला लला इति पदं लघुबालकानां
सम्बोधने बहुतरां मुदमातनोति॥ ४६॥

अद्यापि ता व्रजभुवो नवयौवनाढ्याः
सुस्वस्थ-गौरवपुषो ललनाः स्मरामि।
या मस्तके त्रिचतुरेषु घटेषु नीरं
तीरात् कलिन्ददुहितुः सुखमानयन्ति॥ ४७॥

मथुरायाः तीरसमीपवर्तिन्यो बह्व्यो गौरवर्णाः स्वस्था युवतयः प्रतिदिनं मस्तके त्रिचतुरेषु घटेषु यमुनाया जलमानयन्ति, न च श्राम्यन्ति इति दृश्यं मम नयनयोरतिमोहकं भवति स्म।

प्रथमयात्रायां १.३.७४तः आरभ्य २१.३.७४ पर्यन्तं तथा द्वितीय-यात्रायां १.७.७८तः आरभ्य ११.७.७८ पर्यन्तं मम मथुरायां वृन्दावने च निवासः भ्रमणकार्यं चासीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि ता व्रजभुवः परिणीतकन्या
धन्या अवैमि नितरां बहुसौख्यभाजः।
या मातृवेश्मनि विधाय दिने निवासं
सायं ततः पतिगृहं पुनराव्रजन्ति॥ ४८॥

मथुराया अयमपि एको व्यवहारः सर्वथा नूतनो विस्मयावहश्च प्रतिभाति यत् मथुरायाः याः कन्याः तत्रैव विवाहिता भवन्ति ताः कार्यवशात् दिने मातुः समीपे तिष्ठन्ति, परं रात्रौ पुनः पतिगृहं समायान्ति। तासां पितृगृहे पतिगृहे वा गमनागमनयोः कापि सामाजिकी बाधा न भवति। इदं द्वयोरपि कुलयोः कृते परमं सुविधाजनकं हितावहं च मे प्रतिभाति स्म।

भाटपाररानी—

अद्यापि मित्रवर - केशवचन्द्रमिश्र-
कीर्तिस्थली लसति मे हृदि भाटपारम्।
यन्मे सुदीर्घतम - संस्कृत - साधनाया
आधारभूमिरभवत् सुदृढा चिराय॥ ४९॥

उत्तरप्रदेशस्य पूर्वाञ्चलवर्तिनो देवरियामण्डलस्य पूर्वदिशाया अन्तिमं लघु नगरं "भाटपार" नाम्ना विदितं वर्तते। परन्तु इदं लघु अपि नगरं शैक्षिकदृष्ट्या सांस्कृतिकदृष्ट्या च उत्तरप्रदेशस्य पूर्वाञ्चले सर्वाधिकं विख्यातं स्थानमस्ति। अस्य च विख्यातौ मूलभूता आसन् सुगृहीतनामधेया आचार्यश्रीकेशवचन्द्रश्रिमहाभागा यैस्तत्र मदन-मोहनमालवीयमहाविद्यालयः संस्थापितः, सर्वविधसाधनसम्पन्नतया उत्कृष्टरूपेण सञ्चालितश्च। अस्य महाविद्यालयस्य अङ्गरूपेण संस्कृतपाठशाला, आयुर्वेदमहाविद्यालयः, तक्षशिलापुस्तकालयः, भीम-व्यायामशाला, पुरातत्त्वसंग्रहालयश्चेति अन्या अपि अनेकाः संस्था मिश्रमहोदयैः स्थापिताः सञ्चालिताश्च। एतदतिरिक्तं समये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समये अखिलभारतीयानां; प्रदेशीयानां, मण्डलीयानां च विविधानां शिक्षासाहित्यसम्बन्धिनां सम्मेलनानामायोजनम्, बहूनां ख्यातिभाजां विदुषां सम्मानः, विविधजयन्तीनां प्रदर्शिनीनाञ्च आयोजनञ्चेत्यादयः अपरेऽपि अनेके महत्त्वपूर्णाः कार्यक्रमाः सम्यक्तया प्रचलन्ति स्म। एवं च स्थानमिदं मिश्रमहोदयानां प्रयासेन महतीं ख्यातिमभजत। मिश्रमहोदयाश्चापि अपरमालवीयरूपेण समाजे सर्वत्र महान्तं सम्मानं, महतीं प्रतिष्ठां, सुमहत् लोकप्रियत्वञ्च समुपार्जयन्।

स्थानमिदं मम ग्रामात् केवलं चतुर्षु क्रोशेषु दक्षिणस्यां दिशि अवतिष्ठते। परन्तु १९४६तमवर्षपर्यन्तं मिश्रमहोदयेन सह मम साक्षात्कारः परिचयो वा नासीत्। परं नाम तु बहुधा श्रुतिपथं गतमासीदेव। अतोऽहमेकदा तान् मिलितुकामो भाटपारं गतवान्। तेषां कार्यालये साक्षात्कारो जातः। तेऽपि कतिपयदिनेभ्यो मम साक्षात्कारं प्रतीक्षमाणा आसन्। तस्माद् उभयोरपि आवयोः चिरप्रतीक्षितसमीहितसिद्धौ महती प्रसन्नता जाता। चिरं वार्तालापो जातः। विविधा च संस्कृतविषयिणी चर्चा जाता। नितान्तं आमोद-प्रमोदमयं मिलनमासीदिदं प्रथमम्। ततः परं तदानीमेव तैः महाविद्यालये एका सभा आयोजिता, मदीयं भाषणं कारितं तथा तस्मादेव दिनात् तत् स्थानं संस्कृतप्रचारस्य एकं केन्द्रं सञ्जातम्। अनन्तरं च यदा मया १५ अगस्त १९४७ ई० दिनाङ्के वाराणस्यां संस्थापितस्य सार्वभौम-संस्कृत-प्रचार-संस्थानस्य पञ्जीकरणं कृतं तदा श्रीमिश्रमहोदया एव प्रधानमन्त्रिपदे सर्वसम्मत्या निर्वाचिताः। तदारभ्य आवयोः स्नेहः सम्बन्धश्च दिनानुदिनं घनिष्ठतामभजत्। अहं प्रायेण तेषामावासे निवसामि स्म। मम संस्थानस्य विकाससम्बन्धे च चिन्तनं विधीयते स्म। संस्थानस्य नियमावली अपि मिश्रमहोदयैरेव निर्मिता तथा संस्थानस्य सर्वविधेषु लघुषु बृहत्सु वा कार्यकलापेषु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषां महान् सहयोगो भवति स्म। एवं च संस्थानस्य या कापि प्रगतिर्जाता तस्या आधारभूमिः भाटपारमेवाभूदिति सर्वदा इदं स्थानमहं कृतज्ञतया स्मरामि।

पुनश्च श्रीमिश्रमहोदयानां प्रयासेन अस्मिन् लघुनगरे अ० भा० संस्कृत-साहित्यसम्मेलनस्य बृहदायोजनं सम्पन्नम्, अन्यान्यपि संस्कृतसम्मेलनानि बहुवारं सम्पन्नानि, संस्कृतपुस्तकप्रदर्शन्यः समायोजिताः, नानाविधाः कालिदासादिजयन्तीसमारोहाश्चापि आयोजिताः तथा अत्र सर्वविधानां प्राचीननवीनानां संस्कृतगीतानां गानस्यापि अनेकवारं मनोहराणि आयोजनानि सम्पन्नतां गतानि। अत्रत्या उर्दूअध्यापकाः श्रीइस्लाहीमहोदया यदा "निनादय नवीनामये वाणि वीणाम्" इति गानं कब्वालीरागेण मंचे गायन्ति स्म तदा तालिकावादनेन सर्वे श्रोतारः सुमहदानन्दं प्रकटीकुर्वन्ति स्म। एवं च स्थानमिदं संस्कृतप्रचारस्य कृते महत्प्रेरणाप्रदं केन्द्रमासीत् जीवनकाले श्रीमिश्रमहोदयानाम्। एतदपि एकं वैशिष्ट्यं वक्तुं शक्यते अस्य स्थानस्य चिरस्मरणीयम्।

मथुरा—

अद्याप्यहं प्रतिदिनं स्पृहयामि तेभ्यः
"पेड़ा"ऽभिधान - मथुराभव - मोदकेभ्यः।
ये स्वल्पभक्षणवशादपि तं प्रदेशं
माधुर्यसौरभभरेण सुगन्धयन्ति॥ ५०॥

मथुरानगरे विशुद्धकिलाटे (खोआ) एलां मिश्रयित्वा "पेड़ा" नामको यो मोदको निर्मीयते स अत्यन्तं स्वादिष्ठः सुगन्धिः सन्तर्पकश्च भवति। यत्रैव इदं स्थाप्यते किञ्चिद् भक्ष्यते वा तदेव स्थानं सुगन्धमयं भवति। तादृशो मोदकः बिहारप्रदेशस्यं 'देवघर' स्थानं विहाय अन्यत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुत्रापि न लभ्यते। मथुरानिवासकाले मया प्रतिदिनमेतस्य भक्षणं क्रियते स्म। अतः साम्प्रतमपि तत् स्पृहयते मम मनः।

अद्यापि बाल्यसमये मथुरानगर्यां
दृष्टानि यामुनजले सततं स्मरामि।
वृद्धस्य कच्छपकुलस्य पुरः प्रमोदात्
वृत्तानि बालशफरीकुल-नर्तनानि॥ ५१॥

मथुरायां यमुनाया जले कच्छपा बहुला भवन्ति तीरवर्तिनि जले च आगत्य तिष्ठन्ति। तत्र स्नानार्थिनो जनाः किञ्चित् खाद्यं वस्तु जले प्रक्षिपन्ति तच्च ते खादन्ति। एतदर्थमेव तत्र तेषां समुदायो दृश्यते। तत्र इदं दृष्ट्वा महत् कौतूहलं जायते यत् बृहतां कच्छपानां पुरस्तात् बहवो लघुलघुमीना अपि आगत्य प्लवन्ते खाद्यं वस्तु च यथालाभं तथा खादन्ति यथा वृद्धजनानां पुरस्तात् लघुलघुबालकाः।

अद्यापि लज्जति मनो मथुरानगर्यां
वृन्दावने च दधि - दुग्ध - सरं मनोज्ञम्।
संयाचतो बहुजनाननुधावतश्च
स्मृत्वा द्विजान् नवनवानपि हृष्टपुष्टान्॥ ५२॥

मथुरायां विशेषतो वृन्दावने च इदं लज्जाकरं दृश्यं प्रायः सर्वास्वेव यात्रासु मम दृष्टिपथमागतं यत् तत्र वयसा युवानः शरीरेण हृष्टपुष्टा अपि अनेके ब्राह्मणाः यात्रिणां पुरस्तात् पृष्ठतश्च किञ्चिद् दधि भोजयतु, किञ्चिद् दुग्धं पाययतु, किञ्चिद् दुग्धसरः (मलाई) दापयतु, अथवा द्रव्यमेव ददातु, इति कथयन्तः याचमानाश्च तान् अनुधावन्ति, प्रार्थयन्ते, स्वां प्रतिष्ठां विनाशयन्ति, ब्राह्मणसमाजं च कलङ्कयन्ति।

महोबा—

अद्यापि भारतभुवः प्रथिते 'महोबा'-
ग्रामे श्रुता उभयवीरकथाः स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

या: प्रौढगायकदलेन बलेन गीता
रोमाञ्चयन्ति न तनुं खलु कस्य पुंसः॥ ५३॥

विश्वभारत्याः राष्ट्रियविद्वत्परिषदः संस्कृतशिक्षणगोष्ठ्यां सम्मिलितुमहं १२.३.८२ दिनाङ्के उत्तरप्रदेशस्य सुप्रसिद्धं ग्वलियर-नगरं प्राप्तवान् आसम्। तत्रत्यं गोष्ठीकार्यं सम्पाद्य बहोः कालात् द्रष्टुमिष्टं महोबानगरमहं १४.३.८२ दिनाङ्के सम्प्राप्तः। इदं नगरं सुविख्यातयोः आल्हाऊदलनाम्नोः द्वयोः वीरपुरुषयोः जन्मस्थली कर्मस्थली चेति सुप्रसिद्धं वर्तते। अत्र एकं चण्डिकामन्दिरं वर्तते यत्र उभावपि वीरौ दुर्गादेव्याः पूजनमाराधनां च कुरुतः स्म। अनयोरेव वीरताया गाथा आल्हागीतरूपेण उत्तरप्रदेशे मध्यप्रदेशे च ढोलक-वाद्येन सह सोल्लासं गीयते महत्या श्रद्धया च सह ग्रामीणैः नागरिकैश्च समूहरूपेण श्रूयते। इदं गीतं मया बहुषु स्थानेषु श्रुतं परं महोबानगरे यत् श्रुतं तत् सर्वथा अश्रुतपूर्वमासीत्, अत्यद्भुतं रोमाञ्चकारि च।

मिर्जापुर—

मिर्जापुरे विविध-लौकिकगीतगोष्ठ्या-
माकर्णिता मृदुतर-स्वर-वर्ण-बद्धा।
अद्यापि सा प्रतिपदं रसमुद्गिरन्ती
मिर्जापुरी कजलिका प्रमुदं तनोति॥ ५४॥

एकदा १९७७ तमे खृष्टाब्दे अहं मिर्जापुरं गतवान्। तत्र च वरियाघाट-समीपवर्तिनि संस्कृतमहाविद्यालये स्थित आसम्। तदानीं श्रावणमासः प्रचलति स्म, अतः वरियाघट्टे मिर्जापुरी-कजलीगायकानां महान् समुदायः एकत्र भवति स्म, महता समारोहेण च रात्रिपर्यन्तं गीतानां कार्यक्रमः प्रचलति स्म। महाविद्यालयस्य समीपवर्तितया, स्वयमपि संगीतरसिकतया च अहमपि तस्मिन् समारोहे उपस्थितो भवामि स्म। बनारसी-कजलीगीतानां ज्ञानं तु मम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वतोऽपि आसीदेव परं मिर्जापुरीकजलीगीतानां रसास्वादनस्य अयं मे प्रथमः प्रमोदभरोऽवसर आसीत्। तानि गीतानि मया इदानीमपि गीयन्ते।

मुजफ्फरनगर—

अद्यापि भारतसुधीजनमौलि-सीता-
रामाभिधानविदुषां भवने विशाले।
वस्तूनि तानि सकलानि बृहद्बृहन्ति
दृष्टानि मन्मनसि विस्मयमावहन्ति॥ ५५॥

वाराणसीनिवासिनो विख्यातसाहित्यकाराः आचार्यश्रीसीताराम-चतुर्वेदिमहोदया देशे विख्यातकीर्तयः सन्ति। एतेषामेकं विशालं भवनं मुजफ्फरपुरनगरेऽपि वर्तते यद् "वेदपाठिभवनम्" इति नाम्ना प्रसिद्धमस्ति। आचार्यचतुर्वेदिमहोदयं मिलितुमहं १७.११.७६ दिनाङ्के तेषां भवनं प्राप्तवान्। प्रारम्भिककुशलप्रश्नानन्तरं तेषां प्राङ्गण-द्वययुतस्य विशालभवनस्य अवलोकनप्रसङ्गे भोजनपानाद्यवसरे च इदं सविस्मयं दृष्टं यत्तेषां भवनस्य एकमपि वस्तु लघ्वाकारं नासीत्। सर्वाण्यपि वस्तूनि बृहदाकाराण्येव आसन्। पर्यङ्कादारभ्य (छुरिका) कर्तरीपर्यन्तं सर्वाणि काष्ठनिर्मितानि लौहनिर्मितानि च वस्तूनि, स्थालीपात्रादारभ्य चमसपर्यन्तं सर्वाणि पात्राणि, सितार-हारमोनियम्-तबलाप्रभृतीनि सर्वाणि वाद्यानि च अन्यस्थानापेक्षया द्विगुणिताकाराणि त्रिगुणिताकाराणि च आसन्। तेषां पुस्तकालयस्य विषये किं वक्तव्यम्? तदपि तेषामध्ययनानुरूपमेव असाधारण-मासीत्। तेषां गृहस्य आसन्दिका विशालत्वात् भारवत्त्वाच्च मया इतस्ततो नेतुं न शक्यते स्म। "सर्वं हि महतां महत्" इति सूक्तिः बहोः कालाद् ज्ञायते स्म परं तस्याः प्रत्यक्षमुदाहरणं मया एतेषामेव गृहे दृष्टम्। एतत् सर्वं सर्वथा युक्तमेवासीत्। यतः चतुर्वेदिमहोदयस्य सर्वे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पारिवारिका जना अपि विशालकाया एव भवन्ति। विशालवस्तूनां प्रदर्शनी वक्तुं शक्यते तेषां भवनम्।

मुरादाबाद—

अद्यापि मुस्लिममहासमितौ मुरादा-
बादे पुरेऽमरगिरो विबुधैर्विरोधे।
प्रोक्तान्यनर्गलवचांसि बहूनि तारं
सञ्चिन्तितानि हृदये जनयन्ति चिन्ताम्॥ ५६॥

१९६५ तमे खृष्टीयसंवत्सरेऽहं प्रचारप्रसङ्गेन अप्रैलमासस्य प्रथमसप्ताहे मुराराबादनगरं (उ.प्र.) गतवानासम्। तत्रैव संयोगवशात्तदानीं ८-९ अप्रैलदिनाङ्के "कुलहिन्दमुस्लिम मजलिस मुसावरात" सभायाः क्षेत्रीयं महाधिवेशनं "शौकतबाग" स्थाने समायोजितमासीत्। तत्र कतिपयसदस्यैः उर्दूसमर्थनं कुर्वद्भिः संस्कृतविरोधेऽपि विविधा विचाराः प्रकटीकृतास्तारस्वरेण। मुस्लिमलीगी सांसदः श्री ए. के. समदमहोदयस्तु प्रोक्तवान्— "हिन्दुस्तान के करीब ५०० लोगों की जबान संस्कृत पर दो करोड़ रुपया खर्च किया जाता है, यानी ४० हजार रुपये फी आदमी। उसके ख़िलाफ उर्दू के साथ ज्यादती की जा रही है।"

राजापुर—

अद्याप्यहं सकुतुकः सततं स्मरामि
राजापुरस्थ-तुलसीस्मृतिमन्दिरं तत्।
रामायणाय खलु यत्र समर्पितानां
सङ्ख्या न जातु सुशका वरवेष्टनानाम्॥ ५७॥

१३.१.७० दिनाङ्के अहं कर्वी (चित्रकूट) स्थितस्य श्रीजयदेव-वैष्णवसंस्कृतमहाविद्यालयस्य वार्षिकोत्सवे विद्वद्गोष्ठीसमारोहे कवि-सम्मेलने च भागं ग्रहीतुं कर्वीं गतवानासम्। ततः परावर्तनकाले

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१४.१.७० दिनाङ्के राजापुरं समागतः। इदं नगरं गोस्वामि-तुलसीदासस्य जन्मस्थानमस्ति। अत्र एकः तुलसीस्मारक-संस्कृतमहाविद्यालयोऽपि प्रचलति। एकस्मिन् विशाले परिसरे गोस्वामीजीद्वारा स्थापितं हनुमन्मन्दिरमपि विद्यते। इदं सर्वं द्रष्टुं समाकृष्टमना अहमत्र समागत आसम्। परन्तु अत्र आगत्य मया यत् सर्वाधिकमाकर्षकं वस्तु दृष्टं तद् आसीत् गोस्वामिमहोदयानां हस्तलिखितं श्रीरामचरितमानसस्य अयोध्याकाण्डम्। परन्तु इतोऽपिं आकर्षकं विस्मयकरं च वस्तु आसीत् अस्य पुस्तकस्य चित्रविचित्रवर्णयुतानां वेष्टनानां बाहुल्यम्। अत्र यः कोऽपि आगच्छति, पुस्तकस्य कृते एकं नूतनं वेष्टनं ददाति। वेष्टनबाहुल्येन पुस्तकस्य दर्शनं किञ्चिद् दुष्करं भवति। परं तत्रत्यानां संस्कृतच्छात्राणां साहाय्येन मत्कृते इदं सुकरं जातम्।

लखनऊ—

उर्दूहितैकरत - शासन - भञ्जनाय
संचालिते बुधजनैः प्रबले विरोधे।
काराप्रविष्टविदुषां प्रियसाहसाना-
मद्यापि सादरभरं स्मरणं करोमि॥ ५८॥

श्रीबनारसीदासमहोदयानां मुख्यमन्त्रित्वकाले उर्दूभाषायाः प्रबल-पक्षपातिना उत्तरप्रदेशशासनेन संस्कृतशिक्षाया उच्छेदाय केचन प्रस्तावाः पारिता येषां विरोधाय १९७९-८०तमे वत्सरे लखनऊ-निवासिभिः बहुभिः संस्कृतपण्डितैः संस्कृतानुरागिभिश्च सम्मिलित-रूपेण सुमहदान्दोलनं प्रारब्धम्। एतस्मिन्नेव क्रमे च केचन कारागार-मपि गतवन्तः शासनसमक्षं च सुमहद्विरोधं प्रकटीकृतवन्तः। ये कारागारं गतास्तेषु मुख्या निम्नाङ्किता महानुभावा आसन्—बाबू राधाकृष्ण अग्रवालः, पण्डितब्रह्मदत्तदीक्षितः, डॉ० एस०पी० दुबे,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

डॉ० जी० एन० चतुर्वेदी, श्रीजयशंकरशास्त्री, श्रीशिवबालकद्विवेदी, डॉ० वीरभद्रमिश्रः, ओङ्कारनाथमिश्रश्च। संस्कृतरक्षायै बद्धपरिकराणामेतेषामान्दोलनस्य फलमिदं जातं यद् उत्तरप्रदेशे पुनः संस्कृतशिक्षा प्राचलत्।

श्रीराज्यपालवर - वुर्गुल - रामकृष्ण-
रावैः मनीषिमणिभिः सह राजगेहे।
भुक्तान्यनन्यसुलभानि सुखानि मास-
मद्यापि तानि मनसः प्रमुदे स्मृतानि॥ ५९॥

उत्तरप्रदेशस्य महामहिमराज्यपालाः श्री वी० रामकृष्णराव-महोदयाः मम पूर्वपरिचिता आसन्। तेषां महान् विद्याव्यासङ्ग आसीत्। अतस्ते यत्रैव गच्छन्ति स्म तत्रैव संस्कृत-तेलगू-उर्दू-इङ्गलिशभाषाणां द्वित्रिसहस्रपुस्तकानि नयन्ति स्म। एकदा राजभवने साक्षात्कारकाले मया तानि पुस्तकानि विशेषतः संस्कृततेलगू-पुस्तकानि द्रष्टुं वाञ्छा प्रकटीकृता। ततस्तैरनुमतिः प्रदत्ता सहर्षं, राजभवने एव च पञ्चदशदिनानि मम निवासस्य व्यवस्था कृता। पुनश्च ते आत्मना सहैव मामपि भोजनं कर्तुं कथितवन्तो येन संस्कृत-भाषणस्य तेषामभ्यासः पुनरपि प्रवर्तितो भवेत् वृद्धिं चापि गच्छेत्। मया एष तेषामनुरोधः स्वीकृतः। पुस्तकानामवलोकनं, तैः सह भोजनं, संस्कृते सम्भाषणं च प्रारब्धम्।

राज्यपालमहोदया आन्ध्रप्रदेशीया आसन्। अतस्तेषां भोजने दक्षिणभारतीयानां भोज्यवस्तूनां प्रचुरता भवति स्म।

राजभवननिवासकाले मम एकमपरमपि नूतनं वृत्तं संवृत्तम्। तत्र निवासकाले मम भोजनं तु राज्यपालमहोदयैः साकमेव भवति स्म परं प्रातः सायं च चायपानादिकं मया स्वप्रकोष्ठे एव विधीयते स्म। मदर्थे चायं तथा अन्यदपि अल्पाहारादिकं राजभवनस्य एकः गौरवर्णः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्लृप्तश्मश्रुः खद्दरधारी प्रोन्नतकायः पर्वतीयब्राह्मण इव प्रतीयमानो भृत्यः आनयति स्म जलादिकं च ददाति स्म। परन्तु यदा एकदा तस्य एको बन्धुः तं "ओ जफरुल्लाभाई" इत्युक्त्वा आहूतवान् तदा मया ज्ञातं यदयं मुस्लिमजनः अस्ति। तदा मम मनसि एतद्घटनाया जातत्वात् किञ्चिद् वैरस्यं जातम्। तदा मया राज्यपाल-महोदयाग्रे इदं सूचितम्। ते अञ्जलीं बद्ध्वा हसित्वा च मामवोचन्—"विद्वन्! अत्र राजभवने इदं दोषकरं न भवति। भवद्भिः वाराणसीं गत्वा गङ्गास्नानेन अयं दोषः प्रक्षालनीय इति"। अनन्तरं तैः भृत्यपरिवर्तनं कृतं तथापि ममं मनः प्रसन्नं न जातम्।

पूर्वभृत्ये किमपि मुस्लिमलक्षणं नासीदिति अहं विश्वस्त आसम्। मया अज्ञायत यदयं पूर्वमुख्यमन्त्रिभिः श्रीगोविन्दवल्लभपन्तमहोदयैः नियुक्तः कोऽपि पर्वतीयो ब्राह्मणो वर्तते इति। पश्चाद् विषयेऽस्मिन् ममापि विचारे किञ्चित् परिवर्तनं जातम्, तादृश आग्रहश्च परित्यक्तः।

तदानीं ८.८.६१ दिनाङ्के अहं लक्ष्मणपुरं प्राप्त आसम्।

अहं १६.३.६२ दिनाङ्के राजभवनमागतः ३१.३.६२ पर्यन्तं च स्थितः। एतेषु दिनेषु श्रीरावमहोदयाः प्रतिदिनं नूतनं नूतनं भोजनं कारयन्ति स्म। भोजननिर्माणं तेषां पत्नी एव करोति स्म। अतः सापि पृष्ट्वा पृष्ट्वा कदाचित् उत्तरभारतीयं कदाचित् दक्षिणभारतीयं, कदाचित् मिष्टं, कदाचित् आम्लञ्चेति बहुविधानि सुस्वादूनि भोजनानि निर्माति स्म निर्मापयति स्म च स्वसहचरीद्वारा। तादृशं भोजनमन्यत्र कुत्र सम्भवति? अतस्तत्स्मरणेनैव सम्प्रति मनः परितोषयामि, प्रीणामि च।

अद्यापि संस्कृतसभाऽखिलभारतीया
मध्येपुरं निजयशोध्वजमुच्छ्रयन्ती।
गोपालचन्द्रसिनहातपसः स्थली सा
शश्वत् स्मृता मम मनो मुदितं करोति॥ ६०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र लखनऊनगरस्य अखिलभारतीय-संस्कृतपरिषदः चर्चा वर्तते। उत्तरप्रदेशस्य तदानीन्तनानां गृहमन्त्रिणां स्वनामधन्यानां श्रीसम्पूर्णानन्दमहोदयानां प्रेरणया १६ नवम्बर, १९५१ दिनाङ्के लखनऊनगरे अस्याः परिषदः स्थापनाऽभूत्। अस्या उद्देश्येषु संस्कृतभाषायाः, संस्कृतशिक्षायाः, संस्कृतसाहित्यस्य, संस्कृत-समाजस्य च उन्नायकाः, संबर्द्धकाः, संरक्षकाश्च यावन्तः कार्यक्रमाः भवितुमर्हन्ति ते सर्वेऽपि अन्तर्भवन्ति। परिषदियं सम्प्रति नगरस्य मध्यभागे राजमार्गस्थितस्यैव एकस्य विशालभवनस्य उपरितने भागे विराजते। अत्रैको बृहत् पुस्तकालयो विद्यते यत्र भूयांसो जिज्ञासवः शोधच्छात्राश्च आगत्य लाभान्विता भवन्ति। इतः संस्कृतभाषायां "अजस्रा" आंग्लभाषायाञ्च "ऋतम्" इति द्वे पत्रिकेऽपि प्रकाश्येते।

परिषदः सञ्चालनार्थं समुन्नयनार्थं च बद्धपरिकरेषु लखनऊ-नगरस्य न्यायाधिकारिणः श्रीगोपालचन्द्रसिनहामहोदयाः मुख्यतमा आसन्। लखनऊनिवासकाले अहं बहुधा परिषदि गच्छामि स्म।

अद्यापि उत्तरप्रदेश - अकादमीया
संस्थापना स्मृतिगता प्रमुदं प्रसूते।
याऽशेष - संस्कृतविकास - परम्पराया
आधारभूमिरभवत् सुदृढा चिराय॥ ६१॥

लखनऊनगरं विशालस्य उत्तरप्रदेशस्य राजधानी अस्ति। परन्तु अत्र राजधान्या अनुरूपं किमपि बृहत्तरं संस्कृतप्रतिष्ठानं नासीत्। एतन्न्यूनतादूरीकरणाय संस्कृतभाषायाः सर्वविधसमुन्नतिसाधनाय च उत्तरप्रदेशीयशासनेन ३१-१२-१९७६ दिनाङ्के संस्कृतअकादमी संस्थायाः स्थापना कृता, या सम्प्रति "उत्तरप्रदेश संस्कृत संस्थान" नाम्ना अभिधीयते।

अनेन संस्थानेन संस्कृतभाषायाः, संस्कृतसाहित्यस्य,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदध्यापकानां, लेखकानां, कवीनां, प्रचारकाणां, विपन्नपण्डितानां, छात्राणां च हिताय अनेका योजनाः परिकल्पिताः। एतदतिरिक्तं सभासम्मेलनादीनामायोजनं, गोष्ठीनां प्रवर्तनं, संस्कृतशिक्षण-शिविराणां सञ्चालनं, पत्र-पत्रिकाणां कृते सहयोगप्रदानम्, संस्कृत-संस्थाभ्यः साहाय्यप्रदानं, पुस्तकानां प्रकाशनाय सहयोग-प्रदानम्, संस्कृतविद्वद्भ्यो विविधपुरस्कारप्रदानञ्चेत्यादयः अन्या अपि अनेका योजनाः स्वीकृताः यथासम्भवं च कार्यान्विता अपि विहिता विधीयन्ते च। एवं च संस्थानमिदं संस्कृतभाषायाः संस्कृत-समाजस्य च कृते सुमहद् बलवच्च आशाकेन्द्रं सञ्जातमिति तत्स्थापनादिनस्य स्मरणं सदा मम हृदयं प्रमोदयति प्रोत्साहयति च। अस्य संस्थानस्य अहमपि वारद्वयं सदस्यरूपेण सेवायां भागं गृहीतवान्।

"दिक्शूलदोषभयतो भवदुक्तकाले
नाऽशक्नुवं खलु भवन्निकटेऽभ्युपेतुम्।"
अद्यापि सैयदहुसेन - मुखोद्भवास्ता
वाचः स्मृता मम मनो बहु मोदयन्ति॥ ६२॥

लखनऊमहानगरस्य समीपवर्तिनि 'मलीहाबाद' नामके उपनगरे निवसन्ति एके सैयदहुसेन नामानो मुस्लिमसंस्कृतविद्वांसो, ये लखनऊ-विश्वविद्यालयस्य प्राच्यविद्याविभागे महापण्डितश्रीरुद्र-प्रसादअवस्थीमहोदयेभ्यः सम्यक् संस्कृताध्ययनं कृतवन्तः। संस्कृताध्ययनात् संस्कृत-सम्मेलनादिषु भागग्रहणाच्च ते सर्वेषामपि संस्कृतपण्डितानां सुपरिचिताः प्रियाः सुहृदश्चासन्। एकदा लखनऊ-निवासकाले मया सह मिलनार्थं ते मम आवासस्थाने (सुन्दरबाग स्थिते श्री पं० शिवशंकर त्रिवेदि-महोदयानां भवने) समाहूताः। परन्तु यस्मिन् दिने मिलनार्थं ते मया आहूताः, ते तद्दिनमतिक्रम्य अपरस्मिन् दिने समागताः। एतस्य कारणे पृष्टे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तैरुक्तम्—'तस्मिन् दिने दिक्शूल आसीत्, तस्मादहं भयेन तस्मिन् दिने नागतः।' इदं श्रुत्वा मम महदाश्चर्यमभूत्। मया पृष्टम्—'भवन्तः कथं दिक्शूलभयादेवं प्रपीडिता जाताः?' तैः कथितम्—"मम गुरवः श्रीमदवस्थीमहोदयाः सदैव दिक्शूलविचारं कृत्वैव यात्रां कुर्वन्ति स्म। अतस्तद् दर्शं दर्शं ममापि तादृशी धारणा जाता इति।"

एकस्य मुस्लिमजनस्य एतादृशीं धारणां ज्ञात्वा मम महदाश्चर्यं जातं, परं प्रमोदश्चापि सुमहान् अजायत। इदं वृत्तं प्रायेण मम स्मृतौ सदा तिष्ठत्येव तथा हुसेनमहोदया अपि सदा हृदये विराजन्ते।

अद्यापि राजभवने सह राज्यपालैः
होलोत्सवे मिलितमन्त्रिमहाजनानाम्।
हासोपहासवचनान्यनियन्त्रितानि
संस्मृत्य गालिसहितानि मुदं वहामि॥ ६३॥

मम राजभवननिवासकाले एव होलिकाया अवसरः सम्प्राप्तः। होलिकाया दिने प्रातरेव सर्वे मन्त्रिणो राजभवनं समागत्य राज्यपालमहोदयं मिलितवन्तः, अभिवादनं कृतवन्तस्तथा अबीरगुलालादिलेपनेन तेषामभिनन्दनं कृतवन्तः। श्रीराज्यपाल-महोदयैरपि तथैवाचरितम्। चायपानेन ताम्बूल-एला-लवङ्गादि-प्रदानेन च तेऽपि तेषां स्वागतं सत्कारं च अकार्षुः।

एतदनन्तरं हासस्य, परिहासस्य, व्यङ्ग्यविनोदानीनां गालि-प्रदानस्य च क्रमः प्रारब्धः। तदानीं श्रीचन्द्रभानुगुप्तमहोदयाः मुख्य-मन्त्रिणः आसन्। ते अविवाहिता अभूवन्। अतस्तान् लक्ष्यीकृत्य बहुविधा वादाः प्राचलन्। केचन तान् नपुंसक इति कथितवन्तः। ततश्च तैः आत्मनः पुंलिङ्गत्वं साधयितुं घोषणा कृता। एवंविधैः वाग्विलासैरट्टहासैश्च राजभवनं दोलायमानमिव अभूत् कतिपय-क्षणपर्यन्तम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीचन्द्रभानु इति नामकमन्त्रिवर्य्यं
गुप्तं कृतज्ञमनसा सततं स्मरामि।
यस्य प्रभाववशतोऽमरवाक् प्रदेशे
अद्यापि जीवति सुखेन विराजते च॥ ६४॥

येषु दिनेषु केन्द्रीयशिक्षापरिषदा त्रिभाषायोजना स्वीकृता सर्वत्र च परिचाल्यमाना आसीत् तदानीमुत्तरप्रदेशे स्वनामधन्याः श्रीचन्द्रभानुगुप्त-महोदया मुख्यमन्त्रिपदे विराजमाना आसन्। तस्मिन् समये विद्यालयेषु तृतीयभाषारूपेण संस्कृतं पाठ्यते स्म। इदं ज्ञात्वा केन्द्रीयशिक्षामन्त्रिणा श्रीछागलामहोदयेन एकदा कथितं यद् उत्तरप्रदेशे त्रिभाषायोजनाया यथावत् पालनं न विधीयते। यतस्तत्र तृतीयभाषारूपेण दक्षिणभारतस्य एका भाषा पाठनीया आसीत्, परं तत्स्थाने तत्र संस्कृतं पाठ्यते। इदं ज्ञात्वा श्रीगुप्तमहोदयैः संस्कृतशिक्षणस्य पक्षः स्वतर्कैर्योजनाया अविरुद्धः स्थापितः। तत एवोत्तरप्रदेशे संस्कृतशिक्षणमव्याहतरूपेण प्रचलितं जातम्, अद्यापि च प्रचलति। तदिदं श्रीगुप्तमहोदयानामेव दृढतापूर्वकं संस्कृत-पक्षपोषणस्य फलं वर्तते। अतो वयं सर्वेऽपि संस्कृतज्ञास्तेषां कृतज्ञाः स्मः।

अद्यापि रामलखनेत्यभिधं मदीयं
मित्रं सदैकहृदयं सततं स्मरामि।
येषां गृहे प्रवहति स्म सदैव पुण्या
धाराऽमराऽमरगिरः खलु शिक्षणस्य॥ ६५॥

मम सुहृत्प्रवराः श्रीमन्तो डॉ० रामलखनशर्ममहोदयाः लखनऊनगरे छितवापुररोडसम्भागनिवासिनः, संस्कृतपाठशाला-निरीक्षककार्यनिर्वहणे व्यस्ता अपि संस्कृतप्रचारौपयिकेषु विविधेषु कार्यक्रमेषु निरन्तरं दत्तचित्तास्तिष्ठन्ति स्म। तैः उत्तरप्रदेशसंस्कृत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समितिनाम्ना एका समितिः सञ्चालिता यस्या अनेकान्यधिवेशनानि जातानि महत्त्वपूर्णानि। संस्कृतशिक्षणोपयोगीनि अनेकानि पुस्तकान्यपि एभिर्लिखितानि प्रकाशितानि च। एतेषां संस्कृतसेवायाः सर्वतोऽधिकं वैशिष्ट्यमिदमासीद् यदेतेषां गृहे संस्कृतशिक्षणस्य धारा सदानीरा इव निरन्तरं प्रवहति स्म। लखनऊनिवासिनो, वैदेशिकाश्चापि अनेके छात्रा अत्रागत्य प्रातः मध्याह्ने सायं निशायां च यथेच्छं सदैव अध्ययनं कुर्वन्ति स्म। परं तानि दिनानि अद्य स्मृतिशेषतां गतानीति नितरां चेखिद्यते मे चेतः।

परन्तु प्रसन्नताया अयं विषयो वर्तते यत् तेषामेकः प्रमुखः शिष्यः, ममापि च स्नेहभाजनं डॉ० सुधीरतिवारी, तेषामेव आदर्शमनुसरन् यथासम्भवं सर्वविधैरपि प्रकल्पैः संस्कृतसेवायै, ममापि संस्थायाः समुन्नतये च कृतसंकल्पो वर्तते। आशासे, मनोवाक्कायकर्मभिः वित्तेन च अयं नूनमस्माकं मनोरथान् पूरयिष्यतीति।

अनेन लक्ष्मणपुरस्य संस्कृतपाण्डित्यपरम्परानुशीलनम्, इति नाम्ना एकं महत्त्वपूर्णं पुस्तकमपि लिखितम्। तत् पुस्तकमेतद्-विषयजिज्ञासुभिरवश्यं द्रष्टव्यम्।

बदरिकाश्रम—

अद्यापि तान् बदरिकाश्रमवर्ति-विद्व-
द्वर्यान् स्मरामि मनसा बहुदुःखितेन।
येऽपारयन् परिचयं न निजं प्रदातुं
संशुद्धया सुरगिरा सदसः समक्षम्॥ ६६॥

एतेषां स्मरणमात्रेणापि मनसः कालुष्यमपयाति भावशुद्धिश्च जायते इत्यहं प्रत्यहमनुभवामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि मानसमहो मम दूयते यत्
सम्पूर्णतीर्थमुकुटे बदरीशधाम्नि।
संतप्यमान - जल - पूरित - कुण्डमध्ये
स्नानं मया न विहितं बहुतापभीतेः॥ ६७॥

बदरिकाश्रमे मन्दिरनिकट एव एकं कुण्डं वर्तते यस्य जलं नितान्तं तप्तं भवति, येन तस्य स्पर्शोऽपि न सर्वैर्जनैः कर्तुं शक्यते। तथापि भूयांसो जनास्तत्र स्नानं कुर्वन्ति। परन्तु मया तत्र तापभीतेः कदापि न स्नातमिति अद्यापि दूयते मनः।

अद्यापि दृष्टमखिलं बदरीशधाम
दृष्टानि शान्त - शुचि - रम्यतपःस्थलानि।
दृष्टाननेकमुनियोगितपस्विसिद्धान्
स्मृत्वापि वीतकलुषं स्वमवैमि नित्यम्॥ ६८॥

बदरिकाश्रमे समायोजिते उत्तरप्रदेशीयसंस्कृताध्यापकसंघस्य वार्षिकोत्सवे सम्मिलितुमहं ३०.१०.७९ दिनाङ्के हरिद्वारात् प्रस्थाय रात्रौ च कर्णप्रयागस्य वैदिकविद्यालये विश्रम्य द्वितीयदिने सायं बदरिकाश्रमं प्राप्तवान्। यात्रायामस्यां वार्षिकोत्सवस्य अध्यक्षा आचार्यश्रीपण्डितबदरीनाथशुक्लमहोदयाः तथा अन्येऽपि भूयांसः प्रादेशिकाः पर्वतीयाश्च पण्डिताः सम्मिलिता आसन्। दिनत्रयं सभा प्रावर्तत।

सभायाः प्रारम्भे मया एकः प्रस्तावः समुपस्थापितो यत् सर्वेऽपि समागताः सदस्याः संस्कृतया गिरा स्वस्वपरिचयं प्रदद्युरिति। ततस्तथैव सर्वैरनुष्ठितम्। परन्तु इदं दृष्ट्वा महती ग्लानिरभूत् यत् प्रायो बहुभिरध्यापकैः शुद्धया गिरा परिचयो दातुं न अपार्यत।

व्रजभूमि—

दिव्यैर्वनोपवन - मन्दिर - तीर्थघट्टैः
यात्रोत्सवैः ललितगीतकथाप्रबन्धैः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराधिकाहरिमयं व्रजमण्डलं तत्
अद्यापि मे स्मृतिगतं हरतीव चेतः॥ ६९॥

भक्तकविना श्रीजयदेवेन गीतगोविन्दस्य मङ्गलाचरणे लिखितम्—"राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः।" एतदनुसारं यमुनाया उभयोः कूलयोः यावन्ति वनानि, उपवनानि, मन्दिराणि, तीर्थाः, घट्टाः भवन्ति, व्रजमण्डले च यावत्यो यात्राः, ये च उत्सवाः प्रचलन्ति, यानि च ललितगीतानि गीयन्ते, कथा-कीर्तनव्रतानुष्ठानानि च अनुष्ठीयन्ते तत् सर्वमपि राधाकृष्णयोरेव नाम्ना विख्यातं वर्तते, तयोरेव लीलया सम्बद्धं वर्तते तथा तयोरेव महिम्ना मण्डितं वर्तते। अतः सम्पूर्णं व्रजमण्डलं राधाकृष्णमयमेव प्रतिभाति। तत्रापि मथुरा-वृन्दावन-नन्दगाँव-गोकुल-बरसानेप्रभृतीनि स्थानानि विशेषरूपेण प्रभावितानि दृश्यन्ते।

श्रीकृष्ण - गो - चरणपूतरजः - कणेषु
सत्प्रेम - भक्तिरस - रञ्जित - जीवनेषु।
अद्यापि दुग्ध - दधिपूर्ण - निकेतनेषु
हृद्यां व्रजेषु वसतिं सततं समीहे॥ ७०॥

व्रजमण्डलस्य इदं वैशिष्ट्यं मया मथुरा-वृन्दावन-गोकुल-बरसानेप्रभृतिषु स्थानेषु अनेकधा अनुभूतम्।

वाराणसी—

येनाऽभवन् सहजभोजनपानवार्ता-
लापाः कुटुम्बिसदृशा बहुवर्षकालम्।
अद्याप्यकृत्रिमवचोव्यवहारभाजां
मूर्तिं स्मरामि सुहृदामवधेशनाम्नाम्॥ ७१॥

अनुमानतः १९३३ ईसवीय-संवत्सरस्य इयं घटना अस्ति। तदानीमहं क्वीन्सकालेजस्य (राजकीयसंस्कृत-महाविद्यालयस्य)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छात्रावासे निवासं कुर्वन्नासम्। परं छात्रावासे प्रवेशं गृहीतवतो मम पञ्चदशदिनान्येव व्यतीतान्यासन् यदाहं छात्राणां कोलाहलात्, सदैव तेषां फिल्मीगीतगानात्, कलहाच्च उद्विग्नःसन् षोडशे दिनाङ्के छात्रावासं परित्यक्तवान्, वस्तूनि च गृहीत्वा, मध्याह्नकाले समीपवर्तिनि श्रीभारतधर्ममहामण्डलनामके संस्थाने तदध्यक्षाणा-मनुमतिं विनैव प्रविष्टवान्, वस्तूनि च एकस्य काष्ठपट्टस्य उपरि संस्थाप्य कमपि अधिकारिणं प्रतीक्षमाणः क्षणं स्थितः। अनन्तरं तत्कालमेव एके सौजन्यमूर्तयो विद्वांसः समागताः पृष्टवन्तश्च मां हिन्दीभाषया—'*आप कौन हैं, कहा से आ रहे हैं?*' तदा मया संस्कृतभाषया स्वकीयः पूर्णः परिचयः प्रदत्तः, स्वकीया परिस्थितिः स्वकीयमागमनप्रयोजनं च सर्वं निवेदितम्। ते मम संस्कृतभाषां सरलां प्राञ्जलां प्रवाहपूर्णां च श्रुत्वा प्रसन्ना अभूवन्, स्मयमानाश्च संस्कृतगिरा उक्तवन्तः—"अस्तु, स्थीयतां तावदत्रैव, रात्रौ स्थानस्य यथासम्भवं व्यवस्था विधास्यते। इदानीं भवान् अस्माकमतिथिः संवृत्तः इति।" तत् श्रुत्वा ममापि सर्वा चिन्ता व्यपगता, महती च प्रसन्नता जाता। अनन्तरमन्यजनस्य मुखादिदं परिज्ञातं यद् इमे एव सूर्योदयपत्रिकायाः सम्पादकाः, संस्थानस्य च एके सर्व-जनमान्या अधिकारिणः आसन् श्रीअवधेशप्रसादद्विवेदिनामानो, येषां मया अस्मिन् श्लोके चर्चा विहिता।

प्रथमं खलु आवामपरिचितावेव आस्तां परं स्वल्पकालेनैव आवयोः व्यवहारे प्रगाढा प्रीतिः, अविच्छेद्यं साहचर्यम्, विचारेषु ऐकमत्यम्, हार्दिकी सहानुभूतिश्च, परां वृद्धिमुपागमत् तथा सह-भोजनपानेषु, आलापसलापेषु, विनोदवार्तासु, च महान् आनन्दोऽनुभूयते स्म। द्विवेदिमहोदयः सौजन्यस्य, सहृदयतायाः सहनशीलतायाः शान्तेश्च साक्षात् मूर्तयः आसन्। तेषां वियुक्तानां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहूनि दिनानि व्यतीतानि। परमद्यापि तेषां यदा स्मरणं जायते तदा हृदयं वेदनया अभिभूतं भवति।

परन्तु श्रीद्विवेदिमहोदयानां ज्येष्ठा आत्मजाः श्रीजलेश्वरनाथ-द्विवेदिनः शीलेन स्वभावेन च तेषामेव सादृश्यं भजन्तो न्यायाधीश-पदान्निवृत्ताः सम्प्रति स्वपरिवारेण सह वाराणस्यामेव ईश्वरगंगीसम्भागे निवसन्ति। तांस्तथा तेषां परिवारं च दृष्ट्वा सुहृत्प्रवराणां वियोगस्य किञ्चित् परिहारः शान्तिमुपयाति च मदीयं चेतः।

अद्यापि तं तिलकबिन्दु-विराजिभालं
आपादमूर्ध - धवलाञ्चल - शोभमानम्।
दिव्याकृतिं मृदुलवाचमगाधसत्त्वं
श्रीमालवीयमुनिवर्यमहं नमामि॥ ७२॥

काशीहिन्दुविश्वविद्यालयस्य संस्थापकानां विश्वविख्यात-यशसां परमश्रद्धेयानां, महामनसां, श्रीपण्डितमदनमोहनमालवीय-महाभागानां पुण्यनाम्ना के नाम न परिचिताः सन्ति? परं तादृशा जना विरला एव भवेयुः ये मालवीयमहोदयानां नैकट्येन दर्शनस्य, निकटे अवस्थानस्य, तेषां चरणस्पर्शस्य, संभाषणस्य, शुभाशीर्वाद-ग्रहणस्य वा सौभाग्यं प्राप्तवन्तः स्युः। परं तादृशेषु विरलेषु जनेषु अहमपि आत्मानमेकं सौभाग्यशालिनं मन्ये।

१९३६तमस्य ईसवीयवत्सरस्य घटना अस्ति। तदानीमहं वाराणस्याः सुप्रतिष्ठिते धार्मिके संस्थाने श्रीभारतधर्ममहामण्डले निवसामि स्म। तेष्वेव दिनेषु इन्दौरस्थ-श्रीमहाराजासंस्कृतकालेजस्य प्रख्याताः प्रधानाचार्याः श्री श्रीपादहसूरकरशास्त्रिमहाभागा श्रीभारत-धर्ममहामण्डलं समागताः। ते यं कमपि विद्वांसं विशिष्टं वा पुरुषं मिलितुं व्रजन्ति स्म तत्र मामपि नयन्ति स्म। एकदा ते मया सह श्रीमालवीयमहोदयं मिलितुं गताः। तत्र परिचयानन्तरं यदा संस्कृत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रचारविषयिणी वार्ता प्रचलिता तदा मम उद्देश्यं, मम संस्कृत-प्रचारकार्यं, मम संस्कृतशिक्षणविधिं, संस्कृतप्रचाराय मम जीवन-दानस्य च वृत्तं श्रुत्वा श्रीमालवीयमहोदया भृशं प्रसन्ना अभूवन्, शयनात् किञ्चिदुत्थाय मम पृष्ठं परामृशन्तः प्रभूता आशिषः प्रददुः, द्रुतमिलनाय च आदिष्टवन्तः। तदारभ्याहं काले काले तेषां दर्शनार्थं गच्छामि स्म। तद्दिनं मम जीवनस्य कृते परमसौभाग्यमयमासीत्। अहं परमाह्लादितो भूत्वा स्वस्थानं परावृत्तवान्। तेषां दिव्यामाकृतिं, हृद्यानि वचांसि च ध्यायं ध्यायं परमं सौख्यं प्राप्तवान्।

गोपालशास्त्रिविबुधा अथ ब्रह्मदत्त-
जिज्ञासवो भरतमिश्रमनीषिणश्च।
अद्यापि पाणिनिमुनित्रितयी नवेयं
चित्तं मम स्मृतिगता विदुनोति नित्यम्॥ ७३॥

दर्शनकेशरिश्रीपण्डितगोपालशास्त्रिमहोदयाः श्री पं० ब्रह्मदत्त-जिज्ञासुमहोदयास्तथा श्री पं० भरतमिश्रमहोदयाः (सोऽहं बाबा) एते त्रयोऽपि प्राचीनव्याकरणशास्त्रस्य विख्याता ज्ञातारः, अध्यापकाः लेखकाः प्रचारकाश्च आसन्। एते त्रयोऽपि प्रायेण समानवयस्काः, समानोद्देश्याः, समानविचाराः, समानवेषाः, समानव्यवहाराः भोजन-पानादिषु समानाचाराश्च आसन्। एतेषु श्रीगोपालशास्त्रिणस्तथा श्री पं० भरतमिश्रमहोदयाश्च पूर्णरूपेण कांग्रेससमर्थकास्तथा तदान्दोलने-कारागारमपि गतवन्त आसन्। एवमेतेषां जीवनं शास्त्र-रक्षायाः समानमेव राष्ट्ररक्षाया अपि कृते समर्पितमासीदिति एते पण्डितसमाजे विशिष्टं स्थानं भजन्ते स्म।

कर्तृत्वदृष्ट्या श्रीगोपालशास्त्रिमहोदयाः वाराणस्यामेव सिगरा-सम्भागस्थिते स्वकीये भवने अनेकान् शिष्यान् अनेकाः शिष्याश्च प्राचीनव्याकरणं पाठयन्ति स्म। 'माननीयाः श्रीब्रह्मदत्तजिज्ञासुमहोदया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि वाराणस्यामेव पाणिनिकन्यामहाविद्यालयनाम्ना 'कन्यानां संस्कृतशिक्षणाय एकां विशालां संस्थां संस्थाप्य शताधिकाः कन्याः अष्टाध्यायीं काशिकां महाभाष्यं च पाठितवन्तो यासु प्रज्ञा मेधा चेति द्वे शिष्ये विशिष्टां योग्यतां सम्पाद्य तत्रैव प्राध्यापिके अजायेताम्। श्री पं० भरतमिश्रमहोदया बिहारस्य छपरानगरे संस्कृतमहाविद्यालयं संस्थाप्य तत्रैव सञ्चालकाः प्रधानाचार्याश्च भूत्वा प्राचीनव्याकरण-ग्रन्थानां विशेषरूपेण अध्यापनं कृतवन्तः। अन्ते च वाराणसीमागत्य अत्रत्ये अगस्त्यकुण्डासम्भागे एकं भवनं गृहीत्वा अत्रापि बहून् पाठितवन्तस्तथा अत्रैव शरीरं त्यक्तवन्तः। एतैस्त्रिभिरपि व्याकरण-शिक्षणाय संस्कृतशिक्षणाय च अनेके ग्रन्था लिखितास्तथा स्व-परिवारस्यापि अनेके बालका बालिकाः, स्नुषाश्चापि पाठिताः। संस्कृतभाषा एतेषां परिवारस्य व्यवहारभाषा आसीत्।

एते त्रयोऽपि मद्दृष्ट्या पाणिनिसमाना आसन्। मया सह तेषां त्रयाणामपि महान् घनिष्ठः सम्बन्धः, प्रगाढा प्रीतिरपि आसीत्। संयोगवशात् तेषु एकोऽपि सम्प्रति न विद्यते इति मे महत् कष्टं जायते। परं परमप्रसन्नताया अयं विषयो वर्तते, यदेतेषां त्रयाणामपि, प्रियशिष्यभूतः, प्राचीनव्याकरणग्रन्थानां विशिष्टो ज्ञाता, प्रौढः प्रवक्ता, संस्कृतप्रचारे प्रवीणश्च डॉ० ब्रह्मानन्दचतुर्वेदी सम्प्रति तेषां त्रयाणामपि गुरुवर्याणामृणस्योद्धारे संलग्नो वर्तते। स इदानीं पाटलिपुत्रस्य मुरारकासंस्कृतमहाविद्यालये सुप्रतिष्ठिते प्राचार्यपदे आसीनो विद्यते।

अद्याप्यहं प्रथितपण्डिततल्लजश्री-
राजेश्वरं बुधमणिं प्रणतः स्मरामि।
यस्याङ्गणे बृहति दर्शनराजनीत्यो-
र्धरि समं प्रवहतो जगतो हिताय॥ ७४॥

वाराणस्यां रामघट्टे प्रतिष्ठापितस्य साङ्गवेद-महाविद्यालयस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सञ्चालकाः प्राचार्याश्च पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडमहाभागा एके भारतस्य सुविख्याताः सर्वमान्याश्च विद्वांस आसन्। सर्वेषु दर्शन-शास्त्रेषु, विशेषतश्च न्यायशास्त्रे तेषां प्रगाढपाण्डित्यस्य देशे सर्वत्र महती ख्यातिरासीत्। अध्यापनेन, व्याख्यानेन, प्रवचनेन, शास्त्रार्थेन, ग्रन्थलेखनेन, धर्मव्यवस्थाप्रदानेन, वर्णाश्रमधर्मस्य सुदृढं समर्थनेन, आचारपूतेन जीवनेन च धवलं तेषां यशो विद्वत्समाजे सनातनधर्मिसमाजे च दूरं दूरं व्याप्तमासीत्। परन्तु येन कारणेन तेषु मम महीयसी श्रद्धा आसीत् तदासीत् तेषां दर्शनशास्त्राणामगाधज्ञानेन सह राजनीतिशास्त्रस्यापि अनुपमं वैदुष्यम्। एतादृशं वैदुष्यं देशे मया अन्यत्र नैव विलोकितम्। कौटलीये अर्थशास्त्रे—

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती।
विद्या ह्येताश्चतस्रस्तु लोकसंस्थितिहेतवः॥

अस्मिन् श्लोके चतसृणामपि विद्यानां लोकसंस्थितेर्हेतुत्वं निर्दिष्टं परन्तु तासां समन्वितं ज्ञानमावश्यकं, पार्थक्येन वा इति न लिखितम्। परन्तु शास्त्रिमहोदयैः आन्वीक्षिक्या सह दण्डनीतेरपि ज्ञानं सम्यगात्मसात्कृत्य विदुषां पुरस्तादेकं नूतनमुदाहरणमुपस्थापितं, नूतनञ्च एकं द्वारमुद्घाटितमिति मम महान् हर्षो भवति। "व्यवहारज्ञानशून्यत्वं पण्डितत्वम्" इति एकः प्रवादः पठितो मया एकस्मिन् निबन्धपुस्तके। परन्तु यदि पण्डिता अन्यशास्त्राणां ज्ञानेन सह नीतिशास्त्रस्यापि ज्ञातारो भवेयुस्तर्हि न कोऽपि जनः पण्डितानेवमधिक्षेप्तुं शक्नुयात्।

श्रीशास्त्रिमहोदयैरस्याः परम्परायाः स्थापनाय स्वकीया अनेके शिष्या दर्शनशास्त्रेण सह नीतिविद्यामपि पाठिता येषु श्रीदातार-महोदयाः, श्रीहरिरामशुक्लमहोदयाश्च प्रमुखाः सन्ति। एभिः शिष्यैः सह श्रीशास्त्रिमहोदयाः स्वकीयौ द्वौ आत्मजावपि दर्शनशास्त्रं,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मशास्त्रं नीतिशास्त्रं च पाठितवन्तः, विद्यालय-सभासञ्चालनादिकमपि च प्रशिक्षितवन्तो येन तेषामभावेऽपि ताः परम्परा अक्षुण्णरूपेण साम्प्रतमपि प्रचाल्यमाना वर्तन्ते। तयोर्नामनी वर्तेते श्री पं० विश्वेश्वरद्रविड तथा श्री पं० गणेश्वरद्रविडश्च।

अद्यापि साधु-बुध-वृद्धजनाभिनन्द्यः
काशीनिवासिजनताहृदयैकवन्द्यः ।
श्रद्धासुमाञ्जलिभृते हृदये मदीये
राराज्यते नृपवरोऽमर-काशिराजः ॥ ७५ ॥

संस्कृतसमाजस्य कृते भूतपूर्वकाशीराज-श्रीविभूतिनारायण-सिंहमहोदयानां परिचयप्रदानस्य विशेषावश्यकता नास्ति। एते न केवलं स्वकीयविश्रुतकुलपरम्परानुसारमेव संस्कृतशिक्षायाः, संस्कृत-शास्त्राणां, सनातनधर्मस्य, संस्कृतविद्वत्समाजस्य च संरक्षका आसन् प्रत्युत अनेकैर्नवनवकार्यकलापैः संवर्द्धका अपि अजायन्त। एतेषामध्यक्षतायां विश्वसंस्कृतप्रतिष्ठानस्य सञ्चालनेन, विश्वभाषा-पत्रिकायाः प्रकाशनेन, संस्कृतशिक्षणप्रचारोपयोगिनां नवनव-समारोहाणां शश्वत् समायोजनेन, संस्कृतप्रचारकेभ्यः प्रेरणा-प्रदानेन च महाराजेन संस्कृतस्य यादृशी सेवा विहिता सा संस्कृत-प्रचारस्य इतिहासे स्वर्णाक्षरैरुल्लेखनीया वर्तते। तेषामुपस्थितौ संस्कृत-समारोहाणां या शोभा गरिमसम्पन्नता या च दृष्टिगोचरी भवति स्म सा इदानीं दुर्लभा जाता। तेषां स्वरूपं ध्यायं ध्यायं, तेषां भाषणानि कार्यकलापांश्च स्मारं स्मारं प्रेरणा तु लभ्यते परं विषादोऽपि सुमहान् जायते। परं प्रसन्नताया अयं विषयो वर्तते यत् तेषामात्मजा राजकुमारी कृष्णप्रिया, एम्. ए. (संस्कृते, दर्शने च) सम्प्रति तेषामभावे विश्व-संस्कृतप्रतिष्ठानस्य समस्तं कार्यजातं यथापूर्वं महता श्रमेण कौशलेन च सम्पादयति तद्विकासार्थं च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथासाध्यं प्रयतते। तेषां कनिष्ठो राजकुमारः श्रीमान् अनन्तनारायणसिंहोऽपि, यः प्रारम्भे संस्कृतं न्यायशास्त्रं च अधीतवान्, तस्याः सम्यक् सहयोगं करोति।

महाराजानां सच्चारित्र्येण धार्मिकैराचारैश्च वाराणस्या जनास्तान् श्रीविश्वनाथस्वरूपान् मन्यन्ते स्म तथा 'हर हर महादेव' इत्युद्घोषैस्तेषां स्वागतं शुभाभिनन्दनं च कुर्वन्ति स्म। ते यथानामगुणं वाराणस्या देशस्य च विभूतय आसन्। कामं ते दिवङ्गताः परमस्माकं हृदये तु सर्वदा विराजन्त एव विराजिष्यन्त एव च।

अद्यापि तं देवरहेति जगत्प्रसिद्धं
ब्रह्मर्षिवर्यमनिशं हृदि चिन्तयामि।
यद्वृत्त-योग-वचसां परमाद्भुतानां
साक्ष्यं वहन्ति सकलाः सरितः पवित्राः॥ ७६॥

अस्माकं देशे, विशेषतः उत्तरभारते "देवरहा बाबा" इति नाम अत्यन्तं सुप्रसिद्धं सर्वत्र समाजे अभ्यर्हितं च वर्तते। एते सर्वविधसुख-साधनसमृद्धेषु मठेषु निवासं परित्यज्य नदीनां तटेषु कौपीनमात्रवस्त्र-धारिणः कुशकाशकाष्ठमुञ्जनिर्मिते कुटीरे निवसन्ति स्म, प्रचण्ड-शीतातपं सहन्तः साधनां कुर्वन्ति स्म, तथा तेषां दर्शनार्थं समागतेभ्यो भक्तजनेभ्यो धर्माचारान् उपदिशन्ति स्म। एतादृशं सरलम्, आडम्बरहीनं, तपोमयं, कष्टसहिष्णु च जीवनं साधुसमाजे अन्यत्र कुत्रापि न दृष्टमिति तेषु जनताया महीयसी श्रद्धा आसीत्। संस्कृतप्रचारे प्रेमातिशयात् तैः मदीयसंस्थानस्य प्रधानसंरक्षकता स्वीकृता आसीत्, साहाय्यं च विधीयते स्म। सम्पूर्णेऽपि भारते भ्रमणं कुर्वतो मम एतादृशं जीवनं कुत्रापि दृष्टिपथं नागतमिति तेषां मुहुः मुहुः स्मरणं जायते।

पण्डितान् प्रति तेषामन्यदपि एकं विशिष्टं वक्तव्यमासीदिदम्-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकान्तवासमपहाय पथेषु पोंपों
कुर्वन्तु पण्डितजनाः खलु संघबद्धाः।
एषा महर्षिवर-देवरहा-सदुक्ति-
रद्यापि मन्मनसि कौतुकमातनोति॥ ७७॥

पूज्या देवरहाबाबामहोदया इदं ज्ञात्वा बहु अप्रसन्ना भवन्ति स्म यत् अध्यापकाः कस्मिंश्चित् प्रकोष्ठे स्थित्वा द्वित्रान् त्रिचतुरान् वा छात्रान् तूष्णीं पाठयन्ति परं समाजे संस्कृतप्रचारार्थं प्रयत्नं न कुर्वन्ति। अतस्ते एकदा वाराणसीमागताः तेषां दर्शनार्थं समागतान् पण्डितान् उद्दिश्य कथितवन्तः—*"पण्डित बदरीनाथ सुनो। पण्डित लोग एक कोठरी में बैठकर और भेड़ की तरह सिर नीचे लटका कर दो चार छात्रों को पढ़ाते हैं। पर इतने से समाज में संस्कृत का प्रचार नहीं होगा। पण्डितों को संघबद्ध हो सड़क पर निकल कर और चौराहे पर जाकर पों पों पों पों करना चाहिए अर्थात् संस्कृत का महत्त्व सब को समझाना चाहिए। तब सब लोग संस्कृत पढ़ेंगे।"* तेषां वारं वारं पों पों इति कथनं श्रुत्वा सर्वे उपस्थिता जना अति प्रसन्ना जाताः पण्डिताश्च प्रायः सर्वेऽपि तेषां कथनमनुमोदितवन्तः। मम तु स 'पों पों' शब्दः सर्वदैव कर्णयोरनुगुञ्जति प्रेरणां च प्रददाति।

अद्याप्यहं सकलशास्त्रनिधीन् अखण्डा-
नन्दाभिधान् मुनिवरान् प्रणतः स्मरामि।
येषां स्मिते नयनयोर्वदने कथायां
सम्भाषणे च वहति स्म सुधाप्रवाहः॥ ७८॥

माननीयाः स्वामिवर्य्याः श्रीमदखण्डानन्दसरस्वतीमहाभागा देशस्य कतिपयेषु अङ्गुलिगणनीयेषु शास्त्रज्ञेषु कथाप्रवचनकुशलेषु विद्वत्सु अन्यतमा आसन्। ते वेदोपनिषद्-दर्शन-पुराणसाहित्यादि-विषयाणां पारङ्गताः, सूक्ष्मविवेचनविचक्षणाः, जिज्ञासूनां परम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्तोषप्रदा एके महर्षिकल्पा महात्मानः साधवोऽभूवन्। प्रथमं तैः गीताप्रेसे कल्याणपत्रिकायाः सम्पादनमक्रियत। अनन्तरं ते कथा-प्रवचने, ग्रन्थलेखने च सम्पूर्णं जीवनमनैषुः। धर्मं, संस्कृतिं, गीताम्, उपनिषदः श्रीमद्भागवतं चाश्रित्य ते हिन्दीभाषायां शताधिकान् महतो लघूंश्च ग्रन्थान् लिखितवन्तः। एका रचना तेषां संस्कृतभाषायामपि वर्तते हनुमद्भक्तिविषयिणी शार्दूलविक्रीडितच्छन्दसि। तदवलोक्य तेषां संस्कृतरचनायामपि प्रौढपाण्डित्यस्य परिज्ञानं भवति।

एवंविधास्तेषामगणनीया गुणगणा आसन् परं मम मनसो यत्र परमनिर्वृतिर्भवति स्म तदासीत् तेषां सौमनस्यस्वरूपं तथा तेषां कथायां, प्रवचने, वार्तालापे, विनोदे, स्मिते, श्लोकपाठे च प्रवहमाना स्वाभाविकी आनन्दमयी सुधाधारा। भक्तिग्रन्थेषु जीवने सर्वत्र सौम्यभाव एव हृदये भगवन्निवासस्य प्रधानं लक्षणं निर्दिष्टमस्ति—यथा विष्णुपुराणे। तेषां सौम्यभावमलोक्य तेषु नूनं भगवान् विराजते इति मम प्रतीतिः भवति स्म।

वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः।
क्षितिरसमतिसौम्यमात्मनोऽन्तः कथयति चारुतयैव शालिपोतः॥

३.७.२५

संस्कृप्रचारे निरन्तरं संलग्नतया मम संस्थानेऽपि स्वामिपादानां महान् स्नेहः सहयोगश्च आसीत्। इदानीं तेषां सुगृहीतनामधेयाः आत्मजाः श्रीविश्वम्भरनाथद्विवेदिमहोदया एव मम संस्थानस्य प्रधानमन्त्रिण इति अद्याप्यहं स्वामिपादानामनुग्रहं स्नेहञ्च लभ्यमानमिव अनुभवामि।

अद्यापि तं विविधशास्त्ररहस्यविज्ञं
सुस्पष्टवाचमचलं स्वमते स्वतन्त्रम्।
सद्धर्म - संस्कृति - विवेचनसिद्ध - सम्पू-
र्णानन्दनाममहितं सततं स्मरामि॥ ७९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

डॉ० सम्पूर्णानन्दमहोदया देशस्य राजनीतौ तथा साहित्य-क्षेत्रेऽपि परमां प्रसिद्धिमुपगता एके सर्वेषामपि सम्मानभाजः सर्वेषामपि विद्वांसो नेतारश्चापि आसन्। स्वतन्त्रा विचाराः, सुस्पष्टवादिता, सुविचारितो निर्णयः, अन्तस्तलस्पर्शि विवेचनम्, निराडम्बरं जीवनं तथा राष्ट्रस्य निःस्वार्थसेवा चेति तेषां विशेषगुणा आसन्। परन्तु एतत्सर्वगुणापेक्षयाऽपि तेषां यदस्माकं कृते चिरस्मरणीयं वैशिष्ट्यमासीत् तत् संस्कृतविद्याभ्युन्नतये सततं प्रयासः, तद्रक्षायै संघर्षः तथा संस्कृतविश्वविद्यालयस्य स्थापना अस्ति। स्वल्पकालेन संस्कृतं शिक्षयितुमपि ते पण्डितान् प्रेरयन्ति स्म। यदा ते राजस्थाने राज्यपालपदमलङ्कुर्वन्ति स्म तदा तैरेकस्यां पण्डित-परिषदि मासत्रयेण संस्कृतं शिक्षयितुं घोषणां कर्तुं पण्डिताः प्रार्थिताः। पाश्चात्त्यसंस्कृतिसभ्यताप्रभाविते आधुनिके शिक्षितसमाजे संस्कृत-विषये आक्षेपाय, याश्च आशङ्का विद्यन्ते तन्निवारणमपि ते पण्डितानां कर्त्तव्यं मन्यन्ते स्म। मम "सुरभारतीसन्देश" नामकग्रन्थस्य आलोचनाप्रसङ्गे ते एतद्विषये यन्मां लिखितवन्तस्तदधस्तादुल्लिख्यते पण्डितानां संस्कृतहितैषिणां च चिन्तनाय—

प्रिय द्विवेदी जी, *राजभवन, जयपुर*

दिनांक २० जून १९६४ ई०

मैं आपकी पुस्तक 'सुरभारतीसन्देश' को देख गया। इसके कुछ पहिले पं० रामाज्ञा पाण्डेय से आपकी प्रशंसा सुन चुका था। आप संस्कृत के प्रचार के लिए जो काम कर रहे हैं वह सर्वथा प्रशंसनीय है। पुस्तक मुझे पसन्द आयी। आपने संस्कृतप्रेमियों का ध्यान जिन बातों की ओर आकृष्ट किया है वह सब बहुत आवश्यक है। यदि सब लोग उन बातों का ध्यान रखें तो संस्कृत की बहुत ही अच्छी सेवा हो सकती है। संस्कृत के प्रचार में एक और बाधा है

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जिस ओर स्यात् आपका ध्यान नहीं गया। मेरी समझ में उस सम्बन्ध में भी साग्रह लिखना चाहिए। आजकल का शिक्षित समुदाय प्राचीन संस्कृति और धार्मिक विचारों की ओर से विमुख होता जा रहा है। उसको उन बातों पर श्रद्धा नहीं है। इसका बड़ा भारी कारण यह है कि पण्डित-समाज देश-काल-पात्र की ओर ध्यान न देकर इस नयी पीढ़ी के सामने पुरानी बातों को समुचित रूप से उपस्थित नहीं करता। आज साइन्स का युग है। साइन्स जाननेवाला जिन विषयों का अध्ययन करता है और प्रयोगशाला में जिन तथ्यों का साक्षात्कार करता है उनको ध्यान में रखकर ही उसको उपदेश देना होगा। उसकी शंकाओं का समाधान करना होगा। इसलिए वैज्ञानिक विषयों की जानकारी प्राप्त करनी होगी। इस नयी पीढ़ी को उपेक्षादृष्टि से नहीं देखा जा सकता, क्योंकि देश के भावी सरकारी अधिकारी, सेनाध्यक्ष, शासनाधिकारी, इंजीनियर, डॉक्टर, व्यवस्थापक, मंत्री सब इसी वर्ग में से निकलेंगे। भावी माता-पिता इसी वर्ग के होंगे। यदि वह धर्म से विमुख हुए तो एक दो पीढ़ियों में धार्मिक बातों का लोप हो जायगा। फिर संस्कृत कौन पढ़ेगा? यदि धर्म की और संस्कृत की रक्षा करनी हो तो इस वर्ग को हाथ में लेना चाहिए और इसका एकमात्र उपाय यह है कि इसके अध्येतव्य विषयों का स्वयं अध्ययन किया जाय। इसकी शंकाओं का समाधान किया जाय और इसको यह दिखलाया जाय कि हमारे प्राचीन ग्रन्थों में ऐसी बातें हैं जो आज के युगमें भी उपयोगी हैं।

सम्पूर्णानन्द

अस्माकं संस्थानस्य पुस्तकालये तादृशं प्रचुरं साहित्यं वर्तते यत् संस्कृतशिक्षायाः संस्कृतपण्डितसमाजस्य च विरोधे, आलोचनायां, निन्दायां, उपहासे च लिखितं वर्तते। तत् पठित्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसम्पूर्णानन्दमहोदयस्य वक्तव्यं कियद् आवश्यकं, कियद् उपयोगि, कियच्च प्रासङ्गिकं विद्यते इति सम्यक् परिज्ञातं भवति। केचिद् आधुनिका विद्वांसस्तु संस्कृतस्य वेदशास्त्रपुराणादीनामपि उपरि प्रहारं कृतवन्तः सन्ति, इदानीमपि च कुर्वन्ति अतः पण्डितसमाजेन शास्त्रप्रामाण्य-परिरक्षणार्थम्, आत्मसम्मानरक्षार्थं, समाजहिताय ईदृशानां पुस्तकानामवश्यमध्ययनं कर्तव्यम्।

ये तर्ककर्कशधियोऽपि विनोद-हास्य-
साहित्य-गीत-कवितादिषु चारमन्त।
तान् सर्वशास्त्रकुशलान् व्यवहारदक्षान्
श्रीशुक्ल नाम विदुषः प्रणतः स्मरामि॥ ८०॥

वाराणस्याः सम्मानीयाः आचार्यप्रवरश्रीबदरीनाथशुक्ल-महोदया असाधारण-प्रतिभाशालिनो भारतप्रसिद्धा विद्वांसः तथा न्यायशास्त्रस्य विख्याता विद्वांसः आसन्। ते पूर्वं हिन्दुविश्व-विद्यालयस्य संस्कृतसंकाये न्यायशास्त्रस्य अध्यापका अभूवन्। ततः परं वाराणसेयसंस्कृतविश्वविद्यालये न्यायवैशेषिकविभागाध्यक्षपदे विराजमानाः कुलपतिपदमपि पर्यभूषयन्। एतदतिरिक्तं ते बहूनां प्रादेशिकीनाम् अखिलभारतीयानां च सारस्वतसंस्थानां, सभापति-त्वेन, मन्त्रित्वेन, सदस्यत्वेन च सेवां विधाय, सम्मानं च वर्धयित्वा संस्कृतस्य महतीं सेवां कृतवन्तो महतीं च ख्यातिमधिगतवन्तः।

परन्तु तेषामनितरसाधारणं वैशिष्ट्यमिदं मया दृष्टं यत् ते कर्कशप्रायस्य तर्कशास्त्रस्य अध्ययने, अध्यापने, ग्रन्थलेखने च निरन्तरं निरता अपि न रूक्षस्वभावा आसन् अपितु हास्ये, विनोदे, नाटके, संगीते, कवितापाठादिषु च भृशं प्रीतिं भजन्ते स्म, सभायोजकानाञ्च प्रोत्साहनं कुर्वन्ति स्म। सम्पूर्णेऽपि भारते भ्रमता मया श्रीशुक्लमहोदयसदृशाः सरलस्वभावाः सहृदयाः हास्यविनोद-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियाः सामान्येषु अपि पण्डितेषु परमस्नेहभाजो विद्वांसो नैव क्वचिदवलोकिताः। अपरञ्च ते व्यवहारेऽपि दक्षाः प्रशासनेऽपि च नितान्तं कुशला आसन्निति तषां सम्पूर्णानन्द-संस्कृत-विश्व-विद्यालय-कुलपतित्वकाले सर्वैरपि सम्यगनुभूतम्।

मयि, मम संस्थाने चाऽपि तेषां महान् स्नेहो महती च कृपा आसीत्। कतिपयवर्षपर्यन्तं ते मम संस्थानस्य अध्यक्षपदं स्वीकृत-वन्तस्तस्य च गौरवं वर्द्धितवन्तः। तेषां स्मरणं यद्यपि हृदयं दुनोति परं प्रेरणामपि भूयसीं ददाति।

श्रीशुक्लमहोदयैः अनेके ये ग्रन्थाः लिखिताः तत्त्वचिन्तामणेः विधिवादस्य हिन्दीभाषानुवादाः लिखिताः सम्पादिताश्च तेषु सर्वश्रेष्ठाः सन्ति।

साहित्यवारिनिधिमन्थनपण्डिता धीः
सङ्गीत - सान्द्रमधुरध्वनि - मञ्जुला वाक्।
सौम्याकृतिर्मधुर-प्रेमलताभिधा सा
व्यक्तिः सदैव हृदये मम रारजीति॥ ८१॥

वाराणसीस्थ-काशीहिन्दुविश्वविद्यालयस्य विख्याता सङ्गीत-शास्त्रविभागाध्यक्षा तदनन्तरं खैरागढस्य-इन्दिराकलासंगीत-विश्वविद्यालयस्य कुलपतिः डॉ० (कुमारी) प्रेमलता शर्मा न केवलं सङ्गीतशास्त्रस्य अपितु साहित्यशास्त्रस्यापि महीयसी विदुषी आसीत्। अत्यन्तं सौम्या आकृतिः, सौम्यः स्वभावः, सौम्यः व्यवहारश्चेति तस्या वैशिष्ट्यमासीत् सर्वैः परिचितैरपरिचितैश्च जनैः समनुभूयमानम्। अतएव सा सम्पूर्णेऽपि विश्वविद्यालये सुहृत्समाजे च 'बहनजी' इत्यभिधयैव विख्याता आसीत्, अनेनैव सम्बोधनपदेन च सम्बोध्यते स्म। सरलतायाः स्नेहस्य वात्सल्यस्य परोपकारस्य तु सा प्रतिमूर्तिरिवासीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहं साधनहीनोऽपि सदा संस्कृतप्रचारं कुर्वन्नासमिति मयि तस्याः परमः स्नेहो महांश्च समादरभाव आसीत्। मम तया साहाय्यमपि यदा कदा विधीयते स्म। त्रिंशद्वर्षेभ्यः पूर्वं मम संस्थानस्य कृते केन्द्रशासनात् लभ्यमानमनुदानं केनापि कारणेन एकदा अकस्मादवरुद्धं जातम्। ततः संस्थानस्य दैनिको व्ययः कथं प्रचलिष्यतीति मम महती चिन्ता उदपद्यत। तदेतत् संकटं मया बहनजीमहोदयायै निवेदितम्। ततः परं द्वितीयदिनादेव बहनजी मम पुस्तकानि प्रसेवके आदाय परिचितेषु मित्रेषु च विक्रीय अन्याऽन्योपायैः इतस्ततो द्रव्यं संगृह्य, स्वकीय-वैदेशिक-शिष्यैश्च साहाय्यमादाय मम दैनिककार्यसञ्चालने सहयोगं कर्तुं प्रारब्धवती। पञ्चमासपर्यन्तमयं क्रमश्चलितः। मम तु विश्वास एव नासीद् यत् कश्चिद् एतावत् कष्टं सोढ्वा मम साहाय्यं करिष्यति। परन्तु बहिनजी. स्वकीयं प्रेमलतेति नाम सार्थकं कृतवती। तस्या तद् अद्भुतं साहाय्यं कदापि विस्मर्तुं न शक्यते।

पुनश्च, मामेकाकिनं सुख-सौविध्यसाधनविहीने संस्थाने निवसन्तं निरीक्ष्य काले काले द्रव्यदानेन, वस्त्रादिदानेन, पुस्तकदानेन, स्वनिर्मितविविध-सुमधुर-भक्ष्यभोज्यादिप्रदानेन च यन्मां लघुभ्रातृवत् पालयति स्म तत् सर्वं स्मृत्वा अद्यापि नेत्रे अश्रुपरिप्लुते भवतः।

आचार्यश्रीबदरीनाथशुक्लमहोदयेषु दिवंगतेषु मम संस्थानस्य अध्यक्षपदमपि कानिचिद् दिनानि सा निर्व्यूढवती। इदमपि एकं तस्या महत् साहाय्यं लब्धं मया।

दिवङ्गतायां बहिनजीमहोदयायामहं कति-कतिभ्यो लाभेभ्यो वञ्चितो जात इति मम हृदयमेव जानाति। परं धातुः कृपा दुर्बले। मम कृते सुमहतः सन्तोषस्यायं विषयो जातो यत् तस्याः सततं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सारस्वतसाधनरता कनिष्ठा भगिनी डॉ० ऊर्मिला शर्मा तथैव मयि मम संस्थाने च सर्वविधं सहयोगं स्वयमेव दातुं प्रारब्धवती, यद्द्यापि अनवरतं तथा अग्रेऽपि प्रचलिष्यत्येवेति विषयेऽस्मिन् मम संशयलेशोऽपि नास्ति—

अद्यापि तं प्रबल-संस्कृत-दुर्गपालं
निर्भीकभाषिणमसंख्यविरोधिसङ्घे ।
गाण्डीवधारिणमिवार्जुनमेकवीरं
श्रीरामबालकबुधं हृदि भावयामि॥ ८२ ॥

मूलतः उत्तरप्रदेशीय-बलियाजनपदनिवासिनः श्रीपण्डित रामबालकशास्त्रिमहोदया मध्यभागस्थिते वाराणस्या जयनारायण-घोषालउच्चतरमाध्यमिकविद्यालये संस्कृताध्यापका आसन्। परन्तु एतेषां चिन्तनपद्धतिः जीवनपद्धतिश्च अन्यसंस्कृतपण्डितापेक्षया किञ्चिद् विशिष्टा विलक्षणा च आसीत्। एते आरम्भत एव संस्कृतभाषायाः प्रचारस्य प्रबलाः पक्षपातिन आसन्। ते केषाञ्चिदपि शिक्षाधिकारिणां, शिक्षामन्त्रिणां, नेतृणाञ्च पुरतो निर्भया भूत्वा प्रबलैस्तर्कैः संस्कृतस्य पक्षमुपस्थापयन्ति स्म, तांश्च तत्स्वीकर्तुं विवशीकुर्वन्ति स्म। ते बलियानिवासिन आसन् इति पूर्वमेव सूचितम्। अतस्तेषां च बलियाटिकस्वभावः सर्वत्र प्रत्यक्षीभवति स्म। विशेषतश्च संस्कृतविषयमादाय वादे विवादे च जायमाने। अन्ततः संस्कृतप्रचारपक्षस्य प्रबलरूपेण उपस्थापनाय समर्थनाय च तैः स्वकीयैः साधनैः साप्ताहिक "गाण्डीवम्" पत्रस्य प्रकाशनं प्रारब्धम्। संस्कृतस्य कुरुक्षेत्रे ते अर्जुन इव महाबला योद्धारः आसन्। अतस्तेषां पत्रस्य "गाण्डीवम्" इति नाम सर्वथा उपयुक्तं सार्थकं च आसीत्। पत्रमिदं सौभाग्यात् साम्प्रतमपि तदीयप्रसन्नमतां पं० श्रीराधेश्यामधरद्विवेदिनां तुलनात्मकधर्मदर्शन - विभागाध्यक्षाणां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रबन्धव्यवस्थासम्पादनप्रयासेन संस्कृतविश्वविद्यालयात् प्रकाश्यते। संस्थापक-महोदयस्य च उद्देश्यं परिपूर्यते इति संस्कृत-समाजस्य कृते महतो हर्षस्य विषयो वर्तते।

तेषां द्वित्राणि अन्यान्यपि रोचकानि वृत्तानि लिखितुमिच्छामि। ते प्रायेण परनिर्मितं पाकं न भुञ्जते स्म। अतो यत्रैव सभासम्मेसनादिषु गच्छन्ति स्म, पूर्वाञ्चलस्य प्रियभोज्यान् सक्तूनपि नयन्ति स्म। एकदा मध्यप्रदेशशासनेन भोपाले संस्कृतशिक्षाविषयिणी एका विदुषां समितिः समायोजिता आसीत्। तत्र श्रीरामबालकशास्त्रिमहोदयाः अपि सम्मिलिता अभूवन्। तस्मिन्नवसरे गोष्ठ्यनन्तरं यदा अन्ये सदस्याः शष्कुली - शाक - पायसादिरम्यभोजनार्थमुपविष्टास्तदा श्रीशास्त्रिमहोदयाः स्वकीयान् सक्तूनादाय तद्भोजनं पानं च प्रारब्धवन्तः। तद् दृष्ट्वा बहूनामाश्चर्यं, बहूनां मनोरञ्जनं, बहूनां कष्टमपि चाजायत। पुनस्तेषां कृते रात्रिभोजनस्य पृथग् व्यवस्था विहिता। एवमेव ते एकदा मां हास्यविनोद-सङ्गीतगोष्ठीं समायोजयन्तं दृष्ट्वा सम्मेलने मां कथितवन्तः—"किं भोः! *एक ओर तो संस्कृत मर रही है, और आप को हँसी, गाना, और बजाना अच्छा लग रहा है?*" मयापि हसता उत्तरितम्—"*शास्त्री जी, मैं तो संस्कृत को जिलाने के लिए ही यह सब कर रहा हूँ।*"

तृतीयं वृत्तमासीत्—संस्कृतस्य राष्ट्रभाषात्वविषये मम मतभेदमादाय मां प्रति तेषामाक्रोशप्रदर्शनम्।

उत्तरभारते वाराणस्यां श्री पं० रामबालकशास्त्रिणः, आयोध्यायां च "संस्कृतम्" साप्ताहिकपत्रस्य प्रधानसम्पादकाः श्री पं० कालीप्रसादशास्त्रिणश्चेति द्वौ संस्कृतक्षेत्रस्य परमतपस्विनौ परमतेजस्विनौ परमत्यागिनौ च योद्धारौ आस्ताम्। ममापि तयोः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समानमेव उद्देश्यमासीत् परं कर्मक्षेत्रे तौ द्वावपि मदपेक्षया परमविशिष्टौ परमवीरौ चास्तामिति मया सर्वदैव तयोः श्रद्धया स्मरणं विधीयते, महती प्रेरणा च लभ्यते।

शास्त्राम्बुधेर्गहनमन्थन - मूर्तरूपं
दीव्यद्दृशौ प्रखरवाग् धिषणाप्यधृष्या।
तेजःप्रसर्पि करपात्रमहामुनीना-
मद्यापि पण्डितगणं चकितीकरोति॥ ८३ ॥

नाम्ना स्वामिश्रीहरिहरानन्दसरस्वती, उपनाम्ना च "श्रीकरपात्रीजी" महोदयाः सर्वेषामपि देशविदेशवासिनां सनातन-धर्मावलम्बिनां जनानां परमसम्मान्या धर्मगुरवो मार्गदर्शकाश्च आसन्। सर्वेषामपि श्रुति-स्मृति-पुराणादीनां धर्मग्रन्थानामन्तस्तलस्पर्शि गहनमध्ययनं, सर्वेषामपि आस्तिकनास्तिकदर्शनानां प्रगाढं पाण्डित्यं, केनापि अधर्षणीया धिषणा, प्रखरा वाणी, तपस्तेजोमयं दिव्यं व्यक्तित्वं, सनातनधर्मस्य संरक्षणे प्रचारे च महीयसी निष्ठा चेति तेषां सम्पदोऽभूवन्। आत्मनो विचारानुसारं धर्मशिक्षायै तैः धर्मसङ्घनाम्ना एका संस्था संस्थापिता। अनेके महत्त्वपूर्णा महान्तश्च ग्रन्थाः प्रणीताः। बहवो विद्वांसो धर्मप्रचाराय प्रशिक्षिताः। समस्ते भारते भूयांसि धर्मप्रतिष्ठानानि सञ्चालितानि, विरोधिनां प्रतिरोधाय च स्थले स्थले सभा आयोजिताः। एतदादिकं तेषां महत्तमं कार्यं दृष्ट्वा भगवत्पाद-श्रीमदाद्यशङ्कराचार्याणां स्मरणं जायते। तेषां ब्रह्मसायुज्यलाभेन धार्मिकजगतः अपूरणीया क्षतिः जाता। परं तेषामुत्तराधिकारिणो यदि अद्यापि निष्ठापूर्वकं तदीयोद्देश्यानां पूर्तये प्रयत्नं कुर्युस्तर्हि तेषामभावस्य काचित्पूर्तिर्भवितुमर्हति, स्वामिपादानामन्तरात्मनः सन्तोषश्च। मयि स्वामिपादानां महती कृपा आसीत् परं ते मम सार्वजनिकं संस्कृतशिक्षणं नानुमन्यन्ते स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि काशिकबुधांश्च सुहृज्जनांश्च
चेतः स्मरत्यनुदिनं बहुमानपूर्वम्।
यत्स्नेहदान - करुणा - विविधोपकारै-
र्लब्धा मया सफलता प्रथमं स्वकार्ये॥ ८४॥

वाराणस्यां श्रीभारतधर्ममहामण्डले निवसता तथा काशिक-संस्कृतमहाविद्यालये वेदाचार्यकक्षायां पठता मया महामण्डले एव १५ अगस्त १९४७ दिनाङ्के स्वतन्त्रताप्राप्तेः ऐतिहासिके पर्वणि अस्य संस्थानस्य स्थापना विहिता। परन्तु ततः पञ्चवर्षेभ्यः पूर्वत एव मम संस्कृतप्रचारकार्यं प्रचलति स्म। तेषु दिनेषु वाराणस्यां तादृशा अनेके विद्वांसो मम सुहृदश्च अभूवन् ये स्नेहेन, प्रोत्साहनेन, प्रेरणया, आवश्यकवस्तुप्रदानेन, यात्रायै द्रव्यदानेन च मां सर्वदा उपकृतवन्तः। तादृशेषु विद्वत्सु पं० कालीप्रसादमिश्रः, श्रीपट्टाभिरामशास्त्रिमहोदयः, पं० बलदेवउपाध्यायः, पं० अनन्तशास्त्री फडके, पं० महादेव शास्त्री, पं० सभापतिशर्मोपाध्यायः, पं० गोपालशास्त्री दर्शनकेशरी, पं० पद्मप्रसादभट्टराई, पं० नारायण शास्त्री खिस्ते, पं० प्रमथनाथ तर्कभूषणभट्टाचार्यश्चेति सर्वेऽपि तदानीन्तनाः पण्डितमूर्धन्या मम सहायका आसन्। चिकित्सकेषु पं० व्रजमोहनदीक्षितमहोदयाः सदैव सस्नेहं निःशुल्कं च मम रोगावस्थायां साहाय्यं कुर्वन्ति स्म। वाराणस्या विश्रुता विद्वांसः हिन्दूविश्वविद्यालये संस्कृतसंकायाध्यक्षाः श्री पं० बालकृष्णमिश्रमहोदया मैथिला आसन्। अहमपि मैथिलीभाषां जानामि स्म। अतो यदाहं तेषां संविधे गच्छामि स्म, ते मैथिली-भाषायामतिशयस्नेहपूर्वकं पृच्छन्ति स्म—'*आऊ आऊ, वासुदेव बाबू, आऊ, कहू संस्कृतप्रचार क हाल। केहन चलैत अछि?*' एवमेव डॉ० मङ्गलदेवशास्त्रिमहोदयाः, राजकीयसंस्कृतमहाविद्यालयाध्यक्षा अपि मम प्रेरणादातारः सहायकाश्च आसन्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मम सहयोगिषु च श्रीअवधेशप्रसादद्विवेदिनः, श्रीचन्द्रबली द्विवेदिनः, श्रीजगन्नाथउपाध्यायाः, श्रीजनार्दनपाण्डेयाः, श्रीव्रज-बल्लभद्विवेदिनः, श्रीकपिलदेवत्रिपाठिनो जटिल-महोदयाः डॉ० प्रेमलताशर्ममहोदयाः, श्रीरामविलासपोद्दारमहोदयाः, श्रीकृष्णमोहन-ठक्कुरमहोदयाः, श्रीगणपतिशर्ममहोदयाः, श्रीपुरुषोत्तममोदीमहोदयाः, तथा दीवानश्रीरामचन्द्रकपूरप्रभृतयः प्रमुखा आसन्।

धर्माचार्येषु जंगमवाड़ीमठाधीशाः श्रीविश्वेश्वरशिवाचार्य-महाचार्य-महोदयाः, गीताप्रचारमन्दिरस्य अध्यक्षाः श्रीहरिहरानन्द-महाराजाः, श्रीभारतधर्महामण्डलस्य अध्यक्षा श्रीस्वामिज्ञानानन्द-सरस्वती महाराजाः, संन्यासिसंस्कृतमहाविद्यालयस्य व्यवस्थापकाः श्रीधर्मानन्दस्वामिनश्चेत्यादयो मम परमसहायका आसन्। यदि एतेषां सहयोगो नाऽभविष्यत् तदा प्रचारे गतिरेव नागमिष्यत्। अतस्ते सर्वेऽपि मम स्मृतौ सर्वदा सबहुमानं विराजन्ते।

अद्यापि हास-परिहास-विनोद-गोष्ठ्यां
हास्यप्रियेषु रसिकेषु मिथो मिलत्सु।
उन्मुक्तहास्यसजुषां विदुषां त्रयाणां
भूकम्पकारि हसितं नहि विस्मरामि॥ ८५॥

वाराणस्यां दशाश्वमेधघट्टसमीपवर्तिनि जम्मूछात्रावासे मया होलिकावसरे ८.३.७१ दिनाङ्के एका बृहती हास्यविनोदगोष्ठी समायोजिता आसीत्। अस्यां वाराणस्याः तदानीन्तनाः त्रयो विशिष्टा अट्टहास्यभट्टा विद्वांसः समुपस्थाय स्वकीयैरुन्मुक्तहास्यैः सम्पूर्णामपि गोष्ठीं हास्यरसधारायां निमज्जयामासुः। वैदुष्येण, वचसा, आकर्षकेण व्यक्तित्वेन च सर्वातिशायितां भजमाना ते त्रयो विद्वांसः इमे निम्नलिखिता आसन्—

१. *आचार्यप्रवराः श्रीहजारीप्रसादद्विवेदिमहोदयाः*

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२. श्री एल.ओ जोशी महोदया:, हि. वि. विद्यालये विशिष्टाधिकारिण:

३. श्रीमहेशप्रसादमहोदया:, वाराणसी-जिलाधिकारिणश्च

अद्यापि हास्यसमितौ कविषु प्रकामं
कुर्वत्सु हास्यकवितारसरम्यवर्षा:।
श्रीमद्द्विवेदिविबुधेन सहासमुक्तां
श्रीकालिदासकवितानुकृतिं स्मरामि॥ ८६॥

पूर्वश्लोके मया हास्यविनोदगोष्ठ्या: चर्चा कृता। अस्यामेव गोष्ठ्यां विभिन्नकवीनां कवितापाठानन्तरं श्रीमता आचार्यद्विवेदिमहोदयेन एक: अत्यन्तं मनोहारी हास्यप्रसङ्ग: श्रावित:। तैरुक्तम्—एकदा तै: कस्याञ्चित् सभायामेका खद्दरवस्त्रधारिणी स्थूलकाया सुन्दरी महिला दृष्टा। तां दृष्ट्वा अभिज्ञानशाकुन्तले दुष्यन्तेनोक्तां शकुन्तलाविषयिणीमेकां पंक्तिमनुकृत्य तेषां मुखात् सहसा एका पंक्तिर्निर्गता। सा चेयम्—

इयमधिकमनोज्ञा खद्दरेणापि मोटकी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

इदं श्रुत्वा सर्वेऽपि निकामं प्रहसितवन्त:। तालिकावादनेन च सम्पूर्णं सभाभवनं गुञ्जायमानमजायत।

अद्यापि तं दिवसमेकमभूतपूर्व-
कोलाहलाकुलमहं सततं स्मरामि।
श्रुत्वा यदा किमपि भाषणमप्रियं मे
केचिद् बुधा मयि भृशं कुपिता अभूवन्॥ ८७॥

वाराणस्यां १९४९ तमे वत्सरे, मईमासे टाउनहालभवने अ.भा. संस्कृतसाहित्यसम्मेलनस्य एकं विशिष्टाधिवेशनं म. म. श्रीगिरिधरशर्मचतुर्वेदमहोदयानामध्यक्षतायां समायोजितमासीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्मिन्नेव समारोहे द्वितीयदिवसे संस्कृतशिक्षाया वर्तमानस्वरूपस्य गुणदोषविवेचनविषयमधिकृत्य एका विचारगोष्ठी अपि समायोजिता अभवत्। विषयेऽस्मिन् बहूनां विदुषां भाषणानि जातानि। मयापि एनं विषयमधिकृत्य स्वकीया विचाराः श्लोकबद्धरूपेण श्राविताः। तत्र इमावपि द्वौ श्लोकौ पठितौ—

नेयमाध्यात्मिकी शिक्षा आर्थिकी धार्मिकी न वा।
न वाऽनन्दकरी पुंसां केवलं कालयापिनी॥
एवं बहूनां छात्राणां नाशयित्वा नवं वयः।
पण्डितैः पाठशालासु ब्रह्महत्या विधीयते॥

एतत् श्लोकद्वयं विशेषतश्च द्वितीयं श्लोकं श्रुत्वा मञ्चे विराजमानाः अनेके वाराणसेया विद्वांसो भृशं कुपिता अजायन्त। महान् कोलाहलोऽभूत्। तत्र एकेन कथितम्—"अयं क्षमायाचनां करोतु।" ततो विहारप्रदेशीयैः जयपुरनिवासिभिश्च प्रतिनिधिभिरुक्तम्–"क्षमायाचनाया आवश्यकता नास्ति। छात्राणां जीवनं वृथा गच्छति विद्यालयेषु। तदेतत् हत्यासमानमेव भवति।" एवं परस्परविरुद्ध प्रश्नोत्तरे प्रारब्धे तन्निरोधाय जयपुरनिवासिभिः कविवरेण्यैः श्रीभट्टमथुरानाथ-शास्त्रिभिः कविसम्मेलनस्य प्रारम्भं कर्तुं घोषणा कृता। कवितापाठश्च प्रारब्धः। तेन वातावरणे परिवर्तनमजायत। अध्यक्षाः श्रीमन्तश्चतुर्वेद-महोदयास्तु मनसा मत्पक्षसमर्थका अपि वचसा न किमपि वक्तुमपारयन्। तूष्णीमेव सर्वं पश्यन्तो विराजमाना आसन्। एतदन्तरे एको युवा श्लोकश्रवणेन जातोत्साहः तस्य प्रकाशनाय कञ्चित् द्रव्यराशिं दातुं समागतः परं तं निवारितवन्तः श्रीचतुर्वेदिमहोदया विरोधभयादन्येषाम्। सैषा घटना मुहुर्मुहुर्मम स्मृतिपथं समायाति।

प्रायेण गौर-रमणीयतरौ विशालौ
गम्भीर - धीरतर - मानिवर - स्वभावौ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्कृष्टलेखन - कवित्वकला - प्रवीणौ
अद्यापि तौ समधियौ सुधियौ स्मरामि॥ ८८॥

वाराणस्यां मम सुपरिचितौ माननीयौ च द्वौ प्रतिष्ठितौ विद्वांसौ आस्ताम्। तौ उभावपि प्रायः समानस्वभावौ आस्ताम्। उभावपि गौरवर्णौ, विशालकायौ, गम्भीरधीरस्वभावौ, मनस्विनौ, महाकाव्य-लेखकौ, तत्रापि उभावपि "हरणकाव्य"लेखकौ आस्ताम्। न केवलमेतावदेव सादृश्यमासीदुभयोः। परं द्वावपि तौ सुधियौ समधियौ (भोजपुरीभाषायां "समधी") अपि आस्ताम्। एष तावत् तयोः परोक्षपरिचयः। प्रत्यक्षपरिचयस्तु तयोरीदृशो वर्तते। प्रथम-स्तावत् 'रुक्मिणीहरण' महाकाव्यप्रणेता पण्डितप्रवरः श्रीकाशीनाथद्विवेदी। द्वितीयः पारिजातहरण-महाकाव्यप्रणेता कविवरेण्यः श्रीमदुमापतिद्विवेदी। इमावुभावपि उत्तरप्रदेशस्य पूर्वाञ्चलीय-देवरियाजनपदनिवासिनौ। 'समधी' सम्बन्धेन श्री पं० काशिनाथद्विवेदिनां पुत्रः श्रीमदुमापतिद्विवेदिनां जामाता आसीत्।

किं संस्कृतं भवितुमर्हति राष्ट्रभाषे-
त्येवंविधं खलु निरीक्ष्य मदीयलेखम्।
छात्राश्च पण्डितजनाश्च यदाक्षिपन् मा-
मद्यापि तन्मम मनो विकलीकरोति॥ ८९॥

११.१२.६८ दिनाङ्के वाराणस्या दैनिके "आज" पत्रे मया हिन्द्यां "क्या संस्कृत राष्ट्रभाषा हो सकती है" इतिशीर्षक एको लेखः प्रकाशनार्थं प्रदत्तः। पत्रे लेखस्तु सम्पूर्णरूपेण प्रकाशितः परन्तु शीर्षके *"संस्कृत राष्ट्रभाषा नहीं हो सकती"* इति परिवर्तनं कृतम्। एतद्विषये मया यदा सम्पादकाः पृष्टास्तदा तैः कथितम्—*"आप के लेख का जो निष्कर्ष था तदनुरूप ही हम लोगों ने शीर्षक दे दिया। पत्रकारों का भी तो कुछ अधिकार होता है। और हम लोगों ने तो आप के पक्ष को*

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ही पुष्ट किया है।" पश्चात् इमं शीर्षकं पठित्वा मम च लेखकरूपेण नाम ज्ञात्वा अत्रत्याः केचन पण्डिताः छात्राश्च भृशमप्रसन्ना जाताः। मया सह ते वादं विवादं च कृतवन्तः। मया च यथासम्भवं समाधानं कृतम्। स्वकीयः पक्षश्च समर्थितः। तत्पश्चात् सर्वं शान्तं जातम्।

या नाम वृद्धमपि मां वदति स्म "बाबू"
सस्नेहमादृतवती बहुखाद्यपेयैः।
अद्याप्यहं शिवमुनीत्यभिधानधन्यां
नो तादृशीं सहृदयामलभे कदाचित्॥ १०॥

बाबूशब्दः खलु अस्माकं समाजे बहु प्रचलितो वर्तते। प्रयोगश्चास्य बहुषु अर्थेषु भवति। कार्यालयेषु कार्यकर्तृणामर्थे, अधिकारिणामर्थे, सम्मानितजनानामर्थे, पितुरर्थे चापि क्वचित्। परन्तु विशेषतो बालकानां, प्रियजनानाञ्चार्थे अस्य शब्दस्य बहुलः प्रयोगो भवति। परं वृद्धानां कृते तु अयं शब्दः कुत्रापि न प्रयुज्यते। परन्तु इदं ममैव सौभाग्यमासीत् यत् विश्रुतनामधेयस्य श्रीमदाचार्यबलदेवोपाध्यायमहोदयस्य धर्मपत्नी श्रीमती शिवमुनीदेवी सर्वदैव मां "बाबू" शब्देनैव सम्बोधयति स्म। तत्रापि न केवलं बाबू इत्येव अपितु 'संस्कृतवाला बाबू' इति शब्देन। तदेष तस्याः स्नेहसिक्तो मधुरः शब्दो माममतितरामाह्लादयति स्म। अद्यापि तत् स्मृत्वा अहमात्मानं 'बाबू' इत्येव मत्वा महान्तमानन्दं गौरवं चानुभवामि।

विद्वत्सु संस्कृतगिरोऽध्ययनाधिकार-
माश्रित्य यः प्रचलितो विपुलो विवादः।
अद्यापि तेन सुरवाक् स्वभविष्यहेतो-
श्चिन्तान्विता ननु भवेदिति चिन्तयामि॥ ११॥

पूर्वमेका देवभाषापरिषन्नाम्ना अखिलभारतीया सभा प्रचलति स्म। संस्कृतमेव राष्ट्रभाषा भवेद् इत्यस्याः सभायाः प्रमुखमुद्देश्यमासीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्या एव सभाया ३.१२.१९४४ दिनाङ्के वाराणस्यामधिवेशन-मायोजितं यस्या आध्यक्ष्यं काशीहिन्दुविश्वविद्यालयस्य प्रच्यविद्या-विभागाध्यक्षाः पण्डितप्रवरश्रीकालीप्रसादमिश्रमहोदया निरवहन्। ते स्वकीये अध्यक्षीये अभिभाषणे संस्कृतभाषायाः राष्ट्रभाषात्वस्य समर्थनमकुर्वन्। परन्तु तथाविधं भाषणं पण्डितसमाजे तुमुलस्य विवादस्य कारणं जातम्। यतो यदि संस्कृतं राष्ट्रभाषा अभविष्यत् तर्हि शूद्राः अपि संस्कृताऽध्ययने अधिकारिणः प्राभविष्यन्। परन्तु इदं तदानीन्तनपण्डितानां कृते शास्त्रानुरोधात् स्वीकार्यं नासीत्। पण्डितसमाजस्य मूर्धन्या मान्याश्च प्रतिनिधयः स्वामिश्रीकरपात्रपादा अपि शूद्राणां संस्कृताऽध्ययनेऽधिकारं न मन्यन्ते स्म। तदेतत् स्वीयं मतं तैः विस्तरेण प्रतिपादितं "अन्धराबाढ़ी, दरभङ्गा, विहार" स्थानात् प्रकाशिते मित्रवाण्याः पत्रिकाया वाचस्पतिमिश्रविशेषाङ्के (१८८५ शकाब्द, भाद्रकृष्ण-जन्माष्टमी)। अतः श्रीपण्डितकाली-प्रसादमिश्रमहोदयानां संस्कृत-भाषायाः राष्ट्रभाषात्वसमर्थनमादाय पण्डितसमाजे महान् विक्षोभ आसीत्। एतद्विरोधे केचन लेखा अपि पण्डितपत्रिकायां प्रकाशिताः। तदानीमेतदपि श्रुतं मया—स्वामिश्रीकरपात्रमहोदयानां कथनात् श्रीमिश्रमहोदयैः स्वकीयं मतं परिवर्तितम्।

अहं मन्ये, यदि इदं सर्वं मतामतं संस्कृतभाषायाः श्रुतिगोचरम-भविष्यत् तर्हि सा नूनमिदानीमपि स्वभविष्यविषये भृशं चिन्ताकुला अभविष्यत्।

अस्मिन् विषये पण्डितपत्रिकायाः १६ मार्च १९५३ तमे, २३ मार्च १९५३ तमे तथा १३ जुलाई १९५३ तमे अङ्के प्रकाशिता लेखा अपि, ये परस्परं विरोधिनः सन्ति—एतद्विषयजिज्ञासुभिः द्रष्टव्याः सन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काव्यालिका - गजल - चित्रपटीय - रागे
बद्धानि मे विविध - संस्कृतगीतकानि।
आकर्ण्य केचन बुधा यदवाक्षिपन् मा-
मद्यापि तन्मनसि विस्मयमादधाति॥ ९२॥

संस्कृते कवितां गीतं च लिखितुं मम छात्राऽवस्थायामेव प्रवृत्तिरुत्पन्ना। १९३६ तमे वत्सरे यदाहं विहारप्रदेशे गोपालगंज-मण्डलीय-हथुआ-राज्यस्थिते श्रीछत्रधारिसंस्कृतमहाविद्यालये शास्त्रिकक्षायां पठन्नासम्, तदानीमेव 'संस्कृतगीतमाला' नाम्ना स्वकीयसप्तदशगीतानामेकं लघु पुस्तकं प्रकाशितम्। तदनन्तरं 'संस्कृतगानमाला' नाम्ना तदेव पुस्तकं परिवर्द्धितरूपे प्रकाशितम्। अनयोर्द्वयोरपि "गजल कव्वाली" गीतान्यनुकृत्य संस्कृगीतानि मया लिखितानि। तानि तस्मादेव कालात् बहुभिश्छात्रैः गीयन्ते।

उर्दूच्छन्दस्सु इदं संस्कृतगीतप्रणयनं अनेकेभ्यः प्रारम्भे नारोचत। वाराणस्यां भारतीयसंस्कृतिपरिषदो मन्त्री श्रीमद्रामचन्द्र-कपूरमहोदयः एतद्विरोधे स्थानीये "आज" दैनिकपत्रे २४.३.६६ दिनाङ्के एकं लेखं प्राकाशयत्। हरिश्चन्द्रकालेजस्य तदानीन्तनः प्राचार्यः श्रीकेलकरमहोदयः "संस्कृतश्लोका एव विविधैः स्वैर्गातुं शक्यन्ते तथा सङ्गीतस्य आनन्दोऽपि लब्धुं शक्यते। अतो नूतनगीतानां निर्माणस्य आवश्यकता नास्ति" इति कथयित्वा विरोधं कृतवान्। एवमेव अन्येऽपि केचन पण्डिता विरोधिनो मिलिताः। परन्तु यदि संस्कृतच्छात्राः साक्षात् अभद्रभावभरितानि उर्दूगीतानि गायन्ति तदा तदनुकृत्या रचितानां साधुभावभरितानां संस्कृतगीतानां गाने को दोषः? इति विचिन्त्य मया विरोध-मविगणय्य तादृशानि गीतानि लिख्यन्ते स्म। एतत्पक्षसमर्थने मयापि एको लेखः प्रकाशितः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि शीतसमयः सलिलं च शीतं
स्नानं प्रभातसमये पवनश्च शीतः।
तत्रापि शीतदधियुक् चिपुटं च भोज्यं
संस्मृत्य तद् वपुरहो हु हु हू करोति॥ ९३॥

रामनगरस्य द्वितीयमधिवेशनं शीतकाले समायोजितमासीत्। अतः श्रीशुक्लमहोदयस्य गृहे प्रातःकाले उपस्थितिः कष्टसाध्या आसीत्। एकं तु भयङ्करः शीतकालः, द्वितीयं प्रातःकाले स्नानम्, तदपि शीतलेन जलेन, चतुर्थं रामनगरात् त्रिचतुःक्रोशपर्यन्तं जीपयानेन गमने शीतपवनस्य प्रबला आघाताश्चेति महती कष्टपरम्परा सहनीया अभवत्। तथापि "तत्र गत्वा उष्णामुष्णां शष्कुलीम्, उष्णमुष्णं विविधं शाकं च स्वेच्छानुकूलं भुञ्जानाः सकलं शीतजनितं कष्टं निवारयिष्यामः" इति चिन्तयन्तो वयं महता उत्साहेन तत्र यथाकालं संप्राप्ताः। परं तत्र स्वचम्पारणीय-विशिष्टभोजनस्य दधिचिपुटान्नस्य वैशिष्ट्यं विज्ञापयितुकामेन तदेव भोजयितुं व्यवस्था विहिता आसीत्। तस्मात् तत्रत्यं गाढसरः—(छाली) समेतं दधि अतिशीतलतया पञ्चमं कष्टकरं वस्तु जातम्। एवं च तस्मिन् दिने कम्पमानेन करेण यद् भोजनं विहितं तदद्यापि स्मृतेर्नापगच्छति।

बलिया—

अद्यापि मत्स्मृतिगता बलियास्थितस्य
विद्वज्जनस्य बहुविस्मयकारिवाचः।
यो मत्प्रचारविषये सुबहूपहासं
पूर्वं विधाय परतो व्यदधात् प्रशंसाम्॥ ९४॥

एकदाहं गोरखपुरमण्डलान्तर्गतात् बड़हलगंजनगरात् रेलयानेन वाराणसीं गच्छन्नासम्। एतन्मध्ये एव रेलयाने एके वृद्धपण्डिता मां मिलिताः। ते वपुषा, वस्त्रेण च अत्यन्तं भव्यस्वरूपा आसन्। ते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतपुस्तकमेकं पठन्तं मां विलोक्य पृष्टवन्तः—को भवान्? किं करोतीति? ततोऽहं स्वकीयं सर्वं कार्यं वृत्तं निवेदितवान्, निम्नांकितकवितामाध्यमेन स्वकीयमुद्देश्यं च निरूपितवान्—

नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी।
सदने सदने जनजन-वदने जयतु चिरं कल्याणी॥

ते इदं मदीयमुद्देश्यं ज्ञात्वा किञ्चिद् विहस्य प्रोक्तवन्तः—"महाशय, किमिदं भवान् असम्भवं सम्भवं कर्तुं वृथा प्रयासरतोऽस्ति! अस्मिन् ह्रासमये समये संस्कृतं किं पुनरपि जनजनभाषा भवितुमर्हति? सर्वथा असम्भवमिदम्। पतनोन्मुखे भवने सुधालेपनमिव, पतनोन्मुखे वृक्षे जलसेचनमिव, मरणोन्मुखस्य नरस्य अलङ्करणमिव च अयं भवतः प्रयासः अस्ति। अस्मिन् विषये पुनश्चिन्तनं क्रियताम्। अथवा वाराणसी-गमनं विहाय भवान् मया सह बलियां चलतु। तत्र विषयेऽस्मिन् पुनश्चिन्तनं करिष्यामः इति।" एवमुक्त्वा ते मम वाराणसीयात्रां निरुध्य मऊस्टेशनात् मत्कृते अन्यां चिटिकां गृहीतवन्तः, मां च बलियां नीतवन्तः। तेषामिमा वाचः श्रुत्वा मम बहुकौतूहलं जातम्। अतो मयापि तेषामशेषविचारपरिज्ञानाय महता उत्साहेन उल्लासेन च बलियामगनं स्वीकृतम्। अनन्तरमिदं मया ज्ञातं यदिमे महानुभावाः बलिया जुबलीसंस्कृतकालेजस्य प्राचार्याः, प्रतिष्ठिता विद्वांसः, श्री पं० उदितनारायण उपाध्यायमहोदया आसन्। एते श्रीमदाचार्यबलदेव-उपाध्यायमहोदयस्य पितृव्या भवन्ति स्म। इदं ज्ञात्वा तैः सह गमने मम अधिका प्रसन्नता महान् उत्साहश्च सञ्जातः।

अनन्तरमावां रात्रौ दशवादने बलियानगरं प्राप्तवन्तौ, कालेजं च गतवन्तौ। ततश्च किञ्चिदल्पाहारं गृहीत्वा, किञ्चिद् दुग्धं पीत्वा, किञ्चिदालप्य च सुखं सुप्तवन्तौ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः प्रातःकाले किं जातम्? तद् दृष्ट्वा श्रुत्वा च महदाश्चर्यं भवति स्म। सर्वान् पण्डितान् छात्रांश्च आहूय तैरेवं वक्तुमारब्धम्— *"देखो, भाई, ये बनारस के पण्डित हैं। इनके जीवन का उद्देश्य है संस्कृत को घर-घर पहुँचाना और हर एक के मुख से बोलवाना। क्या यह आज के युग में सम्भव है? ये असम्भव को सम्भव करने चले हैं। अस्तु, आज शाम को सभा की जायगी। देखें, यह अपनी बात को कैसे सिद्ध कर पाते हैं।"* अनन्तरं सायंकाले बलियास्थपण्डितानां, छात्राणां संस्कृतप्रणयिनां च एका महती सभा आयोजिता। तत्र मदीयं सुविस्तृतं भाषणं जातम्। बहूनां प्रश्नानामुत्तराणि दत्तानि, शङ्कानां समाधानानि च कृतानि। तेन पण्डितमहोदया मयि भृशं प्रसन्ना जाताः। भूरि भूरि च धन्यवादान् दत्तवन्तः। वस्तुतस्ते मम संस्कृतसमर्थकान् विचारान् विस्तरेण ज्ञातुमेव मां बलियामानीतवन्तः आसन्।

ततः परं परमप्रसन्नैः पण्डितमहोदयैः नगरस्य जनपदस्य च बहुषु शिक्षास्थानेषु मम भाषणानि कारितानि। पण्डितमहोदयानां परिचयेन, सौहार्देन, सद्व्यवहारेण च ममापि महती प्रसन्नता जाता। मम यात्राया इदमेकं नूतनमुदाहरणमासीत्।

वृन्दावन—

अद्यापि तत् प्रतिगृहं प्रतिवीथि नित्यं
प्रत्यापणं प्रतिवनोपवनं समन्तात्।
राधेतिवर्णयुगलेन सुगुञ्जितं श्री-
वृन्दावनं स्मृतिगतं मुदमातनोति॥ ९५॥

वृन्दावने प्रायः सर्वेषां श्वासे, जृम्भणे, प्रणामे, आशीर्वादे, मिलने, केलौ, कौतूहले, उत्सवे च सर्वत्रैव "राधे राधे राधे राधे" इति ध्वनिः श्रूयते।

श्रीकृष्णभक्तानां हृदये राधां प्रति कीदृशी भक्तिः, कीदृशी श्रद्धा,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कियान् स्नेहः, कियती अनुरक्तिः, कीदृशी च आत्मसमर्पणभावना आसीदिति सम्यक् परिज्ञानाय विद्वद्भिः "श्रीराधारससुधानिधि-स्तव" नामकः ग्रन्थः पठनीयः। रसकुल्याख्यया टीकया समलङ्कृतः ८४० पृष्ठात्मकोऽयं विशालो ग्रन्थः राधया सह संस्कृतवाङ्मयस्यपि गौरवं बर्द्धयति।

अद्यापि तानि ललितानि मनोहराणि
चैतन्यदेवकविभक्तमुखात् श्रुतानि।
सत्काव्य - गीत - कविताभिनयादिकानि
चेतः स्मृतानि रमयन्ति विनोदयन्ति॥ ९६॥

चैतन्यसम्प्रदायस्य श्रीसनातनगोस्वामि - श्रीरूपगोस्वामि-श्रीजीवगोस्वामि-श्रीगोपालभट्टगोस्वामिप्रभृतिभिराचार्यैः श्रीकृष्ण-लीलासम्बन्धे काव्य-गीत-कविता-नाटकादिरूपेण यत् विपुलं कृष्णसाहित्यं लिखितं तत्सर्वमपि अत्यन्तं सरल-ललितं मधुरं मनोहारि च भवतीति तत्पाठकैः सर्वैरपि अङ्गीकर्तुं शक्यते। इदं साहित्यं नवद्वीपे बङ्गलिप्यां लभ्यते परं वृन्दावने तत्सर्वं देवनागरीलिप्यामुपलब्धं भवति। एतस्य साहित्यस्य अध्येतारः ज्ञातारः बोधयितारः गायकाश्चापि वृन्दावने बहवो भक्तजना लभ्यन्ते। मया वृन्दावननिवासकाले तस्य सर्वस्यापि साहित्यस्य अध्ययनाय श्रवणाय च अपूर्वः आनन्दमयोऽवसरः प्राप्तः। एतस्य साहित्यस्य रसिकजनैः पठनीयानि कानिचित् पुस्तकानि इदानीमपि ततो लब्धुं शक्यन्ते।

अद्यापि तत्र मनसो मम याति चित्रं
वृत्तं विनोदजनकं च तथाऽप्रियं च।
एकेन पण्डितवरेण विनैव यानं
नीतो यदाऽहमभवं स्वगृहं सुदूरम्॥ ९७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृन्दावननिवासकाले अहमेकदा नगरात्किञ्चिद्दूरवर्तिनि धर्मसंघ-संस्कृतमहाविद्यालये तत्रत्यं प्रधानाचार्यमहोदयं मिलितुं विद्यालयञ्च द्रष्टुं गतवान्। तत्र आचार्यमहोदया मिलिताः, सस्नेहं वार्ता जाता, भोजनं च मया मध्याह्नकालिकं तत्रैव विहितं, कञ्चित्कालं विश्रामश्चापि जातः। अनन्तरं सायंकाले आवां प्रस्थानार्थमुद्यतौ, प्रस्थितौ च। मार्गे मया विचारितं, गन्तव्यं किञ्चिद्दूरे वर्तते, अतः पण्डितमहोदयाः किमपि रेक्सायानं ग्रहीष्यन्ति इति। परं पण्डितमहोदया यान्ति आयान्ति च अनेकानि यानानि पश्यन्तोऽपि कमपि यानचालकं तत्र चलितुं न कथितवन्तः। अनन्तरं किञ्चित् प्रतीक्षां कृत्वा मया स्वयमेव पण्डितमहोदया निवेदिताः किमपि यानं ग्रहीतुम्। ततः पण्डितमहोदयैरुक्तम्—*''जाने दीजिये पण्डितजी, न जाने किस जाति का रेक्सा है और किस जाति का चलाने वाला है! फिर स्नान करना पड़ेगा। अतः धीरे-धीरे पैदल ही चला जाय। अब कितना दूर है ही''।* इदं कथनं यद्यपि मत्कृते अप्रियमासीत् परं तेषां तर्कं श्रुत्वा मम विनोदोऽपि भूयान् जातः। तेषां कथनमद्यापि मम विस्मृतिं न गच्छति, विनोदं च जनयति।

अद्यापि पीडयति मे हृदयं यदस्मिन्
वृन्दावने बहुषु सत्स्वपि पण्डितेषु।
सङ्कीर्तनार्चन - कथा - भ्रमणादि - सक्ताः
छात्राः श्रमं विदधते स्म न शास्त्रपाठे॥ ९८॥

वृन्दावनं नाम मन्दिरबहुलं नगरं वर्तते। अत्र लघूनि विशालानि च सुबहूनि मन्दिराणि सन्ति। किमधिकम्, गृहे गृहे एकैकं लघु लघु मन्दिरं दृष्टिगोचरीभवति। एतेषु सर्वेषु च मन्दिरेषु कीर्तनं, भजनं, पूजनं, कथाप्रवचनम् चेति कार्यक्रमाः प्रतिदिनमेव नियमितरूपेण प्रचलन्ति। काले काले च यात्रा, उत्सवः, कृष्णलीला, रासलीला,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृत्यं, गीतं चेति विविधा विशेषकार्यक्रमा अपि आयोज्यन्ते। परिक्रमाया, मन्दिरे मन्दिरे भ्रमणस्य, दर्शनस्य अत्र एका अपराऽपि प्रवृत्तिः प्रायः तत्रत्येषु जनेषु दृश्यते। एतादृशे वातावरणे प्रायश्छात्रा अपि आकृष्टचेतसः प्रायेण सर्वेषु कार्यक्रमेषु सम्मिलिता भवन्तीति तेषामैकान्तिके अध्ययने बाधा सुनिश्चितैव। अतो वृन्दावने शास्त्रज्ञानस्य प्रवृत्तिः सर्वथा अल्पीयसी दृश्यते।

श्रीरङ्गमन्दिर - समाश्रित - पूजकाद्यैः
रात्रौ निशीथसमये परिकीर्तितानि।
अद्यापि मत्-श्रवणयोरतिविप्रियाणि
राधामुकुन्दवचनानि न विस्मरामि॥ ९९॥

उत्तरप्रदेशीयसंस्कृतविद्यालयाध्यापकसमितेः वार्षिकाधिवेशने सम्मिलनाय २.३.७४ दिनाङ्के अहं वृन्दावनं प्राप्तवान् २१.३.७४ पर्यन्तं च वृन्दावने मथुरायां च स्थितः। तत्र श्रीरङ्गलक्ष्मी-संस्कृत-महाविद्यालये मम निवासव्यवस्था आसीत्। तेषु दिनेषु तत्र सुप्रसिद्धे श्रीरङ्गलक्ष्मीमन्दिरे ब्रह्मोत्सवः प्रचलति स्म। मन्दिराध्यक्षाणां मान्य-श्रीगोवर्द्धनरङ्गाचार्यस्वामिमहोदयानां मम पूर्वपरिचितानामनुरोधेन ब्रह्मोत्सवपर्यन्तमहं तत्रैव महाविद्यालयस्य प्रधानाचार्याणां मम सुहृदां पण्डितप्रवर-श्रीरामादर्शपाण्डेय-महोदयानामावासे स्थितः। तत्र राधाकृष्णयोः संवादरूपः एको विचित्रोऽभिनयो नित्यमवलोकितो मंया यस्यास्मिन् पद्ये सङ्केतो विद्यते।

मन्दिरे रात्रौ सम्भवतो द्वादशवादनावसरे विलम्बेन आगतस्य श्रीकृष्णस्य गृहाभ्यन्तरे प्रवेशमवरोद्धुं श्रीराधा कपाटं न उद्घाटयति स्म तथा कुत्र कस्या गृहे एतावत्कालपर्यन्तं रात्रौ स्थित इति श्रीकृष्णं दोषारोपणपूर्वकं पृच्छति स्म, उपालभते स्म, भर्त्सयति स्म च। पुनश्च श्रीकृष्णः आत्मानं सच्चरित्रं निर्दोषं च साधयन्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कपाटोद्घाटनाय श्रीराधां बहुचाटुवचनैरनुरुणद्धि स्म। तमिमं खलु उक्तिप्रत्युक्तिमयमभिनयं तत्रत्याः पूजकाः पण्डिता एव च कुर्वन्ति स्म मनोहरैः पद्यैः श्रीकृष्णरूपेण बहिः स्थिताः तथा श्रीराधारूपेण च आभ्यन्तरे स्थिताः सन्तः। इदं द्रष्टुं भूयान् तत्र सम्मर्दो भवति स्म। परन्तु इदं दृश्यं अद्भुतं मनोरञ्जकं च सदपि देवानां कृते अश्रद्धेयं लज्जाकरं च भवति स्म मम दृष्टौ। तस्मात् मम कदापि तद्दर्शने श्रद्धा प्रीतिर्वा न जाता, अपि तु लज्जया तु भूयते स्म।

अद्यापि तद्दिनमविस्मरणीयमेकं
वृन्दावनस्य सविशेषतरं मतं मे।
यत्रालभे प्रथमतः प्रभुपादनाम्नां
तद्दिव्यदर्शनमहं वरदेशिकानाम्॥ १००॥

उत्तरप्रदेशीय-संस्कृताध्यापकसम्मेलनस्य वृन्दावने समायोजिते महासम्मेलने भागं गृहीतवता मया सम्मेलनादवशिष्टे समये वृन्दावनस्य भूयसां दर्शनीयस्थानानां तथा बहूनां मन्दिराणां च दर्शनस्य शुभाऽवसरो लभ्यते स्म। एतेष्वेव दिवसेषु इस्कानसंस्थायाः सुविशालस्य भव्यतमस्य च मन्दिरस्य, तत्रत्यायाः स्वच्छतायाः, तत्रत्यानां पूजा-भजन-कीर्तन-गीतानां कार्यक्रमस्य च रमणीयतां विलोक्य महती प्रसन्नता जाता। विविधविदेशवासिनां बहूनां गौराङ्गानां भक्तानां भारतीयवेषभूषापरिधानम्, विविध-तिलक-कण्ठी-तुलसीमालाधारणम्, भगवद्गीता-भागवतपाठः, विनम्रतापूर्णो हृदयग्राही व्यवहारः, तेषां परस्परं परमसौहार्दञ्चेत्यादिकमपि सर्वथा अदृष्टपूर्वमेव दृश्यं दृष्टिगोचरं जातं परमाह्लादकञ्च। संयोगवशात् तेषु दिनेषु तस्याः संस्थायाः संस्थापकाः सञ्चालकाश्च शान्तिशील-सौजन्यमूर्तयो जगतः एके अद्वितीया विभूतयः श्रीप्रभुपादमहोदया अपि तत्रैव विराजमाना आसन्। तेषां श्रीकृष्णभक्तिधारायाः प्रचाररूपं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्वविस्मयकरं कार्यजातं मया पूर्वत एव ज्ञातमासीत् परं तेषां साक्षात्कारस्य तथा तैः सह आलापस्य च अयं प्रथम एवाऽवसरः प्राप्त आसीत्। मया निवेदने कृते तैः भक्तेषु संस्कृतशिक्षणस्य तथा संस्कृतेनैव वार्तालापस्य च कृते आश्वासनमपि प्रदत्तम्। इदं दिनं न केवलं मम कृते आनन्दकरमेव प्रत्युत सुमहत् प्रेरणादायकमपि समजायत। अतस्तस्य दिनस्य सर्वदैव मम हृदये पुनः पुनः स्मृतिरुत्पद्यते, प्रेरयति च मां किमपि विश्वव्यापकं महत्तमं कार्यं कर्तुम्, भक्तिमिव देववाणीमपि सर्वत्र प्रचारयितुम्।

सारनाथ—

श्रीबुद्धपादरजसा विनयोपदेशै-
र्वन्द्यं समस्तजगतो मृगयूथरम्यम्।
तीर्थस्थलं विविधदेशजुषां जनाना-
मद्यापि राजति सदा हृदि सारनाथम्॥ १०१॥

वाराणसीनिकटवर्ति सारनाथनगरं नाम क्षेत्रफलदृष्ट्या लघुतरमपि स्वकीयेन अनितरसाधारणेन बहुविधेन वैशिष्ट्येन समस्तेऽपि विश्वस्मिन् किमपि विशिष्टतरं स्थानं भजते। इदमेव नगरं "भगवतो अर्हतो सम्मासम्बुद्धस्य" प्रथमोपदेशस्थलमिति इतिहासविदां सुप्रसिद्धमेव। इत एव भगवता बुद्धेन दीक्षिताः प्रशिक्षिताश्च कृत्वा पञ्च भिक्षवः शिष्याः जगति धर्मप्रचाराय प्रेषिताः इदमेव धर्मचक्रप्रवर्तनमित्युच्यते। भगवता बुद्धेन शिष्यान् प्रति यानि उपदेशवचनानि प्रोक्तानि तानि पठित्वा स्मृत्वा च शरीरं गर्वेण आनन्देन च रोमाञ्चितं भवति। पालिभाषया मन्त्रवत् प्रोक्तानि तानि वचनानि इमानि सन्ति—

चरथ भिक्खवे चारिकं वहुजनहिताय बहुजनसुखाय लोकानुकम्पाय अत्थाय हिताय सुखाय देवमनुस्सानम्। उपदेसेयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भिक्खवे धम्मम् आदिकल्याणं मध्येकल्याणं परियवसानकल्याणं सात्थं सब्यञ्जनं बम्हचरियंपकासेथ। इति।

वर्तमानसारनाथे भगवतो बुद्धस्य विशालं मन्दिरं, देवानां प्रियेण सम्राजा अशोकेन निर्मापितः स्तम्भः, अन्ये च अनेके स्तूपाः, विहाराः, मृगानामरण्यानि चेति वस्तूनि स्थानस्यास्य प्राचीनताम् ऐतिहासिकतां च प्रख्यापयन्ति। यदाहमध्ययनार्थं वाराणसीं समागतस्तत्कालादेव सारनाथे गमनागमनं प्रारब्धम्। परन्तु सारनाथं प्रति ममाकर्षणस्य मुख्यं कारणमासीत् विभिन्नदेशवासिनां बौद्धानामत्र आगमनं तथा तेषां भाषा-साहित्य-मन्दिर-मूर्ति-पूजा-धार्मिकसमारोहादीनां परिज्ञानं च। अनन्तरं तत्र उच्चतिब्बती-शिक्षासंस्थाने सञ्चालिते पालिभाषाग्रन्थानां बौद्धसंस्कृतग्रन्थानां, भोटभाषाग्रन्थानां च विशालसंग्रहं परिज्ञातुं पठितुं च यत् सौविध्यं प्राप्तं तदपि आकर्षणस्य एकं प्रधानं कारणमभूत्। एभिः कारणैः विश्वस्य बहुभ्यो देशेभ्यो बौद्धधर्मावलम्बिनः बौद्धसाहित्याध्येतारश्च सारनाथमागच्छन्ति। मया स्वपथं सारनाथगमनकाल एव तत्र चीन-जापान-कोरिया-मंगोलीया-बर्मा-थाई-श्रीलंका-तिब्बतप्रभृति-देशानां भूयांसः पर्यटकाः दृष्टिपथमागताः। मम च सौभाग्यवशात् छात्रावस्थात एव 'वसुधैव कुटुम्बकम्', 'भ्रातरो मनुजाः सर्वे, स्वदेशो भुवनत्रयम्', इत्यादयो भावा विचाराश्च हृदये सुदृढं स्थानमलभन्त। अतः सारनाथे बहूनां वैदेशिकबन्धूनां मिलनादिदं स्थानं मम परमप्रियं स्थानं जातम्, अद्यापि च तत् तथैव हृदि विराजते।

हरिद्वार—

अद्याप्यधः परिनिधाय हसन्तिके द्वे
धृत्वोपरि प्रबलतूलपटीं गरिष्ठाम्।
उष्णं पयश्च परिपीय सुखेन सुप्त्वा
नीतां निशामृषिकुलस्य न विस्मरामि॥ १०२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकदा छात्रावस्थायामहं दिल्लीतो हरिद्वारं गतवानासं तत्रत्यं सुप्रतिष्ठितं संस्कृतशिक्षासंस्थानम् ऋषिकुलं द्रष्टुं, तत्रत्यां शिक्षण-पद्धतिं च परिज्ञातुम्। धूमयानस्य विलम्बिततया अहं रात्रौ दशवादने ऋषिकुलं प्राप्तः। द्वारपालेन द्वारे उद्घाटिते अन्तः प्रविष्टोऽहं प्रधानाचार्यस्य सविधे एकेन ब्रह्मचारिणा स्वागमनस्य सूचनां प्रेषितवान्।

स शीतकालस्य समयः आसीत्। रात्रेः दशवादनवेला। वेगेन प्रवहमानः शीतलो वायुः शरीरे वस्त्रैरावृतेऽपि अन्तःप्रविश्य प्रबलं प्रहारं करोति स्म। स्टेशनस्थानात् ऋषिकुलपर्यन्तं तांगाद्वारा गमने शरीरं शैत्येन जडीभूतमिव जायमानमासीत्। तस्यामस्थायां यावदहमधीरतया प्राचार्यमहोदयं प्रतीक्षमाण आसम्, तावत् झटित्येव प्राचार्यमहोदयाः द्वे हसन्तिके (अगींठी) एकां गरिष्ठां तूलपटीं (रजाई) तथा उष्णं च सशर्करं पयो गृहीत्वा आगताः कथितवन्तश्च-''द्विवेदिमहोदयाः, रात्रौ एतावति काले एतदेव आतिथ्यं भवति अतिथीनाम्। क्षम्यताम्। प्रातः पुनः शोभना व्यवस्था भविष्यति। अहं कृतज्ञतापूर्वकं तत्सर्वं स्वीकृत्य तान् विसर्जितवान्। ततः परं तदुष्णं पयः पीत्वा, खट्वाया अधस्तात् हसन्तिके संस्थाप्य, उपरि च तूलपटीमाच्छाद्य शयने कृते तस्यां रात्रौ यथा मया प्रगाढतरा निद्राऽनुभूता यच्च सुखं लब्धं तत् स्मारं स्मारं सदैव अहम् ऋषिकुलं प्रति कृतज्ञतामावहामि।

अद्यापि शैलतटिनीप्रबलप्रवाहं
स्मृत्वैव तापसमयेऽपि बिभेति चेतः।
यस्यातिशीतलतरे द्रुतगामिनीरे
क्षेपेऽपि हन्त पदयोर्नियतो विनाशः॥ १०३॥

ऋषिकुले निवासकालस्यैव. इदं वृत्तं वर्तते। तत्र दिने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तापसमयेऽपि गङ्गाया जलं शीतलतरं भवति तथा अत्यन्तं द्रुतवेगेन वहति। तस्यामवस्थायां यदि कोऽपि जनः असावधानो भूत्वा पादनिक्षेपं करोति तदा तस्य प्रवाहो विनाशश्च अवश्यम्भावी एव। अहं तत्र एकस्य पादस्य अल्पमेवांशं जले निक्षिप्य तस्य शैत्यं वेगं च अनुभवामि स्म।

हरिद्वारप्रशस्तिः—

भव्याश्रमैः सुमठ-मन्दिर-तीर्थवृन्दैः
विद्यालयैः यति - मुनीश्वर - साधुसङ्घैः।
गुञ्जायमानमभितो हरिकीर्तनैश्च
द्वारं हरेरिव पुरं प्रतिभाति नित्यम्॥ १०४॥

उत्तरप्रदेशप्रशस्तिः—

श्रीरामकृष्ण - पदपङ्कज - रेणुपूतं
श्रीगाङ्ग - यामुन - पवित्र - जलाभिषिक्तम्।
संसेवितं बदरिकादिक - पुण्यतीर्थैः
सर्वप्रदेशगुरुमुत्तरमानतोऽहम् ॥ १०५॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ७ :

कश्मीर (जम्मू) प्रदेशीय-संस्मरणानि

कश्मीर—

अद्यापि विस्मरति नो हृदयं ममैनाम्
एतत्प्रदेशगत-निर्दयतां प्रकृत्याः।
यत्राखिलोऽपि मनुजोऽनिशमेव सी सी
सी सी करोत्यनिलकम्पितसर्वगात्रः॥ १॥

कश्मीरप्रदेशस्य सर्वथा रमणीयतमत्वेऽपि अस्य प्रकृत्या निर्दयतापि सर्वथा अवर्णनीयैवेति कथने न कापि अतिशयोक्तिर्भवति। यतस्तत्र सततप्रवहमानशीतल-तरवायुवेगाघातैराहंन्यमाना मनुजा सर्वदैव सी सी सी सी कुर्वाणा दरीदृश्यन्ते, युवानोऽपि शैत्यातिशयेन संकुचितकलेवरा वृक्षा इव विलोक्यन्ते। तदेतन्मया श्रीनगरे प्रदेशस्य प्रथमदिन एव सम्यगनुभूतं, कथं चात्र बहूनि दिनानि स्थित्वा प्रचारकार्यं विधास्यमीति मे महती चिन्ता समुत्पन्ना। अलङ्कारशीलम् अपह्नुतेरलङ्कारस्य एकं रोचकमुदाहरणं पठ्यतेऽस्माभिः।

सीत्कारं शिक्षयति, व्रणयत्यधरं, तनोति रोमाञ्चम्।
नागरिकः किं मिलितो, नहि नहि सखि हैमनः पवनः॥

(शार्ङ्गधरपद्धति-५२४)

अस्मिन् पद्ये लिखितानि सर्वाण्यपि हेमन्तपवनलक्षणानि काश्मीरिके पवनेऽपि सङ्घटन्ते। अत एवाहं कश्मीरनिवासकाले

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"नहि नहि सखि हैमनः पवनः" इति पाठस्य स्थाने "नहि सखि काश्मीरिकः पवनः" इति पाठं पठामि स्म।

श्रीनगर—

यत् श्रीयुतं पुरवरं च नदी वितस्ता
एते कदापि न हृदोऽपगमिष्यतो मे।
यद्दर्शनोत्सुक - मदीयमनस्यजस्त्रं
तत्प्रोच्छलत्स्तुतिगिरः स्मृतिमभ्युपेताः ॥ २ ॥

श्रीनगरगमनात् पूर्वं मया कल्हणविरचिता राजतरङ्गिणी अधीता आसीत्, यस्याः प्रथमतरङ्गे आदावेव कश्मीरप्रदेशस्य श्रीनगरस्य, वितस्तायाश्च मनोहरं वर्णनं विहितं वर्तते, यत् पठित्वा तत् सर्वमवलोकयितुं मनसि बलवदुत्सुकता जागर्ति स्म। परन्तु महामाहेश्वर-श्रीमदभिनवगुप्ताचार्यपादविरचितस्य तन्त्रालोकस्य सप्तत्रिंशत्तमे आह्निके एतत्त्रयस्यापि वर्णनप्रसङ्गे उपजाति-वसन्ततिलका-मन्दाक्रान्ता-शार्दूलविक्रीडित-प्रभृतिललितच्छन्दो-निबद्धेषु हृद्यतमरूपेषु पद्येषु यत् काव्यकलाकौशलमयं वर्णनं व्यधायि तदधीत्य तु तत्कालमेव मनो लालायितं भवति श्रीनगरं प्रति प्रस्थातुम्। मम श्रीनगरयात्राविनिश्चये जाते उपर्युक्तयोः द्वयोरपि ग्रन्थयोः तत्-सम्बन्धिनः प्रसङ्गा मन्मनसि मुहुर्मुहुः समुच्छलन्ति स्म तरङ्गा इव।

इदानीन्तु तेषां पद्यानां तान्त्रिकशिरोमणिभिः डॉ० परमहंसमिश्र "हंस" महोदयैर्विरचितं रोचकं रमणीयतमं च यदि भाषाभाष्यं पठ्येत तदा कश्मीरगमने एकक्षणस्यापि विलम्बो दुःसहो भविष्यति। विशेषतंश्च शिवभक्तानां तथा मदन-मद्य-मानिनी-मैरेय-मृद्वीकेति-पञ्चमकारानुरक्तानां जनानां कृते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

य: पण्डित: स्वदुहितुः शुभनाम्नि रूपा-
देव्या अचालयदनुत्तमशास्त्रपीठम्।
स्वीये पुरे च कृतवान् सुरगी:प्रचारम्
अद्यापि तं बुधवरं सततं स्मरामि॥ ३॥

पं० परमानन्दमहोदया: श्रीनगरनिवासिन: एके सुप्रतिष्ठिता विद्वांस:, महाराजहरिसिंहद्वारा सम्मानिता: सम्भ्रान्तनागरिकाश्च आसन्। एभि: बाल्यकाल एव मृताया: स्वकनिष्ठकन्याया रूपादेव्या नाम्ना एक: उच्चकन्याविद्यालय: संस्थापित:, तथा तत्र संस्कृतविषय: सर्वासामपि कन्यानां कृते अनिवार्य: कृत:। पण्डितमहोदयस्य इयं बलवती आकाङ्क्षा आसीत् यत् तस्य विद्यालयस्य सर्वा अपि हिन्दुमुस्लिमकन्या: संस्कृतविषये प्रवीणा: स्यु: तथा संस्कृतभाषणे च कुशला भवेयु:। एतदर्थमहं पण्डितमहोदयै: सादरं साग्रहं च समाहूत:। तै: एतदपि सोपालम्भमुक्तम्—"यदि वाराणस्या: पण्डिता अत्रागत्य संस्कृतं न प्रचारयिष्यन्ति तदा तदभावे अत्र सर्वेऽपि हिन्दवो मुस्लिमधर्मं स्वीकरिष्यन्ति इति। तेषामीदृशं वक्तव्यं पठित्वा आग्रहं च दृष्ट्वा अहं १२.६.६४ दिनाङ्के वाराणसीत: प्रस्थाय श्रीनगरं सम्प्राप्त:, तथा तत्र २३.७.६४ दिनाङ्कपर्यन्तं स्थित्वा विभिन्नस्थानेषु प्रचारं शिक्षणशिविराणां च संचालनं कृतवान्। इदं सर्वं कार्यं कर्तुं तथा तस्य प्रदेशस्य प्राकृतिकशोभाया अवलोकनस्य, तत्रत्यानां स्वादिष्ठफल-मूलादीनां भक्षणस्य, तत्स्थानवासिनां जनानां जीवनपद्धते: दर्शनस्य च यत् सौभाग्यं मया प्राप्तं तत् पण्डित-परमानन्दमहोदयानां प्रसादेनैवेति तेषां सदैव स्मरणं मे जायते।

पण्डितमहोदयानां विशालं भवनं श्रीनगरस्य सुरम्ये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'वसन्तबाग'—सम्भागे विराजते स्म। अत्रैव मया सर्वविध-सुखसौविध्यपूर्णानि दिनानि यापितानि।

अद्यापि शैलशिखरेषु नतोन्नतेषु
तिर्यक्स्थितेषु कुटिलेषु 'बसेन' गच्छन्।
यद् दृष्टवान् विकटगर्तमधो गभीरं
स्मृत्वैव तन्नु हृदयं बहु कम्पते मे॥ ४॥

अत्युन्नतेषु कुटिलेषु समासमेषु
सद्योनिपातभयदेषु सकण्टकेषु।
कश्मीरदुर्गमपथेषु निमील्य नेत्रे
गच्छन्निवाहमधुनापि भवामि भीतः॥ ५॥

अद्यापि केशरभुवस्त्रिदिवोपमाया
यात्राक्लमो न खलु गच्छति विस्मृतिं मे।
मार्गे शिलानिपतनेन यतोऽवरुद्धे
भूयस्यभूदशन - पान - निवास - बाधा॥ ६॥

श्रीनगरयात्रा मध्ये मध्ये प्रायेण विघ्नैर्बहुधा बाधिता भवति। अहमपि यदा बसयानेन पठानकोटतः जम्मूनगरं प्राप्तवान् तदा "कुत्रापि मध्येमार्गं काचिद् बृहती शिला पतिता" इति वृत्तं ज्ञात्वा बसचालकैः यात्रावरोधस्य सूचना दत्ता। ततो मया रात्रिद्वयी तत्रैव संस्कृतमहाविद्यालये यापिता। पुनस्तृतीयदिने यदा प्रातर्यात्रा आरब्धा तदा पुनरपि सायंकाले एकस्मिन् स्थाने यात्रावरोधो जातः। तत्र निवासस्यापि किञ्चित् सौविध्यं नासीत्। भोजनालयेषु सर्वत्र लशुन-पलाण्डु-कुक्कुटाण्ड-मांसप्रभृतीनां प्राचुर्यमासीत्। अतो भोजनं विनैव रात्रिरतिवाहिता। ततः पुनः प्रातरेव यात्रायां प्रारब्धायां मध्याह्नकाले अहं पण्डितपरमानन्दमहोदयानां यदा गृहं प्राप्तः तदा सर्वोऽपि मे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यात्राक्लमस्तेषां मधुरवचसा आतिथ्येन च व्यपगतः। कश्मीरेषु प्रायः ब्राह्मणानामपि गृहे मुस्लिमजना एव भृत्यकार्यं कुर्वन्ति। परन्तु मत्कृते तैरेकः पंजाबी भृत्यः नियुक्त आसीत्।

अद्याप्यहं प्रतिदिनं प्रथमं बहूष्णं
धृत्वा करस्थवसनोपरि चायपात्रम्।
फूं फूं विधाय लवणाञ्चितरोटिकाभि-
श्चायं ज्वलद् यदपिबं नहि विस्मृतं तत्॥ ७॥

चायपानस्य विधिस्तु प्रायः सर्वेष्वेव प्रदेशेषु समान एव दृश्यते, परं श्रीनगरे तस्य विधौ भिन्नता भवति। शैत्याधिक्यात् तत्र चायं बहु उष्णीकृतं भवति। तस्मात् चायपात्रं तत् अनावृते हस्ते न ग्रहीतुं शक्यते। अतः चायपात्रस्य अधस्तात् एकं स्थूलं लघुकर्पटं "रुमाल" सदृशं हस्ते स्थापयित्वैव चायपानं ग्रहीतुं शक्यते। चायं च अत्यन्तं तप्यमानं ज्वलच्च भवति। अतः फूं फूं कृत्वैव तत् शनैः शनैः अल्प-स्वल्पं च पीयमानं सुखकरं भवति। अन्यथा हस्तस्य मुखस्यापि ज्वलनस्य भीतिर्भवति। पुनश्च चायेन सह किञ्चित् लावणिकमपि अपेक्षितं भवति। तत्पूर्तये तत्र जीरक-लवणमिश्रिता लघुलघुरोटिका निर्मीयन्ते, या अत्यन्तं स्वादिष्ठा भवन्ति। चायपातारः ते एव द्वे द्वे गृहीत्वा ताभ्यां सह चायं पिबन्ति। इयं रीतिर्वर्तते श्रीनगरे चायपानस्य। सा च रीतिः मयापि अनुसृता, इदानीं च स्मर्यते वारं वारम्।

अद्यापि विप्रभवनेष्वपि मुस्लिमानां
दृष्ट्वा समस्तगृह्मकर्मसु किंकरत्वम्।
शिक्षालयेष्वपि च अत, तदिदं नु सद्वाऽ
सद्वेति भ्रामकमतिर्बहु बंभ्रमीति॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनगरनिवासकाले श्रीनगरे तथा अन्यत्रापि मया इदं दृष्टं यद् ब्राह्मणानामपि गृहेषु सर्वत्र मुस्लिमा एव भृत्यकार्यं कुर्वन्ति स्म। यतस्तत्र ब्राह्मणा मुस्लिमाश्चेति जातिद्वयी एव विद्यते। सिक्खा अपि सन्ति केचन परं ते सामान्यं भृत्यकार्यं न कुर्वन्ति। अतः विवशतया ब्राह्मणा अपि मुस्लिमजनैरेव भृत्यकार्यं कारयन्ति। एवं शिक्षालयेष्वपि सर्वेषु मुस्लिमा एव भृतका भवन्ति। त एव सर्वेषां कृते चायपान-भोजनादिव्यवस्थां कुर्वन्ति। मयापि तेषु तेषु स्थानेषु तैरेव दत्तं चायादिकं पीयते स्म, किञ्चिद् भोज्यवस्तु च भुज्यते स्म। तदिदं सर्वं दृष्ट्वा मम मनसि वारं वारमयं प्रश्नः समुदेति स्म, यत् मुस्लिमजनैः सह ब्राह्मणानामीदृशो व्यवहारः सम्बन्धश्च समुचितो वर्तते अनुचितो वा? अत्र मम मतिः प्रायेण बंभ्रमीति स्म एव सदा।

अद्यापि शैवमतदर्शन-तन्त्र-मन्त्र-
दीक्षादिसाधन - सुविश्रुत - सिद्धपीठम्।
कश्मीरमेत्य यदिदं विदितं समस्तं
सौभाग्यमेव मम तत् परमित्यवैमि॥ ९॥

मानवस्यायं चिरन्तनः स्वभावो वर्तते यत् स सर्वाणि सुखसाधनानि उपभुञ्जानोऽपि कदाचित् एकान्तक्षणेषु संसारस्य विषये इदं ज्ञातुमिच्छति यत्-कुतोऽयं संसारः समुत्पद्यते? कुत्र च विलीयते? किं वा निमित्तमेतस्य उत्पत्तिविनाशयोः? किं वा स्वरूपं तस्य निमित्तस्य? इत्यादि। मानवस्य इयं जिज्ञासा एव दर्शनशास्त्राणां प्रणयनस्य कारणं भवति। एतदनुसारमेव विभिन्नदेशनिवासिभिः जिज्ञासुभिश्चिन्तकैश्च स्वस्वचिन्तनानुसारं बहुविधानि दर्शनशास्त्राणि प्रणीतानि। तदनुसारमेव भारतेऽपि भेदोपभेदसहितानां षण्णामास्तिकदर्शनानां नास्तिकदर्शनानां च केषाञ्चित् निर्माणं समजायत।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इमानि दर्शनशास्त्राणि भारतस्य विभिन्नेषु प्रदेशेषु प्रणीतानि, व्याख्यातानि, ख्यातिमुपगतानि, प्रचारितानि च। परं दर्शनक्षेत्रे कश्मीरप्रदेशः खलु एकं विशिष्टमेव स्थानं भजते। अत्रैव शैवदर्शनस्य, तदाधारभूतानां तन्त्रशास्त्रग्रन्थानां विशालसाहित्यस्य निर्माणं जातम्। अस्य दर्शनस्य तथा तन्त्रसाहित्ये परमप्रमाणभूतस्य तन्त्रालोकग्रन्थस्य प्रणेतारः प्रत्यभिज्ञादर्शनस्य च उद्भावकाः परमाचार्याः अभिनव-गुप्तपादा अत्रैव जनिमलभन्त। साम्प्रतमपि प्रदेशेऽस्मिन् अनेके तन्त्रशास्त्रवेत्तारः, क्रियाकुशलाः साधकास्तथा लेखका व्याख्यातारश्च विराजन्ते इति श्रीनगरनिवासकाले मया परिज्ञातम्। अस्मिन् विषये कश्मीरनिवासिनः इदानीन्तनाः तन्त्रशास्त्रस्य विशिष्टा विद्वांसः श्रीबलजिन्नाथपण्डितमहोदया मम विशेषतः सहायका अभूवन्। श्रीनगरनिवासिनः तन्त्रशास्त्राणां सुविख्याता ज्ञातारः साधकाश्च श्रीलक्ष्मणजूमहाभागा अपि साक्षात्कृताः। राजकीयपुस्तकालये तन्त्रग्रन्थानामपि विशालः संग्रहो दृष्टः। कश्मीरयात्रया तत्रत्य-प्राकृतिक-सौन्दर्यदर्शनलाभातिरिक्तो योऽयं काश्मीरिक-शैवदर्शन-तन्त्रशास्त्रीय-ग्रन्थानामवलोकनस्य तथा तज्ज्ञैः सह साक्षात्कारस्य च यः सुदुर्लभो लाभो जातस्तमहमद्यापि स्वजीवनस्य महत् सौभाग्यमेव मन्ये।

अद्यापि हिन्दु - यवनी - महिलाजनानां
स्मृत्वाऽद्भुतानि वसनाभरणादिकानि।
चेतः प्रसीदतितरां, नहि यान्यदृष्ट्वा
यः कोऽपि तानि परिकल्पयितुं समर्थः॥ १०॥

अद्यापि केशरभुवो वनिता ललामाः,
सौन्दर्य-साधन-भरो, मधुरः समीरः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतत् त्रयं प्रवयसोऽपि करोति यूनो
यत्, तत् स्मृतं मम मनः कलुषीकरोति॥ ११ ॥
अद्यापि कञ्चुकवरानतिलम्बमानान्
अग्नीष्टिकामुरसि च ज्वलितां वहन्तः।
काश्मीरिका प्रबलशैत्यनिवारणाय
श्रीमण्डिता अपि विभान्ति विचित्ररूपाः॥ १२ ॥

कश्मीरेषु यदा प्रचण्डहिमपातो भवति तदा तत्रत्या जनाः शैत्यनिवारणाय अतीव लम्बमानान् कञ्चुकान् धारयन्ति तथा कञ्चुकाभ्यन्तरे एकमग्निपूर्णं पात्रमपि वक्षःस्थलस्य उपरि धारयन्ति येन हृदये उष्णता तिष्ठति। इदं रूपं तेषां सुन्दराणामपि किञ्चिद् विरूपमिव प्रतिभाति।

सम्मिल्य पञ्चदश - पण्डित - मौलवीनां
सम्भाषणं पठन - पाठन - पानकादिम्।
दृष्टं यदत्र खलु शिक्षणमन्दिरेषु
अद्यापि तन्मम मनो मुदितं करोति॥ १३ ॥

पूर्वं श्रीनगरे एकः संस्कृतविद्यालयः प्रचलति स्म। पश्चात् मुख्यमन्त्रिणा श्रीशेख अब्दुल्लामहोदयेन विद्यालयस्य स्थाने एकः ओरिएन्टलस्कूलनाम्ना अपरः विद्यालयः सञ्चालितः। अत्र संस्कृतस्य अरबी–फारसीभाषयोश्च पञ्च पञ्च अध्यापका अध्यापनं कुर्वन्ति स्म। संस्कृताध्यापकाः सर्वे ब्राह्मणा आसन्। अपरे च सर्वे मुस्लिमाः। अस्मिन् विद्यालये एकदा मम भाषणं जातम्। अन्यदाऽपि द्वित्रिवारं मया तत्र भाषणं कृतम्। तत्र इदं दृष्ट्वा मम महती प्रसन्नता भवति स्म, यत् सर्वेऽपि ब्राह्मणा मुस्लिमाश्च अध्यापकाः परस्परं परमसौहार्दभाजो मित्रवद् व्यवहरन्ति स्म तथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चायपानादिकं च सहैव कुर्वन्ति स्म। छात्राणामपि ईदृश एव सौहार्दमयो व्यवहारो मया दृष्टः।

अस्मिन् विद्यालये सर्वप्रथममहं ३.७.६४ दिनाङ्के गतवान् भाषणं च कृतवान्। मयापि च तत्र तैरेव सह चायपानादिकं विहितम्।

दृष्टोऽधुनापि मयकाऽखिलदेशवर्ती
काशीनिवासिविबुधान् प्रति भक्तिभावः।
यत् श्रीपुरे समवलोक्य वटुर्युवैको
मां स्वीचकार खलु मुण्डयितुं शिरः स्वम्॥ १४॥

मम श्रीनगरनिवासकाले एकस्य ब्राह्मणयुवकस्य यज्ञोपवीत-संस्कारः सम्पद्यमान आसीत्। स युवकः बी०ए० कक्षायाः छात्र आसीत्, सुसज्जितलम्बकेशश्च। अतः स मुण्डनं कारयितुं न समीहते स्म। कुटुम्बजनैः पण्डितैश्च आग्रहे कृतेऽपि स तन्नामन्यत। संयोगवशात् तस्मिन्नुत्सवे अहमपि आमन्त्रित आसम्। मयि तत्र गते तत्रत्याः पण्डिताः तं युवकं मां दर्शयित्वा कर्णे एवमबोधयन्—"भोः, यदि त्वं मुण्डनं न कारयसि तर्हि अस्माकं महती अप्रतिष्ठा भविष्यति। एते वाराणसीस्थाः पण्डिताः सन्ति। वाराणसीं गत्वा अस्माकमुपहासं करिष्यन्ति इति।" इदं श्रुत्वा मां च निरीक्ष्य युवकः काशीति शब्दं श्रुत्वा मुण्डनं कारितवान्।

कश्मीरिपण्डितजनाः श्रमसाध्यकार्ये
प्रायो रुचिं न दधते न च वाऽद्रियन्ते।
तस्मान्न तेऽत्र सुखिनो न च वा समृद्धा
अद्यापि तेन हृदयं मम खिद्यतीव॥ १५॥

कश्मीरनिवासिनः पण्डिता बहोः कालात् तत्र सर्वजनानां मान्याः पूज्या आदरभाजश्च आसन्। सर्वे जनास्तेषां सेवां कुर्वन्ति स्म। सर्वे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनास्तान् "महाराज, महाराज" इति सम्बोधनेन सम्मानयन्ति स्म। परन्तु स कालः सम्प्रति समाप्तिं गतः, पण्डितानां कृते विपरीतश्च समयः समागतः। तथापि ते अद्यापि श्रमं कर्तुं न समीहन्ते, प्रगतिपंथे च पश्चाद्वर्तिनस्तिष्ठन्ति इति कष्टस्य विषयः अस्ति।

अद्यापि केशरभुवो बहुमुस्लिमानां
दृष्ट्वा द्विजातिसदृशान् विविधानुपाधीन्।
धर्मे भविष्यविषयेऽपि च पण्डितानां
जातो मतिभ्रम इति प्रतिभाति सत्यम्॥ १६॥

कश्मीरेषु मुस्लिमशासकानामाक्रमणकाले बहवो ब्राह्मणा अपि हत्याभयात् मुस्लिमधर्मं स्वीकृतवन्तः परं तेषां जातीय उपाधिः दर, भट इत्यादिः। तदानीमपि तैः स्वमुस्लिमनाम्ना एव व्यवह्रियमाण-मासीत्, अस्ति च इदानीमपि, यद् आपणेषु विज्ञापनपट्टेषु दृश्यते। यथा—अब्दुलसमद भट, अब्दुलगनी भट इत्यादि।

एतेन इदं स्पष्टमेव प्रतीयते यदेते मुस्लिमाः पूर्वं ब्राह्मणा एव आसन्। पश्चात् बहवो मुस्लिमाः पुनरपि स्वं हिन्दुधर्मं स्वीकर्तुमुद्यता आसन्। परं पण्डितानां विरोधकारणात् ते पुनः हिन्दुधर्मे प्रवेष्टुं नाशक्नुवन्। धर्मशास्त्रानुसारं प्रायश्चित्तं कारयित्वा तेषां पुनर्ग्रहणं सर्वथा उचितमासीत्। अथ च भविष्यकाले जनिष्यमाणस्य हिन्दुविनाशस्यापि चिन्तनं कृत्वा ते हिन्दुसमाजे पुनः स्वीकरणीया आसन्। परन्तु पण्डितानां धर्मविषये मतिभ्रमात् दूरदर्शितायाश्च अभावात् हिन्दुसमाजस्य महान् ह्रासो जात इति प्रायेण सर्वेऽपि इदानीन्तना हिन्दुनेतारः पण्डितजनान् निन्दन्ति आक्षिपन्ति च। तदेतत् सर्वथा सत्यमेव प्रतिभाति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि मुस्लिमगृहेष्वपि सप्रमोदं
ये हिन्दुधर्मनियमाः प्रचलन्ति केचित्।
आकर्ण्य तानथ निरीक्ष्य च लज्जते मे
चेतो विचिन्त्य तदु धर्मविदां विवेकम्?॥ १७॥

कश्मीरेषु, विशेषतः श्रीनगरे, यत्र मया दृष्टं श्रुतं च, बहूनां मुस्लिमजनानामद्यापि भट्टप्रभृतयो ब्राह्मणानामुपाधयो व्यवह्रियन्ते, लिख्यन्ते च इति मया पूर्वमेव निवेदितम्। परन्तु इतोऽपि विस्मयकरं वृत्तमिदं वर्तते यद् बहुषु मुस्लिमपरिवारेषु कतिचन हिन्दूनामाचारा अपि परिपाल्यन्ते।

एकदा आचार्यहजारीप्रसादद्विवेदिमहोदया एकं विस्मयकरं वृत्तं श्रावितवन्तः। ते कश्मीरराज्ये हिन्दीप्रचारविषये वार्तां कर्तुं, कामपि नीतिं च निर्धारयितुं तदानीन्तनं मुख्यमन्त्रिणं श्रीगुलाम–मुहम्मद बक्सी महोदयं मिलितुं गताः। तैः सह श्रीधुलेकरमहोदया अपि अवर्तन्त। बक्सीमहोदयेन स्वकीयावासे एव तयोर्निवासस्य व्यवस्था विहिता। प्रातराशानन्तरं शनैः शनैः भोजनकालः समुपागतः। परं संयोगवशात् तद् दिनं शिवरात्रिव्रतस्य आसीत्। तथापि एताभ्यामतिथिभ्यां भोजननिषेधस्य सूचनाया अभावात् बक्सीमहोदयेन मध्याह्ने तयोर्भोजनस्य कृते सर्वाणि उपकरणानि सुसज्जीकृतानि। मुख्यमन्त्रिणां गृहे भोजनमासीत्। अतः भोजनप्रकाराणां रमणीशृङ्गाराणामिव कापि इयत्ता नासीत्। सेवक–परिवेषकरूपेण च स्वयं बक्सीमहोदयस्य समस्तः परिवारः सन्नद्धः अभवत्। अनन्तरं भोजनपात्रेषु भोज्यवस्तुषु च परिवेषितेषु यदा उभावपि विद्वांसौ भोजनार्थमुपविष्टौ तदा आचार्यद्विवेदिमहोदयेन बक्सीमहोदयः प्रार्थितः "कृपया भवन्तोऽपि आयान्तु, भोजने च सम्मिलिता भवन्तु इति।" तदा बक्सीमहोदयो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बद्धाञ्जलिर्भूत्वा सविनयं निवेदितवान्—"*आज शिवरात्रिव्रत है। अत: रात में औरतें कुछ पूजा करती हैं और उसके बाद ही हम लोग भोजन करते हैं।*" द्विवेदिमहोदया मां कथयन्ति स्म—"*द्विवेदीजी, बक्सीकी बात सुनकर तो हमारे होश ही उड़ गये। अब न खाते ही बनता था और न छोड़ते ही बनता था।*" इदं वृत्तं श्रुत्वा मम मनसि पण्डितसमाजं प्रति अयमेव आक्रोश: पुन: पुन: घूर्णते स्म यत् एतादृशानां परिवाराणां कृते कथं न हिन्दुसमाजे प्रवेशस्य व्यवस्था विहिता? अहमिदं हिन्दूसमाजस्य हिन्दूपण्डितसमाजस्य च महनीयामदूरदर्शितां मन्ये।

अद्याप्यसौ न समय: खलु विस्मृतो मे
अत्युग्र - शीत - पवनाहत - विग्रहस्य।
यस्मिन् तुषारपतनेन मही समग्रा
श्वेतोत्तरीयपरिधानवतीव भाति॥ १८॥

कश्मीरेषु प्रायेण काले काले तुषारपातो भवत्येव। तेन सर्वाऽपि भूमि: श्वेतिमानं परिधत्ते। भयंकरशैत्येन च समग्रं जनजीवनं सुतरामव्यवस्थितं, बाधितं, कष्टबहुलं च जायते। तन्मयापि तथैवानुभूतम्।

अद्यापि तानि कुतुकेन मुहु: स्मरामि
कश्मीरवासि - ललना - मुखमण्डलानि।
यासां प्रसन्नशरदिन्दुनिभाननेभ्यो
लावण्यपूरमिव भाति पुरं सदा तत्॥ १९॥

यत् कालिदासकविनाऽभिहितो घनोऽसौ
"त्वं वञ्चितोऽसि नयनै"रिति सोपहासम्।
मन्ये ततोऽप्यधिकमेव यथार्थमेतत्
कश्मीरभूमि - रमणी - सुषमा - प्रसङ्गे॥ २०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महाकविना कालिदासेन मेघदूते उज्जयिन्या वर्णन-प्रसङ्गे मेघं प्रति सहास्यमिदं कथितम्—यदि त्वं तत्रत्यानां पौराङ्गनानां लोलापाङ्गैर्न रमसे तर्हि लोचनैर्वञ्चितो भविष्यसि। परन्तु मम दृष्टौ इदं कश्मीरवासिमहिलानां प्रसङ्गे ततोऽप्यधिकं यथार्थं भवितुमर्हति इति मया अनुभूतम्।

अद्यापि ताः कृषिरता अतिरम्यरूपाः
कश्मीरवासिमहिलाः सततं स्मरामि।
या अप्सरोगण इवैत्य भुवं द्युलोकात्
सौन्दर्यराशिमिव भूमितले किरन्ति॥ २१॥

श्रीनगरसमीपवर्तिषु क्षेत्रेषु भ्रमणकाले मया बहुधा दृष्टम्—ग्रामवासिन्यः अतिशयरूपसौन्दर्यभाजश्च अनेका महिलाः क्षेत्रेषु लघुगर्तं निर्माय तत्रैव च स्वशिशून् शाययित्वा बीजवपनं कुर्वन्ति स्म। तदवलोक्य मम मनसि ईदृशो भावः समुदेति स्म—नूनमिमाः कश्मीरक्षेत्रेषु सौन्दर्यस्य बीजं वपन्ति इति।

अस्मिन् पुरे युवतयो बहुधा वितस्ता-
तीरे निधाय वसनानि निजानि नग्नाः।
यत् क्रीडनं विदधते स्म जले सहेलम्
अद्यापि मन्नयनयोस्तनुते ह्रियं तत्॥ २२॥

श्रीनगरनिवासकाले 'वंसन्तबाग' नाम्ना विख्यातस्य सम्भागस्य पण्डितपरमानन्दमहोदयानां यस्मिन् विशाले भवने मम निवास आसीत् तत्समीपे एव वितस्ता (झेलम) नदी प्रवहति स्म। तत्र स्नानं जलक्रीडां वा कर्तुं या मुस्लिममहिला आगच्छन्ति स्म ताः प्रायेण सर्वा अपि स्वकीयां शाटीं कञ्चुलिकां च तीरे निधाय नग्ना एव नदीं प्रविशन्ति स्म। एकदा प्रातःकाले सौधस्य उपरि तले स्थितोऽहं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकस्मादेव इदं नूतनं दृश्यं दृष्टवान्, लज्जया विमुखश्च अधस्ताद-वातरम्।

परन्तु इदं दृष्ट्वा मम अधिकमाश्चर्यं नाभूत्। यतो मया एतादृशदृश्यवर्णनपरं पद्यमेकं पूर्वत एव ज्ञातमासीत्। यथा—

तीरे तटिन्या वसनं निधाय पिधाय वक्षोजयुगं करेण।
दिक्षु प्रदिक्षु प्रविधाय दृष्टिं नारी नदीतीरमवाततार॥

अद्यापि केशरभुवः सततं स्मरामि
नौकागृहान् सकलसौख्यदवस्तुपूर्णान्।
येषु स्थितः सगृह एव जनोऽपरेषु
स्थानेष्वहो भवति सञ्चरितुं समर्थः॥ २३॥

कश्मीरेषु श्रीनगरे इदमेकं विस्मयकरं दृश्यं दृष्टिगोचरं भवति यत्तत्र वितस्ता (झेलम) नद्यां नौकासु वस्त्रमया गृहा निर्मिता भवन्ति। तत्र च गृहोपयोगीनि सर्वाण्यपि विविधानि पाकनिर्माण-भोजन-शयनासन-विविधासन्दिका-पर्यङ्कादीनि साधनानि परिकल्पितानि भवन्ति। एषु गृहेषु निवसन्तो जनाः स्वेच्छानुसारं सुखेन नौकां चालयित्वा यत्र तत्र गन्तुं शक्नुवन्ति, यत्र तत्र वा स्थातुं प्रभवन्ति। तेषां जीवने दैनिके कार्यकलापे वा किमपि असौविध्यं न जायते। इदमाश्चर्यजनकं दृश्यमद्यापि मम विस्मृतं न भवति।

अद्यापि तान् मृगवने वसतः सयूथं
स्मृत्वा परां मुदमुपैमि मृगान् मृगीश्च।
ये वक्तुमक्षमतमा अपि वक्तुकामा
भान्तीक्षितैरनिमिषैरिव लोकयन्तः॥ २४॥

भारतस्य अनेकेषु स्थानेषु पशुपक्षिणां सुरक्षायै तेषां वंशवृद्ध्यै च पशुविहार-पक्षिविहारनाम्ना अभयारण्यनाम्ना च बहूनामुद्यानानां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्माणं विहितमस्ति। तत्र मृगाणां निवासाय मृगविहारनम्ना यानि स्थानानि निर्मितानि सन्ति तानि विशेषरूपेण चित्ताकर्षकाणि भवन्ति। एतानि प्रायः सामान्यरूपेण सर्वेष्वपि प्रदेशेषु लभ्यन्ते परं कश्मीरेषु श्रीनगरात् केवलं २२ किलोमीटरदूरवर्ति दाचीगामनामकं मृगवनं यद् वर्तते तत् सर्वापेक्षया विशालं दर्शनीयं च मन्यते। तत्र कस्तूरीमृगा अपि यदा कदाचित् दृष्टिपथमायान्ति। एते मृगा मृग्यश्च यदा नवागतान् जनान् निर्निमेषं पश्यन्ति तदा किञ्चिद् वक्तुमिच्छन्तीति प्रतिभाति। तदवलोक्य च मनो मुह्यतीव।

अद्यापि तस्य डलझीलतटस्थितस्य
विद्यालयस्य विबुधान् सदयं स्मरामि।
येऽत्यल्पवेतनवशात् कृशवृत्तिभाजो
जीवन्ति हन्त डल - शीतलवारि - वातैः॥ २५॥

श्रीनगरे वर्तमानः डलझीलनामको महान् ह्रदः नितरां प्रसिद्धः, रमणीयतमः, नौकाविहारिणां कृते परमाह्लादकश्च। अस्यैव एकस्मिन् तटे स विद्यालयः आसीत् यत्र पूर्वं चर्चिताः पञ्चदश अध्यापकाः पाठयन्ति स्म। परं तेषां वेतनं नितरां न्यूनमासीदिति ते असन्तुष्टा, दुःखिताश्च तिष्ठन्ति स्म। अस्मिन् प्रसङ्गे यदा मया "भवद्भिः स्वल्पेन वेतनेन कथं निर्वाहो विधीयते इति पृष्टं तदा तैरुत्तरितम्— "*पण्डितजी, हमलोग डल की ठंढी हवा खाकर रहते हैं*"। इदं श्रुत्वा बहु दुःखं दया च समुत्पद्यते स्म।

अद्यापि संस्मरति मे सततं मनस्तत्
आचार्यशङ्करतपःपरिपूतशृङ्गम्।
यत्तुङ्गता न खलु भौतिकमुन्नतत्वं
साऽध्यात्मिकीमपि समुन्नततां व्यनक्ति॥ २६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भगवत्पादा आद्यशङ्कराचार्या वैदिकधर्मस्य पुनरुद्धारं प्रचारं च कुर्वाणाः कश्मीरप्रदेशे श्रीनगरस्य यस्मिन् पर्वतीयभागे स्थिताः। स एव भागः शङ्कराचार्यपहाडीनाम्ना विख्यातो जातः। तत्रैव एकः शङ्करमठोऽपि विद्यते यः भगवत्पादैरेव स्थापित इति प्रसिद्धिर्विद्यते। एतत्पर्वतस्य उच्चतमं शृङ्गमारुह्य सर्वोऽपि अधस्तनो भागो द्रष्टुं शक्यते श्रीनगरस्य समानरूपेण।

तां क्रान्तिवादि-महजूरकवेरपूर्वां
नो विस्मरामि ललितां कवितां कदाचित्।
छुम् छुम् पदानि बहुधा कथितानि यस्या-
मद्यापि मत्स्मृतिगतानि विमोहयन्ति॥ २७॥

कश्मीरीभाषायाम् "अस्ति" इत्यर्थे 'छुम्' इतिं क्रियापदस्य प्रयोगो विधीयते। गुलाम अहमद महजूर कवेरेकस्यां कवितायां छुम् इति पदस्य बहुधा प्रयोगो विहितो वर्तते। सा कविता, तादृशी अन्या वा काचित् कविता यदा मया श्रूयते स्म तदा मम अत्यन्तं मनोरञ्जनं जायते स्म, पुनः पुनश्च तां कवितां श्रोतुं उत्सुकता जागर्ति स्म। तस्याः कविताया एकमुदाहरणमत्र काव्यरसिकानां मनोरञ्जनाय दीयते—

सुबह छुम् बाग छुम् मस्ताना
दिल छुम् ताज यावुन छुम्।
बहारस दाद ह्योन छुम्
शौक शान गुलजार छावुन छुम्॥

भावार्थ— *मेरे उपवन में प्रातः का मधुर समय है, नव यौवन है, मस्त हृदय है। क्यों न बहारों में ही अपने को खो जाऊँ? शौक भरे जिया को गुलजार बनाना है।*

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि केशरभुवो रमणीयताया
नो विस्मराम्यतुलनीयमपूर्वरूपम्।
प्रत्यङ्कुरं प्रतिलतं प्रतिपल्लवं च
यत्राऽन्वहं नवनबेव विराजते श्रीः॥ २८॥

अद्यापि मत्स्मृतिगताः खलु ते प्रदेशा
ग्रामा वनान्युपवनानि च, यत्र नित्यम्।
"अंगूर - किसमिस - बदाम - फलानि खादन्
"चायं च विस्कुटयुतं" प्रपिबन्नगच्छम्॥ २९॥

अस्मिन् पद्ये स्पष्टबोधार्थं केचन आधुनिकशब्दाः प्रयुक्ताः।

अद्यापि केशरभुवं प्रकृतिप्रदत्तं
सौन्दर्यराशिमभितो दधतीं स्मरामि।
यत्र स्थितोऽहमधिकान् दिवसाननैषं
भूलोकनन्दनवनानि निरीक्षमाणः॥ ३०॥

श्रीनगरस्य समीपवर्तिषु स्थानेषु यानि चश्मा-शाही-निशातबाग-शालीमार - नसीमबाग - प्रभृतीनि मुगलमहीपतिभिर्निर्मितानि उद्यानानि वर्तन्ते तानि भूलोकस्य नन्दनवनान्येवेति सर्वेषां पर्यटकानां मतं वर्तते।

साक्षादवलोकनं विना तेषां रमणीयताया अनुभवो वा वर्णनं वा सर्वथा असम्भवमेवेति मया बहुधा तेषामवलोकनं कृतम्।

अद्यापि मन्त्रिवर-शेखमहोदयानां
नो विस्मृतानि मम भीषणभाषणानि।
आकर्ण्य मुस्लिमजनाः खलु यानि मत्ताः
'अल्लाह अकबर' इति स्म वदन्ति गर्वात्॥ ३१॥

श्रीनगरनिवासकाले श्रीशेखअब्दुल्लाहमहोदयानां भाषणं श्रोतुं मया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूयान् अवसरो लभ्यते स्म। ते भाषणात् पूर्वं कुरानस्य कांश्चित् मन्त्रान् तदनु कानिचित् प्रभावोत्पादकानि "शेर" पद्यानि पठन्ति स्म। तानि अत्यन्तं कोमलानि श्रुतिमनोहराणि च भवन्ति स्म। परं तदनन्तरं यानि राजनीतिसम्बन्धिभाषणानि भवन्ति स्म तानि नितान्तं परुषाणि उत्तेजकानि भयप्रदानि च जायन्ते स्म। पश्चात् तेषां भाषणं श्रुत्वा उत्तेजितैः मुस्लिमजनैः यदा "अल्लाहो अकबर" इति अत्युच्चस्वरेण अत्युग्ररूपेण च निनादः क्रियते स्म तदा तदाकर्णयतां हिन्दुजनानां सा एव स्थितिर्भवति स्म, या सिंहगर्जनं श्रुत्वा जम्बुकानां भवति। परन्तु तदानीं श्रीनगरे भारतीयसैनिकानां विपुला संख्या सदैव वसति स्म, येन हिन्दुजनता निर्भया भूत्वा सुखं शेते स्म सुखं च जागर्ति स्म।

कश्मीरवाससमये सकलेऽपि सौख्ये
लब्धेऽदसीयवचसोऽनवबोधहेतोः ।
यद् गीत-काव्य-रसपान-सुखं न लब्ध-
मद्यापि तन्मम मनो विकलीकरोति॥ ३२॥

भारतस्य अन्यासु प्रादेशिकीषु भाषासु मम यादृशी गतिर्वर्तते तादृशी अपि कश्मीरभाषायां नासीत्। तत्र निवासकालेऽपि केवलं प्रचारे शिक्षणे च अहोरात्रं संलग्नत्वात् मया कश्मीरभाषा न पठिता। केवलं तत्र निवासकारणात् कानिचिद् वाक्यान्येव ज्ञातानि। अत एव तत्रत्यानां गीत-कवितानां रसास्वादस्य सौभाग्यं मया न प्राप्तम्।

यद्यपि कश्मीरीभाषायां सन्ति अत्यधिकाः तद्भवशब्दाः तथापि तेषां रूपेषु तथा विकृतिर्जाता येन तेषामुच्चारणे कृते संस्कृतस्य तत्र गन्धोऽपि नायाति। कश्मीरप्रदेशस्य भाषायाः साहित्यस्य च परिज्ञानार्थं जिज्ञासुभिः निम्नलिखिता ग्रन्था अवलोकनीयाः—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१. कश्मीरशब्दामृतम् (कश्मीरभाषायाः संस्कृतभाषायां लिखितं प्राचीनं व्याकरणम्)

२. कश्मीरी भाषा और साहित्य ले० डा० रैना, प्र० सन्मार्ग प्रकाशन, दिल्ली–७, मूल्य–३०.००

३. कश्मीरी भाषा का भाषाशास्त्रीय अध्ययन प्रो० डॉ० त्रिलोकीनाथ गंजू प्र० वाणी प्रकाशन नई दिल्ली–२, मूल्य–२७५.००

नो केवलं भुवमिमां प्रकृतिप्रदत्तं
सौन्दर्यमेव जगति प्रथितां विधत्ते।
गंभीरचिन्तनमपि प्रतिशास्त्रमस्या
अद्यापि पण्डितजगत् चकितीकरोति॥ ३३॥

क्षेमेन्द्र - कल्हण - जगद्धर - वामनानां
रत्नाकराऽभिनव - कैय्यट - मम्मटानाम्।
कीर्त्या गुणाढ्य - शिवदर्शनतान्त्रिकाणा-
मद्यापि कुन्दधवलां धरणीं स्मरामि॥ ३४॥

अद्यापि तस्य 'डलझील' महाह्रदस्याऽ-
पूर्वं स्वरूपमथ तत्सुषमाप्यपूर्वा।
नौकाविहारजनितं सुखमप्यपूर्वं
तच्चाखिलं नयनयोर्मम नृत्यतीव॥ ३५॥

श्रीनगरे शोभायमानः "डलझील" नामको महान् ह्रदो न केवलं भारतस्य प्रत्युत विश्वस्यापि दर्शनीयवस्तुषु एकमतुलनीयं स्थानं बिभर्ति। अस्य विपुलो विस्तारः, विमलं जलम्, तटे तटे विराजमाना तरुलताराजिः, ह्रदे सुसज्जितानां नौकानामनेकाः पङ्क्तयः, जले प्रतिविम्बितानां प्राकृतिकदृश्यानां छटाश्चेति सर्वमपि दृश्यं दर्शकानां कृते नितान्तं नयनाभिरामं हृदयाकर्षकम् अविस्मरणीयं च भवति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि तद्दिनमहं सततं स्मरामि
यस्मिन् मुहम्मदमहोदय - केश - लोपात्।
आसीत् समग्रनगरेऽखिलमुस्लिमानां
शोकाश्रुपूरितदृशां भृशमार्तनादः ॥ ३६ ॥

एकस्मिन् दिने श्रीनगरे अयं प्रवादो महता वेगेन प्रसृतो जातो यत् मोहम्मद-साहबस्य केशाः केनापि चौरेण एकस्मात् मस्जिदात् चोरिता इति। इदं वृत्तं श्रुत्वा मुस्लिमसमाजे सर्वत्र विस्मयकरं शोकमयं वातावरणमजायत। तस्यैव वर्णनमस्मिन् पद्यद्वये वर्तते।

केचित् कपोलदलदत्तकरा अभूवन्
केचिच्च जानुयुगलम्बितमस्तकाश्च।
केचिद् रुदन्त इतरेऽतितरां श्वसन्त-
स्तेऽद्यापि मे खलु तथैव दृशोर्विभान्ति॥ ३७॥

इदं दृश्यं मम कृते सर्वथा अभूतपूर्वम्, अश्रुतपूर्वम्, अदृष्टपूर्वं च आसीत्। परन्तु इदं चौर्यं केनापि मुस्लिमजनेनैव मस्जिदे प्रविश्य कृतमिति प्रचारहेतोः हिन्दुजना निर्भया निश्चिन्ताश्च आसन्। मयाऽपि श्रीनगरं परितो निर्भयं भ्रमता साश्चर्यमिदं दृश्यमवलोकितम्।

अद्यापि विस्मरति नो हृदयं मदीयं
कश्मीरदृश्यमखिलं नयनाभिरामम्।
यत्रागता नृपतयो यतयो बुधा वा
तद्दृश्यदर्शनसुखस्मरणं जहुर्नो॥ ३८॥

कश्मीरेषु गिरि-शिखर-निर्झर-जलप्रपात-नदी-नद-सरोवर-द्रुम-पुष्प-लताप्रभृतीनि बहूनि अवर्णनीयानि प्राकृतिकानि दृश्यानि वर्तन्त एव परं मानवनिर्मितानि तथा अकबर-शाहजहाँ-जहाँगीर-दाराशिकोहप्रभृतिभिर्मुस्लिमशासकैर्निर्मापितानि निशातबाग,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नसीमबाग - चश्मशाही - शालीमार - प्रभृतीनि उद्यानान्यपि सौन्दर्यदृष्ट्या अद्भुतानि अत्यन्तरमणीयानि अविस्मरणीयानि च वर्तन्ते। अत्रागत्य न केवलं रसिका जनाः नृपतयः कवयो वा मुग्धा भवन्ति प्रत्युत यतयोऽपि विशुद्धमतयः आकृष्टचेतसो जायन्ते। भगवत्पादा आद्यशङ्कराचार्या अपि अत्रागत्य एकस्य पर्वतस्य शिखरे एकं देवालयं तथा स्वकीयं मठं च स्थापितवन्तो यत् श्रीनगरस्य सर्वतोऽधिकं गौरवास्पदं दर्शनीयं च स्थानं विद्यते।

अद्यापि वाञ्छति मनः पुनरेव गन्तुं
तत् पाम्पुरं प्रथितकेशरज़न्मभूमिम्।
यत्र स्थातुमेव न च यातुमहो नु शक्ताः
आगत्य यत्र रसिकाः पुरुषा रमण्यः॥ ३९॥

कश्मीरेषु पाम्पुर-नामकं स्थानं श्रीनगरजम्मूमार्गमध्यवर्ति वर्तते। अत्रैव सर्वप्रथमं केशरस्य कृषेरारम्भः समजायत। इदानीन्तु तस्य क्षेत्रस्य नवयुगानुरूपं नूतनैर्विविधैः साधनैः समधिकं विकासो जातः। केशरकेदारेषु च अभिनवा शोभा समवर्द्धत इति बहवो यात्रिणस्तत्र समायान्ति तत्रत्यां नयनाभिरामामपूर्वां च छविं दृष्ट्वा मुग्धमानसा जायन्ते। अतस्ते तद् दृश्यं त्यक्त्वा झटिति न गन्तुं पारयन्ति न वा निवासप्रबन्धाभावात् तत्र चिरं स्थातुमेव शक्नुवन्ति।

नामानि सन्ति विरलानि यथार्थवन्ति
नामास्य किन्तु नगरस्य यथार्थमेव।
नामानुरूपमभिलक्ष्य गुणप्रकर्ष-
मद्यापि मन्मनसि तत्प्रमुदं विधत्ते॥ ४०॥

श्रीनगरमिति नाम श्रीमण्डिततया यथार्थमित्यर्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कश्मीरयात्रि - जनमानस - मोहनानाम्
अत्युन्नतामित - चिनार - महीरुहाणाम्।
या दीर्घपंक्तिरतिरम्यतरा व्यलोकि
अद्यापि सा मनसि मे खचितेव भाति॥ ४१॥

कश्मीरप्रदेशेषु विशेषतः श्रीनगरे तत्पार्श्वदेशे च चिनारवृक्षाणां समधिकं बाहुल्यं दृश्यते। इमे वृक्षा अत्यन्तम् उन्नताः दर्शनीयाः शोभाधायकाश्च भवन्ति। एतेषां सौन्दर्येण आकृष्टचेताः सम्राट् अकबरः श्रीनगरे द्वादशशतचिनारवृक्षान् रोपयामास। चिनारवृक्षाणां मार्गेषु उद्यानेषु च पंक्तिबद्धानां सौहार्देन सम्मिल्य स्थितानामिव अपूर्वा शोभा न लेखपठनेन अपितु साक्षाद् दर्शनेनैव अवगन्तुं शक्यते। सर्वे यात्रिणो निर्निमेषरूपेण तान् अवलोकयन्ति भृशं च आनन्दमनुभवन्ति।

सम्पूर्णभारतभुवोऽधिकमुन्नतत्वं
शैत्यं श्रियं च नितरामधिकं वहन्ती।
"सर्वत्र वर्ज्यमति" इत्युदितां सुधीना-
मद्यापि केशरमही मनुते न नीतिम्॥ ४२॥

उन्नतत्वे, शैत्ये, प्राकृतिकशोभायां च सर्वत्र सर्वप्रदेशातिशायितां संवहन्ती कश्मीरभूमिः 'अति सर्वत्र वर्जयेत्' इति नीतिवचनं न समादृश्यते अपितु चिरादुल्लंघयन्तीव प्रतिभातीति भावः।

श्रीकर्णसिंह - युवराजमहोदयानां
वृद्धं सदा सहृदयं सचिवं स्मरामि।
अद्यापि यस्य मृदुहृद्य-'नमः पुरस्ता'-
दित्यादि भव्यवचनं मुदमादधाति॥ ४३॥

श्रीनगरनिवाससमये १०.७.६४ दिनाङ्के मया महाराजैः डॉ०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकर्णसिंहमहोदयैः सह मिलनस्य शुभावसरः प्राप्तः। यदाहं यानादवतीर्य महाराजस्य प्रकोष्ठाभिमुखं प्रस्थितस्तदा मम स्वागतार्थं तत्र अलिन्दे स्थितेन एकेन वृद्धसचिवेन "नमः पुरस्तादथ पृष्ठतस्ते, नमोऽस्तु ते सर्वत एव सर्व" इति गीताश्लोकांशं सस्मितवदनेन कथयता मम स्वागतं कृतम्। इदमेतादृशं स्वागतवचनं श्रुत्वा मम महती प्रसन्नता महांश्च विस्मयो जातः। यत एतादृशं स्वागतवचनमहं ततः पूर्वं कुत्रापि न श्रुतवानासम्। अतस्तत् स्मृत्वाऽहं सर्वदैव महान्तं प्रमोदमनुभवामि।

अनन्तरं यदाऽहं महाराजसमीपं प्राप्तस्तदा तैरादौ बहवो वेदोपनिषदां मन्त्राः श्राविताः। अनन्तरं जलपानादिव्यवस्था जाता। मम कश्मीरयात्राया अयं सर्वथा अभूतपूर्वः सदा संस्मरणीयश्च प्रसंग आसीत्।

सर्वं दिनं सुखमयं समवेक्ष्य दृश्यं
वीतां दशां निशि विचिन्ततयोऽतिशोच्याम्।
या वेदना मनसि मे भवति स्म तीव्रा
साऽद्यापि याति नहि, वर्धत एव नित्यम्॥ ४४॥

तथा हि—

ध्वंसाः कृताः कति, हताः कति हिन्दवो वा
प्रज्वालितानि कति पुस्तकपत्रकाणि।
धर्मोऽथ हन्त कियतां परिवर्तितो वा
दुष्कृत्यमेतदखिलं वचसामगम्यम्॥ ४५॥

कश्मीरेषु अतीतकाले १३३९ तमखृष्टाब्दादारभ्य चतुःपञ्च-शतवर्षपर्यन्तं हिन्दुजनताया ब्राह्मणानां च उपरि इस्लाम-धर्मावलम्बिभिः शासकैः यथा भीषणा अत्याचाराः कृताः, असंख्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनानां वधाः कृताः, मन्दिराणां मठानाञ्च विध्वंसः कृतः, पुस्तकानि तृणवत् प्रज्वालितानि तथा सामूहिकरूपेण हिन्दूनां धर्मपरिवर्तनं कृतं तत्सर्वमपि इतिहासे प्रसिद्धं वर्तते। इदानीमपि च तस्य पुनरावृत्तिर्जायमाना दृश्यते एव। एतदेव सर्वं पुरातनमितिवृत्तं चिन्तयतो रात्रौ मम निद्रा नागच्छति स्म।

कश्मीरेषु मुस्लिमशासकैः कृतानामाक्रमणानां विषये विशेषपरिज्ञानाय निम्नलिखिता ग्रन्था अवलोकनीयाः। यद्यपि जैनुलआबदीनप्रभृतयः केचन हिन्दुहितचिन्तका अपि आसन् परं तादृशानां संख्या नितान्तमल्पीयसी आसीत्।

१–राजतरङ्गिणी (जोनराजकृत). सम्पादक–डॉ० रघुनाथ सिंह प्रकाशक।

२–Hindu Temples-What Happened to them Vol. 2nd by Sita Ram Goel, Pub-Voies of India New Delhi-price-150.00

३–धर्म के नाम पर, लेखक–गीतेश शर्मा प्रकाशक–समायोजन ११वीं, जवाहर लाल नेहरु रोड, कलकत्ता–१ मूल्य–१५०.००

कश्मीरविषयक–समग्रवृत्तपरिज्ञानाय जिज्ञासुभिः निम्नाङ्किता ग्रन्था अवलोकनीयाः—

प्राचीनेतिहासविषये—

१–राजतरङ्गिणी (कल्हण विरचिता)

२–राजतरङ्गिणी (जोनराजविरचिता) डॉ० रघुनाथ सिंहेन विशिष्टभूमिकापरिशिष्टादिना सह प्रकाशिता। पण्डितजनैश्च अवश्यं पठनीया।

३–Cultural Heritage of Kashmir by Suresh chandra Banerji, Pub-Hari Pada Bhattacharya. Sanskrit Pustak Bhandar-38, Bidhan Sarani Calcutta-6, Price-12/-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जम्मू—

कश्मीरभूमि - गमनागमन - प्रसङ्गे
जम्मूपुरे निवसतिं सुखदां स्मरामि।
अद्यापि देवभवनैः सह यत्र दैवी
भाषाऽपि राजतितरां सुसमेधमाना॥ ४६॥

अहं कश्मीरगमनकाले १४-१५.६.६४ दिनाङ्कयोः तथा आगमनकाले २०-२५.७.६४ दिनाङ्केषु जम्मूनगरे स्थितवान् आसम्। अत्र श्रीरघुनाथसंस्कृतमहाविद्यालये मम निवासः आसीत् तथा एतन्महाविद्यालयस्य प्रधानाचार्याणां पण्डितश्रीजयरामशर्म्मणां गृहे भोजनपानादिव्यवस्था आसीत्। पण्डितमहोदयानां धर्मपत्नी भ्रमणाधिक्यजनितेन आयासेन अस्वस्थतां गतस्य मम कृते स्वास्थ्यकर-भोजनपान-प्रदाने सदा सावधाना तिष्ठति स्मेति मया तत्र परमं स्वास्थ्यं सुखं च सम्प्राप्तम्।

जम्मूनगरं मन्दिराणां बाहुल्येन इदं मन्दिराणां नगरम् इत्युच्यते। वस्तुतः दूरादेव मन्दिराणां बहूनि शिखराणि दृष्ट्वा कोऽपि नूतनो यात्री तन्नगरं मन्दिरनगरमेव अवगच्छति। अत्र च यः श्रीरघुनाथसंस्कृत-महाविद्यालयो वर्तते सोऽपि जम्मूकश्मीरप्रदेशस्य सर्वाधिकगौरव-शाली, सर्वसाधनसम्पन्नः, महति परिसरे स्थितः, स्वस्वशास्त्रेषु निष्णातैः पण्डितैर्मण्डितः, संस्कृतशिक्षाया एकं सर्वप्रधानं केन्द्रं वर्तते। एवं च अत्र देवानां देवभाषायाश्च समानरूपेण शोभना स्थितिरिति वक्तुं शक्यते।

अस्याश्च शोभनायाः स्थितेः प्रधानं कारणमिदं वर्तते यदत्रत्याः सर्वाः धर्मसंस्थाः संस्कृतशिक्षणसंस्थाश्च युवराज डॉ० श्रीकर्णसिंह-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महोदयानां कृपादृष्टेः भाजनीभूताः सन्ति। तैरेव संस्थापितेन धर्मनिधिना इमाः सर्वाः संचाल्यन्ते।

डॉ० कर्णसिंहमहोदयाः सुप्रसिद्धाः संस्कृतभाषायाः भारतीय-संस्कृतेश्च संरक्षकाः सन्ति। श्रीनगरे यदा तेषां साक्षात्कारो जातस्तदा तैः मां प्रति कथितं यन्मया वर्षे षड्मासपर्यन्तं वाराणस्यां स्थातव्यं तथा तावदेव जम्मू-कश्मीरप्रदेशे स्थातव्यम्। तदा अत्र संस्कृतस्य प्रचारो भविष्यति। परन्तु मया तेषां वचनं भ्रमणकारणात् पूरयितुं न पारितम्।

जम्मूनिवाससमये सततं श्रुता या
आलाप-गीत-कविताः खलु डोंगराणाम्।
अद्यापि ताः स्मृतिगताः सरसत्वमेषां
शौर्यं तथैव युगपज्जनयन्ति चित्ते॥ ४७॥

जम्मूनगरे एका डोंगरीसाहित्यपरिषद् वर्तते यस्यां साहित्य-सङ्गीत-नाट्यसम्बन्धिनः अनेके कार्यक्रमाः तथा भाषणानाञ्च आयोजनानि प्रचलन्ति। जम्मूनिवासकाले २०.७.६४ दिनाङ्के मम भाषणस्य कार्यक्रमः आसीत्। तस्मिन्नेवावसरे डोंगरीभाषायाः कवितानां गीतानाञ्च रसास्वादस्य मया आनन्दो लब्धः। तत्रैव मया इदमप्यनुमितं यत् पंजाबीभाषायामिव डोंगरीभाषायामपि सरसतायाः वीरतायाश्च सुमधुरः सम्बन्धो विद्यमानो वर्तते, उभयोश्च सममेव रसप्रवाहः प्रवर्तते।

एतन्नगरनिवासिषु विद्वत्सु श्रपिण्डित-जयराम-शास्त्रिणः (संस्कृत - महाविद्यालय - प्राचार्याः) श्रीपूर्णचन्द्रशास्त्रिणः (ज्योतिषाचार्याः) श्रीकाकारामशास्त्रिणः (अनुसन्धानकर्तारः) श्री पं० रामनाथशास्त्रिणः (हिन्दी-डोंगरी-लेखकः) श्री पं० शुकदेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शास्त्रिणः (द्विगर्तस्तुतिलेखकाः) इत्येवं विद्वांसो मम प्रचारकार्ये प्रभूतं सहयोगं दत्तवन्तः सौहार्देन सह।

कश्मीरप्रशस्तिः —

सत्काव्यलेखनकलानिलयः कवीनां
भूमिस्तपस्विजन - संयम - साधनायाः ।
शृङ्गारगेहमिव चित्रमयं प्रकृत्याः
कश्मीरभूमिरपरैव कृतिर्विधातुः ॥ ४८ ॥

सैषाऽधुना विधिवशान्निजनेतृदोषात्
मुस्लिमजनैरधिकृता बहुधर्षिता च।
भूयोऽपि भारतजनप्रबलप्रयत्नैः
श्रीमण्डिता भवतु इत्यनिशं समीहे ॥ ४९ ॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ८ :

गुर्जरप्रदेशीयानि संस्मरणानि

पारडी—

अद्यापि सुप्रथित-सातवलेकराणां
श्रीपादनामविदुषां स्मरणं करोमि।
देशेऽभवन् सरलसंस्कृत-वेदविद्या-
सद्धर्म-संस्कृत-समर्पितजीवना ये॥ १॥

गुर्जरप्रदेशे सूरतमण्डलान्तर्गतमेकं "पारडी"-नामकं स्थानं वर्तते यत्र वेदमूर्तिभिर्महर्षितुल्यैः श्रीपाददामोदरसातवलेकर-महोदयैः स्वाध्यायमण्डलनाम्नी संस्था संस्थापिता तथा मासिक-पत्राणां प्रकाशनेन, संस्कृतपरीक्षाणां सञ्चालनेन, धर्म-संस्कृति-सम्बन्धिनां ग्रन्थानां तथा मूल-सटीक-सानुवाद-सभाष्य-वेदग्रन्थानां प्रकाशनेन च संस्कृतभाषायाः भारतीयसंस्कृतेः वैदिकसाहित्यस्य च महती सेवा विहिता। ऋषिकल्पानामेषां तपस्विनां पुण्याश्रमे निवासस्य यो मयाऽवसरो लब्धस्तदहमात्मनः परमं सौभाग्यं मन्ये। अत्राहं २९.११.५९ दिनाङ्के सम्प्राप्तः।

तं वेदवाङ्मय - समुद्धरणैकनिष्ठं
नित्यं स्मरामि बुध-सातवलेकराख्यम्।
तेजस्विनी च मधुरा च यदीयमूर्ति-
रद्यापि तिष्ठति ममात्मनि देवतेव॥ २॥

परं सर्वापेक्षया यत्तेषामविस्मरणीयं चित्ताकर्षकं वस्तु आसीत् तदभूत् तेषां गौरवर्णं दिव्यं स्वरूपम्, पीयूषवर्षिणी मधुरा वाणी तथा तेजोमयी दृष्टिः। ते समागतानामतिथीनामपि स्वयमेव भोजनपान-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिवेषणादिना सत्कारं कुर्वन्ति स्म। तदेतत् सर्वमपि स्मारं स्मारमहमद्यापि भावविह्वलो भवामि।

अद्यापि विस्मरति मे हृदयं न बद्री-
नाथं बुधं सहृदयप्रवरं सुधीन्द्रम्।
यत्स्नेहलाभवशतो मम गुर्जरीया
यात्राऽखिलापि सुखशान्तिमयी प्रजाता॥ ३॥

दक्षिणभारतयात्रां समाप्य बम्बईनगरे च कञ्चित् कालं स्थित्वा अहं गुर्जरप्रदेशं गन्तुमना अभूवम्। तत्रापि विद्याक्षेत्रे बड़ौदानगरस्य ख्यातिं श्रुत्वा पूर्वं तत्रैव गन्तुं स्थातुं च निश्चयो विहितः। परं तत्र गत्वा कुत्र स्थातव्यमिति चिन्ता जाता। सौभाग्यवशात् बड़ौदा-निवासिनः सुविख्याता विद्वांसः कविशिरोमणयश्च श्रीबदरीनाथशास्त्रि-महोदयास्तदानीं बम्बईनगरे एव विराजमाना आसन्। निवेदने कृते एते बड़ौदानगरे स्वपरिवारे एव मम निवासार्थं व्यवस्थां कृतवन्तस्तथा सर्वविधसुखसौविध्यप्रदानार्थं स्वपरिवारजनान् प्रति एकं पत्रं लिखितवन्तः। तेन मम महत् सौविध्यं जातं, बड़ौदानगरे च सर्वं कार्यं सम्पादयितुं मया महदवलम्बनं प्राप्तम्।

बड़ौदा—

आदाय पत्रमथ शास्त्रिमहोदयानां
गेहे मयाऽतिसुखदे विहिते निवासे।
यः गुर्जरीय - नव - भोजनपान - लाभो
जातः स लोभयति मामधुनापि भूयः॥ ४॥

शास्त्रिमहोदयानां पत्रं गृहीत्वाऽपि अहं प्रथमं पारडीग्रामे एव वासमकार्षमिति मया पूर्वश्लोके निवेदितम्। अनन्तरमहं यदा बड़ौदानगरं प्राप्तस्तदा रिक्सायानेन शास्त्रिमहोदयानां गृहं गतवान्, तेषां कुटुम्बिभ्यश्च शास्त्रिमहोदयप्रदत्तं पत्रं दत्तवान्। पत्रं दृष्ट्वा ते सर्वे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मां नमस्कृत्य बहुसमादरपूर्वकं भवनाभ्यन्तरे नीतवन्तः, मधुरैर्वचोभिः, कुशलमङ्गलप्रश्नेन, किञ्चित्सुमधुरभोज्यपेयादिना च मां सुतरां संतर्प्य विश्रामाय ततःकिञ्चिदवसरं सुखासनञ्चैकं दत्तवन्तः।

अस्मिन्नेव भवने मया सर्वप्रथमं गुर्जरप्रदेशीयानां नानाविधानां भोज्यपदार्थानां परिचयस्तेषामास्वादश्च समुपलब्धः। अत्र च शयनार्थं मया यादृशी स्थूला सुकोमला मसृणा सुखप्रदा च गर्दिका लब्धा। तादृशी पुनः कुत्रापि अन्यत्र न लब्धा।

अद्यापि गुर्जरमहीभ्रमणे तदीयां
भाषासमृद्धिमधिकां समुदं स्मरामि।
यत्रेक्ष्यते प्रकृतिसम्भव-देवभाषाऽ-
पभ्रंश-गुर्जरगिरां विपुलः प्रवाहः ॥ ५ ॥

गुर्जरप्रदेशस्य प्रादेशिकी भाषा गुजराती वर्तते। अतस्तस्याः तत्र प्राधान्यं विकासः प्रचारश्चापि स्वाभाविक एव। परं तया सह तत्र संस्कृतभाषायाः प्राकृतभाषायाश्च पठन-पाठनयोः, शोधस्य, ग्रन्थ-प्रकाशनस्य च श्लाघनीया व्यवस्था वर्तते। एतदतिरिक्तं नगरे अन्या अपि अनेकाः संस्कृतप्राकृतसंस्थाः प्रचलन्ति। अपभ्रंशसाहित्यस्यापि अत्र विपुलं प्रकाशनं भवति।

मध्यप्रदेशीय-जबलपुरस्य दिगम्बरजैनमहाविद्यालये तथा राजस्थाने ब्यावरनगरस्य दिगम्बरजैनमहाविद्यालये स्वपितृपादैः सह निवसता पठता च मया प्राकृतभाषायाः तत्साहित्यस्य च पर्याप्तः परिचयः प्राप्त आसीत् परन्तु अपभ्रंशभाषायाः तत्साहित्यस्य च परिचयाय मया अत्रैव सुयोगः सौविध्यं च सम्प्राप्तम्।

एवं चात्र संस्कृतम्, प्राकृतम्, अपभ्रंशः, प्राचीनगुजराती, नवीनगुजराती चेति विविधभाषाणां परिज्ञानाय प्रचुरसामग्रीं दृष्ट्वा बहुभाषाप्रियं मे मनः समधिकं प्रमोदमनुभवति स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि गुर्जरजनेषु बहु प्रसिद्धं
शब्दद्वयं हृदयहारि परं मनोज्ञम्।
भाई च बेन च इति प्रथमं श्रुतं यत्
तत् सर्वदैव मम मोहयतीव चित्तम्॥ ६॥

गुर्जरप्रदेशे प्रायः सर्वेषां पुरुषाणां नामभिः सह 'भाई' इति तथा च सर्वासां स्त्रीणां नाम्ना सह बेन (बहन) इति शब्दः प्रयुज्यते। तदेतत् शब्दद्वयं श्रुत्वा मम मनो नितरां मोमुह्यते स्म। अन्य प्रदेशेष्वपि यदा कदा जनाः भाई, भाईजी, बहनजी इति वदन्ति परं गुर्जरेषु अनयोः शब्दयोः भाषणे लेखने च यथा व्यापको व्यवहारो दृश्यते न तथा कुत्रापि अन्यत्र। तदेतत् गुर्जरप्रदेशस्य महत्त्वपूर्णं सांस्कृतिकं वैशिष्ट्यं वर्तते।

अद्यापि गुर्जरमही - महिलाजनानां
नित्यं स्मराम्यतिशयं मधुरप्रियत्वम्।
शाकादि-लावणिकवस्तुचयेऽपि नित्यं
याः शर्करामथ गुडं च बहु क्षिपन्ति॥ ७॥

गुर्जरप्रदेशस्य आहारे इदमेकं विचित्रं वैशिष्ट्यं वर्तते यत् तत्र शाकसूपादिषु लावणिकवस्तुष्वपि शर्करा वा गुडं वा पर्याप्तं दीयते। नूतनजनानां कृते इदमत्यन्तं विस्मयकरम्, अस्वादु, अप्रियं च भवति। ईदृशं भोजनं मया सर्वप्रथमं बड़ौदानगरे पण्डितप्रवर-श्रीबदरीनाथमहोदयानां गृहे विहितम्। परं पश्चात् ममापि तत् प्रियं जातम्।

अद्यापि सावरमतीतट-संस्थितं तत्
गान्ध्याश्रमं सकलभारतभूमितीर्थम्।
नित्यं स्मरामि कणिका अपि यस्य चेतो
राष्ट्रीयभावभरितं कुरुते समेषाम्॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र किमपि विशिष्टं लेखनीयं नास्ति। अहं लघुच्छात्रावस्थात एव गान्धिवादी आसम्। तस्मान्मया बहुशः स्थानमिदं गम्यते स्म। श्रद्धया सर्वं दृश्यते स्म, सुचिरं च भावप्रवणतया स्थीयते स्म। एतदतिरिक्तं तस्मिन् स्थाने संचितानि दुर्लभानि च राष्ट्रियभावोद्वेलकानि वस्तूनि, पुस्तकानि, पत्रपत्रिकाश्च द्रष्टुमवसरो लभ्यते स्म।

अद्यापि गुर्जरभुवो मधुवर्षि गर्वा-
नृत्यं व्यलोकि यदहो नयनाभिरामम्।
तद् व्यासवर्णित-मनोरमरासकेलि-
र्दृष्टा समक्षमिव मे प्रतिभाति नित्यम्॥ ९॥

अन्यप्रदेशानां विभिन्नविशिष्टनृत्यानीव गुर्जरप्रदेशस्यापि एकं विशिष्टं नृत्यं भवति "गर्वा" नामकं यन्मया अहमदाबादनिवासकाले बड़ौदानिवास-काले च बहुधाऽवलोकितम्। नृत्यमिदं रासनृत्यानुकारीव भवति। श्रीमद्भागवतवर्णितरासलीलाप्रकरणाध्ययनावसरे मम इदं सर्वदा स्मृतिपथमागच्छति। तथापि नारायणभट्टप्रणीते नारायणीये यानि सङ्गीतस्वररञ्जितानि पद्यानि रासलीलासम्बन्धीनि वर्तन्ते तेषां पठनकाले तु साक्षात् स्वयं नर्तनस्यापि अनुभवो भवति। सङ्गीतरसिकैः पण्डितैस्तानि पद्यानि अवश्यं पठनीयानि नृत्यस्यापि च आनन्दानुभवः प्राप्तव्यः।

अद्यापि सूरतमहीमणि-वासुदेव-
स्मार्तं तदद्भुतकलां च सदा स्मरामि।
श्रीकालिदासरचना निजतूलिकाभि-
र्येनाऽखिला रुचिरचित्रमयी प्रणीता॥ १०॥

गुजरातप्रदेशस्य सूरतनगरे श्रीवासुदेवस्मार्तनामानः एके चित्रकलाविशारदा विद्वांसो विराजन्ते। ते काशीहिन्दुविश्वविद्यालये चित्रकलाविभागस्य अध्यक्षपदेऽपि व्यराजन्त। तैः महाकविकालि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दासस्य काव्यानि नाटकानि च चित्रमयानि प्रणीतानीति तेषां वैशिष्ट्यं वर्तते। तेषां चित्राणां प्रदर्शनी मया उज्जयिनीनगरे दृष्टा।

अद्यापि विज्ञजगति प्रथितौ अहम्दा-
बादस्थितौ स्थविर - वैष्णव - जैन - सूरी।
एतावुभौ विविधशास्त्रविमर्शसिद्धौ
विद्यानिधी निवसतो हृदये सदा मे॥ ११॥

भारतस्य सुप्रसिद्धे औद्योगिके नगरे अहमदाबादे अद्यापि सन्ति अनेके विविधशास्त्राचार्या विद्वांसस्तथापि वैष्णवाग्रगण्याः श्रीमन्तो भगवदाचार्यमहोदयास्तथा जैनविद्वन्मूर्धन्याः प्रज्ञाचक्षुष्काः श्री पं० सुखलाल संघवीमहोदयाः सकलविद्वत्समाजे महनीयं स्थानं भजेते। एतौ च न केवलं यथालिखितपाठकौ न वा रूढि-परम्परावादिनौ प्रत्युत इतिहासः, पुरातत्त्वम्, दर्शनं, धर्मः, साहित्यं, समाजः, सम्प्रदायः, पुण्यं पापञ्चेत्यादि समस्तमानवजीवनो-पयोगिविषयेषु यथार्थचिन्तकौ, बहूनां ग्रन्थानां लेखकौ, वक्तारौ, व्याख्यातारौ च आस्ताम्। एतयोः सम्पर्के कञ्चित् कालं स्थित्वा, एतयोः विशालं पुस्तकालयं च दृष्ट्वा मम महान् आनन्दो जातः महती प्रेरणा च लब्धा।

अद्यापि गुर्जरमहीमहिते अहम्दा-
बादेऽतिभौतिक - समृद्धिमयेऽप्यजस्त्रम्।
अध्यात्म - धर्म - सुरवाक्प्रचुर - प्रचारं
स्मृत्वा सदैव हृदयं मम मोमुदीति॥ १२॥

अहमदाबादनगरं यद्यपि भारतस्य एकं सुप्रसिद्धं विशालं च औद्योगिकं व्यापारप्रधानं केन्द्रं वर्तते तथापि अत्र धर्म-संस्कृति-शिक्षा-साहित्य-सम्बन्धीन्यपि बहूनि महत्त्वपूर्णानि च प्रतिष्ठानानि विराजन्ते येनेदं नगरमेतेष्वपि विषयेषु महतीं ख्यातिं प्रतिष्ठां च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बिभर्ति। अस्मिन् नगरे श्रीकाशीविश्वनाथसंस्कृतमहाविद्यालयः, स्वामिनारायणसंस्कृतमहाविद्यालयः, श्रीब्रह्मचारिसंस्कृतमहाविद्यालयः, हिरापुरजीसंस्कृत-पाठशाला चेति अनेके संस्कृत-महाविद्यालयाः संस्कृत-संस्कृति-धर्म-सदाचारादिविषयाणां शिक्षणे प्रचारे च साधुरूपेण संलग्नाः सन्ति।

स्वामिनारायणसम्प्रदायस्य, वैष्णवधर्मस्य, जैनधर्मस्य, चापि अत्र अनेकाः संस्थाः, अनेकानि मन्दिराणि च धार्मिकीम् आध्यात्मिकीं च शिक्षां ददते। प्रवचनकर्तारश्चापि अत्र भूयांसो विराजन्ते।

अत्युच्चकोटिक - महत्तम - तीर्थ - विद्या -
प्रोद्योग - मन्दिर - महापण - यन्त्रगेहैः।
गान्धीपटेलजनुषा च महान् अहम्दा-
बादः सदा जयति गुर्जरभूमिरत्नम्॥ १३॥

अद्यापि गुर्जरभुवः स्पृहये सदाऽहं
श्रीकृष्णभक्तिभरितं चरितं जनानाम्।
येषां ध्वनिर्मधुर - वैष्णव - गीतिरम्यो
नाद्यापि मत्-श्रवणतोऽपगतः कदाचित्॥ १४॥

साम्प्रतिको गुजरातप्रदेशो बाहुल्येन वैष्णवधर्मानुयायी वर्तते। अत्रत्याः सर्वे हिन्दुजनाः शुद्धाद्वैतपुष्टिमार्गस्य प्रवर्तकानां श्रीबल्लभाचार्याणामेव सम्प्रदायं स्वीकुर्वन्ति। अतएवास्मिन् प्रदेशे गृहे, गृहे मन्दिरे मन्दिरे, प्रतिदिनं प्रातःकाले श्रीकृष्णभक्तिभरितानां गीतानां, कीर्तनानां, भजनानां, कथाप्रवचनानां, स्तोत्राणां च विपुलो ध्वनिः श्रूयते। जयदेवविरचितस्य गीतगोविन्दस्यापि गीतान्यत्र प्रभूतमात्रायां गीयन्ते। श्रीमद्भागवतस्यापि पाठः प्रचुरमात्रायां भवति। नरसीमेहता-दयाराम-मीराबाईप्रभृतिभक्तप्रवरैर्विरचितानि लोकभाषागीतानि तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र अशिक्षितजनैरपि अतिशयश्रद्धापूर्वकं गीयन्ते। गुजरातभ्रमण-काले यदेतत् सर्वं सर्वत्र मया श्रुतं तदिदानीमपि श्रूयमाणमिव प्रतिभाति। नरसीमेहताविरचितं "वैष्णव जन तो तेणो कहिये पीरपराई जाणे रे" इति गीतं तु राष्ट्रस्य आदर्शगीतमिव मन्यते श्रद्धया गीयते च।

अद्यापि नन्दति मनो भ्रमणप्रियं मे
संस्मृत्य सर्ववटपत्तन - वास - सौख्यम्।
यत्रागमन् मम दिनानि सदैव विद्या-
व्यासङ्ग - विज्ञजन - संगति - चंक्रमेषु॥ १५॥

वटपत्तनं (बड़ौदा) नाम नगरं गुर्जरप्रदेशस्य प्रधानं विद्या-स्थानमस्ति। अत्र महाराजा-सम्भाजीराव-विश्वविद्यालयो विराजते। एतस्यैव अङ्गभूतः संस्कृतमहाविद्यालयोऽप्येकः विविधशास्त्राणा-मध्यापनेन, विद्वत्सभानां कविसम्मेलनानां च समायोजनेन, पत्रिकायाः प्रकाशनेन, सामयिक-गोष्ठीनामायोजनेन च संस्कृतस्य महतीं सेवां समुन्नतिं च कुर्वाणो वर्तते। अत्रत्या विद्वत्सभापि बहोः कालात् प्रचलति या विविधविषयेषु विद्वद्गोष्ठीनामायोजनं करोति। एतादृशेषु अनेकेषु अवसरेषु मया भूयान् भागो गृहीतः।

अत्रत्येषु विद्वत्सु श्रीहरिप्रसादमहोदयाः, श्रीगोविन्दलालभट्ट-महोदयाः, श्रीरामस्वामीशास्त्रिणः, श्रीशानभागमहाशयाः, पं० जयनारायणरामकृष्ण-पाठकमहोदयाः, डॉ० अरुणोदय नटवरलाल-जानीमहोदयाः विशिष्टं स्थानमधिकुर्वन्ति। अत्रैके विद्वांसः विद्या-भास्कर श्री मणिशंकर उपाध्याय महोदया वर्तन्ते यैः "ईश्वर-स्वरूपम्" नामकमेकं पद्यात्मकं पुस्तकं लिखितं यत्र आदौ वसन्त-तिलकाछन्दोनिबद्धैः सानुप्रासैः भावपूर्णैश्च एकविंशतिपद्यैः महात्मने गान्धिमहोदयाय भक्तिभावपूर्णः श्रद्धाञ्जलिः समर्पितो वर्तते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वाण्यपि पद्यानि नितान्तं सरसानि मनोहराणि वैदुष्यपूर्णानि च सन्ति। अनन्तरं १०२६ संख्यकेषु अनुष्टुप्छन्दस्सु ईश्वर-जीव-पुनर्जन्म-धर्म-सम्प्रदायादिविषयेषु नवनवाः क्रान्तिकारिणो विचारा उल्लिखिताः सन्ति। धार्मिकाणां लक्ष्मीपतीनां चाप्यत्र तीक्ष्णा आलोचना वर्तते। एवमिमे उपाध्यायमहोदया अत्रत्येषु विद्वत्सु क्रान्तिकारिणो मन्यन्ते।

वटपत्तने इत्येवमादिभिरनेकैः साहित्यरसिकैः सह खादतः पिबतः, भ्रमतः, भाषमाणस्य, गीतानि शृण्वतः, हास्यगोष्ठीश्च अनुतिष्ठतो मम भूयसा आनन्देन सह दिनानि व्यतीतानि। अत्र न्यायव्याकरणाचार्यश्रीशोभितमिश्रमहोदयानां तथा ज्योतिषाचार्य-श्रीलक्ष्मीकान्तझा महोदयानां गृहे मया मैथिलभोजनस्यापि प्रभूत आनन्दः समुपलब्धः।

अद्यापि गुर्जरभुवः सुखदे प्रवासे
श्रीसोमनाथ - नवदर्शन - संभवानि।
हत्याऽपमान - धनहानि - पराभवादि -
शल्यानि मां विकलयन्ति तुदन्ति चेतः॥ १६॥

इतो बहोः कालात्पूर्वमेकदा गुर्जरप्रदेशयात्राप्रसङ्गे यदाहं श्रीसोमनाथमन्दिरदर्शनार्थं गतवान् तदा मन्दिरस्य विशालतां, तस्य शिल्पकलाकौशलं, तत्परिसरस्य रमणीयतां च विलोक्य महती प्रसन्नता जाता। तत्रत्यं च सर्वाधिकमानन्ददायकं दृश्यमासीत् पर्यटकानां चिन्ताकर्षकं च मन्दिरस्य सागरनीरवर्तित्वं, येन पर्यटका जनाः सागरस्य तीरे भ्रमणं तथा मन्दिरस्य दर्शनञ्चेति उभयविधं लाभं लभन्ते। परन्तु मन्दिरस्य ध्वंसावशेषं दृष्ट्वा महमूदगजनवी यवननामकेन भक्तत्रासकेन मन्दिरोपरि अनेकवारं कृतस्याक्रमणस्य स्मरणं यदा जायते तदा सर्वोऽपि मन्दिरदर्शनोत्पन्नः आनन्दः समाप्तिं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गच्छति। आक्रमणकाले मन्दिरस्य रक्षायै तत्पराणां ५० सहस्रजनानां हत्या जाता, मन्दिरं विध्वस्तम्, महतः शिवलिङ्गस्य अनेकधा खण्डनं कृतम्, मन्दिरे सञ्चिता असंख्याः स्वर्णमुद्रा लुण्ठिताः, सर्वेषां मन्दिराधिकारिणां पूजकानाञ्च पराभवो विहितः, सकलाश्च मन्दिरमर्यादा उद्ध्वस्तीकृताः। इदं सर्वमितिवृत्तं यदा स्मृतिगतं तदानीं भवति शल्यवत् हृदयं पीडयति स्म। इदं च विचिन्त्य मनसि बहवो विकल्पाः शङ्काश्च उपयन्ति स्म। यत् तस्मिन् काले कथं न केनापि देवेन मन्दिरस्य तत्रत्यजनानां वा रक्षा कृता? अयं प्रश्नः पुनः पुनरुदेति स्म, मानसं मे उद्वेलयति स्म, मन्दिरे, देवे, पूजायां च अनास्थां जनयति स्म।

गुर्जरप्रान्तप्रशस्तिः—

श्रीद्वारकेशकरुणा - विमलान्तरात्मा
श्रीसोमनाथ - दययाऽऽप्तसमस्तकामः।
नाना - कवित्वकल - गुञ्जित - दिग्दिगन्तः
श्रीगुर्जरो विजयते भुवि भव्यदेशः॥ १७॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ९ :

दिल्लीप्रदेशीयं संस्मरणम्

दिल्लीप्रवाससमये प्रथमे समन्ताद्
याऽलोकिता विपुलता च विशालता च।
यज्जीवनं च बहु कर्ममयं जनानाम्
अद्यापि तन्मम मनः प्रगुणीकरोति॥ १ ॥

मया दिल्लीनगरस्य विभिन्नकार्याण्युद्दिश्य अष्टादशवारान् यात्राः कृता यासां दिनाङ्कविवरणं लिखितं वर्तते। परन्तु मम प्रथमयात्रा छात्रावस्थायां जाता यदा दिल्लीनगरे श्रीस्वामिकरपात्रमहाराजैः सहस्रकुण्डी यज्ञः समायोजित आसीत्। बहुचर्चितमिमं यज्ञं द्रष्टुं तथा दिल्ल्याः परिभ्रमणं कर्तुमहं छात्रावस्थायामेव गतवान् यस्य दिनाङ्क-विवरणं नास्ति। एतद्यज्ञस्य समाप्त्यनन्तरं मया दिल्लीपरिभ्रमण-मारब्धम्। तत्र परिभ्रमणक्रमे मार्गेषु, वीथीषु, आपणेषु, भोजनालयेषु, चत्वरेषु, चतुष्पथेषु, मठेषु, मन्दिरेषु, लोकसदनेषु, राजभवनेषु, मन्त्रालयेषु च यददृष्टपूर्वं परमाद्भुतं च दृश्यमवलोक्य मनसि महान् आह्लादो जायते स्म, परिभ्रमणाच्च मनः कदापि न विरमति स्म। पुनश्च दिल्लीनगरे समृद्धान् असमृद्धान् वा सर्वानपि आबालवृद्धान् जनान् निरन्तरं कार्यनिरतान्, पादाभ्यां यानैर्वा गच्छतः धावतः प्रधावतः, स्कूटरयानेभ्यः सशिशुपत्नीकं पततः पुनरुत्थाय च गन्तुं यतमानान् दर्शं दर्शं मम महान् हर्षो जायते स्म, तेषां जीवनं च मे मनो मुहुर्मुहुरभिनन्दति स्म। मया दिल्लीयात्राया इदमेव महत् फलं प्राप्तं यत् मम दृष्टिकोणे, चिन्तने, उद्देश्ये च विशालता विपुलता च समागता तथा जीवने कर्ममयतां तथा कठोरपरिश्रमं प्रति च आस्था समुत्पन्ना।

तदित्थं मम प्रथमं दिल्लीदर्शनं मम जीवनस्य कृते मार्गनिदर्शकं जातम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि भीतिमुपयाति विचिन्त्य दिल्ल्या
मीनारमुन्नततमं जगति प्रसिद्धम्।
यत्तुङ्ग - शृङ्गमवलोकयतामधस्तात्
"टोपी" पतत्युपरि घूर्णति मस्तकं च॥ २॥

दिल्ल्या विशालताया विपुलतायाश्च पूर्वतने पद्ये चर्चा कृता। परं दिल्ली औन्नत्येऽपि कस्माच्चिदपि देशात् नगराद्वा न्यूनतां न भजते। अत्र मेहरौली नामके संभागे "कुतबमीनार" नामकमेकं विश्वप्रसिद्धं स्मारकं वर्तते यस्य उच्चताया जगति कुत्रापि तुलना नास्ति। तस्य अन्तिमे उच्चतमे स्थाने गमनाय सोपानानां चतुश्शतानि आरोहणीयानि भवन्ति। तत्रारोहणे यथा सुखमनुभूयते तथैव श्रान्तिस्तथा भीतिरपि। परन्तु अत्रारुह्य इदं मया अनुभूतं यत्—उत्तुङ्गता कियती अपि भवेत्, तत्र मनुष्यः आरोढुं शक्नोत्येव। इत एव इमां शिक्षां गृहीत्वा मया सूक्तिरेका लिखिता—

किं तत् कष्टं यत् सोढुं न शक्यते?
कोऽसौ भारो यो वोढुं न शक्यते?
का सा उन्नतिः या आरोढुं न शक्यते?

दिल्ल्या अनेकभवनापण - मार्ग - वीथी-
भोज्यालयान्, ललितसंस्कृतनामभाजः।
स्मृत्वा च धर्म - मत - संस्कृति - बोधकांश्च
अद्यापि हृष्यति मनो बहु मोदते च॥ ३॥

दिल्लीमहानगरी यद्यपि वर्तमानयुगस्य सर्वाभिरपि नवीनताभिः प्रभाविता वर्त्तते एव तथापि तस्यां केषुचित् क्षेत्रेषु प्राचीनताया अपि मनोहरं दृश्यं दृष्टिगोचरं भवति। तत्र संस्कृतशब्दानां प्रयोगः संस्कृतिबोधकशब्दानां च प्रयोगो मम विशिष्टमाकर्षणं वहति स्म। तस्य कानिचिदुदाहरणानि अत्र उपन्यस्यन्ते—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१–विशालभवनानां नामानि—
आकाशदीप, जीवनदीप, जीवनतारा, जीवनविहार, वेंकटेश्वर इत्यादीनि।

२–भोजनालय (होटल) नामानि—
अलका, कनिष्क, सिद्धार्थ, सम्राट्, पञ्चशील, मौर्य, आम्रपाली इत्यादीनि।

३–चलचित्रगृह (सिनेमा) नामानि—
अजन्ता, अल्पना, अनुपम, आराधना, मीनाक्षी, सम्राट्, विराट्, विशाल, संगम इत्यादीनि।

४–जलपानगृह (रेस्तरां) नामानि—
सत्कार, आतिथ्य, स्वागतम्, रसिका, पुनर्नवा, संगमनी इत्यादीनि

५–राज्यानुसारं वाणिज्यकेन्द्र (इम्पोरियम) नामानि—
अम्बपाली (विहार) मृगनयनी (मध्यप्रदेश) मञ्जूषा (पश्चिम बंगाल) गंगोत्री (उत्तर प्रदेश) गुर्जरी (गुजरात) नोपाक्षी (आन्ध्रप्रदेश) त्रिमूर्ति (महाराष्ट्र) इत्यादीनि।

अद्यापि हृष्यति मनो मम वीक्ष्य सर्वान्
आबाल-वृद्ध - वनिता - युव- जीर्णकायान्।
व्यस्ताः सदा विविधकर्मसु येऽप्रमादं
गीतोपदेशमखिलं चरितार्थयन्ति॥ ४॥

दिल्लीनिवासिनः प्रायः सर्वेऽपि बालाः वृद्धाः युवानः युवतयश्च अहोरात्रं स्वस्वकर्मसु निरन्तरं व्यस्तास्तिष्ठन्तीति दृष्ट्वा महती प्रसन्नता जायते, एवं चानुभूयते यद् दिल्लीनिवासिनो वास्तविकरूपेण गीतोपदेशानुसारं कर्मयोगस्य उपासकाः सन्तीति।

अद्यापि ता उभयपार्श्वजुषां तरूणां
छायाः सुशीतलतमाः सततं स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र क्षणं समुपविश्य परिश्रमार्तो
यात्री निजं सकलतापमपाकरोति ॥ ५ ॥

नवदेहल्या: निखिलानामपि प्रधानमार्गाणां पार्श्वद्वयेऽपि पंक्तिबद्धरूपेण सुशोभना: सुघनच्छायाभृतश्च भूयांसो वृक्षा आरोपिता: सन्ति। ते न केवलं मार्गाणां शोभां वर्द्धयन्ति प्रत्युत श्रान्तानां पदातिपथिकानां कृते श्रमक्लमहरा: सुखशान्तिप्रदाश्चापि भवन्तीति दृष्ट्वा मम महती प्रसन्नता जायते स्म।

अद्यापि नित्यमबला: कतिचिद् ''बसा''र्थं
दिल्ल्यां विलोक्य तरसा पथि धावमाना:।
श्रीकालिदासकवि - वर्णित - यक्षकान्ता
धावेत्तथा किमु न वा, बहु तर्कयामि ॥ ६ ॥

मेघदूते यक्ष: मेघं प्रति स्वकान्तापरिचयप्रदानप्रसङ्गे तस्या: कृते ''श्रोणीभारादलसगमना'' इति विशेषणं दत्तवान्। परन्तु दिल्ल्यां विविधेषु कार्यालयेषु कार्यं कुर्वत्य: अनेका महिला: श्रोणी-भारवत्योऽपि बसयानग्रहणाय द्रुतवेगेन धावन्ति अलसा न भवन्तीति दृष्ट्वा यक्षकान्ताविषये ममेयं चिन्ता भवति यत् यदि इदानीं सापि क्वचित् कार्यरता अभविष्यत् तर्हि बसग्रहणाय धावितुं शक्नुयात् न वा इति? न जाने, एतादृशी चिन्ता मम यदा कदा कथं जायते?

श्रीकर्णसिंहयुवराजमहोदयैर्यत्
प्रोक्तं मदीयहितकृद्वचनं यथार्थम्।
अद्यापि तन्नुदति लज्जयतेऽतिमात्रम्
प्रोत्साहयत्यथ च भर्त्सयते सदा माम् ॥ ७ ॥

एकदा दिल्लीनिवासकाले माननीयै: डॉ० कर्णसिंहमहोदयैरहं प्रोक्त:—''शास्त्रिमहोदया:, भवता स्वसंस्थाया: ''सार्वभौम'' इति बहु बृहदर्थकं नाम कृतम्। कथमेतत् सार्थकं कर्तुं शक्यते भवता?''

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततो मया प्रोक्तम्—"भवतां कृपया सर्वमपि संभवति।" ततस्तैः कथितम्—"बाढम्, यद्येवं तर्हि भवान् चाणक्यपुरीस्थिते मदीये आवासे निवासं करोतु। तत्रैव सर्वेषां देशानां राजदूतावासा विद्यन्ते। तैः सह सम्पर्कं साधयतु तथा सम्बन्धं च वर्धयतु। एतेनापि किञ्चित् सार्वभौमत्वं सेत्स्यति। परन्तु संस्थाया नाम्नः सार्थकता अवश्यं साधनीया, तदर्थं च सदा प्रयासो विधेयः।"

तेषामिदं कथनं सदैव मम स्मृतौ तिष्ठति सदैव च मां समुद्वेलयति।

मद्धौतवस्त्रमवलोक्य नवे युगेऽस्मिन्
मामक्षमं यदवदन् कतिचित् प्रचारे।
नव्यं च वेषमथ धर्तुमुपादिशन् मा-
मद्यापि तन्नुदति मां नवचिन्तनाय॥ ८॥

एकदा दिल्लीनिवासकाले २.५.६७ दिनाङ्के अहं पटेलरोडस्थितं भारतसाधुसमाजस्य कार्यालयं गतस्तदध्यक्षेण सह संस्कृतप्रचार-विषये वार्तां कर्तुम्। वार्ताप्रसङ्गे प्रारब्धे अध्यक्षमहोदयैः कथितम्—"शास्त्रिमहोदय, धोतीवस्त्रं धारयित्वा दिल्लीनगरे संस्कृतप्रचारो न कर्तुं शक्यते? यदि भवन्तः अनेन वेषेण कस्यापि गृहं गमिष्यन्ति तर्हि स भवन्तं याचकं मत्वा भवता सह वार्तामेव न करिष्यति। का पुनः कथा आसनदानस्य चायपानस्य वा? अतः अस्मिन् नवयुगे नवदेहल्यां संस्कृतप्रचारार्थं नवपरिधानस्य आवश्यकता वर्तते इति। इदं श्रुत्वा प्रचारकाणां वेषभूषाविषये मम नूतना चिन्ता जाता, नूतनं चिन्तनं च समापतितम्। यतो बहवो जनाः संस्कृतप्रचारार्थं प्राचीनमेव वेषं साधु मन्यन्ते।

अद्यापि भग्नकुटिकासु निवासभाजां
सम्पूर्ण - गृह्यसुखसाधन - वञ्चितानाम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आकर्णिता मधुर - हास्यविनोद - वार्ता
तप्तं मदीयहृदयं शिशिरीकरोति॥ ९॥

भ्रमणकाले मया बहुषु समृद्धिशालिषु नगरेषु एवंविधा भूयांसः परिवारा दृष्टा ये जीर्णशीर्णकुटिकासु एव ग्रीष्मे वर्षासु शीतकाले वा निवसन्ति स्म, परमावश्यकसुखसाधनानाञ्च अभावे महता कष्टेन दिनान्यतिवाहयन्ति स्म। ईदृशीं तेषां दयनीयां दशामवलोक्य मम भृशं पीडा भवति स्म। परन्तु तादृश्यामपि कष्टमयदशायां तेषु परिवारेषु यदाऽहं परस्परं हास्यविनोदवार्तां, मधुरालापं, गीतानि, वाद्यानि च शृणोमि स्म तदा किञ्चित् पीडा अपगच्छति स्म तथा संतप्तं मनः किञ्चित् शिशिरीभवति स्म।

दृष्ट्वैकतो विविध - सौध - निवास - सौख्यं
झुग्गीनिवासमपरत्र दुरन्तदुःखम्।
एषा स्थितिर्ननु कदा नु कथं नु गच्छे-
दद्यापि सा मम मनो न जहाति चिन्ता॥ १०॥

देहल्यामेकतो विशाला विशाला अट्टालिकाः, गगनचुम्बीनि सौधानि, भवने भवने अपरिमितानि महार्घाणि च सुखसाधनानि, एकैकस्य जनस्य कृते विविधा मनोहरा वेषभूषा, सुरभि-शृङ्गारोपकरणानि च नानाविधानि सर्वदैव दृष्टिपथमायान्ति प्रसादयन्ति च मनांसि सर्वेषां दर्शकाणाम्। परं तत्रैव अन्यतः झुग्गीझोपड़ीनाम्ना विख्यातेषु जीर्णशीर्णेषु नग्नभग्नेषु, वर्षासु जलनिमग्नेषु च शताधिकेषु तृणकुटीरेषु निवसतां स्त्रीपुरुषाणां बालवृद्धानां च दयनीयं दृश्यं दृष्टिपथमायाति यत् सचेतसां दर्शकाणां चेतसि महतीं चिन्तामुत्पादयति पीडयति च "सर्वे भवन्तु सुखिनः" इति वाक्यं कदा साधकं भविष्यतीति प्रश्नश्च पुनः पुनरुदेति। सा चिन्ता सा च पीडा मामपि अद्यापि तथैव बाधते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि विस्मृतिमुपैति कदापि दिल्ल्या
नो सा सभा सुमहती वरपण्डितानाम्।
यत्राभवत् "सुरगवी ननु राष्ट्रभाषा
स्याद् वा नवेति विषये" विपुलो विवादः॥ ११॥

अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य २; ३, ४, अक्टूबर ६६ दिनाङ्केषु समायोजिते स्वर्णजयन्तीसमारोहे एकस्मिन् सत्रे "एतत्सम्मेलनद्वारा संस्कृतं राष्ट्रभाषा स्वीकृता भवेत्" इति विषयमधिकृत्य विपुलो विवादः सञ्जातः। बहूनां विदुषां भाषणानि जातानि। अन्ते मतविभाजनप्रसङ्गे संस्कृतं राष्ट्रभाषा न भवेदिति पक्षे पं० पट्टाभिरामशास्त्री, डॉ० मण्डनमिश्रः, पं० रुद्रदेवत्रिपाठी, पं० महेशदूबे, पं० चट्टोपाध्याय इत्येतैर्विद्वद्भिः मया च मतानि दत्तानि तथा संस्कृतं राष्ट्रभाषा भवेदिति पक्षे एतत्पक्षपुरस्कर्ता श्रीलक्ष्मीकान्त म० चक्रदेवः, पं० विद्याधर शास्त्री, आचार्य-कपिलदेव शर्मा, डॉ० श्रीधर भास्कर वर्णेकरः, श्री वसन्त अ० गाडगिल इत्यतैर्मतानि दत्तानि। विरोधे मम मतं ज्ञात्वा श्रीचक्रदेव-महोदया मयि भृशं कुपिता अभूवन्। यतो मम मतमिदं तेषां विश्वासविरुद्धं जातम्।

अद्यापि मत्स्मृतिगता खलु भारतीय-
विद्यागृहस्य महती सुरगीःसमज्या।
यत्राभवत् कलकलो विदुषां समाजे
श्रुत्वा मदीयगदितं च मदाग्रहञ्च॥ १२॥

७.१.८१ दिनाङ्के दिल्लीनगरस्य भारतीयविद्याभवने दिवंगतानां श्री के० एम० मुंशीमहोदयानां जयन्तीसमारोहे मुख्यातिथिपदेन भाषमाणेन मया निवेदितम्-"माननीया मुंशीमहोदयाः संस्कृत-भाषाया महान्तः प्रशंसकाः प्रचारकाश्च आसन्निति सर्व एव जानन्ति। अतस्तेषां जयन्तीसमारोहे संस्कृतभाषयाऽपि कानिचिद् भाषणानि भवन्तु इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः 'सर्वे संस्कृतं बोद्धुं न प्रभवन्ति' इति कैश्चित्तत्प्रतिवादे कृते मया कथितम्—"सरलं लघु च भाषणमत्र बहवो बोद्धुं शक्नुवन्ति।" अन्ततः मुंशीमहोदयानामन्तरात्मनस्तुष्टये विद्याभवनस्य निदेशका एव कानि- चित् संस्कृतवाक्यानि कथयित्वा मुंशीमहोदयं प्रति श्रद्धाञ्जलिं समर्प- यन्तु इति। अन्यथा अस्याः संस्थाया एतन्निदेशकस्य वा संस्कृतनिष्ठा कथं प्रमाणिता भवितुमर्हति? भारतीयविद्याभवने वा असंस्कृतज्ञस्य निदेशकस्य अवस्थानं कथं नाम औचित्यं भजते"। एवं मया आग्रहे कृते निदेशकमहोदयानां संस्कृते वक्तुमसमर्थानां स्थाने केन्द्रीय-विद्यालय-सचिवैः श्रीनवाथेमहोदयैः पञ्च संस्कृतवाक्यानि उक्त्वा निदेशक-महोदयानां प्रातिनिध्यं कृतम्, अग्रिमवर्षीयजयन्त्यां च निदेशक-महोदयाः स्वयमेव संस्कृते भाषणं करिष्यन्तीति निश्चयो जातः।

अस्मिन्नवसरे प्रसङ्गमिममाश्रित्य सभासदां मध्ये महान् कलकल आसीत्। अनेन मम प्रस्तावेन बहवः प्रसन्ना अपि जाताः।

अद्यापि मुस्लिमजनं तमतीव शिष्टं
वृद्धं सुनिर्मलमतिं बहुशः स्मरामि।
यः सभ्यतापचयमेव विशेषहेतुं
ह्रासेऽखिले सुरगिरोऽकथयद् विषण्णः॥ १३॥

अहमेकदा संस्कृतकाव्यनाटकानां कथापुस्तकानाञ्च उर्दू-अनुवादमन्वेषयन् दिल्ल्याः जामामस्जिदसमीपवर्ति उर्दूबाजार-नामकं स्थानं गतवान् यत्र अनेका उर्दूपुस्तकानां विपणयो विराजन्ते। तत्र एकं वृद्धं पुस्तकविक्रेतारं मिलित्वाऽहं स्वकीयं प्रयोजनं निवेदितवान्। ततः स दुःखं प्रकटीकुर्वन् मामेवं प्रोक्तवान्—

"पण्डितजी, संस्कृत तो तहजीब की जबान है, सभ्यता की जबान है। लेकिन अब तो लोगों में तहजीब रही नहीं गयी है तो अब कौन संस्कृत पढ़ेगा और कौन संस्कृत की किताब खरीदेगा? इसलिए

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कौम में फिर पुरानी तहजीब लानी होगी तभी संस्कृत चल सकती है। खैर, आप आगये हैं तो मैं दूसरी दूकानों में देखता हूँ'' एवं कथयित्वा स विक्रेता सज्जनः कुतश्चित् अभिज्ञानशाकुन्तलस्य एकं, मेघदूतस्य एकं तथा गीतगोविन्दस्य एकम् उर्दू-अनुवादं दत्तवान् तथा मां मुहुर्मुहुः प्रार्थितवान् सभ्यतायाः पुनःस्थापनाय प्रयासं कर्तुम्।

तस्मिन् दिने मया इयमेका नवीना शिक्षा लब्धा। वयं सभ्यतायाः रक्षार्थं संस्कृतं प्रचारयितुं प्रयतामहे परं स संस्कृतप्रचारार्थं सभ्यतायाः पुनरुज्जीवनं परमावश्यकं निरूपितवान्।

तदारभ्य सदाऽहं तस्य श्रद्धया स्मरणं करोमि।

दिल्लीनिवासिविदुषां समितेः पुरः श्री-
राजीवगान्धिरखिलानुदसाहयद् यत्।
विद्वज्जनान् सुरगिरः परिरक्षणार्थम्
अद्यापि तद् हृदि बलं प्रबलं विधत्ते॥ १४॥

धर्मशालायां समायोजितं तिब्बतीसंस्थाने संस्कृतशिक्षण-शिविरं ४.६.८९ तमे दिनाङ्के समाप्य ततश्च प्रस्थाय अहं दिल्लीं सम्प्राप्तः। तदानीं तत्र नवोदयविद्यालयेषु संस्कृतशिक्षाया अपि शिक्षणस्य व्यवस्था कर्तव्येति विषये प्रधानमन्त्रिणा श्रीराजीवगान्धि-महोदयेन सह वार्तां कर्तुं दिल्लीस्थसंस्कृतविदुषामेकं प्रतिनिधिमण्डलं कृतनिश्चयमासीत्। अहं वाराणसीनिवासी पण्डित इति प्रतिनिधि-मण्डले मह्यं मुख्यं स्थानं प्रदत्तं मया च श्रीप्रधानमन्त्रिणा सह संस्कृतशिक्षाविषये वार्ता कृता। तैरुक्तम्—शासनस्य विधानेषु आवश्यकतानुसारं लोकमतानुसारं च सदा परिवर्तनं भवति। अतो भवद्भिरस्मिन् विषये व्यापकमान्दोलनं विधेयं प्रबलं च। ततो नूनमेव अत्रापि परिवर्तनं भवितुमर्हति। बृहतः प्रदर्शनस्य आवश्यकता अस्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याप्यहं जयदयाल इति प्रसिद्धं
श्रीडाल्मियाकुलमणिं सततं स्मरामि।
विद्यालयेषु सततं सुरगी:प्रयोगं
द्रष्टुं य ऐच्छदथ मामनुदत्तदर्थम्॥ १५॥

स्वनामधन्याः श्रेष्ठिप्रवराः श्रीजयदयालडालमियानामानो भारतस्य सुप्रसिद्धा उद्योगपतयोऽभूवन्। ते संस्कृतभाषां विद्यालयेषु न केवलं पाठ्यमानां प्रत्युत छात्रैरध्यापकैश्च परस्परं भाष्यमाणामपि द्रष्टुमिच्छन्ति स्म। ते मम प्रचारकार्येण सम्यक् परिचिता आसन् तथा मम संस्थायाः सहायतामपि कुर्वन्ति स्म। अतस्ते मां बहुधा माध्यमिकविद्यालयेषु गत्वा तत्रत्यान् अध्यापकान् अध्यापिकाश्च संस्कृते वक्तुं प्रशिक्षितान् कर्तुं सदा प्रेरयन्ति स्म तथा मां स्वयमपि यत्र तत्र प्रेषयन्ति स्म। एकदा तैः प्रेरितोऽहं १५.१२.८३ दिनाङ्के मथुरायां श्रीकृष्णजन्मभूमिस्थले सञ्चाल्यमाने बालगोपालविद्यालये तत्रत्या अध्यापिका बहूनि दिनानि संस्कृते वदितुं वादयितुं च शिक्षितवान्। एवमेव एकदा दिल्ल्यां झंडेवालान् स्थानेऽपि त्रिंशतः महिलानां प्रशिक्षणस्य बृहत्तरः कार्यक्रमः सञ्चालितोऽभूत्।

श्रीडालमियामहोदयानामियं संस्कृतनिष्ठा अन्यत्र सुदुर्लभा आसीत्। ते सदैव संस्कृतविषये बहु चिन्तयन्ति स्म।

अद्यापि शाब्दिकशिरोमणिचारुदेवः
शास्त्री विराजति सदा हृदये मदीये।
यः पुत्रपौत्रसहितोऽखिल-शब्दशास्त्र-
ज्ञानप्रदाननिरतोऽगमयत् स्वकालम्॥ १६॥

सम्पूर्णेऽपि भारते "अपरपाणिनि" रिति विरुदेन विख्याताः श्रीमदाचार्यचारुदेवशास्त्रिणः स्वजीवनस्य समस्तमपि कार्यक्षमं कालं संस्कृतभाषायाः सेवायां, विशेषतश्च व्याकरणशास्त्रस्य अध्ययने,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अध्यापने, परिशीलने, तद्विषयकपञ्चदशाधिक-महत्त्वपूर्णग्रन्थलेखने, संस्कृतपत्रिकादिषु व्याकरणविषयकगम्भीरनिबन्धलेखने च यापितवन्तः। तदनुसारमेव एतेषां स्वनामधन्याः देशविदेशयोश्च विख्याताः पुत्राः डॉ० श्रीसत्यव्रतशास्त्रिणोऽपि तमेव पन्थानमनुसृत्य संस्कृतसेवायां समर्पितात्मानः सन्ति। एतेषां परिवारे अयमेको महान् विशेषो दृष्टो यद् कस्यापि बालकस्य यावत् समग्रस्य हितोपदेशस्य पदपदार्थपूर्वकं ज्ञानं न भवति तावत् तस्य उपनयनसंस्कारो न क्रियते। यदाऽहं श्रीशास्त्रिमहोदयानां गृहं गतवान् तदा श्रीसत्यव्रतशास्त्रिणां पुत्रः उपनयनदृष्ट्या एव हितोपदेशमधीयानो दृष्टः, मया पृष्टश्च हितोदेशगतानां पदानामर्थं तथा सन्धिसमासादिकं च सम्यग् निरूपितवान्। एतस्मिन् परिवारे यदा कदा स्थित्वा मया महत् सुखमनुभूयते स्म। सा रीतिरन्यैरपि पण्डितैरनुसरणीया इति कामयेऽहम्।

अद्यापि मत्स्मृतिगतं पृथुकीर्ति झंडे-
वालाननाम महनीयतमं स्थलं तत्।
यद् देशधर्म-परिरक्षण-शिक्षणस्य
यूनां कृते परम-पावन-सिद्धपीठम्॥ १७॥

दिल्लीनगरे झंडेवालाननामकमेकं स्थानं वर्तते यत्र राष्ट्रियस्वयंसेवक-संघस्य सुविशालः कार्यालयो वर्तते। संघस्य देशहितसाधकाः कार्यकलापाः सर्वत्र विख्याताः सन्ति। प्रस्तुते पद्ये तस्यैव चर्चा विद्यते।

यद् विश्वसंस्कृत-सदस्युपविश्य भूमौ
वैदेशिकैः सह बुधा अपि भुक्तवन्तः।
अद्यापि मे स्मृतिगतं सुखदायि, मन्ये
साफल्यमेति "वसुधैव कुटुम्बकं" वाक्॥ १८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"वसुधैव कुटुम्बकम्" इत्यस्माकं भारतीयानां पुरातनः सिद्धान्तो विद्यते यस्यास्माभिर्देशे विदेशे च सर्वत्र सभासम्मेलनादिषु साभिमानमुद्घोषः क्रियते। परन्तु परस्परं भोजनपानादिव्यवहाररूपो यः कुटुम्बधर्मो मन्यते स कदापि वैदेशिकैः सह भारतीयैः पण्डितैर्न स्वीकृतो न वा व्यवहारे चरितार्थतां नीतः। परन्तु सुदीर्घकालानन्तरं विश्वसंस्कृतसम्मेलने वैदेशिकैर्विद्वद्भिः सह भूमौ सुविस्तृते आसने एकपङ्क्तौ उपविश्य यदनेकैः पण्डितैर्भोजनं कृतं तद् दृष्ट्वा मम महती प्रसन्नता जाता, "उपर्युक्तश्च पुरातनः सिद्धान्तः सम्प्रति साफल्यमुपगत" इति परमं सन्तोषमहं लब्धवान्।

अद्यापि कापि रचना वचनावलीनां
नो तादृशी खलु विदेशिबुधेषु दृष्टा।
यस्यां समुच्छलदभङ्गतरङ्गयुक्तो
वारां प्रवाह इव भाति गिरां प्रवाहः॥ १९॥

अद्यापि मद्दृशमुपैति यदा यदा "बाक्
कन्वे" कृताऽमरगिरः सुषमात्रयी सा।
गूढार्थ-रम्यपदबन्धयुता, तदा सा
तन्वी तनूः स्मृतिमुपैति सदैव तस्य॥ २०॥

१९८१तमे वर्षे दिल्लीनगरे समायोजिते विश्वसंस्कृतसम्मेलने समागतेषु वैदेशिकेषु विद्वत्सु कोरियादेशनिवासी श्रीबाक्कन्वे महोदयो मम सर्वाधिकं श्रद्धासमादरभाजनमभूत्। विदुषां मध्ये कन्वेमहोदयः कृशकायः, स्वल्पपरिच्छदः, बाह्याडम्बरहीनः, सरलस्वभावश्चासीत् परं स न केवलमेतावदेव वैशिष्ट्यमावहति स्म प्रत्युत संस्कृतभाषायां सरसललितगद्यरचनायां या तस्य असाधारणी प्रतिभा, निपुणता चासीत् सा संस्कृतलेखकेषु वैदेशिकविद्वत्सु न कुत्रापि दृष्टिगोचरतामागता। तस्य १. संस्कृतकथारत्नाकरः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२. अमरुशतकलीला ३. मेघदूतविलासश्चेति तिस्रो रचनाः कादम्बरी-हर्षचरित - मन्दारमञ्जरी - शिवराज - विजय - प्रभृतिशीर्षण्य - संस्कृतगद्यरचना अनुकुर्वन्ति।

अद्यापि नामाखिलभारतभूप्रतिष्ठां
तेजोमयीं प्रबलसाहसशक्तिमूर्तिम्।
देवीं स्वरक्षकहतामहमिन्दिराख्यां
संस्मृत्य नित्यमतिविह्वलतामुपैमि॥ २१॥

एकदा सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दीक्षान्तसमारोहे दीक्षान्तभाषणं कर्तुं प्रधानमन्त्री माननीया इन्दिरागान्धीमहोदया आगता आसीत्। समारोहे मया सम्पूर्णं भाषणं श्रुतं परं मन्मनसि तेन सन्तोषो न जातः। अतो मया तां मिलित्वा तया सह वार्तां कर्तुं निश्चयो विहितः। एतदर्थं मया एकं पत्रं लिखित्वा समयदानाय प्रार्थना कृता, स्वैभाग्यवशाच्च मम प्रार्थना स्वीकृता, मिलनस्य च कृते २४.५.८३ दिनाङ्के ११ वादनस्य समयः निर्धारितः। प्रधानमन्त्रिकार्यालयस्य पत्रं लब्ध्वा मम अनधिगतपूर्वा महती प्रसन्नता जाता, महता उत्साहेन च अहं दिल्लीं प्रति प्रस्थानं कृतवान्।

निर्दिष्टे च दिने प्रधानमन्त्रिकार्यालयं प्राप्तः। सर्वाश्च औपचारिकीः तत्रत्या बाधा अतिक्रम्य यथासमयमहं गान्धि-महोदयाया निकटं प्रापितः एकेन अधिकारिणा। अहं वृद्धः, पण्डितः, वाराणसीतश्च सम्प्राप्त इति मदर्थे मिलनाय किञ्चिदधिकं सौविध्यं प्रदत्तमधिकारिभिः। गान्धिमहोदयां सम्प्राप्य परस्परप्रणामानन्तरं प्रसन्नेन वदनेन मधुरया च गिरा गान्धिमहोदयया पृष्टोऽहं सर्वं निवेदितवान्, स्वीयं प्रकाशितं सर्वं साहित्यं च प्रदत्तवान्। संस्कृतविषये च तया स्वकीया बहुविधा विचाराः श्राविताः। कश्मीरप्रदेशस्य च संस्कृतविषयिणी आधुनिकी परिस्थितिरपि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चर्चिता। एवं त्रिंशत्क्षणपर्यन्तं वार्ता जाता। पश्चात् चित्रग्रहणानन्तरं पुनः सादरं सहर्षं च प्रणिपत्य अहं बहिर्निर्गतः। तद्दिनं मम जीवने सौभाग्यस्य आनन्दस्य च चरमोत्कर्षस्य आसीत्। परन्तु गान्धि-महोदयां साक्षात्कृत्य यन्मया महत्सुखं प्राप्तं तत् अल्पदिव-सानन्तरमेव तस्या निर्ममहत्यायाः अकस्मात् संवादं श्रुत्वा अवर्णनीये अविस्मरणीये च दुःखे परिणतं, यत् कदापि विस्मर्तुं न शक्यते।

अद्यापि तं विविधवाङ्मयमूर्तरूपं
धर्मेन्द्रनाथबुधवर्यमहं स्मरामि।
ईरानदेशकविना रचितं 'गुलिस्तां'
ग्रन्थं सुरम्यमलिखत् खलु संस्कृते यः॥ २२॥

ईरानदेशस्य सुप्रसिद्धेन कविना श्रीशेखसादी महोदयेन फारसीभाषायां विरचितं "गुलिस्तां" नामकं पुस्तकं विश्वविश्रुतं वर्तते। इदं पुस्तकं पञ्चतन्त्रमिव उक्तीनां, सूक्तीनां मनोरञ्जककथानां च महनीयो निधिर्वर्तते। अनेन कारणेन विश्वस्य अनेकासु भाषासु अस्य अनुवादो लभ्यते। अस्यैव ग्रन्थरत्नस्य संस्कृते अनुवादं विधाय आचार्यधर्मेन्द्रनाथमहोदयेन संस्कृतजगतो महान् उपकारः कृतः तथा संस्कृतसाहित्यरसिकानां कृते एतस्य रसास्वादनं सुलभं कृतम्। १९७१ तमे ईसवीये वत्सरे एतस्य प्रकाशनं जातं तथा इदं पुस्तकं भारते तदानीं समागताय ईरानदेशस्य शाहंशाहाय श्रीमोहम्मदरजा पहलवी-महोदयाय एकस्मिन् समारोहे समर्पितम्। शाहंशाहमहोदयेन तत्पत्न्या आहवान् फराहदीबा महोदयया च पुस्तकमिदं दृष्ट्वा महती प्रसन्नता प्रकटीकृता।

आचार्यमहोदयैः दिल्लीनगरस्य दरियागंज-संभागे "निखिल-भारतीयभाषापीठ" नाम्ना एका संस्था संस्थापिता आसीत् यत्र तैः सह मम बहुधा मिलनं भवति स्म। बहूनां महत्त्वपूर्णानां फारसी-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषाकाव्यानां संस्कृते अनुवादं कर्तुं तेषां योजना आसीत्। यतस्ते फारसीभाषाया अपि पारङ्गता विद्वांसः आसन्। तादृशः कोऽपि अन्यः संस्कृतविद्वान् मम दृष्टिपथं नायातो न वा श्रुतिपथं गतः।

अस्मिन् संस्थाने ५.२.७० दिनाङ्के सर्वप्रथमं मम आचार्य-महोदयैः सह साक्षात्कारः, परिचयः, वार्तालापः, संस्कृतप्रचारविषये विचारविनिमयश्च सञ्जातः।

अद्यापि शाब्दिक - पयोनिधि - मन्थनानां
साहित्य - संस्कृति - समर्पित - जीवनानाम्।
आचार्यवर्य - रघुवीरमहोदयानां
सौम्याकृतिर्मम सदा हृदये चकास्ति॥ २३॥

अद्याप्यसौ वसति चेतसि मे. "विहारः
सारस्वतो" नगर - गौरव - गन्धवाहः।
यः स्वीय - सञ्चित - सुदुर्लभ - रत्नजातै-
राकर्षतीव हृदयं विदुषां जगत्याः॥ २४॥

नईदिल्लीनगरस्य हौजखास - सम्भागे सरस्वत्या वरदपुत्रैः स्वर्गीय-श्री डॉ० रघुवीरमहोदयैः स्थापितं सरस्वतीविहारनामकं संस्थानं न केवलं दिल्ल्याः, न केवलं भारतस्य, न केवलं एशियाखण्डस्य, प्रत्युत समस्तविश्वस्य कृते एकं महत्त्वपूर्णं सारस्वतं पीठं वर्तते। अत्र भारताद्बहिर्भूतेषु समस्तेषु एशियाखण्डस्थदेशेषु विद्यमानानां हस्तखितपुस्तकानां प्रतिलिपिस्वरूपेण अनुवादरूपेण च सुदुर्लभः संग्रहो वर्तते। बहवश्च इतो महत्त्वपूर्णाः सुदुर्लभाः ग्रन्था अपि प्रकाशिताः सन्ति। सम्प्रति एतस्य संस्थानस्य सञ्चालनं डॉ० रघुवीरमहोदयानां माननीया आत्मजाः डॉ० लोकेशचन्द्रमहोदयाः, पुत्रवधूः डॉ० शारदारानी तथा सुपुत्री डॉ० सुदर्शनादेवी चेत्यादयः कुर्वन्ति, संस्थानस्य अवशिष्टं कार्यंजातं च सम्पादयन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वप्रथमं मया यदा तेषां साक्षात्कारः सरस्वतीविहारे विहितस्तदा तैर्मम संस्कृतप्रचारकार्यस्य कृते महती प्रसन्नता प्रकटीकृता तथा इयमपि आकाङ्क्षा प्रकटीकृता यत् सरस्वतीविहारस्य सर्वे कार्यकर्तारः अपि संस्कृतज्ञास्तथा संस्कृते वक्तुं क्षमा भवेयुः।

अद्यापि पण्डितजनाऽर्यसमाजिमध्ये
मध्येसभं बहुविधे चलिते विवादे।
श्रीमाधवार्यविदुषां प्रतिपक्षिसंघे
वर्षन्ति वेधकवचांसि न विस्मृतानि॥ २५॥

अस्माकं देशे विंशशताब्द्या आरम्भतः प्रायः पञ्चाशद् वर्षाणि यावत् सनातनधर्मावलम्बिनां पण्डितानां तथा आर्यसमाज-मतावलम्बिनां विदुषां मध्ये धार्मिकं मतभेदमवलम्ब्य महता समारोहेण संरम्भेण च शास्त्रार्थसभाः प्रचलन्ति स्म। आसु सभासु उभयपक्षयोर्दिग्गजा वक्तारः शास्त्रार्थकुशलाश्च विद्वांसः सम्मिलिता भवन्ति स्म, परस्परविजिगीषया च स्वस्वपक्षान् प्रमाणपुरस्सरमुपस्थापयन्ति स्म। अस्मिन्नवसरे उभयपक्षयोर्जनता विपुलमात्रायामुपस्थिता भवति स्म, अवसरानुरूपं तालिकावादनेन च स्वस्वपक्षस्य वक्तुः उत्साहवर्धनं करोति स्म। इदं दृश्यं मया बहुषु नगरेषु बहुधा विलोकितम्।

एतस्मिन् वाङ्मये महारणे दिल्लीनिवासिनः श्री माधवाचार्यशास्त्रिणः सनातनधर्मस्य पक्षधराः, प्रबला वक्तारः शास्त्रार्थकलाकुशलाश्च आसन्। ते शास्त्रार्थे प्रबलैः प्रमाणैः, अद्भुताभिर्युक्तिभिः, अखण्डनीयैस्तर्कैः, वेधिकाभिर्व्यङ्ग्योक्तिभिश्च प्रतिपक्षिणामुपरि तथा प्रहारं कुर्वन्ति स्म यथा ते प्रभञ्जनप्रताडिता मेघा इव छिन्न-भिन्ना भवन्ति स्म। तादृशाः प्रसङ्गा अद्यापि स्मृता मम मनो रञ्जयन्ति।

अद्यापि सर्वविधधार्मिक-कर्मजातं
विज्ञान-तर्क-परिपूतमिति प्रमाणैः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रख्यापयन्तमनिशं परिषत्सु दीना-
नाथाख्यशास्त्रिणमहं सततं स्मरामि॥ २६॥
अद्यापि तं विबुधमण्डनमिश्रवर्य्यं
तं शास्त्रिणं च खलु लालबहादुराख्यम्।
नित्यं स्मरामि च नमामि, ययोर्बिभर्ति
सम्पूर्णसंस्कृतजगद् भृशमाधमर्ण्यम्॥ २७॥

अतीतेषु पञ्चाशद्वर्षेषु भारते संस्कृतप्रचारक्षेत्रे संस्कृतविद्यानामध्ययनाध्यापनक्षेत्रे च या महत्त्वपूर्णा प्रगतिर्जाता तत्र श्रीमतां डॉ० मण्डनमिश्रमहोदयानां तथा श्रीलालबहादुरशास्त्रिमहोदयानां सुमहद् योगदानं वर्तते। श्रीमण्डनमिश्रमहोदया अ०भा० संस्कृतसाहित्यसम्मेलनस्य महामन्त्रिणः आसन्। सम्मेलनमिदं १९९३तमे खृष्टाब्दे हरिद्वारनगरे महामनसां श्रीपण्डितमदनमोहनमालवीयमहोदयानां प्रेरणया म०म० श्रीशिवकुमार शास्त्रिवर्य्याणामध्यक्षतायां स्थापितम्। अनन्तरं म०म० श्रीगिरिधरशर्म-चतुर्वेदमहोदयानां मुख्यसञ्चालकत्वे केषाञ्चिद् महामन्त्रित्वे च सम्मेलनस्य प्रचारकार्याणि सम्पूर्णेऽपि देशे महता उत्साहेन प्राचलन्। परन्तु डॉ० मण्डनमिश्रमहोदयानां महामन्त्रित्वे सम्मेलनस्य कार्येषु यादृशी प्रगतिर्जाता न तथा पूर्वं कदाचित्। महता समारोहेण सम्मेलनस्य वार्षिकाधिवेशनानामायोजनम्, संस्कृतप्रचार - संस्कृतशिक्षापरिषद् - विद्वद्गोष्ठी-कविसम्मेलन-विद्वत्सम्मान-पुस्तकपत्रिकादिप्रकाशनादिकाश्च विविधा योजनाः प्रचाल्यमाना अभूवन्। संस्कृतसमाजे च सर्वत्र महान् सदुत्साहः समदृश्यत। परन्तु मिश्रमहोदयानां कार्यकाले सम्मेलनस्य सर्वाधिका विशिष्टा उपलब्धिरासीत् दिल्ल्यां केन्द्रीय-संस्कृतविद्यापीठस्य स्थापना। तदानीं देशस्य प्रधानमन्त्रिपदे श्रीलालबहादुरशास्त्रिमहोदया विराजमाना आसन्। तेषामेव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अगाधसंस्कृतस्नेहेन,परमौदार्येण, प्रचुरसाहाय्यदानेन च दिल्ल्यामियं विद्यापीठयोजना सफलतां गता। गाज़ियाबाद-संस्कृत-सम्मेलने विद्यापीठस्य कृते डॉ० मण्डनमिश्रमहोदयेन श्रीलालबहादुर-शास्त्रिणां पुरस्तात् प्रस्तावरूपेण यद् आनुमानिकं व्ययपत्रं (बजट) प्रस्तुतं तद् दृष्ट्वा श्रीशास्त्रिभिः कथितम्—'*इतने से क्या होगा? इसे दोगुना कीजिये।*' एवं मिश्रमहोदयेन संकोचवशाद् यद् स्वल्पं धनं याचितं तत् शास्त्रिमहोदयैः द्विगुणीकृत्य प्रदत्तम्। ततः पूर्वं दिल्लीनगरे राजधान्या अनुरूपं किमपि उल्लेखनीयं संस्कृतशिक्षणकेन्द्रं नासीत्। परं विद्यापीठस्य उद्घाटनेन तस्य महतोऽभावस्य पूर्तिर्जाता। अत्र महाविद्यालयैः सह संस्कृतस्यापि शिरः समुन्नतमजायत। तत्पश्चात् शनैः शनैः देशस्य विभिन्नेषु प्रदेशेषु अनेके विद्यापीठाः स्थपिताः येन संस्कृतशिक्षायामपि एकं नूतनमाकर्षणं समुत्पन्नम्। भव्यानि भवनानि, रमणीयः परिसरः, नूतना शिक्षणपद्धतिः, अनुसन्धानस्य योजना, पुस्तकालयस्य व्यवस्था, पत्र-पत्रिकाणां ग्रन्थानां च प्रकाशनम्, दीक्षान्तसमारोहः, विद्वद्गोष्ठीनां संस्कृतसंगीतनाटकादि-सांस्कृतिककार्यक्रमाणां समायोजनं चेत्यादीनि विद्यापीठानामाक-र्षकाणि कार्याण्यासन्। उपर्युक्तैः कार्यक्रमैः विद्यापीठानि लघुविश्व-विद्यालयरूपाणि प्रतिभान्ति स्म। इदानीं तु तेषु क्वचित् क्वचिद् अधिकापि समृद्धिर्दृष्टिगोचरीभवति। इदं च सर्वं डॉ० मण्डनमिश्र-महोदयानां चिन्तनायाः, प्रयासस्य, कठोरपरिश्रमस्य तथा श्रीशास्त्रि-महोदयानां संस्कृतनिष्ठायास्तथा हार्दिकसहयोगस्य फलमासीत्। एतेन सम्पूर्णमपि संस्कृतजगद् एतयोराधमर्ण्यं वहति स्म।

परन्तु महतः कष्टस्य घटना समजायत यद् इमौ द्वावपि संस्कृतस्य पुण्यश्लोकौ महापुरुषौ अकाल एव कालकवलितौ जातौ। द्वावपि मम परमादरणीयौ प्रधानौ सदा सश्रद्धं स्मर्येते, वन्द्येते प्रणम्येते च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिल्लीनिवासिविदुषां सुहृदां बहूना-
मद्यापि मां स्मृतिगतानि विमोहयन्ति।
तानि स्मितानि हसितानि सुभाषितानि
सुस्वागतानि चकितानि विलोकितानि॥ २८॥

दिल्लीयात्रा मम विविधैः प्रयोजनैरनेकवारमजायत। तासु तासु च यात्रासु सौविध्यवशान्मया विविधासु संस्थासु तथा तत्तद्भागस्थितानां बहूनां विदुषां, परिचितानामपरिचितानाञ्च गृहे निवासस्य आतिथ्यलाभस्य च शुभावसरः सम्प्राप्तः। तत्र संस्थासु दिल्लीनगरस्य बेलारोडस्थिते दक्षिणामूर्तिमठद्वारा च सञ्चालिते श्रीविश्वनाथसंस्कृतमहाविद्यालये तस्य प्रधानाचार्याणां श्रीस्वामि-विद्यानन्दगिरिमहोदयानां सौजन्येन मया मासद्वयं निवासः कृतः। मठ एव च मम सर्वापि भोजनपानादिव्यवस्था विहिता आसीत्। ततः परमेकदा बेलारोडस्थिते एव तिब्बतशिक्षास्थाने तस्य प्रधानाचार्याणां परिवारेऽपि अनेकानि दिनानि सर्वविधसुख-सौविध्यलाभपूर्वकं मया निवासो विहितः। हनुमानरोडस्थिते आर्य-समाजमन्दिरेऽपि मम संस्थानस्य सहयोगिनः श्रीभारद्वाजपाण्डेयस्य पत्नी-पुत्र-पुत्री-समलंकृते कुटुम्बेऽपि अतिशयश्रद्धा-समादरपूर्वकं बहुधा निवास-सुखं समुपलब्धम्। अथ च विद्वज्जनेषु येषां परिवारे स्थित्वा मया प्रचारकार्यं विहितं तेषां नामानि कृतज्ञतया सह अधस्तादुल्लिख्यन्ते—

१. पं० श्रीपद्मनाभशास्त्रिणः-भारतीविद्याभवने संस्कृताध्यापकाः,
२. डॉ० मण्डनमिश्रमहोदयाः, अ०भा०सं० सम्मेलनम्,
३. डॉ० श्रीशिवनारायणशास्त्रिणः-किरोडीमलविद्यालये (संस्कृत-विभागाध्यक्षाः),
४. डॉ० श्रीरमाकान्तशुक्लमहोदयाः-देववाणीपत्रिकासम्पादकाः,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५. डॉ० श्रीकाशीनाथतिवारीमहोदयाः-राष्ट्रियसंस्कृतसंस्थाने उपनिदेशकाः

६. डॉ० श्रीरसिकबिहारीजोशीमहोदयाः, } देशविदेशयोः
७. डॉ० श्रीसत्यव्रतशास्त्रिमहोदयाः, } सुविख्यातौ विद्वांसौ

८. श्रीसन्तोषकुमारशुक्लः शोधच्छात्रः,

९. शास्त्रार्थमहारथिश्रीमाधवाचार्यशास्त्रिमहोदयाःशक्तिनगरम्,

१०.आचार्यश्रीरामदयालुसिंहमहोदयाश्च, संस्कृतसेवा-संस्थानम्, श्रीरामगली, दिल्ली-७

एतेषु विद्वत्सु श्री डॉ० काशीनाथतिवारीमहोदयानां निवासे प्रियशिष्येण श्रीसन्तोषकुमारशुक्लेन सह बहुधा निवसतो मम तिवारिमहोदयानां मधुरव्यवहारेण, सस्मितेन आलापेन, ललित-हिन्दी-उर्दू-संस्कृतकवितानां श्रवणेन च मम अत्यधिकः प्रमोदः संजायते स्म।

११. डॉ० रघुवीर, सरस्वतीविहार, हौजखास एनक्लेभ, नई दिल्ली-२७

१२. डॉ० माधव पाण्डुरंग डेग्वेकर, विश्वहिन्दूपरिषद्, करोलबाग, दिल्ली

१३. डॉ० कमलारत्नम्, न केवलं दिल्यामपितु भारते प्रसिद्धा एका अध्यापिका, लेखिका, कवयित्री च संस्कृतविदुषी महिला।

१४. आनन्दवर्धनरामचन्द्ररत्नपारखी, विद्यालंकार महोदयाः, (१४७, सरोजनी नगर, नई दिल्ली)।

एते रत्नपारखीमहोदयाः मम समग्रेऽपि भारते एके अद्वितीया अतिथिसत्कर्तारो दृष्टाः। इमे न केवलं स्वयं समागतान् अतिथीन् सत्कुर्वन्ति प्रत्युत अतिथीन् आहूय आहूय च सत्कुर्वन्ति स्म। एकदाहं संस्कृतसम्मेलने भागं ग्रहीतुं गाजियाबादनगरं गतवान् तथा सर्वेषु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्यक्रमेषु भागमपि सुष्ठुरूपेण गृहीतवान्। तस्य फलं किं जातम्। रत्नपारखीमहोदयाः सभाया विसर्जने जाते मत्समीपमागत्य अतिस्निग्धवचसा प्रोक्तवन्तः—"विद्वन्! यदि दिल्लीं गत्वा तत्र कानिचिद् दिनानि स्थातुं दिल्ल्यां च भ्रमितुं समीहा भवेत् तर्हि मया सह निःसंकोच्चमनेन यानेन चलन्तु मद्गृहे निवासं च कुर्वन्तु।" पुनरग्रे तैः प्रोक्तम्—"मम पत्नी अपि मामवोचत्—यदि सभायां समागतः कश्चिद् विद्वान् सज्जनः सरलः सुशीलः संस्कृतप्रचारकश्च भवेत् तर्हि स आगृह्य स्वगहमानेतव्यः। तेन गृहस्य वातावरणं संस्कृतमयं भविष्यति। का हानिः इति।" इदं सर्वमश्रुतपूर्वं श्रुत्वा मम महदाश्चर्यं समजायत। अयं च तस्य प्रस्तावो मत्कृते परमप्रिय एवासीत्। अतोऽहं दैवादिमं संयोगं प्राप्तं मत्वा तेन सह दिल्लीं प्रस्थितो दश दिनानि च तत्र स्थित्वा तेषु दिनेषु सपरिवारैः रत्नपारखीमहोदयैः दिनपर्यन्तं चिरप्रसन्नमुद्रया च यथाहं भोजितः पायितः शायितः भ्रामितश्श्चेति तत्स्मृतिपथे विराजते।

पुनश्च पारखीमहोदया अत्यन्तं सरले सुललिते च संस्कृते वदन्ति स्म लिखन्ति स्म च। वाणी च तेषां कीदृशी मृदुला स्निग्धा रसभाववती भवति स्मेति लेखनेन न निरूपयितुं शक्यते। मम यात्राया इदमेकमनुपमं सर्वथा अविस्मरणीयमुदाहरणं वर्तते।

दिल्लीप्रशस्तिः—

जन्मस्थली विविधसंस्कृतिशासनानां
साक्ष्यस्थली जयपराजयविप्लवानाम्।
देशे समस्तजनपौरुषमानवल्ली
दिल्ली चिरं जयतु भारतभाग्यलक्ष्मीः॥ २९॥

★

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १० :

नागाप्रदेशीयानि संस्मरणानि

कोहिमा—

अद्यापि तानि मनसो न गतानि भीत्या
किञ्चिन्निलीय कपटेन निरीक्षितानि।
गोलानि लोल - मणिकुण्डल - मण्डितानि
नागाप्रदेश - रमणी - मुखपङ्कजानि॥ १॥

१०.५.६४ दिनाङ्के डिमापुरस्थानात् प्रातः षड्वादने बसद्वारा प्रस्थितोऽहं वनानि पर्वतीयप्रदेशांश्च अवलोकयन् द्वादशवादनवेलायां नागालैण्डराजधानीं कोहिमानगरं प्रासवान्। ततः पूर्वयोजनानुसारमहं तत्रत्य-हाईकमिश्नरमहोदयानामावासं गत्वा नित्यक्रियां भोजनादिकं च विधाय एकेन पुलिसजनेन सह भ्रमणार्थं बहिर्निर्गतवान्।

तत्रत्येषु आपणेषु विपणिषु च नागानरनारीणां स्वरूपस्य, वेषभूषादीनां, शरीरमण्डनस्य च अवलोकनं प्रथमं चिरवाञ्छितं कृत्यमासीत्। परन्तु तत्र नागानारीणामत्यन्तमनोहरे मुखमण्डले नागापुरुषाणां घातभयात् साक्षात् दृष्टिपातः सुशको न भवति। अतः किञ्चित् गुप्तरूपेणैव व्याजेन वा तद्दर्शनलालसा शमयितुं शक्यते। येन नागापुरुषा इदं ज्ञातुं न शक्नुयुः। अतो मयाऽपि निलीयैव तथा विहितं नागानारीणां च सर्वं बहिरङ्गमवलोकितम्।

नागाप्रदेश अखिले बलवत्तराणां
ग्रामप्रधान इति नामजुषां जनानाम्।
द्वारेषु वंशशिखरस्थित-मुण्डमाला
अद्यापि मे स्मृतिगता जनयन्ति भीतिम्॥ २॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नागाप्रदेशस्य इयं परम्परा वर्तते यद् ग्रामेषु ये बलवत्तरा ग्रामप्रधाना भवन्ति तेषां द्वारेषु दीर्घ-दीर्घाणां वंशानां शीर्षभागे मारितजन्तूनामनेका मुण्डमाला अवलम्बिता भवन्ति। तत्तेषां शौर्यस्य परिचायकं भवति। नागाप्रदेशनिवासिनां ग्राम्यजनानां कृते कस्यापि हिंसा साधारणं कार्यं भवति, अतस्तत्र मुण्डमालानां बाहुल्यं सर्वथा संभवं भवति।

एतत्फलस्य तव किं ननु मूल्यमेवं
पृष्टेऽङ्गुलीर्गणनया परिदर्शयन्तीः।
ताः कोहिमाऽपणगता नवनागकन्या
अद्यापि कौतुककरीः समुदं स्मरामि॥ ३॥

नागाप्रदेशे सामान्यमहिलाजनेषु शिक्षायाः प्रायेण भूयान् अभाव आसीत्। ता न किञ्चित् लिखितुं जानन्ति स्म न वा गणयितुमेव। अतः आपणे अस्य फलस्य किं मूल्यमिति पृष्टे ता अङ्गुलिगणनयैव मूल्यं फलसंख्यां च कथयन्ति स्म। हिन्द्यां च वाक्यमिदं वदन्ति स्म "बहुत अच्छा है, बहुत मीठा है" इति। अहं तत्र ताः अवलोकयितुं तथा तासां वाणीमेव च आकर्णयितुं कानिचित् फलानि क्रीणामि स्म। तन्मह्यं बहु कौतुकावहं मोदावहं च प्रतिभाति स्म।

अद्यापि दूरतरवर्ति - वनप्रदेशे
नागाजनान् यमनिभानिव भीमकायान्।
हन्तुं कमप्युपगतं धृतहस्तशस्त्रान्
स्मृत्वा भयादिव सरामि विवृत्तनेत्रः॥ ४॥

न केवलं वन्यप्रदेशे प्रत्युत नगरेषु ग्रामेषु च भीमकाया बलिष्ठाः शस्त्रधारिणः अर्धनग्नाश्च नागाजना यदि दृष्टिपथमायान्ति तदा अपरिचितानां महती भीतिर्जायते। तेषामक्षिभिः सह अक्षिमेलनं तु अत्यन्तं त्रासकरं भवति, घातकं च भवितुमर्हति। अतो भिन्नप्रदेशीया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जना यात्रिणश्च दूरादेव अपसर्पन्ति तेभ्यः। अहन्तु हाईकमिश्नर-महोदयस्य रक्षकजनेन सह भ्रमणं करोमि स्म अतो मम कापि भीतिर्न भवति स्म।

अद्यापि ताः पठितुमिच्छति मानसं मे
भाषाप्रियं सुकठिना अपि नागभाषाः।
याः स्वल्पदूर अपि भूरिभिदं भजन्त्यः
पुंसां मनो विमुखयन्ति मनागधीतेः॥ ५॥

समस्ता अपि भारतीयभाषाः परिचेतुं परिज्ञातुं पठितुं च सौभाग्यवशात् मम लघुच्छात्रावस्थात एव ब्रलवती स्पृहा आसीत्। तदर्थं च प्रयासे कृते मम उत्तरभारतीयानां दक्षिणभारतीयानाञ्चापि भाषाणां न्यूनाधिकरूपेण परिज्ञानं पठितुं च कापि शक्तिर्जाता। परन्तु नागाप्रदेशभाषाः प्रायेण स्वल्पदूरेऽपि भिन्ना भवन्तीति तासां परिज्ञानं बहुप्रयाससाध्यं भवति। यद्यपि नागाप्रदेशीयभाषाणां शिक्षणाय शासनद्वारा नागाप्रदेशराजधान्यां कोहिमानगरे "नागाप्रदेशभाषा-परिषद्" नाम्ना एका संस्था सञ्चालिता वर्तते। ततश्च व्याकरण-कोष-वाक्यावली-कथाविषयकाणि बहूनि पुस्तकानि प्रकाशितानि सन्ति, तासां लिपिश्चापि देवनागरी एवास्ति तथापि तासां शिक्षा साहसिकमेव कार्यं भवति। अतो मयापि तत्र काचित् सफलता न लब्धा, अद्यापि तदर्थं बहुधा मे मनसि तरङ्गा उत्पद्यन्ते।

सम्प्रति यासां नागाभाषाणां, कासाञ्चिद् आदिवासिभाषाणाञ्च शिक्षणोपयोगीनि पुस्तकानि प्रकाशितानि सन्ति तासां भाषाणां वर्णक्रमानुसारं नामावली अधस्तात् लिख्यते जिज्ञासूनां हिताय।

अंगामी	चकमा	बोकार	सिमते
आओ	चाह	बोडो	सेमो
आदी	जेलियाग	माओ	हमार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आपतानी	तण्वे	मेम्बा	मुण्डारी
उराँव	दिमासा	मिजो	सन्ताली
कुकी	नागामी	मिदी	हो इत्यादयः।
खासी	पाइते	लेपचा	
खेजा	पोचुरी	लोथा	
गारो	फोम	वाङ्चो	

मम संस्थाने इतोऽप्यधिकभाषाणां शिक्षणोपयोगीनि पुस्तकानि संगृहीतानि सन्ति। यदि कश्चित् जनः संस्कृतप्रचारार्थं तस्मिन् क्षेत्रे गच्छति तर्हि तस्य कृते एतासां भाषाणां स्वल्पोऽपि परिचयो लाभकरो भविष्यति। अत एवाऽयं मया संग्रहो विहितः।

नागाप्रदेशे इदानीं वातावरणे परिवर्तिते जाते संस्कृतपण्डितैः, धर्माचार्यैः, कथावाचकैः, कीर्तनकारैश्च अवश्यं गन्तव्यम्, भ्रमितव्यञ्चेति राष्ट्रहितदृष्ट्या मे परमावश्यकं प्रतिभाति।

अद्यापि भारतनिवासकृतां जनानां
नागाजनैः सह ममत्वविवर्धनाय।
आमोद - गीत - रमण - भ्रमणादिकानि
पानाशनानि च भवन्ति मुदा स्मरामि॥ ६॥

येषु दिनेषु अहं नागाप्रदेशं गतवान् तेषु दिनेषु नागाजनानां भारतं प्रति, भारतीयाधिकारिणः प्रति, भारतीयजनांश्च प्रति महती दुर्भावना द्वेषबुद्धिश्च आसीत्। ते अवसरं प्राप्य सदैव तेषां ताडनम्, अपहरणं, हत्याञ्च कुर्वन्ति स्म। तदा तेषामनेन क्रूरव्यवहारेण दुश्चेष्टया च चिन्तान्वितेन भारतशासनेन इयं नीतिर्निर्धारिता यत् तत्रत्या अधिकारिणः, पुलिसजनाः, भारतीयजनाश्च नागाजनैः सह तथा सद्भाव-स्नेह-सौहार्द-भ्रातृत्वपूर्वकं व्यवहारं कुर्वन्तु, तैः सह तथा खादन्तु, पिबन्तु, खेलन्तु, हसन्तु, गायन्तु, नृत्यन्तु, तेषां समारोहेषु च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्मिलिता भवन्तु येन तेषां भावनायां बुद्धौ व्यवहारे च परिवर्तनं भवेत्। तदारभ्य एतन्नीत्यनुसारमेव भारतीयैर्व्यवहर्तुमारब्धम्। एतेन ततः परं नागाप्रदेशे किञ्चित् शान्तिमयं स्नेहसद्भावनापूर्णं च वातावरणं समुत्पन्नम्। तद् ज्ञात्वा महती प्रसन्नता जायते। भीतिश्च तेषां समाजे गमनागमने किञ्चिद् व्यपगता।

एतस्य एकमुदाहरणं मया मार्गे एव प्रत्यक्षीकृतम्। अहं यदा डिमापुरात् कोहिमां प्रति बसयानेन प्रस्थानं कृतवान् तदा तत्रैव मया इदं दृष्टं यत् एकः पुलिसजनः स्वयमेकं सिगरेटं पिबन् अपरमेकं तत्पार्श्वस्थितायै एकस्यै नागकन्यायै दातुमैच्छत्। ततः सा कन्या तद् ग्रहणादनिच्छां प्रकटितवती, परं सस्मितेन वदनेनैव। तथापि तत्र स्थितान् नागयुवकान् दृष्ट्वा मम महती भीतिर्जाता। कदाचित् कुपिता नागयुवका अस्माकं ताडनं कुर्युरिति। स पुलिसजनः एकः भोजपुरीभाषाभाषी आसीत्। ततो मया भोजपुर्यामेव तथा करणात् निवार्यमाणः स मां हसन् प्रावोचत्—"*बाबाजी, डेराईं मत। सरकार के एह घरी ईहे नीति वा*"।

डिमापुर—

स्वल्पं जलं, लघु च पात्रमनेकलोकाः
शौचालयाश्च विरला न च काऽपि शुद्धिः।
अद्यापि तत् खलु डिमापुरपान्थशाला-
कष्टं स्मृतं मनसि कौतुकमातनोति॥ ७॥

मणिपुरगमनकाले डिमापुरस्टेशने या मया एका निशा अतिवाहिता यथा च प्रातःकालीना नित्यक्रिया सम्पादिता तत्सर्वमभूतपूर्वमासीत्। रात्रौ आपणे कुत्रापि मत्स्यमांसलशुनपलाण्डुवर्जितं शुद्धं भोजनं न प्राप्तम्। प्रातःकाले शौचस्नानादिनित्यक्रियायां च यदसौविध्यं कष्टं चानुभूतं तत्सर्वमेव श्लोकेऽस्मिन्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सङ्केतितं वर्तते। पान्थशालायां यात्रिणां जनानां बाहुल्यम्, शौचालयाः स्वल्पाः, पात्राण्यपि स्वल्पानि, तान्यपि लघूनि लघूनि, जलस्यापि न्यूनता, शौचालये गमनार्थञ्च अहमहमिका, तत्रापि नागाजनानां प्राबल्यम्, तेन सर्वत्र शुचिताया अभावः, बीड़ी-सिगरेट-पानस्य प्राचुर्येण धूमस्य गन्धस्य च प्रदूषणञ्चेत्यादयो बहुला अवर्णनीया असुविधाः अनुभूताः। अद्यापि तत् सर्वं स्मृत्वा शिरः कम्पते मनश्च विक्लवतां प्रयाति। अत्राहं ९-५-६४ दिनाङ्के प्रातः गौहाटीतः प्रस्थाय सायं प्राप्तवान् आसम्।

मोकाङ्गचुङ्ग—

अद्यापि नागकुल-बालकबालिकानां
दैवीं गिरं समवकर्ण्य सुविस्मितानाम्।
साकूत - सस्मित - परस्परवीक्षितानि
हृष्टानि चापि वदनानि सदा स्मरामि॥ ८॥

एकदा नागालैण्डवर्तिनो मोकाङ्चुङ् स्थानस्य एकस्मिन् विद्यालयेऽहं तस्य प्रधानाध्यापकेन संस्कृते भाषणार्थं सानुरोधं निमन्त्रितः। परं संस्कृतनाम्नाऽपि अपरिचितानां नागाबालक-बालिकानां पुरतः संस्कृतभाषणस्य किं फलं भविष्यतीति चिन्तयाऽहं प्रथमं तन्निमन्त्रणस्वीकारं कर्तुं नाऽपारयं, परन्तु "संस्कृतभाषणं श्रुत्वा नागाविद्यार्थिनोऽपि संस्कृतभाषया परिचितास्तथा कदाचित् संस्कृत—पठनेऽपि रुचिमन्तो भवेयुस्तर्हि महान् लाभो भविष्यति" इति प्राचार्यमहोदयस्य तर्कं श्रुत्वाहं भाषणं कर्तुमङ्गीकृतवान्। भाषणकाले तु इदं दृष्ट्वा मम महती प्रसन्नता जाता यद् बालका अर्थमनवगच्छन्तोऽपि परस्परं सस्मितवीक्षणेन भाषणं श्रुतवन्तः। मया च तत्र गमनं, भाषणं, नागाजनैर्मिलनं च सर्वथा सफलममन्यत मोदावहं च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आसीदियं बलवती मम कामना यत्
अत्रापि संस्कृतहिताय करोमि किञ्चित्।
शक्यं परन्तु तदभून्नहि नागभोते-
रद्यापि तन्मम मनस्तुदतीव नित्यम्॥ ९॥

नागाप्रदेशं प्रति गमनकाले गौहाटीनगर एव कोहिमानगरेऽपि एकां संस्कृतसभां कर्तुं तथा संस्कृतप्रचाराय यया च किमपि सङ्घटनं रचयितुं संकल्पितमासीत्। परन्तु अत्रागत्य नागाजनानामुपद्रवभयात् तत्सर्वमपि चिन्तितं कार्यरूपे परिणतं कर्तुं न पारितम्। तत्रत्या स्थितिरेतादृशी आसीत् यत् नागाजनानां हितायापि यदि काचित् संस्था वा शासनं वा किमपि कर्तुमिच्छति स्म तर्हि नागाजनास्तत् स्वविरुद्धं किमपि षड्यन्त्रं मत्वा तत्कार्यकर्तॄणामपहरणं हत्यां वा कुर्वन्ति स्म। संस्कृतप्रचाराय क्रियमाणं कार्यं तु तेषां हितावहमपि नासीत्। अतस्तत्र तेषामाशंका द्वेषवुद्धिर्वा सर्वथा स्वाभाविकी आसीत्। अतस्तत्रत्यैः संस्कृतानुरागिभिरपि जनैर्वारितोऽहं तं संकल्पमेव तदानीं भयात् परित्यक्तवान्।

नागाप्रदेश-प्रशस्तिः—

भाषा - स्वरूप - वसनाशन - पानगीतै-
र्नृत्यैश्च हास्यमुदितैर्विविधैर्विचित्रैः।
सर्वस्य चेतसि चमत्कृतिमादधाना
नागाप्रदेश-धरणी नहि कस्य रम्या॥ १०॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: ११ :

पञ्चनदप्रदेशीयानि संस्मरणानि

अमृतसर—

सद्गायकप्रवरवृन्दें - मुखोद्गतानि
सामांन्यतो द्विगुणित - स्वर - झङ्कृतानि।
श्रीस्वर्णमन्दिर उदारगुरूक्तगीता-
न्यद्यापि मामकमनः परिरञ्जयन्ति॥ १॥

स्वर्णमन्दिरे प्रतिदिनं प्रातः गायकैर्भक्तजनैः यद् गुरुवाणीनां कीर्तनं भजनं गायनं भवति तदत्यन्तं श्रुतिमनोहरं चित्ताकर्षकं श्रद्धासद्भाववर्द्धकं च भवति। अमृतसरनिवासकाले मया प्रतिदिनं तत्र गत्वा तेषां कीर्तनभजनादीनां श्रवणस्यानन्दोऽनुभूयते स्म।

श्रीस्वर्णमन्दिर - समर्चन - दर्शनार्थम्
अभ्यागतान् झटिति पाययितुं पयांसि।
अद्यापि सिक्खमहिला धृतपात्रहस्ताः
सेवाव्रताश्च विनताश्च सदा स्मरामि॥ २॥

अमृतसरस्थितस्य स्वर्णमन्दिरस्य अनितरमन्दिरसाधारण-मिदमेकं समुल्लेखनीयं वैशिष्ट्यं वर्तते यत् तत्र दर्शन-पूजानाद्यर्थं सर्वदैव समागच्छतो भक्तजनान् जलं पाययितुं सरोवरं परितो बह्व्यः पानीयशालिका निर्मिताः सन्ति यासु स्थित्वा तिस्रो तिस्रो महिलाः परिक्रमां कुर्वतः सर्वानपि पिपासून् जनान् अतिश्रद्धया प्रेम्णा च जलं पाययन्ति। तत्र तिसृणामपि पायिकानां त्रीणि कार्याणि भवन्ति। एका पिपासवे रिक्तं पानपात्रं (गिलास) ददाति, अपरा तत् जलेन पूरयति, तृतीया च तत् पात्रं प्रक्षालयति। एवमयं क्रमः सदा चलति, वेगेन च चलति तेन केनापि प्रतीक्षा करणीया न भवति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतदतिरिक्तम्, इदमप्यत्र एकं विशिष्टं दृश्यं अदृष्टपूर्वं मम दृष्टिपथमागतं यत् बहवो वयोवृद्धाः सम्मानिताश्च सिक्खमहानुभावाः स्वकीयैः उष्णीषैः तत्परिसरस्य धूलिसम्मार्जनं कुर्वन्ति। एतादृशी भक्तिः श्रद्धा च अन्यस्मिन् कस्मिन्नपि समाजे न दृश्यते।

अद्यापि मेऽमृतसरः - स्थितकालरूपं
संस्मृत्य कूपमखिलो ज्वलतीव देहः।
यत्रैकदैव शतशो मनुजाः पतित्वा
प्राणान् ददुर्वृटिशशासकदण्डभीताः॥ ३॥

पञ्चनदप्रदेशवर्तिनो विश्वप्रसिद्धस्य अमृतसरनगरस्य 'जालियाँवाला बाग' नामकं स्थानं "शहीदस्मारक" नाम्ना सुप्रसिद्धं वर्तते राष्ट्रीयेतिहासे। इदमेव तत् स्थानं यत्र १३ अप्रैल १९१९ दिनाङ्के राजनीतिकसम्मेलने भागं ग्रहीतुं समागतानां भारतीयजनानामुपरि जनरल डायरः गुलिकां चालितवान् येन द्विसहस्राधिका जनास्तत्रैव प्राणान् त्यक्तवन्तः। तस्मिन्नेव स्थाने एको बृहत् कूपो वर्तते यस्मिन् पतित्वा भूयांसो जना मृत्युं गताः। "जालियाँवाला बाग" स्थानं तादृशं वर्तते यत् परितो भवनानां भित्तयो वर्तन्ते, गमनागमनाय च एकं लघुद्वारं वर्तते येन गुलिकाप्रहारकाले कोऽपि पलायितुम् अपि न शशाक। अतएव बहवो गुलिकाभिर्हताः अपरे च कूपे पतिताः प्राणांस्तत्यजुः। तत् सवमपि वृत्तं तत्र शिलाफलके लिखितं वर्तते तथा कूपश्च सः तथैव साक्षिरूपेण सुरक्षितो वर्तते। तदिदं सर्वमवलोक्य, भित्तीनामुपरि गुलिकाप्रहाराणां चिह्नानि च सहस्राधिकानि दृष्ट्वा सर्वेषामपि दर्शकानां हृदये सुमहान् क्षोभो जायते क्षणं च ते चित्राङ्किता इव तिष्ठन्ति।

खन्ना—

खन्नापुरस्थितममुं खलु देवभाषा-
विद्यालयं सुरुचिरं सततं स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि यस्य बहु-संस्मरणानि चेतः
प्रोत्साहयन्ति रमयन्ति च रञ्जयन्ति॥ ४॥

पंजाबवर्तिनि खन्नानगरे सरस्वतीसंस्कृतमहाविद्यालय-नामकमेकं सुविशालं लोकप्रतिष्ठितं च संस्कृतविद्याप्रतिष्ठानं विराजते। लुधियानातः १३.७.७० दिनाङ्के अहमत्र सम्प्राप्तः। पंजाबप्रदेशस्य संस्कृतविद्यालयेषु अयमेव महाविद्यालयः सर्वश्रेष्ठो मन्यते स्म। अस्य विद्यालयस्य लब्धावकाशाः प्राचार्याः श्रीविश्वनाथप्रभाकरशास्त्रिमहोदया वयसा, स्वरूपेण, ज्ञानेन, वेषभूषया च ऋषिमहर्षिसादृश्यं भजमाना अदृश्यन्त। एवमेव ते लौकिकेषु कार्येष्वपि नितान्तं कुशला आसन्। खन्नागमनात् पूर्वं मया भ्रमणे बहूनि पुस्तकानि प्राप्तान्यासन्। तानि अहं डाकद्वारा वाराणसीं प्रेषयितुकाम आसम्। परं कथं तत् प्रेषणीयमिति मम चिन्ता आसीत्। इदं ज्ञात्वा शास्त्रिवर्यैरुक्तम्–"अत्र चिन्ता किमर्थं क्रियते? दीयन्तां सर्वाणि पुस्तकानि। अहं शीघ्रमेव तानि चटवस्त्रे सम्यग् बद्ध्वा, बृहत्सूच्या सम्यक् सीवित्वा, उपरि च स्पष्टाक्षरैः सम्यक् संकेतं लिखित्वा सर्वं सन्नद्धं करोमि। ततश्च छात्रद्वारा पत्रालयं प्रेषयामि। भवान् निश्चिन्तो भवतु। एवमुक्त्वा शास्त्रिवर्यैस्तथैव सर्वं सम्पादितम्। इदमेतादृशं संस्मरणं मम जीवनस्य प्रथमं विद्यते। द्वितीयमिदं यत् शास्त्रिमहोदयेषु सेवानिवृत्तेषु तेषां निवासाय तत्रत्यैस्तेषां शिष्यैरेव द्रव्यसंग्रहं विधाय एकं नूतनं सुन्दरं च भवनं निर्मापितं यत्र ते सुखं निवसन्ति स्म, व्याकरणदर्शन-निबन्धादिविषयेषु ग्रन्थांश्च लिखन्ति स्म। छात्राणामेतादृशी गुरुभक्तिः श्रद्धा सेवा च न मया अन्यत्र कुत्रापि दृष्टा श्रुता वा।

गोपालमोदकमवैति भवान्? श्रुतं वा
नामास्य? भुक्तमथवेति गिरं वदित्वा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत् पण्डितः खलु पलाण्डुमदर्शयन्माम्
अद्यापि तद् वितनुते हृदि कौतुकं मे॥ ५॥

खन्नाविद्यालये निवासस्य इदमप्येकं मनोरञ्जकं वृत्तं विद्यते। तत्र यदाऽहं पण्डितैर्भोजनार्थमाहूतस्तदा एकेन अहं पृष्टः—अपि भवान् भोजने गोपालमोदकस्य उपयोगं करोति? मया तु इदमश्रुतपूर्वं नाम श्रुत्वा तद्विषये अनभिज्ञता प्रकटीकृता। कथितं च, किमेतद् भवति? अहन्तु न जानामि। इदं नामापि मया अद्यैव श्रुतम्! तदा एकेन स्वस्यूतात् (पाकिट) पलाण्डुं निस्सार्य सस्मितं कथितम्—इदं गोपालमोदकं वर्तते। तद् वृत्तं साम्प्रतमपि मम स्मृतिगतं सत् हास्यं विनोदं किञ्चिद् विस्मयं च जनयति।

चण्डीगढ़—

तत् स्थानमस्ति निकटे बहु, नातिदूरे,
नो भीयतां, व्रजतु फल्गु पदातिरेव।
अद्यापि मद्हितकरं वचनं तदुक्तं
"श्रीहंसराज" विदुषां सततं स्मरामि॥ ६॥

पंजाबभ्रमणार्थं दिल्लीतो निर्गत्य सर्वप्रथममहं २२.६.७० दिनाङ्के बसयानद्वारा सायं चण्डीगढ़ं प्राप्तवान्। ततो बसस्थानात् पूर्वनिश्चयानुसारं निवासबुद्ध्या पंजाबविश्वविद्यालये संस्कृत-प्राध्यापकानां डॉ० हंसराजमहोदयानां गृहं गतवान्। सौभाग्य-वशात्तदानीं ते गृहे एव उपस्थिता मिलिताः। मम परिचयप्राप्त्यनन्तरं तैर्महता आदरेण मम स्वागतातिथ्यं विहितं, मम निवास-भोजन-पानव्यवस्था विहिता तथा स्वगृहइव यथेच्छं निवासाय स्वीकृतिः प्रदत्ता। तेषां सर्वविधसुखमयसामग्रीपरिपूर्णे सुरम्ये भवनेऽहं दश दिनानि सानन्द स्थित्वा दूरवर्तिषु समीपवर्तिषु च बहुषु दर्शनीय-स्थानेषु प्रतिदिनं भ्रमणं करोमि स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र तेषामयमेको विशेषो मया दृष्टो यत् ते किमपि स्थानं दूरवर्ति न कथयन्ति स्म। कुत्रापि गन्तुं प्रवृत्तोऽहं यदा तान् "इदं स्थानं कियद्दूरे वर्तते" इति पृच्छामि स्म तदा ते तत्क्षणं कथयन्ति स्म— "चिन्ता न कार्या, अतीव समीपे वर्तते, यानस्य आवश्यकता नास्ति, वृथा बहु रूप्यकाणि ग्रहीष्यन्ति, एतावद्दूरं भवान् पदातिरेव गन्तुं शक्नोति" इति। अहं च संकोचवशात् तथैव प्रवर्ते स्म। पदातिरेव च दूरे दूरे गच्छामि स्म।

अथेदानीमपि तानि तेषां वचनानि मुहुर्मुहुर्मे स्मृति-पथमायान्ति, प्रीणयन्ति प्रसादयन्ति च मां नितराम्।

अद्याप्यहं द्वयमिदं सततं स्मरामि
श्रीहंसराजसुधियां भवनस्य वृत्तम्।
एकश्च मे निवसतिर्भवने विशाले
अन्यच्च चन्द्रकरशीतजलस्य पानम्॥ ७॥

पुनश्च हंसराजमहोदयानामन्यदपि द्वयं वृत्तं सदा मम स्मृतिपथे विराजते। एकन्तु इदं यत्तेषां भवनं बहु विशालमासीत्। तत्र अनेके प्रकोष्ठा आसन्। परं तैरेकोऽपि प्रकोष्ठः भाटकं गृहीत्वा कस्मैचित् न दीयते स्म। तेषां परिवारोऽपि तत्र न निवसति स्म। अतस्तैः सर्वेऽपि प्रकोष्ठा ममैव पूजा-जलपान-भोजन-शयन-स्वाध्याय-मिलनादीनां कृते निर्धारिताः। तेन तेषां भवने मया राजभवनसुखमनुभूयते एव। पुनश्च ते सदा चन्द्रकिरणशीतलं जलं पिबन्ति स्म मामपि च तदेव पाययन्ति स्म सदा एवं च एतद् द्वयमपि तेषां गृहस्य वृत्तं मम सर्वथा अविस्मरणीयतां गतम्।

चण्डीगढैकदिशि सन्निकटे स्थितानाम्
सम्पूर्णधर्ममतपोषक - मन्दिराणाम्।
प्रातः सहैव निनदन् बहुवाद्यघोषः
अद्यापि मामुषसि जागरितं करोति॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चण्डीगढ़स्य एकस्मिन् भागे (सेक्टर) सर्वधर्मावलम्बिनां पूजास्थानानि, मन्दिर-मस्जिद-चर्च-गुरुद्वाराप्रभृतीनि निर्मितानि सन्ति। अत्र गत्वा सर्वेषामपि पूजास्थानानामेकत्र दर्शनेन परिभ्रमणेन च महान् आनन्दो भवति। परं प्रात:काले यदा एकस्मिन्नेव समये उच्चस्वरेण प्रार्थना, मन्त्रपाठ:, घण्टाघोष:, कीर्तन-भजनादिकं च प्रारभ्यते तदा काचिद् असुविधा उद्वेगश्चाप्यनुभूयते। इदं मया एकस्मिन् दिने तस्मिन्नेव भागे, रात्रौ शयित्वा प्रात:काले अनुभूतम्। तस्मिन् समये तत्र कस्यापि शयनमसम्भमासीत्।

अद्यापि पञ्चनदवासि-विलासिनीनां
उत्कृष्टवस्तुरुचितां सततं स्मरामि।
यत्ता महार्घवसनाभरणान्यशक्ता
अप्याग्रहादभिलषन्ति गता विपण्याम्॥ ९॥

चण्डीगढ़निवासकाले २.७.७० दिनाङ्के अहं हरियाणा-भाषाविभागस्य निदेशकमहोदयं मिलितुं गतवान्। तत्र कार्यालये अनेका महिला अपि कार्यरता आसन्। वार्ताप्रसङ्गे निदेशकमहोदयो मम नारीधर्मशिक्षानामकं पुस्तकं पश्यति स्म। पठनकाले तस्य दृष्टि: सर्वप्रथमं "......काले समर्घग्रहणम्" इति सूत्रस्योपरि पतिता। यस्मिन् काले यद् वस्तु समर्घं मिलति तस्मिन्नेव काले तद् वस्तु नारीभि: क्रीत्वा गृहे स्थापनीयम् इति सूत्रार्थो भवति। इदं पठित्वा झटित्येव निदेशकमहोदय: कथितवान्—"*शास्त्री जी, आपकी संस्कृत पंजाब में और उसमें भी महिलासमाज में नहीं चल सकती। क्योंकि ये सब तो जो सामान जितना अधिक मंहगा मिलता है उसे ही हम लोगों को खरीदने के लिए कहती हैं। सस्ता सामान नहीं चाहतीं। आप इस सूत्र को बदल दीजिए*" एवं तत्र बहु विनोदो जात:। महिलानां पुरुषाणां च मध्ये मिथो वाग्युद्धमपि जातम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जालन्धर—

काशीनिवासिविदुषां महिलानुरूपा
वाणीव नो भवति पञ्चनदीय-वाणी।
एषा तु वीरजनगीरिति विस्मृतो मे
नाद्यापि सिक्ख - विबुधस्य यथार्थलेखः॥ १०॥

एकदाऽहं पञ्जाबप्रदेशस्य यात्रायां १०.६.७० दिनाङ्के जालन्धरनगरं गतवान्। तत्र यदाऽहं पञ्जाबीभाषायाः उच्चारणस्य पारुष्यविषये एकं पञ्जाबीविद्वांसं न्यवेदयं तदा तेन विदुषा किञ्चिद् विहस्योक्तम्-"पंजाबीजनानां वाणी काशीनिवासिनां पण्डितानां तथा बङ्गीयानां विदुषां च महिलानां वाणीव मृद्वी न भवति अपि तु इयं वीरजनानां वाणी अस्ति, अतः अस्यां सरसतया सह शूरता, वीरता तथा प्रगल्भताऽपि पूर्णमात्रायां विराजते"। तदेतत् तस्य महोदयस्य कथनं मम दृष्टौ अपि पूर्णतया यथार्थमासीत्। यतः पञ्जाबीभाषायां बहवः संयुक्तवर्णा भवन्ति। तेषां यदा बलाघातेन सह उच्चारणं भवति तदा ते नितान्तं परुषा जायन्ते। अत एव पञ्जावीजनानां मधुरालापोऽपि किञ्चित् प्रखर इव प्रतिभाति। यथा प्रोक्तं पंजाबभाषाविभागाध्यक्षेण श्री ज्ञानी लालसिंह महोदयेन पंजाबीभाषायां—*"पंजाब दे वसनीक सूरमें ते बली लोक हन। उसे मुताविक इन्हां दी मा-बोली जोर ते करार वाली भाषा है।"*

पंजाबीदिवस सोवेनीर-१४ जनवरी १९६४

अद्यापि पञ्चनदवासि - समस्तपुंसां
स्त्रीणां च वृत्तमिदमत्यधिकं प्रियं मे।
यत् ते प्रवाससमयेष्वपि रेलमध्ये
कुर्वन्ति भक्तिसहिता निजनित्यपाठम्॥ ११॥

पञ्जाबभ्रमणकाले रेलयाने बसयाने वा इदं दृष्ट्वा मम महान्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रमोदो भवति स्म यत् तत्रत्या यात्रिणः, पुरुषाः स्त्रियो वा, प्रातः नित्यपाठपुस्तकानां पाठं कुर्वन्ति स्म। एतेषां प्रातः ब्राह्ममुहूर्ते पठनीयेषु "नित्तनेम" पुस्तकेषु श्रीगुरुनानकविरचितं "जपुजी-साहिब तथा आसादी वार" इति पुस्तकद्वयं प्रधानं वर्तते।

नाभा—

अद्यापि पञ्चनदवासि - कुटुम्बमध्ये
दुग्धे मया बहुतरेऽपरिगृह्यमाणे।
तत्रत्य - बाल - युवकैरुपहस्यमानो
नारीजनैश्च बहुधाऽनुभवामि लज्जाम्॥ १२॥

पटियालानगरसमीपवर्तिनि नाभा-नगरे एकस्य सिक्खविदुषो गृहे स्थितेन मया यदा एक-गिलास-परिमितस्य दुग्धस्य पाने असमर्थता प्रकटीकृता तदा तत्र स्थितैः बालकैः गृहपत्न्या च सहास्यं कथितम्-"*शास्तरी जी, आप क्या दूध पीते हैं? इतना तो हमारा यह बच्चा पी जाता है*"।

भाकडा—

अद्यापि पञ्चनदभूमिसमृद्धिहेतुं
तं भाकडासहितनांगल-वारिबन्धम्।
नित्यं स्मरामि, सुविशालतरं स्वरूपं
यस्यावलोक्य चकितो भविता न को वा?॥ १३॥

लुधियाना—

अद्यापि तस्य खलु पञ्चनदप्रदेश-
साहित्यसंसदधिपस्य वचः स्मरामि।
यः संस्कृतस्य विषये प्रथितं प्रवादं
दूरीविधातुमधिकं खलु मां न्यगादीत्॥ १४॥

एकदा लुधियानानगरेऽहं ११.७.७० दिनाङ्के पंजाबी एकेडमी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्थाया निदेशकेन सह पंजाबप्रदेशीय-शिक्षासंस्थानेषु संस्कृताध्येतृणां छात्राणां संख्याविषये वार्तामकरवं, तत्र च तेषां संख्यायां कथं वृद्धिर्भवितुमर्हति इत्यपि अपृच्छम्। उन्‍रे तैर्विहस्य उक्तं यत् तेषां प्रदेशे छात्रेषु संस्कृतविषये अयमेकः प्रवादः प्रचलितो वर्तते यत्—
जलं जले जलानि, संस्कृत कदे न आणी, आणी तो भुल जाणी।

अतो यावदस्य प्रवादस्य अस्या धारणायाश्च निर्मूलनं न भवति तावत् छात्राणां संख्यावृद्धेः सम्भावना नास्ति। अतः स गृहे गृहे गत्वा इमां धारणां दूरीकर्तुं मामनुरुद्धवान्।

होशियारपुर—

तं होशियारपुरमध्यगतं वरेण्यं
श्रीसाधु - आश्रममहं प्रणतः स्मरामि।
यो वर्धयत्यखिल - पञ्चनद - प्रतिष्ठां
साहित्य - संस्कृति - परिष्कृति - शोधकार्यैः॥ १५॥

होशियारपुर-नगरे साधु-आश्रमे स्थितं विश्वेश्वरानन्द-शोधसंस्थानं भारतीयविद्या-धर्म-संस्कृत्यादीनां विश्वप्रसिद्धं शोध-प्रतिष्ठानं विद्यते।

तां होशियारपुरवर्ति - बृहत्स्वरूपां
अद्यापि भव्यतमशोधभुवं स्मरामि।
या संकटाकुलित - पञ्चनदेऽधुनापि
साहित्यसंस्कृतिधुरं महतीं बिभर्ति॥ १६॥

होशियारपुरनगरस्य सुविश्रुते साधु-आश्रमे स्थितं सुविशालं विश्वेश्वरानन्दशोधसंस्थानं भारतीयानां विद्यानां धर्मसंस्कृतीनां च विश्वप्रसिद्धं शोधप्रतिष्ठानं चिन्तनमननकेन्द्रञ्च विद्यते। अत्र ऋषि-कल्पानां प्राच्यप्रतीच्योभयविद्याविशारदानां श्रीविश्वबन्धुशास्त्रिणां निर्देशने बहूनां महत्त्वपूर्णानां नवनवविषयसम्बद्धानां च शोधग्रन्थानां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्पादनं प्रकाशनञ्च समजायत। "विश्वसंस्कृतम्" नाम्ना पत्रिकाऽप्येका महत्त्वपूर्णैरनुसन्धानात्मकैश्च लेखैः संवलिता प्रकाश्यते। बहवश्चात्र विद्वांसः अधिकारिणः अनुसन्धानकर्तारः लेखका अनुवादकाः सम्पादकाश्च विराजन्ते। एवमिदं संस्थानं संकटपूर्णे आतंकवादग्रस्ते चापि पंजाबप्रदेशे स्वकार्याणि सम्यग्रूपेण सम्पादयतीति दृष्ट्वा महान् सन्तोषो जातः। अत्राहं पञ्च षड् दिनानि सानन्दं स्थितो बहु ग्रन्थावलोकनं कृतवान्।

अद्यापि याति मनसो नहि कष्टमेतत्
यत् केऽपि पञ्चनदवासिबुधा इदानीम्।
पंजाबवाचि नहि संस्कृतवाक्प्रवेशं
वाञ्छन्ति ते सुरगिरं च न वाऽद्रियन्ते॥ १७॥

पंजाबभ्रमणकाले मया इदं ज्ञातं श्रुतं पठितं च यत् आधुनिकाः अनेके पंजाबीविद्वांसो लेखकाः कवयः समालोचकाश्च पंजाबी-भाषायां संस्कृत-शब्दानां प्रयोगं न वाञ्छन्ति। तेषु केषाञ्चिदयं भावो वर्तते—यदि भवति पंजाबीभाषायां संस्कृतशब्दानामधिकः प्रयोगस्तर्हि तद्द्वारा ब्राह्मणवादस्य प्रचारो भविष्यति। केचन एवं विचारयन्ति—यदि भारतीयपंजाबीभाषायां संस्कृतशब्दानामधिकः प्रयोगो भवति तर्हि पाकिस्तानीयपंजाबीभाषया सह अस्या एकरूपता न स्थास्यति। यतः तत्रत्यायां पंजाबीभाषायां उर्दूशब्दानामधिकः प्रयोगो विधीयते। केचन तु हिन्दीशब्दानपि संस्कृतशब्दानेव मत्वा तेषां प्रयोगाद् विरज्यन्ते। अस्यां स्थितावपि पंजाबप्रदेशस्य अनेके भाषाविदः साहित्यकाराः राजनीतिनेतारश्च संस्कृतशब्दानां ग्रहणस्य उपयोगितां स्वीकुर्वन्ति। एतद्विषये विशेषपरिज्ञानाय निम्नाङ्किता ग्रन्था लेखाश्च अवलोकनीयाः—

१. *पंजाबी बोलीदा इतिहास,* ले. प्रो. सन्त सिंह 'सेखों' प्र. भाषाविभाग, पंजाब, पटियाला।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२. *पंजाबी भाषादा विआकरण,* ले. प्रो. दुनीचन्द प्र. पंजाब यूनिवर्सिटी पब्लिकेशन ब्यूरो; चंण्डीगढ।

१. हिन्दी संस्कृत लदी, पंजाबी ले. प्रो. रामसिंह, पत्रिका आलोचना (पंजाबी) जून-जुलाई अंक १९६३

२. पंजाबी शब्द निरमाण दी समसिआ, ले. प्रा. धरमपाल सिंगल, आलोचना; सितम्बर १९६४

३. आधुनिक पंजाबी बिच सबद रिपा दी समिति ले. प्रो. सन्त सिंह सेखों। आलोचना जून १९५८

पंजाबवर्ति - जनतागत - शौर्यरूप-
मद्यापि दृक्श्रुतिपथं गतमित्यवैमि।
सामान्यवाग्विनिमयोऽपि हि यत्र नृणां
युद्धं प्रवृत्तमिव भाति सदाऽपरेभ्यः॥ १८॥

पञ्जाबप्रदेशीया जनाः स्वभावत एव तेषां भोजने दुग्ध-दधि-घृतादि-बल्यवस्तूनां बाहुल्यात् हृष्ट-पुष्टाः शूर-वीराश्च जायन्ते। अतस्तेषां वाणी अपि अन्यजनेभ्योऽधिकं बलवती, ओजस्विनी प्रभावशालिनी च भवति। तेषां सामान्यवार्तालापेऽपि मे युद्धस्य विवादस्य च आशंका भवति स्म। इदं च मया रेलयात्रायां स्थानविषयके विवादे बहुशोऽनुभूतम्।

अद्यापि नैव मम पञ्चनदीयभाषा-
संमाननेऽस्ति विमतिर्न च कोऽपि वादः।
दृष्टाः परं विकृतयः खलु देववाचः
शब्देषु या, मनसि मे न मुदावहास्ताः॥ १९॥

पंजाबप्रदेशस्य सर्वमपि मे परमप्रियं सुखकरं च आसीत् परं पंजाबीभाषायां संस्कृतशब्दानां यानि यावन्ति यादृशानि च विकृतानि रूपाणि मया पठितानि तानि मे अत्यन्तमेव अप्रियाणि अरुचिकराणि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च प्रतिभान्ति स्म। बहूनां संस्कृतशब्दानां गुरुमुखीलिप्यां लिखितानां वाचनं विकृतिकारणात् किञ्चित् कठिनमेव भवति स्म। यथा—

दरसटी (दृष्टि)	अधिअयन (अध्ययन)
उसतती (स्तुति)	असतितव (अस्तित्व)
सपसट (स्पष्ट)	सिखिआ (शिक्षा)
अषटाधिआई (अष्टाध्यायी)	अचारिया (आचार्य)
आर्य (आरिआ)	ऐसवरय (ऐश्वर्य)
अधिआइ (अध्याय)	सथिति (स्थिति)
संसकरिती (संस्कृति)	

यदि पञ्जाबीभाषायामपि संस्कृतस्य उपयुक्ताः शुद्धशब्दा एव प्रयुक्ता अभविष्यन् तर्हि पंजाबी-अध्ययने अन्यप्रान्तनिवासिनां जनानां बहु सौविध्यमभविष्यत्।

परन्तु यदि जलवायुप्रभावात् संस्कृतस्य संयुक्ताक्षराणामुच्चारणं पंजाबीनिवासिनां कृते दुष्करं भवति तर्हि यथास्थितिरेव स्वीकर्तव्या।

अद्यापि पञ्चनदवर्तिषु सिक्खबाल-
विद्यालयेषु पठतां लघुबालकानाम्।
दृष्टं मनोज्ञतर-सैनिकवेषमेकं
द्रष्टुं पुनः पुनरपीच्छति मानसं मे॥ २०॥

दिल्ली-पंजाब-कश्मीरभ्रमणकाले मया तेषु तेषु प्रदेशेषु सिखजनानां बहवो बालविद्यालया दृश्यन्ते स्म। तेषु हृष्टपुष्टशरीराः गौराङ्गाः स्ववेषभूषया सुसज्जिता लघुलघुबालका वीरवत् यदा उन्नतमस्तकाः चलन्ति स्म तदा तद् दृष्ट्वा मम सुमहान् प्रमोदो भवति स्म। अन्यप्रदेशीयबालकानां तादृशं चित्तहर्षकं शौर्यप्रदर्शकं च रूपं प्रायः दुर्लभमेव।

अद्यापि पञ्चनदवर्ति-कृषीवलानां
घोरं श्रमं समवलोक्य मुदं वहामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ये स्वेदविन्दुनिचयैरनिशं स्रवद्भिः
कुर्वन्ति भूरिधनधान्यमयं प्रदेशम्॥ २१॥

पञ्जाबीजनेषु न केवलं कृषीवला एव प्रत्युत अन्येऽपि सर्वे जना बहुपरिश्रमशीला भवन्ति। अतएव ते कृषौ वा व्यापारे वा सर्वत्र सफलाः समृद्धाश्च दृश्यन्ते। तेषां गावो महिष्यश्चापि स्वस्थाः हृष्टपुष्ट-कलेवराश्च भवन्ति। अतएव तेऽपि सदैव प्रभूतदुग्धदधिघृतभक्षणात् हृष्टपुष्टकलेवराः स्वस्थाः बलिनश्च भवन्ति। पञ्जाबयात्रायां यदा कदा ग्रामाञ्चलेषु भ्रमणकाले इदं सर्वं दृष्ट्वा मम महान् प्रमोदो भवति स्म। ईदृशा एव च सर्वे भारतीया भवन्तु इति समीहा जायते स्म।

नो संस्कृतेन सह नः सहयोग इष्टः
पञ्जाबिपण्डितजनैरिति घोषिते, यः।
तत्खण्डनं प्रबलतर्कशरैरकार्षीत्
तं सन्तसिंहसुधियं सततं स्मरामि॥ २२॥

पंजाबीभाषायां संस्कृतशब्दानां प्रयोगविरोधविषये केषाञ्चित् मतं मया पूर्वं निरूपितम्। परन्तु पंजाबीविद्वत्सु श्रीसन्तसिंह सेखो महोदयाः एके तादृशा विद्वांसो वर्तन्ते ये पूर्वोक्ततर्कविरुद्धमेव तर्कमुपस्थापयन्ति। तेषामिदं कथनं वर्तते यत् पंजाबीभाषायां संस्कृतशब्दानामप्रवेशात् अन्यभारतीयभाषाणां तुलनायां पंजाबीभाषा नितान्तं हीना, दरिद्रा असंस्कृता च गणयिष्यते।

अद्यापि पञ्चनदवर्ति - बुधाङ्गनाना-
मातिथ्यमद्भुतमहं नहि विस्मरामि।
यावन्न हि प्रथमदत्तमगात् समाप्तिं
तावन्नवं नवमदीयत वारितेऽपि॥ २३॥

प्रदेशस्य प्रायः सर्वेष्वपि प्रमुखनगरेषु मया भ्रमणं कृतं तत्र तत्र च प्रायः सर्वत्रैव हिन्दूनां सिखजनानां वा विदुषामेव गृहे मयाऽव-स्थितम्। भोजनं चापि तेषामेव गृहे, तैर्निर्मितमेव च मया विधीयते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्म। तत्र इदं मयाऽवलोकितं यत् पंजाबप्रदेशीया गृहिण्यो बहु आग्रहं कृत्वाऽधिकाधिकं भोजयितुं यतन्ते स्म। आतिथ्ये अन्यनिखिल-प्रदेशापेक्षया पंजाबप्रदेशो वैशिष्ट्यं प्रथमं च स्थानं भजते इति मेऽनुभवो वर्तते।

अद्यापि पञ्चनदभूभ्रमणे गुरूणां
पुत्रैः समं युधि समर्पितजीवनानाम्।
वृत्तं श्रुतं विविधचित्रगतं च दृष्टं
संस्मृत्य शान्तिमुपयाति न जातु चेतः॥ २४॥

पंजाबप्रदेशे पदक्षेपेण सहैव देशस्य धर्मस्य च रक्षायै त्यक्तजीवितानां गुरु अर्जुनसिंह, गुरु तेगबहादुरसिंह, गुरु गोविन्द-सिंह, इत्यादिगुरूणां तथा गुरुगोविन्दसिंहस्य अजितसिंह, जुझारसिंह, जोरावरसिंह, फतेहसिंह इति नामभाजां चतुर्णां पुत्राणां बलिदानस्य रोमाञ्चकारि इतिवृत्तं स्मृतिगतं भवति। पुनश्च स्वर्णमन्दिरादिस्थानेषु मुगलशासकैः सह घटितस्य युद्धस्य हत्यादीनां यदा च चित्रमव-लोक्यते तदा द्रष्टुः विचित्रा स्थितिर्भवति प्रत्यङ्गं च रौद्ररसस्य संचारो जायते। सेयं स्थितिर्मयापि समये समये अनुभूयते स्म।

अद्यापि पञ्चनदलोकमहोत्सवोऽसौ
वैशाखपर्व निजनैकविशिष्टदृश्यैः।
सुस्वादुभोज्य - बहुनर्तन - गीत - वाद्यै-
रुल्लासयत्यतितरां हृदयं स्मृतं मे॥ २५॥

पञ्चनदप्रदेशवासिनां वैशाखीनाम्ना प्रसिद्धं पर्व महता समुल्लासेन सम्मान्यते। कृषकाः गोधूमादिकं शस्यं यदा वैशाखमासे गृहे आनयन्ति तदा ते इदं पर्व मानयन्ति। तस्मिन् दिने ते नदीषु स्नानं कुर्वन्ति, कीर्तन-भजनादिकमनुतिष्ठन्ति, तथा नृत्यन्तः गायन्तः विविधवाद्यानि वादयन्तः, क्रीडाकौतुकानि कुर्वन्तः, भुञ्जाना भोजयन्तः, पिबन्तः पाययन्तः, उच्छलन्तः कूर्दमानाश्च समस्तं दिवसं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महता आमोदेन प्रमोदेन च गमयन्ति।

अस्य पर्वणः अन्यदपि एकं महत्त्वमिदं वर्तते यत् माननीयः श्रीगुरु गोविन्दसिंह महोदयः १६९९ तमे ईसवीये संवत्सरे अस्मिन्नेव दिने खालसापन्थस्य स्थापनां कृत्वा, सहस्राधिकांश्च जनान् एकस्मिन्नेव दिने दीक्षितान् विधाय देशधर्म-रक्षायै समाजे महतीं क्रान्तिमानीतवान्। एतेन इदं पर्व धार्मिकं राजनैतिकञ्चापि वक्तुं शक्यते। अस्य दिनस्य उत्साहः उल्लासश्च अवर्णनीयो भवति। स मया बहुधा अनुभूत इति अद्यापि तस्य स्मरणेन महान् प्रमोदः सञ्जायते।

तन्दूरिकाविरचिता परिपक्वरोटी
माषस्य सूपमथ गाढतरं प्रशस्तम्।
छोला च, हृद्यमिति पञ्चनदप्रदेश्यम्-
अद्यापि भोजनमिदं सततं स्मरामि॥ २६॥

पंजाबयात्रायां तत्तन्नगरेषु ये ये मम विशेषसहायका अभूवन् तेषां नामान्यत्र कृतज्ञतापूर्वकमुल्लिख्यन्ते—चंडीगढे-श्रीसन्तकृपालसिंहः, पटियाल्लानगरे-धर्मेन्द्रकुमारगुप्तः, प्रो० प्रेमप्रकाशसिंहश्च, लुधियाना-नगरे डॉ० विद्याभास्कर अरुणः, प्रो० परमिन्दरसिंहश्च, जालन्धरे-प्रो० महेन्द्रप्रतापथापरः होशियारपुरे-आचार्यो विश्वबन्धुः, अमृतसरनगरे-श्रीओम्प्रकाश सारस्वतः, फगवाडानगरे-पं० किशोरीलालशास्त्री, खन्नानगरे-श्रीविश्वनाथशास्त्री प्रभाकरः, तामानगरे-पं० साधुरायशर्मा चेति।

पंजाबभूमिप्रशस्तिः—

अद्यापि पञ्चनदपुण्यजलाभिषिक्तां
श्रीनानकामृतवचो - विमलान्तरङ्गाम्।
श्री-शौर्य-वीर्य-धन - धान्य-समृद्धि-पूर्णां
पञ्जाबभूमिमसकृत् श्रयितुं समीहे॥ २७॥

★

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १२ :

बिहार (मिथिला, छोटानागपुर) प्रदेशीयानि संस्मरणानि

कुतुबपुर—

राष्ट्रीयभक्तिभरितानि सदा भिखारी-
ठाकुर्कवेर्मधुरकण्ठ - विनिःसृतानि।
अद्यापि मे मनसि भोजपुरीयभाषा-
गीतानि तानि सरसानि मधु स्त्रवन्ति॥ १॥

बिहारप्रदेशान्तर्गतस्य सारनमण्डलस्य कुतुबपुरनामके ग्रामे भिखारीठाकुरस्य नापितकुले जन्म जातमासीत्। १८ दिसम्बर १८८७ दिनाङ्कं तस्य जन्मतिथिः। तस्य शिक्षा-दीक्षा नितान्तं साधारणी आसीत् परं स बाल्यकालाद् एव स्वभावतः भक्तः, गायकः, वादकः, नर्तनशीलश्च आसीत्। शनैः शनैश्च वयसो वृद्ध्या सह आसु कलासु प्रवीणो जातस्तथा पद्यरचनायां गीतरचनायां तथा नाटकरचनायामपि नैपुण्यं लब्धवान्। तस्य भोजपुरीगीतानि नाटकानि च नितान्तं लोकप्रियाणि आसन् येषु "विदेशियानाटकं" तत्र प्रयुक्तानि गीतानि च जनतायाः कृते विशेषरूपेण आकर्षकाणि अभूवन् अस्मिन् नाटके महान् जनसम्मर्दो भवति स्म। अस्मिन् नाटके स्वयं भिखारीठाकुर-महोदयोऽपि भागं गृह्णाति स्म। अहमपि भोजपुरीभाषां सङ्गीत-रसिकश्च। अतस्तानि गीतानि ममापि अत्यन्तं प्रियाणि आसन्, इदानीमपि च यदा कदा मुखान्निसरन्ति आह्लादयन्ति च मदीयं हृदयम्। तद्विरचितस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहुप्रचलितस्य च "बटोहिया" इति भोजपुरी राष्ट्रियगीतस्यात्र कानिचित् पदानि पाठकानां मनोरञ्जनाय दीयन्ते—

सुन्दर सुभूमि भैया भारत के देशवा में
मोर प्राण बसे हिमखोह रे बटोहिया।
एक द्वार घेरे रामा हिम कोतवलवा से
तीन द्वार सिन्धु हरावे रे बटोहिया।
जाउ जाउ भैया रे बटोही हिन्द देखि आउ
जहवाँ कुहुक कोयल बोले रे बटोहिया।
गंगा ओ जमुनवा के निरमल पनिया से
सरजू झलाके लहरावे रे बटोहिया। इत्यादि॥

कोल्हुआ—

स्मृत्वाऽधुनापि "कोल्हुआ" स्थितमद्भुतं तं
स्तम्भं शिरः सम समुन्नतिमेति गर्वात्।
सिंहान्वितं गगनचुम्बि यदीयशृङ्गं
अद्याप्यशोकमहिमानमलं व्यनक्ति॥ २॥

नालन्दापरिसरे एव कोल्हुआनामकं स्थानं वर्तते यत्र देवानांप्रियस्य प्रियदर्शिनः अशोकस्य महिमानं ख्यापयति दर्शकानाञ्च महदाकर्षणमावहति शीर्षे सिंहान्वितः अशोकस्तम्भः।

चम्पारन—

अद्यापि तानि न मम भ्रमणानि चम्पा-
रण्ये कृतानि रमणानि च विस्मृतानि।
यत्राऽवलोक्य सुधियोऽध्ययने निमग्नान्
पुण्या स्मृतिः पुनरुदेति तपोवनानाम्॥ ३॥

बिहारप्रदेशान्तर्गते चम्पारण्यमण्डले भ्रमणकाले मया वेतिया, अरेराज, रामनगर, बगहा, रत्नमाला, नरकटियागंज, बकुलहर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रभृतिषु स्थानेषु तपस्विन इव अहोरात्रं शास्त्राणामध्ययना-ध्यापनैकनिष्ठा बहवो विद्वांसो विलोकिता येन चम्पारण्यमिति नाम्न तपोवनमिव मे प्रतीतिमगात्।

अद्यापि रामनगरस्य न विस्मृतं मे
संम्मेलनद्वितयमद्‌भुतमद्वितीयम् ।
यत्राभवन्मम चिरेप्सितरम्यचम्पा-
रण्यस्थली - भ्रमण - भोजनपानयोगः ॥ ४ ॥

चम्पारण्यमिति नाम मम बहोः कालात् श्रुतिपथमागतमासीत् बहु च प्रियमासीत्। अतः प्रदेशमिमं द्रष्टुं मम बलवती इच्छा भवति स्म। संयोगात् तस्या इच्छाया पूर्तेः शुभावसरो मया तदा प्राप्तो यदा पश्चिमचम्पारनप्रदेशान्तर्गतरामनगरनाम्नि नगरे बिहारप्रदेशीय-संस्कृतसाहित्यसम्मेलनस्य अधिवेशनद्वयं सम्पन्नम्। तयोः प्रथमं सम्मेलनं भारतविख्यातानां संस्कृतसभाकर्णधाराणां श्री पं० गिरिधरशर्मचतुर्वेदिमहोदयानामध्यक्षतायां १९६१ तमे ईसवीये संवत्सरे सम्पन्नम्। अस्याधिवेशनस्य उद्घाटयितारो बिहारप्रदेशस्य मुख्य-मन्त्रिणः श्री श्रीकृष्णमहोदया अभूवन्। द्वितीयं च अधिवेशनं संस्कृतसाहित्यमन्थनमन्दरायमाणानां श्रीमदाचार्यबलदेवोपाध्याया-नामध्यक्षतायां सुसम्पन्नतामगात् १९६७तमे ई० वत्सरे। अनयोर्द्वयोरपि अधिवेशनयोर्मुख्याः समायोजका आसन् रामनगरस्य श्रीप्रेमजननीसंस्कृतमहाविद्यालयस्य प्रधानाचार्यः श्री पं० कमलाकान्त त्रिपाठिमहोदयाः तथा मुख्यसंघटकाः श्री पं० नागेन्द्रपाण्डेयमहोदयाः ज्योतिर्विदः। एतयोर्द्वयोरपि महाधिवेशनयोः एताभ्यां कर्णधाराभ्यामहूतोऽहं महाधिवेशनद्वयेऽपि प्रमुखरूपेण भागं गृहीतवान् सर्वेषु च अङ्गभूतेषु कार्यकलापेषु सहयोगं दत्तवान्। एतदधिवेशनद्वये समागतस्य मम आत्मनाऽपि अनेके लाभाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संवृत्ताः। चम्पारण्यप्रदेशस्य चिराकांक्षितं भ्रमणं सम्पन्नम्। प्रदेशस्य अनेके विद्यालया अवलोकिताः। अनेके विशिष्टा विद्वांसः साक्षात्कृताः। लेखका कवयश्चापि अनेके मिलिताः। एवं यत्रेयं मम सर्वथा आनन्दमयी उत्साहपरिपूर्णा च सम्पन्ना इति मे महान् सन्तोष आसीत्।

परन्तु अत्रत्यमेकं मनोरञ्जकं वृत्तमपि पाठकेभ्यः सूचयितुमिच्छामि। रामनगरस्य द्वितीयेऽधिवेशने एतन्नगरसमीपवर्ति "धोकरहा" ग्रामवासिनः श्रीरामचन्द्रशुक्लनामानः एके पण्डितधुरीणाः सज्जनाः समुपस्थिता आसन्। तैर्मम नेतृत्वे केचन पण्डिताः स्वगृहे महता स्नेहेन आग्रहेण च भोजनार्थं प्रातःकाले आमन्त्रिताः। अस्माभिश्च तदामन्त्रणं ससम्मानं स्वीकृतं, द्वितीयदिने च प्रातःकाले शुक्लमहोदयानां गृहं प्रस्थिताः। एतस्यैव प्रसङ्गस्य किञ्चिद् रोचकं विवरणं निम्नांकिते पद्ये वर्णितं वर्तते।

छपरा—

अद्यापि तौ स्मरति मे हृदयं विनम्रं
दैव्या गिरो वरसुतौ छपरावतंसौ।
आत्मोपमौ भरतमिश्रगुरुस्तदीयः
शिष्यस्तथा कपिलदेव इति प्रसिद्धः॥५॥

बिहारप्रदेशान्तर्गतस्य छपरानगरस्य निवासिनः श्री पं० भरतमिश्रमहोदयाः (सोहं बाबा) तथा शिष्याः श्रीकपिलदेवशर्माणश्च निःशुल्कशिक्षणद्वारा, प्रचारद्वारा, विद्यालयसंचालनद्वारा, विविधग्रन्थप्रणयनद्वारा, सभा-सम्मेलनादीनामायोजनद्वारा, परेषां मार्गदर्शनद्वारा च संस्कृतशिक्षाया महान्तः उन्नायकाः, विरोधिनां कृते प्रबलाः प्रतिरोधिनः, शासनेनापि सह निर्भयं योद्धारस्तथा जीवनस्य अन्तिमक्षणपर्यन्तं च निःस्वार्थसेवापरायणा आसन्। आभ्यामुभाभ्या-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मपि विद्वद्वरेण्याभ्यां मम बहोः कालाद् घनिष्ठः सम्बन्धः, विचारेषु एकरूपता तथां प्रचारकार्येषु सहभागिता च आसीत्।

जीरादेई—

अद्यापि तं सरलसौम्यमृदुस्वभावं
सम्पूर्ण - भारतमही - जनताभिनन्द्यम्।
श्रद्धानतः प्रथमराष्ट्रपतिं स्मरामि
यस्यान्तिके ससुखमेकदिनं न्यवात्सम्॥ ६॥

सकलभारतीयजनहृदयाभिनन्द्ये अस्माकं प्रथमराष्ट्रपतौ डॉ॰ राजेन्द्रप्रसादमहोदये कीदृशी कियती च सौम्यता सरलता मृदुता मधुरभाषिता च आसीदिति तेषां स्वल्पीयसापि सान्निध्येन सम्भाषणेन च अनुभवितुं शक्यते स्म। स्वतन्त्रताप्राप्तेः पूर्वकाले एकदा संस्कृतविषये कञ्चिद् विमर्शं कर्तुं २२.३.४२ दिनाङ्के तेषां जीरादेई ग्रामस्थितं गृहं गन्तुं मया शुभावसरः सम्प्राप्तः। दिने द्वादशवादने अहं तेषां सान्निध्यं प्राप्तवान्। जलपानाद्यनन्तरं तैर्मम आगमनकारणं पृष्टं मया च सर्वं स्वमनोगतं निवेदितम्। ते मया सह ममाभीष्टे विषये वार्तां कर्तुं बहुधा प्रारभन्त परं बहूनां नेतृजनानामागमनकारणात् विविधवार्ताप्रसङ्गाच्च आवयोः वार्ता पूर्णतां न गता। अतोऽहं रात्रौ तेषामेव गृहे निवासं कर्तुं तैरनुरुद्धः। मदर्थे च निवासाय एकः प्रकोष्ठः दत्तः, शय्यादिकं च परिकल्पितम्। नेतृषु गतेषु ते सायंकाले मत्समीपमागताः पृष्टवन्तश्च मां सादरं बद्धाञ्जलयो भूत्वा—"अपि भवन्तो मद्गृहे निर्मितं भोजनं स्वीकरिष्यन्ति?" अग्रे तैरुक्तम्—"मम गृहे एकः शुद्धब्राह्मण एव पाकं करोति, भोजने लशुनपलाण्डूनामपि व्यवहारो न भवति, अथ च वयं सर्वे भूमौ एव काष्ठपीठे उपविश्य भोजनं कुर्मः, न च कश्चिदन्यो जनः पाकशालायां पादमपि निक्षेप्तुं शक्नोति।" इदं सर्वं श्रुत्वा तेषामभिप्रायं च ज्ञात्वा मया भोजनार्थे सादरं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वीकृतिः प्रदत्ता। अनन्तरं भोजनं कृत्वा आवयोः रात्रौ चिराय वार्ता जाता। मम आगमनप्रयोजनं सर्वं सफलं जातम्। तस्मिन् दिने तेषां सरल-मधुरेण सौजन्येन, स्नेहपूर्णेन आलापेन च मया यादृश आह्लादः प्राप्तः स कथमपि वर्णयितुं न शक्यते।

झरिया आदि—

अद्यापि विस्मयमुपैमि विचिन्त्य शीता-
ङ्गाराकरेषु विवरान्तरितान् जनौघान्।
आमूलचूलमतिकृष्णकरालकायान्
सायं समेत्य बहिराव्रजतः खनिभ्यः॥ ७॥

बिहारप्रदेशस्य झरिया, गिरिडीह, बोकारो, रामपुर प्रभृतीनि स्थानानि शीताङ्गाराणां (कोयला) खनिबाहुल्यस्य कृते प्रसिद्धानि सन्ति येषु विभिन्नस्थानेभ्यः विपुलसंख्यायां समागताः श्रमिकाः कार्यं कुर्वन्ति जीविकां च उपार्जयन्ति। ते प्रातरारभ्य आसायं शीताङ्गारस्य लघु-बृहत्खण्डान् खनन्तीति सर्वथा कृष्णकाया जायन्ते। यदा च ते खननकार्यं कृत्वा सायं खनिभ्यो निर्यान्ति तदा तेषां स्वरूपं विचित्रं विस्मयावहं च भवति, तदानीं ते च तथा प्रतिभान्ति यथा अफ्रीका-निवासिनः स्युः। इदं दृश्यं मया बहुधा साश्चर्यं सकौतुकं च तेषु तेषु स्थानेषु अवलोकितम्।

नालन्दा—

अद्यापि तत्र हृदयादपयाति नाल-
न्दाख्यं पुरं मम कदापि जगत्प्रसिद्धम्।
यन्नाममात्रमपि गायति पुण्यगाथां
विश्वेऽखिले भरतभूमहनीयकीर्तेः॥ ८॥

नालन्दा। इदं स्थानं राजगृहात् नातिदूरे वर्तते'यत्रत्ये प्रतिष्ठिते विश्वविख्याते विश्वविद्यालये दूरदूरप्रदेशेभ्यो विदेशेभ्यश्च विद्वांसो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यार्थिनश्च आगत्य विद्याध्ययनं, शास्त्रचर्चां, गवेषणां च विदधति स्म। अत्र रत्नसागरः, रत्नमहोदधिः रत्नरञ्जकश्चेति त्रयः पुस्तकालया आसन् येषु सञ्चितानि पुस्तकानि सर्वाण्यपि वख्तियार खिलजी-नामकेन मुस्लिमशासकेन प्रज्वालितानि इति वृत्तं सर्वविदितं वर्तते। इदानीं सर्वमपि तत् क्षेत्रं भग्नावशेषरूपेणावस्थितं वर्तते यद् दृष्ट्वा कस्यापि विद्यानुरागिणो, भारतीयस्य हृदयं विदीर्णमिव जायते। अहमिदं स्थानं १९३५ तमे वत्सरे दृष्टवान्।

गते वत्सरे मया औटावा (कनाडा) विश्वविद्यालयस्य प्राध्यापकेन डॉ० वी. सुब्रह्मण्यम् नामकेन विदुषा लिखितं 'नालन्दादहनम्' नाम लघु डिमनाटकं दृष्टं यत्र नालन्दापुस्तकालयस्य पुस्तकानां दाहस्य, तत्रत्यानां विदुषां शिक्षकाणां भिक्षूणां च उत्पीडनस्य च हृदयविदारकं दृश्यं वर्तते वर्णितम्।

पटना—

अद्यापि तान् प्रथितपाटलिपुत्रसंस्थान्
विद्वज्जनान् स्मरति मे हृदयं कदाचित्।
ये दुष्कर - श्रम - बहुव्ययभार - भीत्या
मद्-भाषण-श्रवणतो विमुखा अभूवन्॥ ९॥

एकदा १-८-६१ दिनाङ्के पाटलिपुत्रे बिहारसंस्कृत-संजीवनसमाजस्य वार्षिकोत्सवः समायोजित आसीत्। संयोगवशात् तदानीमहमपि पाटलिपुत्र एव कृतावासः अभवम्। वार्षिकोत्सवस्य सूचनां लब्ध्वा अहं पूर्वमेव संजीवनसमाजस्य सचिवानामावासं गतवान्, तत्र च उपस्थितैः समाजस्य सदस्यैः सह संस्कृतप्रचार-सम्बन्धे व्ययसाध्याः श्रमसाध्याः विविधा योजना उपस्थापितवान्। परं तस्य फलमिदं सञ्जातं यद् उत्सवे मम भाषणाय समाजा-धिकारिभिः अवसर एव न प्रदत्तः। एतस्य किं कारणमिति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जिज्ञासायामेकेन समाजसदस्येन सूचितं यद् "भवतः भाषणानन्तरं समाजस्योपरि महान् श्रमभारः व्ययभारश्च आपतिष्यतीति भिया तैः भवतः भाषणाय अवसरो न प्रदत्तः।" तदेतद् विचित्रं वृत्तं स्मृतं सत् सदैव मे कौतूहलं जनयति।

परन्तु इयमेका आकस्मिकी घटना आसीद् या संयोगवशाद् घटिता। एतद्विपरीतं मया यदा यदा पाटलिपुत्रस्य यात्रां कृता तदा तदा तत्र अनेके संस्कृतशिक्षाधिकारिणः, विद्वांसः, अध्यापकाः, संस्कृतानुरागिणः अन्यभाषाविद्वांसश्चापि मम सहयोगिनः सहायकाः परामर्शदातारश्च भवन्ति स्म। तेषु केचन इमे स्मृतिपथमायान्ति—

श्रीहरिशंकरपाण्डेयः, श्रीरामपदार्थशर्मा (शिक्षाधिकारिणौ) पं० ब्रह्मदत्त द्विवेदी (मुरारकासंस्कृतकालेज प्राचार्यः) श्री पं० चन्द्रदीप शुक्लः (अध्यापकः) श्री रंजनसूरिदेवः (विहारराष्ट्रभाषा-परिषदि ग्रन्थसम्पादकः) श्री पं० विष्णुकान्त झा (ज्योतिषाचार्यः) श्री पं० व्रजबिहारी चतुर्वेदी (विख्यातचिकित्सकः) श्रीकपिलदेव पाण्डेयः (विडलामन्दिरे अर्चकः) श्री बनवारी लाल शर्मा (वैद्यनाथ आयुर्वेद भवन प्रधानः) डॉ० दुखनरामजी (नेत्रचिकित्सकः) संस्कृतसंजीवनसमाजस्य अनेके प्रमुखा सदस्याश्च।

अद्यापि सा वसति मे हृदये पुरीयं
सम्पूर्णदेशविदुषां निकषायमाणा।
देशान्तरादुपगताः सुधियः परीक्षा-
मुत्तीर्य यत्र सुयशो विपुलं वितेनुः॥ १०॥

बिहारस्य राजधानी पाटलिपुत्रं नाम नगरं (पटना) भारतस्य एकं सुप्रसिद्धं प्राचीनं च ऐतिहासिकं स्थानमस्ति। इदं स्थानं पुरा मगधस्य राजधानी आसीत् यत्र नन्दाः, मौर्यसम्राट् चन्द्रगुप्तः देवानां प्रियः अशोकश्चेत्यादयो विश्वविश्रुता राजानः शासनमकुर्वन्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्मिन् नगरे केनापि प्राक्तनेन राज्ञा पञ्चशतानि पुष्पोद्यानानि निर्मापितानि तेन अस्य नगरस्य पुष्पपुरं कुसुमपुरम् इत्यादि नाम विश्रुतमासीत्। इदं नगरं न केवलं भौतिकवैभवदृष्ट्या अपितु विद्यावैभवदृष्ट्यापि कदाचित् चरमां कोटिं प्राप्तमासीत्। एतन्नगरसम्बन्धे इयमपि एका महनीया ख्यातिरस्ति यद् बहवः शास्त्रकारा अत्रैव परीक्षिताः सन्तो देशे विख्यातिं प्राप्तवन्तः। यथा काव्यमीमांसायां लिखितम्—

श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा—

अत्रोपवर्ष-वर्षाविह पाणिनि-पिङ्गलाविहव्याडिः।
वररुचि-पतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः॥

काव्यमीमांसा० दशमः अध्यायः

अद्यापि विश्रुत "सदाकत" आश्रमेऽहं
स्वल्पं गतं समयमप्यधिकं स्मरामि।
यत्राभवत् जयप्रकाशमहोदयानां
प्रारंभ एव बहुरध्ययनेऽन्तरायः॥ ११॥

एकंदा लोकनायको जयप्रकाशनारायणः वर्धानगरे विनोवाभावे-महोदयस्य सकाशे कतिचित् दिनानि स्थित्वा वाराणसीमागतः। तत्र सुहृदां मध्ये तेनेयं समीहा प्रकटीकृता यत् विनोवाभावे यथा गीतायाः श्लोकानां प्रत्येकं पदस्य व्युत्पत्ति-पूर्वकं सुबन्त-तिङन्त - कृदन्त - अव्यय - सन्धि - समासादि-निरूपणपुरस्सरमर्थं बोधयति तथैव सोऽपि गीतां पठितुमिच्छति। एतदर्थं यदि कोऽपि वाराणस्या विद्वान् पटनानगरे सदाकत आश्रमे स्थित्वा तं गीतां पाठयेत्तर्हि तस्य महान् उपकारः कृतः स्यात्। तदर्थं विदुषे पर्याप्तां दक्षिणामपि दातुं सूचितवान्। ततस्तत्र स्थितेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालये बौद्धविभागाध्यक्षेण श्री पं०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगन्नाथोपाध्यायेन मम नाम प्रस्तावितम्, आहूतश्चाहं तत्र श्री जयप्रकाशनारायणमहोदयेन सह मिलितुम्। ततोऽहं तत्र गतवान्। वार्ता जाता। यात्रायाः कार्यक्रमश्च निर्धारितः। निश्चिते च समये अहं पटनास्थितं सुप्रसिद्धं राष्ट्रसेविनामावासस्थलं 'सदाकत' आश्रमं प्राप्तवान्। प्रथमदिनं श्रमापनयने, प्रासङ्गिकेषु विविधवार्तालापेषु, संस्कृतशिक्षणसम्बन्धिनीषु चर्चासु च अतिवाह्य द्वितीयदिने प्रातः-कालादध्ययनं प्रारब्धम्। चत्वारि दिनानि अध्ययनं प्राचलत्। परं पञ्चमे दिने प्रातरेव केन्द्रशासनादियं सूचना आगता यत् "तिब्बतोपरि चीनस्याक्रमणविषयमवलम्ब्य राष्ट्रसंघे आयोजितायां गोष्ठ्यां तिब्बतीयपक्षस्य समर्थनार्थं तैः राष्ट्रसंघे त्वरितमेव गन्तव्यं वर्तते"। तदा इमां सूचनां लब्ध्वा मत्समीपमागत्य तैः कथितम् "*द्विवेदीजी, शायद गीता पढने की हमारी इच्छा पूरी नहीं होनेवाली है। देखिए, यह पत्र आया है। अब मुझे आज ही निकल जाना पड़ेगा। क्षमा कीजियेगा*"। इत्युक्त्वा ते प्रस्थानस्य सन्नद्धतायां संलग्नाः। अहमपि च किञ्चित् खिन्नः आश्रमं त्यक्तुमना अभूवम्।

बोधगया—

अद्यापि विश्वभुवि बोधगयेति नाम्ना
ख्यातिं गतां जगति पुण्यभुवं स्मरामि।
यत्र स्थितेन भगवच्चरितोपदेशै-
र्लब्धो मया नव-नवो विपुलः प्रकाशः॥ १२॥

एकदा १०.२.५६ दिनाङ्के भोजपुरीसम्मेलनेन सह संस्कृतप्रचारगोष्ठी अपि समायोजिा आसीत् यत्र भागं ग्रहीतुमहं गयां गतवान् आसम्। तत्रादौ कतिचिद् दिनानि नगरे संस्कृतप्रचारकार्ये, कतिचिद् दिनानि च खरकुरासंस्कृतकालेजे पाठयित्वा बोधगयां (बुद्धगयां) गतवान् तत्रैव च धर्मशालायां स्थितः। अनन्तरं च मां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पण्डितं, संस्कृतप्रचारकं ज्ञात्वा तत्रत्येन मठाधीशेन मठे निवासस्य भोजनपानादिकस्य च व्यवस्था विहिता। अनन्तरं मया तत्र बोधिवृक्षं तथा अन्यानि च ऐतिहासिकानि स्थानानि सम्यगवलोक्य तत्रत्येषु पुस्तकालयेषु सुरक्षितानां भगवतो बुद्धस्य चरित्रेण धर्मोपदेशैश्च सम्बद्धानां ग्रन्थानामध्ययने सम्प्रवृत्तः। तत्रैव मम बौद्धधर्मसम्बन्धिनां पालिग्रन्थानां परिचयो जातः। मदर्थे अध्ययनस्य ज्ञानस्य, प्रकाशस्य च एकं नूतनद्वारमिव तत्र समुपलब्धम्। बहूनि ऐतिहासिकानि चित्राणि अवलोकितानि। विदेशेषु बौद्धधर्मप्रचारस्य विस्तृतं चित्रमयं विवरणं प्राप्तम्। भगवतो बुद्धस्य रोमाञ्चकारीणि चित्रितानि चरित्राणि प्रत्यक्षीकृतानि। एवञ्चात्र मदर्थे तथा देशविदेशप्रकाशितस्य बौद्ध-साहित्यस्य बौद्धजगतः परिचयस्य च सुदुर्लभोऽवसरः सम्प्राप्तः। इयं लघ्वी अपि यात्रा बह्वर्थकरी इव संवृत्ता।

भोजपुर—

सैषा मही, जनिमसौ खलु यत्र लेभे
वीराग्रणीः कुंवरसिंह-महानुभावः।
यस्यांग्ल - सैनिकदलार्दन - कीर्तिगाथा
अद्यापि दुर्बलजनं प्रबलीकरोति॥ १३॥

बिहारस्य भोजपुरक्षेत्रनिवासिनां जनानां प्रगल्भता, निर्भीकता, परेषामाक्रमणासहिष्णुता च अस्या भूमेः वैशिष्ट्यमिति सर्वविदितं वर्तते। अस्यैव क्षेत्रस्य जगदीशपुरनामके एकस्मिन् ग्रामे क्षत्रियकुल-मौलिमणयो वीराग्रगण्याः स्वनामधन्याः बाबू कुंवरसिंहमहोदया जन्म गृहीतवन्तः, अस्य च क्षेत्रस्य नाम भारतीयस्वातन्त्र्य-संग्रामस्येतिहासे अमरं कृतवन्तः। एते देशस्योपरि आक्रमणकारिणां बृटिशसैनिकानां मानमर्दने यादृशीं वीरतां प्रदर्शितवन्तः तस्य गाथा अद्यापि ग्रामे ग्रामे गीयते, भोजपुरवासिभिश्च सुमहान् स्वाभिमानः अनुभूयते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाण्यां परं मधुरिमाणमशेषलोके
शौर्यं तथा रिपुविमर्दकरं वहन्ती।
अद्यापि भोजपुरकीर्तिरनुस्मृता मे
चित्ते रसद्वयसमाकुलतां विधत्ते॥ १४॥

बिहारप्रदेशस्य शाहाबादजिलान्तर्गतस्य भोजपुरनामकग्रामस्य नाम्ना भोजपुरी भाषा सम्प्रति बिहारोत्तरप्रदेशयोर्विस्तृते भागे प्रचलिता वर्तते। सेयं भाषा आकारान्तशब्दानां प्रयोगबाहुल्यात् उच्चारणे श्रवणे चापि विशेषमाधुर्यमभिव्यनक्ति। *लोटवा-थरियवा, बेटवा-पतोहिया, गोरिया-पियंवा, घरवा-दुअरवा,* प्रभृतयो भूयांसो भोजपुरीशब्दा मनोहरा भाषायां विराजन्ते व्यवह्रियन्ते च। एवमेव भोजपुरिया जनाः स्वभावाद् एव शौर्यसम्पन्ना भवन्तीति विषयोऽपि प्रसिद्धो वर्तते। एवं च भोजपुरक्षेत्रे माधुर्यस्य शौर्यस्य च अतिशोभनः सङ्गमो दृष्टिगोचरी भवति।

मुडहू-तजना—

अद्यापि नैव मुडहू - तजनाभिधेयं-
स्थानद्वयं कथमपि स्मृतितोऽपयाति।
यत्रातिरम्य - तरु - पुष्पलता - विताने
स्थानेऽनयं बहुदिनानि मुदा सदाऽहम्॥ १५॥

बिहारप्रदेशे राँचीमण्डलस्य खूँटीप्रखण्डे मुडहू नामकं स्थानं वर्तते यत्र भारते सर्वोत्तमस्य लाक्षानिर्माणस्य सुप्रसिद्धा कार्यशाला (कारखाना, फैक्टरी) विराजते। एतत्कार्यशालाया एव अध्यक्षेण श्री सोहनलालबहलमहोदयेन तथा तदीयेन गुरुवरेण, जर्मनदेशे भारतीय-साहित्यसंस्कृतिप्राध्यापकेन डॉ० सत्यनारायणशर्मणा च समाहूतोऽहं १०.१०.७६ दिनाङ्के मुडहूं प्राप्तवान्। ममाह्वानस्य मुख्यमुद्देश्यमासीत् राँचीतः प्राकाशयितुमारब्धायाः परमार्थसुधाऽभिधायाः त्रैमासिक-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतपत्रिकाया वाराणसीतः प्रकाशनव्यवस्थाविषयिणी वार्ता। वार्ता जाता, प्रकाशनव्यवस्था मया स्वीकृता, वाराणसीतः प्रकाशनञ्चारब्धम्।

अस्यैव मुडहूस्थितस्य लाक्षासंस्थानस्य व्यवस्थापकः आसीत् श्रीरोशनलालशर्माभिधेयो महान् कर्मठः, सदाचारनिष्ठः, संस्कृत-प्रणयी, मयि च अतिशयश्रद्धावान् एकः स्पृहणीयचरितो युवजनः। मुडहू संस्थां परित्यज्य पश्चाद् अनेनापि स्वप्रतिभा-पौरुषबलेन खूँटीतः नातिदूरे तजनास्थाने एकमपरं लाक्षानिर्माणकेन्द्रं सञ्चालितम्।

मुडहू-तजना इत्येतत् स्थानद्वयमपि बहुविधसुरम्यतमतरु-लता-कुसुमराजिमण्डितं मनोहरं शान्तं स्वच्छजलवायुवातावरण-समन्वितं मम परमं प्रियमासीदिति मया अत्र अनेकवारमागतम्, बहूनि बहूनि दिनानि, उषितं परमानन्दमयश्च कालो यापितः। पुनश्च अनेन महानुभावेन मम आर्थिकी सहायतापि भूयसी कृता। मम व्यक्तिगतजीवनाय, पुस्तकानां प्रकाशनाय, यात्रायै, छात्रवृत्तये च त्रिंशत्सहस्राधिकानि रूप्यकाणि अपि प्रदत्तानि।

मुजफ्फरपुर—

तस्मिन् मुजफ्फरपुरे कतिचिद्दिनाना-
मद्यापि वासमधिकं सुखदायि मन्ये।
यत्र स्थितस्य मम चेतसि लिच्छवीनां
शश्वत् स्मृतावुपगतं गणतन्त्रवृत्तम्॥ १६॥

छात्रावस्थायां परीक्षादानार्थं, तदनन्तरं सभासम्मेलनादिषु भागग्रहणार्थं च मया अनेकधा स्वल्पकालार्थं मुजफ्फरपुरनगरे निवासः कृतः। तेषु दिनेषु बौद्धवाङ्मये इतिहासग्रन्थेषु च पठितस्य लिच्छवीनां प्रजातन्त्रात्मिकायाः शासनप्रणाल्या इतिवृत्तस्य सदा सगर्वं स्मरणं भवति स्म। भारते अद्यतः चतुर्विंशतिशतवर्षेभ्यः पूर्वकालादेव वैशाल्यां लिच्छवीनां वृज्जीनां च प्रजातन्त्रात्मकं शासनं प्रचलति स्मेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्वस्य एका विस्मयावहा, भारतस्य च कृते परमगौरवावहा घटना अस्ति।

परीक्षावसरे मम मुजफ्फरपुरनिवासकाले प्रतिवर्षं धर्मसमाज-संस्कृतमहाविद्यालये संस्कृतगोष्ठीनां तथा आयोजनं विधीयते स्म। तदतिरिक्तं समयान्तरेऽपि यदा कदा नगरेऽस्मिन् प्रचारकार्यं भवति स्म। अस्मिन् कार्ये संस्कृतमहाविद्यालयस्याध्यापकाः, लंगटूराम-कालेजस्य श्रीवैद्यनाथझाप्रभृतयः संस्कृताध्यापकाश्च मम सहयोगं कुर्वन्ति स्म। एतेषु दिनेषु संस्कृत-हिन्दी-साहित्य-शिरोमणीनां कविवर्यश्रीमदाचार्य जानकीवल्लभशास्त्रिणां सम्पर्को मम सर्वाधिक-मानन्दप्रदो भवति स्म।

राजगृह—

अद्यापि हिन्दु - जिन - बुद्ध - मतानुसारि-
नानाविधान - मठ - मन्दिर - मूर्ति - पूजाः।
एकत्र वीक्ष्य पुरि राजगृहे मुदा तत्
पुण्यास्पदं मिलनभूमिमहं नमामि॥ १७॥

१९३४-३७ तमवत्सरेषु बिहारप्रदेशे छपरामण्डलीयस्य हथुवाराज्यस्य श्रीछत्रधारि-संस्कृतमहाविद्यालये मया अध्ययनं विधीयते स्म। तेषु दिनेषु मुजफ्फरपुरनगरे परीक्षायाः केन्द्रमासीत्। अतः साहित्यस्य शास्त्रिपरीक्षाम्, आचार्यपरीक्षां च दातुं चत्वारि वर्षाणि अहं मुजफ्फरपुरं गच्छामि स्म। तदानीं परीक्षां समाप्य मया प्रतिवर्षं समीपवर्तिषु दर्शनीयस्थानेषु भ्रमणं प्रचारकार्यं च क्रियते स्म। तस्मिन्नेव प्रसङ्गे एकस्मिन् वर्षे राजगृहं गतवानहं यस्येदं संस्मरणं वर्तते। राजगृहस्य इदं वैशिष्ट्यं वर्तते यदिदं स्थानं सर्वेषामपि हिन्दु-जैन-बौद्धसम्प्रदायानां मान्यं तीर्थस्थानं वर्तते।

भगवतः बुद्धस्य इदं ज्ञानसाधनाया निवासस्य च प्रसिद्धं स्थान-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मस्ति। राजगृहस्य समीपवर्तिषु पर्वतेषु राजगृहे च बहूनि जैन-मन्दिराणि वर्तन्ते। सहैव हिन्दुधर्मस्यापि अत्र अनेकानि पवित्र-स्थानानि मन्दिराणि च विराजन्ते। एवं च इदं नानाविधानां मठानां, मन्दिराणां, मूर्तीनां, पूजाविधीनां च सामूहिकं समन्वयात्मकं च तीर्थस्थानमस्ति यत्र भ्रमणार्थं, दर्शनार्थं, पूजाद्यनुष्ठानार्थं च प्रतिवर्षं दूर-दूरेभ्यो बौद्धा जैना हिन्दवश्च यात्रिणः प्रभूतसंख्यायां समागच्छन्ति।

राँची—

वैदेशिकोऽपि य इहत्य-समस्तभाषा-
साहित्य - संस्कृति - समर्पितजीवितोऽभूत्।
तं सौम्यमूर्तिमधुनापि सुधीन्द्र-कामिल्-
बुल्के महोदयमहं सततं स्मरामि॥ १८॥

सुगृहीतनामधेयाः श्रीमन्तः फादर कामिल बुल्के महोदयाः बेलजियमदेशवासित्वेन वैदेशिकाः सन्तोऽपि भारतीयसाहित्य-काराणां मध्ये महत्त्वपूर्णं स्थानं भजन्ते स्म। स्वदेशे निवसतामेव एतेषां छात्रावस्थायामेव भारतस्य भाषासु साहित्ये संस्कृतौ च तथा प्रगाढोऽनुरागः श्रद्धा च समुदपद्यत यथा एते स्वदेशात् भारतमागत्य प्रयागविश्वविद्यालये हिन्दीविषये एम.ए. कक्षामुत्तीर्य तत्रैव रामचरितमानसमवलम्ब्य शोधकार्यं कृतवन्तो येन एते भारते विदेशेषु च महतीं ख्यातिं प्रतिष्ठां च अलभन्त। प्रयागे शिक्षाकार्यं समाप्य एते बिहारप्रदेशस्य रांचीनगरं स्वकार्यक्षेत्रं निर्मितवन्तः तत्रैव च स्वकीयं सम्पूर्णं जीवनं क्रिश्चियनधर्म-समाजयोः सेवायां, हिन्दीसेवायां, विविधसाहित्यसम्मेलनेषु भागग्रहणे, विविध-ग्रन्थानां निर्माणे, सारस्वतसाधनायां च स्वकीयं समग्रं जीवनं यापितवन्तः। हिन्दी-भाषया सह संस्कृतशिक्षाया अपि एते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रबलसमर्थका आसन्, यथा एतैः त्रिभाषासम्बन्धिनः प्रश्नस्य उत्तरे प्रतिपादितम्।

परमार्थसुधायाः संस्कृतत्रैमासिकपत्रिकायाः प्रधानसम्पादकानां डॉ॰ सत्यनारायणशर्मणां तथा तत्प्रबन्धसम्पादकानां श्रीसोहनलाल बहल महोदयानां सम्बन्धेन यदा यदा मम रांचीगमनस्य सुयोगोऽभवत् तदा तदा मम बुल्के महोदयानां साक्षात्कारो, विविधविषयेषु चर्चा च जायते स्म। भारते ये ये क्रिश्चियन-विद्वांसः मम परिचिता आसन् तेषु बुल्केमहोदया मम अतिशयश्रद्धाभाजनानि आसन्। ते जन्मना वैदेशिका परन्तु वेषभूषया, स्वभावेन, संस्कारेण, भोजनपानादिना व्यवहारेण च सर्वथा भारतीयतामेव भजमाना अभूवन्। तेषां दिवंगमनेन देशस्य महती क्षतिः जाता।

अद्यापि दक्षिणविहारविशिष्टरांची-
स्थानस्य संस्कृतसदांसि सदा स्मरामि।
येष्वादिवासिजन - खृष्टजनाश्च सर्वेऽ-
भूवन् सदैव मिलिताः सहयोगिनश्च॥ १९॥

रॉंची-संस्कृतमहाविद्यालयस्य प्रधानाचार्याः श्रीपण्डित-राजेश्वरमिश्रहोदयाः संस्कृतप्रचारक्षेत्रे एके सुविख्याता उत्साहवन्तो विद्वांसोऽभूवन्। तैरेकदा रॉंचीनगरे छोटानागपुरसंस्कृतसम्मेलनं कर्तुं योजना रचिता, तदर्थं च अहं परामर्शार्थं सहयोगार्थं च ३.१०.५५ दिनाङ्के तैः रांचीमाहूतः। अनन्तरं मम परेषां च सर्वेषां विदुषां परामर्शेण सम्मेलनस्य रूपरेखायां निर्धारितायां तदनुसारं योजनायां च जातायां १४.२.५६ दिनाङ्के अहं पुनरपि रांचीं समागतः सम्मेलने च भागं गृहीतवान्। एतत्सम्मेलनस्य साफल्यार्थं मया आदिवासिक्षेत्रेऽपि बहुधा भ्रमणं कृतम्। आदिवासिनां संस्कृतच्छात्राणां, संस्कृत-ज्ञनामादिवासिशिक्षकाणां च महान् सहयोगोऽपि लब्धः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वैशाली—

राजन्वती विजयि - लिच्छवि - वज्जिकैर्या
सिद्धिस्थली सुविदिता जिनबुद्धयोर्या।
यस्यामवाप परमं पदमाम्रपाली
यत्राभवद् विमलकीर्तिरुदात्तविद्यः ॥ २० ॥
तां संपदा सुचरितैर्यशसा विशालां
वैशालिकामनुदिनं स्मरतीव चेतः।
या नष्टसर्वविभवापि निजैरतीतै-
रद्यापि कीर्तिमजराममरां बिभर्ति ॥ २१ ॥

बिहारप्रदेशे मुजफ्फरपुरमण्डलान्तर्गता पुरातनी महानगरी वैशाली न केवलं भारतीयेतिहासे प्रत्युत विश्वेतिहासेऽपि सुप्रसिद्धा गौरवमण्डिता च। अस्याः प्रसिद्धेः गौरवस्य च अनेकानि कारणानि वर्तन्ते। प्रथमतस्तु इयं खृष्टाब्दात् चतुःशतवर्षेभ्यः पूर्वं महाप्रभुत्व-शालिनां लिच्छवि-वज्जिकानां गणराज्यस्य सुप्रतिष्ठिता सर्वर्द्धिसम्पन्ना राजधानी आसीत्। द्वितीयतः अत्रैव समीपे भगवतः महावीरस्य जन्मकारणात्, भगवतः बुद्धस्य च अत्र अनेकधा आगमनात् धर्मोपदेशाच्च इयं नगरी जैनधर्मस्य बौद्धधर्मस्य च प्रमुख-तीर्थस्थानरूपे प्रतिष्ठिता जाता। तृतीयतः अत्रत्येषु लिच्छविषु विमलकीर्तिनामा बौद्धधर्मस्य एको गृहस्थो विद्वान् जन्म गृहीतवान् येन विरचितो "विमलकीर्तिनिर्देशसूत्र" नामको ग्रन्थो विश्वस्य अनेकेषु देशेषु महतीं ख्यातिमवाप। चतुर्थतः अस्या एव नगर्याः परमसुन्दरी नगरवधूः आम्रपाली भगवतः बुद्धस्य चरणयोरात्मानं स्वकीयां सम्पदं च समर्प्य परमयशस्विनी बभूव। एवमेव भौतिकसम्पदा, नागरिकाणां सदाचरणैः, विद्याशिल्पकलादीनां प्राचुर्येण च वैशाल्या विशिष्ट-गौरवस्य गाथा अगणनीया वर्तते। परं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कालक्रमात् सम्प्रति सा बसाढ़नामके लघुग्रामे सीमिता वर्तते, परितश्च तस्या भग्नावशेषा दृष्टिपथमायान्ति ये दर्शकाणां हृदये दुःसहां व्यथां जनयन्ति।

परन्तु प्रसन्नतायाः सन्तोषस्य चायं विषयो वर्तते यदिदानीं बिहारराज्यस्य सहयोगेन अस्मिन् स्थाने "प्राकृत, जैनविद्या एवं अहिंसा शोधसंस्थान" नाम्ना एका सुमहती गौरवशालिनी संस्था संचालिता वर्तते। अनया संस्थया बृहता पुस्तकालयेन सह अनुसन्धानोपयोगिसामग्रीणां संग्रहेण, अनुसन्धानसञ्चालनेन, प्रकाशनेन, वार्षिकगोष्ठीनां समायोजनेन, विदुषां संग्रह-सत्कारादिना, अध्ययनाध्यापनादिव्यवस्थया च जैनसाहित्यस्य महती सेवा विधीयमाना वर्तते। मन्ये, अनया संस्थया वैशाल्याः आध्यात्मिकं साहित्यिकं च पुरातनं गौरवं पुनरपि प्रतिष्ठापितं विधास्यते।

इदं स्थानमहं १९३६ तमे वत्सरे दृष्टवान् यदा अत्र भग्नावशेषातिरिक्तं किमपि दर्शनीयं वस्तु नासीत्।

सीतामढ़ी—

सीतामढ़ीतिनगरे समितौ महत्यां
दृष्ट्वाऽल्पतां सुरगिरः समुपासकानाम्।
श्रीमुख्यमन्त्रिण उदासनिराशमास्यम्
अद्यापि रोषकलुषे च दृशौ स्मरामि॥ २२॥

२०, २१, २२ मार्चदिनाङ्केषु सीतामढ़ीनगरे बिहारप्रदेशीयं संस्कृतसम्मेलनं समायोजितमासीद् यस्य मुख्यातिथयः बिहारस्य मुख्यमन्त्रिणः श्रीजगन्नाथमिश्रमहोदया अभूवन्। एतत् सम्मेलनं संस्कृतज्ञानामासीत् परमत्र हिन्दी-अंग्रेजीविद्यालयानामेव शिक्षकाणां संख्या भूयसी आसीत्। हाजीपुरात् सीतामढ़ीं गच्छता मया मार्गे दृष्टं यत् तेनैव मार्गेण मुख्यमन्त्रिणः आगमनं ज्ञात्वा तन्मार्गसमीपवर्तिनः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वेऽध्यापका मार्गे द्वारं निर्माय मुख्यमन्त्रिणां स्वागतार्थं पुष्प-मालादिभिः सुसन्नद्धा आसन्, सर्व एव च ते सभायामपि सम्मिलिता अभूवन्। परन्तु तदपेक्षया संस्कृताध्यापकानां छात्राणां वा संख्या अतीव न्यूना आसीत्। यदि सर्वेषामपि संस्कृतविद्यालयानाम-ध्यापकाः सम्मिलिता अभविष्यन् तदा तेषामपि संख्या न्यूना नाभविष्यत् परन्तु ते आलस्येन, अनुत्साहतया, द्रव्यव्ययभीत्या, क्लेशभयाद् वा न सम्मिलिताः। अतः सम्मेलनस्य विशाले मण्डपे ते अङ्गुलिगणनीया एककोणसङ्कुचिता एव भूत्वा स्थिता अभूवन्। एतादृशीं स्थितिं दृष्ट्वा मुख्यमन्त्रिणो मया नितान्तं विवर्णवदनाः खिन्नमानसाश्च दृष्टाः। तैरुक्तं च—*"मैंने तो पण्डितों का वेतन बढ़ाकर संस्कृत के लिए जो करना था, कर दिया अब पण्डितों को देखना है कि संस्कृत के लिए वे क्या करते हैं? आप समझाइये पण्डितों को"*

सिवान—

अद्याप्यहं नव-सिवान-विशिष्टशाला-
संस्थापकं, धनदमार्यगुणं गुरुं च।
बाँकेविहारि बुधवर्यमुदारसत्त्वं
श्रीरामचन्द्रसुहृदं च सदा स्मरामि॥ २३॥

बिहारप्रदेशस्य सर्वान्तपश्चिमभागस्थिते छपरामण्डले तस्य च पश्चिमे भागे "सिवान" नामकं नगरं वर्तते। इदं नगरं मम उत्तरप्रदेशस्य जन्मग्रामात् पूर्वदिशि दशसु क्रोशेषु वर्तते। तत्र रामेश्वरसंस्कृतविद्यालयनामकं लघु संस्कृतशिक्षणकेन्द्रमासीत् परं सिवाननगरस्य विविधान्यविशिष्टशिक्षण-केन्द्रानुरूपं गौरवावहं किमपि संस्कृतशिक्षणकेन्द्रं नासीत्। इदं दृष्ट्वा निकटवर्ति मम चित्तं सदैव चेखिद्यते स्म। ततो मया ईस्वीये संवत्सरे वसन्तपञ्चमीदिने सिवाननगरस्य डी०ए०वी० कालेजस्य विख्यातं प्रभावशालिनं च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राचार्यं बाँकेबिहारीमिश्रं मिलितुं तथा तस्मिन्नेव परिसरे एकं विशिष्टं संस्कृतमहाविद्यालयं स्थापयितुं तं निवेदयितुं मया निश्चयः कृतः। ततोऽहं वसन्तपञ्चमीदिने प्रातरेव सिवाननगरं प्राप्तः तथा स्वसहपाठिनः श्रीरामचन्द्रत्रिपाठिनो भवने सिवानस्य स्वकीयैः त्रिचतुरैः सुहृद्भिः पण्डितैः सह डी०ए०वी० कालेजं चलितुं प्राचार्यमहोदयैश्च मिलितुं परामर्शं कृतवान्। परं तस्य फलं विपरीतं जातम्। सुहृद्भिः कथितम्—"*अरे, वहाँ चलने से कुछ लाभ नहीं होगा। उसके प्राचार्य तो आर्यसमाजी हैं। न शिखा रखते हैं, न जनेऊ पहनते हैं, न खानपान का विचार करते हैं और न पण्डितों का आदर करते हैं। वे फिर संस्कृतमहाविद्यालय खोलने में सहायता करेंगे? वहाँ चलना बेकार है।*" परन्तु अहं मिलितुं निश्चित्य आगतवान्। अतः एकं मित्रमादाय अहं मिश्रमहोदयं मिलितुं गतवान्। सौभाग्यवशात् मिश्रमहोदयाः कालेजे विराजमाना आसन्। प्रारम्भिके परिचये, कुशलप्रश्ने च सानन्दं सम्पन्ने मया मिश्रमहोदयाय स्वकीयमागमनप्रयोजनं सविस्तरं निवेदितम्। मम निवेदनं श्रुत्वा मिश्रमहोदया भृशं प्रसन्ना जाताः। पण्डितैः हतोत्साहस्य मम तु ततोऽप्यधिका प्रसन्नता जाता। तैः कथितम्—"*बिलकुल सही है। यहाँ संस्कृत की एक बड़ी संस्था होनी चाहिए और आज जब आपने इसी पुण्यकार्य के निमित्त मेरे पास आने का कष्ट किया है तो मैं आज ही अपने कालेज का एक भूखण्ड महाविद्यालय के लिए देता हूँ और अपने एक मित्र को प्रारम्भिक सहायता के लिए बुलाता हूँ। इस कार्य का आज ही शुभारंभ हो जायगा।*" तस्य इदं वचनामृतं श्रुत्वा मम हृदये आनन्दस्य अजस्रधाराः प्रवाहिताः। मम आगमनप्रयोजनं च सर्वथा सिद्धमजायत। एवं च शुभारम्भे जाते अहं वाराणसीं प्रतिनिवृत्तः। द्वितीयदिनादेव च भवननिर्माणस्य कार्यं प्रारभ्यत। परन्तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीबैजनाथपाण्डेयमहोदयैः प्रदत्तं धनं यदा समाप्तं तदा पुनरपि षण्मासानन्तरं कार्यावरोधो जातः। ततोऽस्माभिः महाविद्यालयस्य एकं समारोहं तत्कालीन-शिक्षामन्त्रिणामध्यक्षतायां कृत्वा तत एव अनुदानं लब्धुं निश्चयो विहितः। तदनुसारं मन्त्रिमहोदयाः प्रार्थिताः तैश्च स्वीकृतिः प्रदत्ता। मेषसंक्रान्तिदिने सभां कर्तुं निश्चयः कृतः। तस्मिन् दिने अहमपि वाराणसीतः सिवानं सम्प्राप्तः। दिने १२वादने सभा समारब्धा। सभायां मया संस्कृते एकं सरलं ललितं च भाषणं कृतम्। तत् श्रुत्वा मन्त्रिमहोदयाः भृशं प्रसीदन्ति स्म। तेषां प्रसन्नतां दृष्ट्वा मया स्वभाषणस्यान्ते कथितम्—"मान्या मन्त्रिमहोदयाः, भवन्तः खलु मन्त्रिणः प्रदेशस्य राजानः, अहं च वाराणस्या वैदिको ब्राह्मणः, अद्य च पवित्रं संक्रान्तिपर्व, अतो भवद्भिः किंचिद् विशिष्टं दानं कर्तव्यम्" इति। ततो मन्त्रिमहोदयैः विहस्य कथितम्—*"पण्डितजी, क्या दान चाहते हैं?"* मया उत्तरितम्—"महोदय, अहम् अस्यैव भवनस्य सर्वाङ्गरूपेण सुष्ठुरूपेण च निर्माणं भवेत् इति कामये, तदर्थं च भूयो भूयो निवेदये।" ततस्तैः कथितम्—*"अच्छा, भवन तो मैं बनवा दूँगा, पर आप अपनी ही जैसी संस्कृत हमको भी बोलना सिखा दीजिये।"* इदं श्रुत्वा सर्वे सभासदो महान्तं हर्षं प्रकटीकृतवन्तः, तालिकां वादितवन्तः, आवयोश्च कथनोपकथनं बहु अनुमोदितवन्तः समर्थितवन्तश्च। ततो मन्त्रिमहोदयानां साहाय्यमुद्घोष्य सभा समाप्ता। एवं प्रकारेण महाविद्यालयस्य स्थापना जाता। महाविद्यालयस्य प्रधानाचार्यपदे सिवाननिवासिनः श्रीपं०रामचन्द्रत्रिपाठिनो-व्याकरणाचार्याः प्रतिष्ठापिताः। स महाविद्यालयः अद्यापि सिवानगरस्थस्य गौरवम् आवहतीति महतः प्रमोदस्य विषयो वर्तते। एतन्महाविद्यालयस्य प्रथमवार्षिकोत्सवावसरेऽपि अहं तत्र उपस्थित आसम्, यत्र मया स्वभाषणे इयं चर्चा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतां यत्-सिवाननगरे महान्तः शिखायज्ञोपवीतधारिणः, भोजन-पानादिषु विशिष्टाचारपालकाः, ब्राह्मणत्वाभिमानिनः ये ब्राह्मणा निवसन्ति परं महाविद्यालयस्य कृते प्रथमं साहाय्यं स एको महता उल्लासेन सह दत्तवान् यो न यज्ञोपवीतं धारयति, न भोजनपाने कमपि नियमं पालयति, आत्मनो वा ब्राह्मणत्वमेव उद्घोषयति। मम इदं वक्तव्यं श्रुत्वा तत्र सभायां महान् हासो जातः। ये च मम सुहृदो मां पूर्वं हतोत्साहितं कृतवन्तस्ते लज्जिताः अभूवन्। ततः पुनस्तस्यैव आग्रहेण आर्थिकं सहाय्यमपि प्रचुरमात्रायां प्राप्तम्। प्रधानाचार्यश्च आदौ एव सुयोग्यः सम्प्राप्तः। श्रीत्रिपाठिमहाभागो विद्वान् कर्मयोगी कार्यकुशल आसीत्। एवञ्च श्रीमिश्र-पाण्डेय-त्रिपाठिनां त्रयाणां तथा श्रीशिक्षा-मन्त्रिणां च विशेषसाहाय्येन, इयं संस्था अनुपमं महत्त्वं प्राप्तवती इति एतेषां मम सदा स्मरणं जायते। महती च श्रद्धा जागर्ति। विशेषतश्च मम प्रियसुहृदं श्रीत्रिपाठिनं प्रति मे महती श्रद्धा येन न केवलं महाविद्यालय एव महतीं सम्मुन्नतिं नीतः अपितु एको नूतनः आयुर्वेदमहाविद्यालयोऽपि अत्र संस्थापितो येन संस्कृतक्षेत्रे सिवानक्षेत्रं द्विगुणितं महत्त्वं प्राप्तवत्। श्रीत्रिपाठी एकः सुयोग्यः चिकित्सकोऽपि आसीत्।

अद्यापि या मम सिवानपुरस्थ-रेल-
स्थाने दुरन्तघटना घटिता निशायाम्।
भूरिश्रमार्जितमदीयधनापहा सा
चेतो मम स्मृतिगता बहुशो दुनोति॥ २४॥

भारतस्य विभिन्नप्रदेशेषु अहर्निशं भ्रमतोऽपि मम कुत्रापि कस्यचिदपि वस्तुनः अपहरणं न जातम्। परन्तु एकदा उपर्युक्तसिवाननगरस्य स्टेशने निशायां तथा अपहरणं जातं यस्य पूर्तिरद्यावधि न जाता, नापि भवित्री एव।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घटना ईदृशी वर्तते। अहं तेषु दिनेषु "पर्यायविश्वकोश" नाम्ना एकस्य बृहतः कोशस्य निर्माणे व्यापृत आसम्। तस्य त्रिसहस्र-पृष्ठात्मकं हस्तलिखितं भागं पेटिकायामेकस्यां धृत्वा भ्रमणप्रसङ्गेन सिवान–स्टेशने रात्रौ शयान आसम्। तां पेटिकां कश्चिच्चौरो भारवतीं दृष्ट्वा तत्र च प्रभूतां सम्पतिमनुमाय शनकैः पेटिकां चोरितवान्। प्रबुद्धोऽहं यदा पेटिकां नापश्यं तदा मम सर्वस्वहरणमिव कष्टं जातम्। प्रभाते जाते तदन्वेषणार्थं पुलिसजनानामपि सहायता गृहीता परं तस्य किमपि फलं न जातम्। ततः परं तत्कोशस्य पुनर्निर्माणाय मम उत्साह एव भग्नो जातः। स्मारं स्मारं च तद् वृत्तं मम अद्यापि यदा कदा हृदयं भृशं पीडामनुभवति।

कोशमिमं दृष्ट्वा राष्ट्रपतयः श्री डॉ० राजेन्द्रप्रसादमहोदया भृशं प्रसन्नाः सन्तः तद्विषये एकं स्वाभिप्रायं व्यक्तीकृतवन्त आसन्।

मिथिला—

अद्यापि मैथिलभुवो भ्रमणप्रसङ्गे
दृष्टा अनेक - लघु - वक्रिमभङ्गिभाजः।
तीरस्थितैर्बहुल - वृक्षलता - कदम्बैः
श्यामायमान - सलिलाः सरितः स्मरामि॥ २५॥

मिथिलाप्रदेशे लघ्व्यो बृहत्यश्च अनेकाः सरितः प्रवहन्ति यथा एकस्मिन् मैथिलीपद्ये वर्णितम् मिथिलाभ्रमणसमये। यदा नदीपरिसरे भ्रमणं भवति स्म तदा ता दृष्ट्वा बहु प्रसन्नता जायते स्म।

गंगा वहथि जनिक दक्षिणदिशि पूर्व कौशिकी धारा,
पश्चिम बहति गण्डकी उत्तर हिमवति बलविस्तारा।
कमला त्रियुगा अमृता घेमुरा वागमती कृतसारो,
मध्य वहथि लक्ष्मणा प्रभृति से मिथिला विद्यागारा॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि मैथिलकरग्रहणाऽवसाने
कन्याविदायगमनाऽवसरे श्रुतानि।
गीतान्यतीव करुणाजनकानि मत्कं
चेतो हरन्ति जनयन्ति तथाऽश्रुपातम्॥ २६॥

विभिन्नेषु माङ्गलिकेषु अवसरेषु गीयमानानि प्रायः सर्वेषामपि प्रदेशानां लोकगीतानि मधुराणि मनोहराणि च भवन्ति। परन्तु मिथिलायाः "समदाउन" नामकं गीतं तत्रापि किञ्चिद् अपूर्वां विशिष्टतां भजते। इदं गीतं, यदा कन्याः विवाहानन्तरं पितुर्गृहात् वरेण सह पतिगृहं गच्छन्त्यो भवन्ति, तस्मिन्नवसरे परिवारस्य ग्रामस्य च कन्या महिलाश्च गायन्ति। गीतमिदं माधुर्येण सह अत्यन्तं करुणाजनकं भवतीत्यस्य वैशिष्ट्यं वर्तते। तच्च गीतश्रवणेनैव अनुभवितुं शक्यते। अहं यदा लहेरियासरायनगरे कतिचिद् दिनानि कुमारगङ्गानन्दसिंहमहोदयानां गृहे निवसन्नासं तदा तेषां पाचकः श्री रामकृष्ण झा रात्रौ भोजनान्ते प्रतिदिनं तद्गीतं गायति स्म मां श्रावयति स्म च। तस्य गीतस्य एका पंक्तिर्मां सदा मोहयति—

एतना जतन सो सिया जी के पोसलहु, सेहो रघुवर नेने जाय।

अर्थ :—इयता यत्नेन मया सीता पालिता, पोषिता, परिवर्द्धिता च। परं हा कष्टम्, तामपि इदानीं रघुवरः नयन्नस्ति।

इमानि गीतानि श्रुत्वा न कश्चित् तादृशः निरक्षरोऽपि जनो भविष्यति यस्य लोचने अश्रुपरिप्लुते न स्याताम्। मिथिलाभ्रमणकाले इदं मया साक्षादप्यनुभूतम्।

अद्यापि तत् स्मरति मे हृदयं रसालो-
द्यानं यदीय-लघुकाय-महीरुहाणाम्।
भूमिं स्पृशन्ति सुगुरूणि फलानि लोका-
नुत्पीडयन्त्यपि मनांसि च रञ्जयन्ति॥ २७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मिथिलाभ्रमणकाले कदाचिद् ग्रामाद् ग्रामान्तरगमनावसरे इदं मनोरञ्जकं दृश्यं मया साक्षात्कृतम्। तत्र ग्रामेषु आम्राणां बहूनि च बृहन्ति च उद्यानानि भवन्ति। तेषु आम्रवृक्षेषु च केचन नितान्तं लघुकाया भवन्ति, परं तेषां शाखाः फलभारनतत्वात् भूमिं स्पृशन्त्य इव प्रतिभान्ति। यदा च कश्चित् उद्यानमार्गेण गच्छति, पादाभ्यां यानेन वा, तदा तस्य शिरसि फलानामाघातोऽपि जायते। अतस्तत्र शिरो नमयित्वा एव गमनं हितकरं भवति। ममापि इदं साक्षादनु-भूतम्।

नाट्यानि मैथिलकविप्रवरैः प्रणीता-
न्यद्यापि तानि पठितानि मनो हरन्ति।
दैव्या गिरा प्रकृतिजातगिरा च सार्धं
नृत्यन्ति यत्र मिथिलामृदुगीतकानि॥ २८॥

मिथिलायां प्रणीते नाट्यसाहित्ये अयमेको विशेषो वर्तते यत् केषुचित् नाटकेषु संस्कृतभाषया प्राकृतभाषया च सह सरसमधुराणां, ललितपदावलीसंवलितानां मैथिलीगीतानामपि मनोहरः समावेशो भवति। एतादृशानां पञ्चदशाधिकानां नाटकानां "मिथिला-परम्परागत-नाटक-संग्रहः" इति नाम्ना सप्तसु खण्डेषु संग्रहः प्रकाशितो वर्तते। एतेषु एकमपि नाटकमभिनीयमानन्तु मया न दृष्टं, परं पठितानि सर्वाणि, अद्यापि च मनोरञ्जनाय काव्यरसास्वादनाय च पठ्यन्ते। तेषां नाटकानां, तत्कर्तॄणां कवीनां च परिचयः सर्वेषां परिज्ञानाय अधस्तादुल्लिख्यते—

खण्डः	नाटकम्	कर्ता
प्रथमखण्डः	*धूर्तसमागमप्रहसनम्*	*ज्योतिरीश्वरः*
	गोरक्षविजयम्,	*विद्यापतिः*
द्वितीयखण्डः	*आनन्दविजयनाटिका*	*रामदास उपाध्यायः*

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयखण्डः	पारिजातहरणम्	उमापतिः
	उषाहरणनाटकम्	देवानन्दः
चतुर्थखण्डः	कृष्णकेलिमाला	नन्दीपतिः
पञ्चमखण्डः	रुक्मिणीपरिणयनाटकम्	रमापतिः
षष्ठखण्डः	गौरीस्वयंवरनाटकम्	कविलालः
	कृष्णजन्मरहस्यम्	श्रीकान्तः
	गौरीप्रणयनाटकम्	शिवदत्तः
	पारिजातनाटकम्	शिवदत्तः
	गौरीस्वयंवरनाटिका	कान्हारामदासः
सप्तमखण्डः	उषाहरणनाटिका	रत्नपाणिः
	प्रभावतीहरणनाटकम्	भानुनाथः
	उषाहरणनाटकम्	हर्षनाथः
	माधवानन्दनाटकम्	हर्षनाथः

अद्यापि तानि मधुरध्वनिमण्डितानि
लालित्यसम्भृत - पदावलि - गुम्फितानि ।
गीतानि मैथिलकवीश्वर - निर्मितानि
चेतः स्मृतानि मदयन्ति च मोहयन्ति ॥ २९ ॥

अपरजयदेवेन मैथिलमहाकविना विद्यापतिना अपरगीत-गोविन्दमिव विनिर्मिता सरसकोमलकान्तपदावली-सम्भृता विद्यापतिपदावली मिथिलाप्रदेशस्य जनानां मुखे मुखे विराजते। मिथिलाभ्रमणकाले मयापि तत् स्थले-स्थले गृहे गृहे च श्रुत्वा सुमहान् आनन्दसन्दोहः संप्राप्तः । तदद्यापि मया स्मर्यते स्वयं गीयते च।

अद्यापि सुप्रथितया लखिमेतिनाम्न्या
राज्ञ्या कवित्वरचनाऽञ्चितकीर्तिमत्या।
पद्यद्वयं विरचितं ललितं श्रुतं यत्
तन्मे मनः स्मृतिगतं विदधाति मत्तम्॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मिथिलाप्रदेशे १४०२तमे खृष्टाब्दे महाराजाधिराजः श्रीशिवसिंहो राज्यं करोति स्म। तस्यैव महाराज्ञी लक्ष्मणा, लोके लखिमा इति नाम्ना विख्याता, परमविदुषी काव्यरचनायां परमनिष्णाता चापि आसीत्। तन्निर्मितं मनोरञ्जकं पद्यद्वयं प्रायेण मिथिलायां रसिकविद्वत्समाजे सर्वत्र प्रचलितं वर्तते। तन्मयापि मिथिलाभ्रमणकाले बहुत्र आकर्णितम्, तदुक्तिवैचित्र्येण च चेतोऽपि चमत्कृतं भवति स्म। तत् पद्यद्वयं निम्नलिखितं वर्तते—

एकः कोऽपि रसिको जनः कामपि कटितटे जलघटीं वहन्तीं युवतिं विलोक्य तां व्यङ्ग्यमुखेन प्राह—

किं मां निरीक्षसि घटेन कटिस्थितेन
वक्रेण चारु - परिमीलित - लोचनेन।
अन्यं निरीक्ष पुरुषं तव भोगयोग्यं
नाहं घटाङ्कितकटीं प्रमदां भजामि॥

ततः सा युवतिरिमां व्यङ्ग्योक्तिं श्रुत्वा ततोऽप्यधिकं कटाक्षयन्ती तं जनं लज्जयन्ती च प्राह—

सत्यं ब्रवीषि मकरध्वजवाणपीड
नाहं त्वदर्पितदृशा, परिचिन्तयामि।
दासोऽद्य मे विघटितस्तव तुल्यरूपः
सोऽयं भवेन्नहि भवेदिति तर्कयामि॥

मिथिलायाः संस्कृतसाहित्यविषयकेतिहासपरिज्ञानाय अध्येतव्याः केचन ग्रन्थाः—

१. Contribuition of Mithila to Sanskrit Kavya and Sahitya Shastra. लेखकः-त्रिलोकनाथ झा, प्रकाशक-राष्ट्रिय संस्कृत संस्थान, नई दिल्ली,

२. महाकवि-विद्यापतिः लेखक-आचार्य डॉ० जयमन्त मिश्रः, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, मूल्यम्-५०.००

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१. History of Navya Nyaya in MIthila लेखक–प्रो० दिनेशचन्द्र भट्टाचार्य M. B. Y. Mithila Institute. Darbhanga. Price-13.50

दरभंगा—

अद्यापि विस्मृतिमुपैति न द्वारवंगा-
पुर्यां विशिष्टविदुषां महती सभा सा।
यत्राऽभवत्—सुरगिरा जनवाक् कदाचि-
दासीन्नवेति-विषये तुमुलो विवादः॥ ३१॥

१,२,२,४.७.६५ तमेषु दिनाङ्केषु दरभंगा-संस्कृतविश्वविद्यालयद्वारा एका विदुषां गोष्ठी समायोजिता आसीत्। अस्यां बिहारप्रदेशस्य प्रायः सर्वेऽपि प्रतिष्ठिता विद्वांसः संस्कृतशिक्षाधिकारिणश्च भागं गृहीतवन्तः। अस्यामेव गोष्ठ्यां मया प्रसङ्गवशात् संस्कृतभाषाया आदिभाषात्वविषये लोकभाषात्वविषये च पण्डितेषु मतभेदस्य चर्चा कृता, तन्निवारणाय च निवेदनरूपेण केचन श्लोकाः पठिता यान्निशम्य तत्समर्थकानां तद्विरोधिनां च मध्ये महान् विवादो जातः मयि च अनेके विद्वांसः कुपिता जाताः। ते श्लोकाः पाठकानां ज्ञानार्थं विवेचनार्थं च अधस्ताल्लिख्यन्ते--

स्वयं संस्कृतभाषाया उत्पत्तिविषये महान्।
संशयो विद्यतेऽद्यापि ननु पण्डितमण्डले॥
संस्कृतात् प्राकृतं जातं प्राकृताद्वा नु संस्कृतम्।
संस्कृतं लोकभाषासीन्नं वा देशे कदाचन॥
दैवी भाषेति नामास्या अभवत् केन हेतुना।
संस्कृतं वापि नामैतत् कदा कथमजायत॥
एतस्मिन् विषये प्रायो ज्ञानं किमपि निश्चितम्।
बहुपण्डितवर्याणामपि नैवावलोक्यते॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जैना बौद्धास्तथा नव्या भाषाविज्ञानपण्डिताः।
प्राकृतादेव मन्यन्ते संस्कृतस्य समुद्भवम्॥
बहुभिर्मन्यते श्रौती भाषा सर्वपुरातनी।
परं कैश्चित्ततोऽप्याद्या काचिद् भाषाऽनुमीयते॥
संस्कृतं लोकभाषासीदवश्यमिति भूयसाम्।
पण्डितानां मतं मन्ये ज्ञानाद्वा श्रद्धयाऽपि वा॥
अपरे च पुनः केचित् पण्डिता एव विश्रुताः।
संस्कृतं नहि मन्यन्ते लोकभाषां कथञ्चन॥
अत एव च सर्वेषां पुंसां संस्कृतसद्मनि।
प्रवेशस्याधिकारं ते मन्यन्ते नैव धर्मतः॥
एवञ्च विषयेष्वेषु बहूनां विदुषां मया।
विचारा विविधा दृष्टाः परस्परविरोधिनः॥
परं संस्कृतसम्बन्धे तज्ज्ञानामेव धीमताम्।
ईदृशं खलु वैमत्यं विरोधो वा न शोभते॥
अतः संस्कृतविद्वद्भिर्विषयेऽस्मिन् सयुक्तिकम्।
सम्यगध्ययनं कृत्वा कर्तव्यः कोऽपि निर्णयः॥

सुरभारतीसन्देशः, द्वितीयः सन्देशः,
श्लोकाः ५-१६

पटना—

अद्यापि तस्य हरिमोहनझा - बुधेन्दोः
सम्भाव्यते न खलु विस्मरणं कदाचित्।
मग्नोऽपि यः सकलदर्शनशास्त्रसिन्धौ
प्रावाहयत् प्रखरहास्यरसस्य गङ्गाम्॥ ३२॥

प्रो० हरिमोहनझामहोदया मैथिली - हिन्दीभाषयोः सुविख्याता लेखकास्तथा पटनाविश्वविद्यालये दर्शनविभागाध्यक्षा आसन्। परं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कौतूहलस्य विषयोऽयं वर्तते यदेते दार्शनिका भूत्वापि हास्य-व्यङ्ग्य-विनोदविषयानधिकृत्य कन्यादान, द्विरागमन, प्रणम्य देवता-प्रभृतीनि अनेकानि पुस्तकानि लिखितवन्तः। परं तेषां "खट्टर काका" नाम्ना प्रसिद्धा व्यङ्ग्यकृतिः एका एतादृशी रचना वर्तते यस्या मम दृष्टौ कापि तुलनैव नास्ति। अस्मिन् पुस्तके शास्त्रीयवचनानि अर्थान्तरं कृत्वा व्यङ्ग्यरूपेण तथा व्याख्यातानि यथा तैर्न केवलं मनोरञ्जनं भवति प्रत्युत बुद्धेरपि विकासो भवति, तर्कशक्तिरपि वर्धते तथा बहूनां नवीनविषयाणां ज्ञानमपि जायते। इदं पुस्तकं हास्य-विनोदरसिकैः पण्डितैरवश्यं पठनीयमिति मे बलवदनुरोधो वर्तते। झामहोदयानामन्यानि उपर्युक्तपुस्तकानि मैथिलीभाषायां वर्तन्ते परन्तु इदं पुस्तकं हिन्दीभाषायां वर्तते। पुस्तकप्राप्तिस्थानम्-राजकमल प्रकाशन, १-बी, नेताजीसुभाष मार्ग, नई दिल्ली-११००२, मूल्यम्-३५.००

एतत्प्रदेशधरणीभ्रमण - प्रसङ्गे
दृष्टाः श्रुता वसतयो गतपण्डितानाम्।
संस्मारयन्ति परितो मिथिलामहत्त्वम्
उद्घोषयन्ति च विदां जननस्य गर्वम्॥ ३३॥

मिथिलाप्रदेशो बहूनां सुविख्यातशास्त्रकाराणां जन्मभूमिरिति विषये न कस्यापि संस्कृतसाहित्येतिहासविदो वैमत्यं भवितुमर्हति। अत एव एकेन मैथिलविदुषा एकस्मिन् मैथिलीभाषापद्ये वृत्तमिदं सगर्वमुद्घाटितम्। तत्पद्यं यथा मया श्रुतं तदधस्तादुल्लिख्यते—

गौतम न्यायक सूत्र रचथि जनिकर कुटीर में
विद्यापति कविता क गान सरिताक तीर में।
अंक वैसि गंगेश करथि चिन्तामणि चर्चा
उदयन भरि कुसुमाञ्जलि विरचिल जनिकर अर्चा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वयं जगज्जननी बनथि वैदेही उपजा जकर
मातृभूमि मिथिला हमर के कय सक समता तकर॥

मिथिलायाः प्राचीनपण्डितानां ग्रामादिपरिज्ञानाय निम्नलिखितो ग्रन्थः द्रष्टव्यः—मिथिलाबिहार पत्रिका (मिथिलांक) मार्गशीर्ष, १९९२ वि० सं० पुस्तकभण्डार, लेहरियासराय, दरभंगा (बिहार)।

अद्यापि भारतगताखिलमैथिलानाम्
आतिथ्यमद्भुततमं नहि विस्मृतं मे।
यत्रागता अतिथयोऽधिक - भोज्यदानैर्
ना ना न ना न न न नेति भृशं वदन्ति॥ ३४॥

"अतिथिदेवो भव" इत्यस्माकं वैदिकः सिद्धान्तो वर्तते। तदनुसारं भारतस्य सर्वेष्वपि प्रदेशेषु अतिथिसत्कारस्य प्रथा प्रचलति। परन्तु मिथिलायामतिथिसत्कारस्य स्वरूपं किञ्चिद् भिन्नमेव भवति। अत्र अतिथीनां कृते परिवेष्यमाणेषु भक्ष्य-भोज्यादिपदार्थेषु तथा विविधता एवं प्रचुरता भवति यथा अतिथयः तन्निषेधाय मुहुर्मुहुः ना ना ना ना इति कथने व्याकुला भवन्ति। परिवेषका इदं न विचारयन्ति यद् भोक्ता अतिथिः एतावन्ति भक्ष्यभोज्यादिवस्तूनि भोक्तुं शक्नोति न वा। बहुधा निषेधे क्रियमाणेऽपि ते अधिकाधिकभोजनदाने एव आत्मनो गौरवं मन्यन्ते। इदं दृश्यं मया न केवलं मिथिलायां प्रत्युत अन्यप्रदेशेष्वपि निवसतां मैथिलानां गृहे दृष्टं स्वयमनुभूतं च। अहमदाबाद-नगरस्य पं० दीनानाथझामहोदया एतत्प्रसङ्गे मम सदैव स्मृतिपथे विराजन्ते ये एकस्मिन् बृहत्पात्रे प्रभूतं पायसं दत्त्वा "पात्रं त्यक्त्वा पायसं सर्वं भोक्तव्यमिति" मां प्रार्थितवन्तः। अतः मैथिलविदुषां गृहे भोजने मम महती भीतिर्भवति स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधुवनी, मंगरौनी—

अद्यापि झाकुलजुषो विदुषोऽङ्गनाना-
मातिथ्यमद्भुतमहो नहि विस्मरामि।
सुप्तोत्थितस्य मम याः पुरतः प्रभाते
आदाय पक्ववटिका विविधा उपायन्॥ ३५॥

विद्वद्गोष्ठीसमाप्त्यनन्तरमहं तस्मिन्नेव दिने रात्रौ मम मित्रवर्यस्य पण्डितप्रवर श्रीआद्याचरणझामहोदयस्य कन्याया विवाहे सम्मिलितो भूत्वा भोजनपरिवेषकाणामत्याग्रहवशाच्च प्रचुरं भुक्त्वा द्वादशवादन-समये पण्डितवर्यैः श्रीनमोनारायणझामहोदयैः सह मधुवनीनगरमहं समागतः, तेषामेव च गृहे स्थितः, कञ्चित्कालं च वार्तालापं विधाय सुप्तश्च। विवाहस्तु मंगदौनीग्रामे सम्पन्न आसीत्।

श्रीमन्तो झामहोदया मम चिरपरिचिताः परमसुहृदश्च आसन्। परं तेषां गृहे ममेदं प्रथममागमनमासीत्। अतस्तैः रात्रावेव स्वगृहमहिला ममागमनं सूचिताः, प्रातःयथोचितातिथ्यसम्पादनाय च निवेदिताः। तस्य फलमिदमासीद् यद् यावदहं प्रातः कथञ्चिदुत्थाय नित्यक्रियां सम्पादयामि तावन्नानाविधशाकनिर्मिता विविधाः पक्कवटिका निर्माय मत्समीपमुपहृताः शीघ्रमेव च भोजनायापि निवेदनं कृतम्। परन्तु इदं निवेदनं रात्रौ बहु भुक्तवतो मम कृते कष्टकरमेवासीत्। तथापि तासामनुरोधस्य पालनं तु कर्तव्यमेवासीत्।

नृत्यन्नदीकलकलो, ललिता वनाली,
रम्या रसाल-कदलीलसिता दिगन्ताः।
वाणी प्रिया, ललित-गीत-रसार्द्रवाता
अद्यापि मैथिलभुवो हृदयं हरन्ति॥ ३६॥

मधुवन्यां झामहोदयानां गृहे दिनत्रयं स्थित्वा सौराष्ट्रमेलां च दृष्ट्वा मैथिलमित्राणामनुरोधेन मया अन्येष्वपि क्षेत्रेषु ग्रामेषु च भ्रमणं विहितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा आनन्दमयानि च कतिचिद् दिनानि अतिवाहितानि। अस्मिन् श्लोके स एव सुमनोहरः प्रसङ्गो वर्णितः।

सौराठ—

> अद्यापि मैथिलमहीविदिते "सुराष्ट्र"
> मेलास्थले परिणयार्थमुपागतानाम्।
> यूनां मुखानि मुदितामुदितानि सम्यग्
> दृष्टान्यहं सकुतुकः सततं स्मरामि॥ ३७॥

बिहारप्रदेशस्य मधुवनीमण्डले एकं सौराठ नामकं स्थानं वर्तते यत्र ग्रीष्मकाले एकमासपर्यन्तं विवाहयोग्यानां युवकानां (ब्राह्मणानां) महान् समुदायः एकत्र भवति। तत् "सौराठमेला" इति कथ्यते। अस्यां मेलायां कन्यापक्षीया जनाः स्वानुरूपस्य वरस्य चयनं कुर्वन्ति। तत्र प्रथमं सर्वे वरा एकैकस्मिन् सुपरिष्कृते स्थाने स्वपरिवारसम्बन्धिजनैः सह पृथक् पृथक् तिष्ठन्ति। सर्वे वराः सुरुचिरवेषभूषया विभूषिताः सुरम्ये आसने मध्ये उपविशन्ति, परिवारजनाः सम्बन्धिजनाश्च उभयोः पार्श्वयोर्विराजन्ते। ततः कन्यापितरः स्वपरिवारजनैः सम्बन्धिभिश्च सह पूर्वतो मनोनीतानां कतिपयवराणां पार्श्वे गच्छन्ति, वरं निरीक्षन्ते, प्रश्नादिना वरस्य विद्यां बुद्धिं परीक्षन्ते, विवाहसम्बन्धविषये च तस्य परिजनैः सह वार्तां कुर्वन्ति। यदि च वार्ता सफला भवति तदा सहर्षं गृहं निवर्तन्ते। अन्यथा वराद् वरान्तरं द्रष्टुं परिभ्रमन्ति।

मिथिलाप्रदेशस्य इयमेका वरचयनसम्बन्धिनी अद्वितीया आदर्शव्यवस्था वर्तते यया कन्यापितरः वरचयनार्थं ग्रामे ग्रामे पर्यटनपरिश्रमात्, वरपक्षतः अनेकविधापमानाच्च मुक्तिं लभन्ते। एकेनैव दिनेन च कदाचित् कार्यसिद्धौ सफला भवन्ति।

इदं स्थानमिदं दृश्यं च द्रष्टुं मम बहोः कालाद् बलवती समीहा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आसीत्। परन्तु उपयुक्तावसराभावात् चिरं सफला नाभूत्। परं दरभंगा संस्कृतविश्वविद्यालयस्य समारोहे गमनादियं मम समीहा पूर्णतां गता इति तस्मिन् दिने मम महान् हर्षः संजातः। परन्तु कन्यापितरः कस्यापि युवकस्य वरणम् अकृत्वैव केनापि कारणेन यदा निवर्तन्ते स्म तदा तस्य वरस्य म्लानं ग्लानं मुखं दृष्ट्वा मम बहु कष्टमपि भवति स्म। एवं वराणां पूर्वं प्रफुल्लितं पश्चात् वरणे न जाते ग्लानतां गतं मुखं मम अद्यापि यदा कदा स्मृतौ आगच्छति कौतुकं च जनयति। इदं दृश्यं द्रष्टुमहं दिनद्वयं तत्र स्थितः।

अद्यापि मैथिलसुधीभवनेषु भुक्तं
वस्तुद्वयं न खलु मुञ्चति मानसं मे।
तच्चन्द्रचारु - धवलं चिपुटं सुगन्धि
तन्माहिषं च दधि गाढसरःसमेतम्॥ ३८॥

मिथिलाभ्रमणकाले बहूनां विदुषां गृहे दधिचिपुटान्नभोजनस्य मया मनोहरोऽवसरः संप्राप्तः। कदाचित् जलपानमपि दधिचि-पुटाभ्यामेव भवति स्म। लहेरियासरायनगरे कुमारगङ्गानन्द सिंह महोदयानां गृहे यदाऽहं निवासमकरवं तदा प्रतिदिनमेव मया प्रातः रजतकचोलिकायामुपनीतं दधिचिपुटान्नमेव प्रभूतशर्करासमन्वितं गृह्यते स्म सहर्षं भुज्यते स्म च।

दधिचिपुटान्नभोजनस्य प्रथा उत्तरभारतस्य प्रायः सर्वेष्वपि प्रदेशेषु प्रचलिता वर्तते। बहवश्च बहु रोचयन्ते भोजनमिदम्। परन्तु मिथिला-प्रदेशस्य चम्पारन-प्रदेशस्य च चिपुटान्नं यादृशं धवलं कोमलं लघुकं सुगन्धि भवति न तथा अन्यप्रदेशानाम्। तत्रापि च यदा गाढसरःसमेतस्य दध्नः प्रचुरशर्करया सह योगो भवति तदा तस्य स्वादः अपूर्व एव भवति। मया उभयप्रदेशयोः भ्रमणकाले इदं सुखं पूर्णतया उपलब्धम् अद्यापि च रसना तदर्थं लालायते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि मैथिलमहीसुधियां समाजे
स्थित्वा दिनानि सुबहून्यपि नैकवारम्।
मत्स्यामृतं नहि मया स्वदितं क्वचित् तत्
धर्म्यं नवेति विषये बहु चिन्तयामि॥ ३९॥

अमृतस्य कुत्र निवासो भवतीति विषये मैथिलविदुषामेका उक्तिः बहुप्रचलिता वर्तते। सा चेयम्—

केचिद् वदन्त्यमृतमस्ति पुरे सुराणाम्
केचिद् वदन्ति वनिताधरपल्लवेषु।
ब्रूमो वयं सकलशास्त्रविचारदक्षा
जम्बीरनीर - परिपूरित - मत्स्यखण्डे॥

इमामेव प्रसिद्धां बहुश्रुतां च उक्तिमाधारीकृत्य मम इयं चिन्ता समुत्पन्ना। मैथिलविद्वद्भिः सह तदवश्यमेव किञ्चित् आस्वादनीय-मासीदिति मे सम्प्रति बुद्धौ समायाति।

छोटानागपुर—

मूर्ध्नीन्धनं, कटितटे लघुबालमेकं,
पृष्ठेऽपरञ्च निहितं वनवासिनीनाम्।
उन्मुक्तनाभितललम्बि कुचद्वयं च
स्मृत्वा घृणा च करुणा च भवत्यजस्रम्॥ ४०॥

बिहारप्रदेशान्तर्गतछोटानागपुरस्य पर्वतीये भूभागे वनानां बाहुल्यं भवति यत्र तत्तत्क्षेत्राणां निर्धनाः स्त्रियः इन्धनसंग्रहं कुर्वन्ति तं च सायंकाले कस्मिंश्चित् हाटके विक्रीय खाद्यवस्तूनां क्रयणं कुर्वन्ति। एवं तासां परिवारस्य पालनं पोषणं च भवति। अस्मिन् क्षेत्रे गुमला, खूंटी, मूढ़ं, प्रभृतिस्थानानामापणेषु मया दृश्यते स्म यत् अनेका वृद्धाः स्त्रियः मस्तके इन्धनं गृहीत्वा कष्टेन आपणमागच्छन्ति स्म। आसामेकः लघुबालकः कटितटे भवति स्म, अपरश्च बालकः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वस्त्रे आवेष्टितः पृष्ठदेशे तिष्ठति स्म। वस्त्रस्य अल्पतया च तासां कुचौ अनावृतौ एव नाभिपर्यन्तं लम्बमानौ भवतः स्म। तद् दृष्ट्वा मम बहु कष्टं, लज्जा च भवति स्म तथा शासनं प्रति च आक्रोशः समुत्पद्यते स्म।

अद्यापि तानि वनवासिविलासिनीनां
रङ्गं विनाऽप्यभिनयश्रियमावहन्ति।
लीला - विलास - वसनाभरणेङ्गितानि
चित्राणि चित्तहरणानि मुदं वहन्ति॥ ४१॥

वनवासि-क्षेत्रनिवासिनीनां महिलानां चित्रविचित्राणि वस्त्राणि, आभरणानि, लीलाविलासादयश्च तथा शोभना आकर्षकाश्च भवन्ति स्म यथा ता मञ्चं विनापि अभिनयं कुर्वन्तीति प्रतिभाति स्म।

अद्याप्यनेक - लघुनागपुराऽदिवासि-
ग्रामेषु पानमदमत्त - विलासिनीनाम्।
उन्मुक्त - नृत्य - परिरंभण - गीत - वाद्यै-
र्नीताः सुखं नव निशा अनिशं स्मरामि॥ ४२॥

एकदा नवरात्रसमये अहं खूँटीनगरे श्रीरोशनलाल-शर्ममहोदयानां शैलाकफैक्ट्री-मध्ये निवासं कुर्वाण आसम्। तदानीं तेषां कारचालकः एकः वनवासी आसीत्। नवरात्रसमये सर्वे वनवासिनोऽपि नवदिनपर्यन्तं विशेषरूपेण स्वपरम्परागतं नृत्यगीतादिकमनुतिष्ठन्ति सम्पूर्णां च रात्रिं विविधैर्नृत्यगीत-वाद्यादिभिरेव सोल्लासं गमयन्ति, प्रभूतं मदिरापानादिकं च कुर्वन्ति। इदं सर्वं दृश्यं ममापि बहु रोचकं भवति स्म। अतः कारद्वारा अहमपि नवरात्रसमये विभिन्नेषु ग्रामेषु प्रतिदिनं गत्वा तत्सर्वमवलोकयामि स्म, मनोरञ्जनं च करोमि स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृत्ये भवन्ति विविधानि विवर्तनानि
धृत्वा करं कटितटीपरिचालनानि।
अद्यापि तानि परिफुल्ल-मुखाम्बुजानि
गीतानि चाऽप्यतिमृदूनि मनो हरन्ति॥ ४३॥

'भवन्ति' इति शतृप्रत्ययान्तस्य नपुंसकलिङ्गे प्रथमायां बहुवचने रूपम्।

अद्यापि नागपुरवासिसमाज - नृत्यं
स्मृत्वा भवामि मुदितोऽधिकविस्मितश्च।
यत्र स्त्रियश्च पुरुषाश्च निपीय मद्यं
नृत्यं मिथोधृतकरा रणवत् चरन्ति॥ ४४॥

हथुवा—

अद्यापि मे स्मृतिगता हथुवेति नाम्नी
शिक्षास्थली मम मनो मुदितं करोति।
सङ्गीत - काव्यरचनाऽभिनयादिकानां
यत्रोद्गतानि हृदि मे प्रथमाङ्कुराणि॥ ४५॥

मम बाल्यकालस्य चतुर्दशवर्षाणि स्वपितृपादैः सह काशी-अयोध्या-चित्रकूट-जबलपुर-ब्यावर-इन्दौर-प्रभृतिषु नगरेषु भ्रमतो व्यतीतानि। ततः पञ्चदशे वर्षे मम पितृपादानां काश्यां दिवङ्गमनं जातम्। अनन्तरं मम मातुरहं एक एव पुत्र आसमिति सा मां निकटवर्तिनि एव एकस्मिन् कोयलादेवानामकग्रामे विद्यमाने संस्कृतविद्यालये पाठयितुं निश्चयं कृतवती। तत्र च विद्यालये अहं बिहारप्रदेशस्य मध्यमापरीक्षापर्यन्तमध्ययनं कृतवान्। तत्पश्चात् मम ग्रामात् पूर्वस्यां दिशि चतुःपञ्चसु क्रोशेषु वर्तमानस्य सुप्रसिद्ध-हथुवाराज्यस्य श्रीछत्रधारीसंस्कृतमहाविद्यालये प्रवेशं गृहीतवान्, साहित्यविषयञ्चादाय आचार्यान्तमध्ययनं कृतवान्। एतेषु चतुर्षु वर्षेषु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मम व्यवहारक्षमं व्याकरणज्ञानं साहित्यज्ञानं च सम्यक्तया सम्पन्नम्। एतदतिरिक्तं च मम एष्वेव दिनेषु संस्कृतप्रचारविषयिणी प्रवृत्तिरपि उदितवती। अस्मिन्नेव काले मयि संस्कृते काव्यरचनायाः सङ्गीत-रचनायाः निबन्धलेखनस्य पत्रलेखनस्यापि च अभिरुचिरुत्पन्ना। एतदतिसिद्धं यत्र तत्र सभासम्मेलनादीनामायोजनस्य, भाषणस्यापि मया तदानीमेव कार्यं प्रारब्धम्, येन मया सर्वत्र प्रशंसा, सम्मानः पुरस्कारश्चापि लभ्यते स्म।

एवञ्च इदमेव तत्स्थानं वर्तते यत्र मम सर्वासामपि प्रवृत्तीनामङ्कुराणि सर्वप्रथमतया उद्‌गतानि यानि पश्चात् विविधानि साधनानि लब्ध्वा वटवृक्षतां प्राप्तानि। अतोऽहं स्थानमिदम्, अत्रत्यं विद्यालयम्, अत्रत्यान् मम सर्वान् गुरुवर्यान्मित्राणि च बहुकृतज्ञतया स्मरामि, अभिनन्दामि, प्रणमामि च। मम अध्ययनस्थानानां गुरुवर्याणां च विशेषपरिचयः अस्य ग्रन्थस्यान्ते मम जीवनपरिचय-प्रसङ्गे द्रष्टव्यः।

बिहारप्रशस्तिः—

राजर्षि - सिद्ध - जिन - बुद्धपदाब्जपूता
विद्या-कला-नृपतिनीतिविदां वरेण्या।
वैदेशिकानपि जनान् निजकेन धाम्ना
न्यक्कुर्वती जयति वन्द्यविहारभूमिः॥ ४६॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १३ :

मणिपुरप्रदेशीयं संस्मरणम्

इम्फाल—

देशोऽखिलोऽपरिचितः, समयो दिनान्तः
इम्फालनामनगरे प्रथमः प्रवेशः।
भाषा तथाऽश्रुतचराऽसुविधा समन्तात्
अद्यापि सा मम निशा स्मृतिमेति शश्वत्॥ १॥

१०.१२.६४ दिनाङ्के अहं डिमापुरात् नागालैण्डस्य राजधानीं कोहिमानगरमागत्य तत्र च दिनत्रयं स्थित्वा चतुर्थे दिने मध्याह्नकाले बसयानेन मणिपुरराज्यस्य राजधानीं इम्फालनगरं सायं तमसि प्रसर्पति सम्प्राप्तः। तदानीं तत्र मम कोऽपि परिचितो नासीत्। वेलापि इतस्ततो भ्रमणानुकूला नासीत्। भाषाऽपि तत्रत्या मया नावबुध्यते स्म। बहवस्तु तत्र भिन्नाकारवेषभूषाभाजो नागादिजातीयजना एव दृश्यन्ते स्म। तादृशैः सह आलापोऽपि निरर्थक एव आसीत् भीतिकरश्च। अतः आपणे किञ्चित् भुक्त्वा एकस्यां लघुधर्मशालायां गत्वा तत्रैव रात्रिमतिवाहितवान्, दिने श्रमकारणात् च रात्रौ सुखं सुप्तवान्।

श्रीनीलवीरविदुषामहमाधमर्ण्यम्
अद्यापि चेतसि वहे महदादरेण।
येषां प्रगाढ-सहयोगमवाप्य सर्वा
दूरं गता भ्रमण-भोजन-वास-चिन्ता॥ २॥

द्वितीयदिने पुनः प्रातरुत्थाय नित्यक्रियां च निर्वर्त्य यदा चायपानार्थं एकस्यां चायपानविपणौ प्रविष्टवान् तदा तत्रोपविष्टा जना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मामदृष्टपूर्वं ज्ञात्वा प्रष्टुमारब्धवन्तः—"को भवान्? कुतः कदा आगत इत्यादि।" ततो यदा मया स्वकीयः पूर्णपरिचयो दत्तः, आगमनप्रयोजनं निवेदितम्, आवासादि-काठिन्यं च निरूपितं तदा ते परं प्रसन्ना अभूवन्, एकस्वरेण च ते मां श्रीनीलवीरशास्त्रिणां सविधे गन्तुं निर्दिष्टवन्तः प्रापितवन्तश्च मां तत्र स्तयमेव।

एते श्रीनीलवीरशास्त्रिणः मणिपुर-संस्कृत-साहित्य-परिषदो मन्त्रिणः, संस्कृतसमाजस्य च अग्रगण्या नेतारः, सर्वजनप्रियाश्च कर्मशीलाः सामाजिका विद्वांसः आसन्। एभिः सह परिचये जाते मम सर्वा बाधा एकक्षणेनैव अपगताः। आवासभोजनादिव्यवस्था जाता, भ्रमणस्य, प्रचारस्य, सभासम्मेलनादीनामायोजनस्य, पण्डितैः सह मिलनस्य तथा संस्कृतानुरागिभिः सह समागमस्य च कार्यक्रमा निर्धारिताः। तद्दिवसमारभ्यैव इमाः सर्वाः प्रवृत्तयः प्रारब्धाः। अहं सर्वथा निश्चिन्तः, नितान्तं प्रसन्नः, उत्साहसम्पन्नश्च संजातः।

साम्ये स्थितेऽप्यखिल - धर्म-विचार-पूजा-
पाठादिकर्मनिचये वसनादिके च।
याऽकार्णिता मणिपुरी बहुभिन्नभाषा
साद्यापि मत्स्मृतिगता ननुते विनोदम्॥ ३॥

मणिपुरे यावन्तो हिन्दवो निवसन्ति ते प्रायः सर्व एव वैष्णवाः, तुलसीचन्दनधारिणः, भागवतगीतादिपाठपरायणाः, कीर्तनभजन-प्रियाः, धार्मिकाः, धौतवस्त्र-अङ्गरक्षक-उष्णीषादिधारिणश्च। एतत् सर्वमवलोक्य आदौ ते मम उत्तरप्रदेशस्य निवासिन इव प्रतिभान्ति स्म। परं पश्चात् तेषां हिन्दीतः नितान्तं भिन्नां भाषां श्रुत्वा महदाश्चर्यं जायते स्म। यद्यपि तत्र हिन्दीभाषाया अपि व्यवहारो भूयान् वर्तते परं तस्य प्रदेशस्य या मणिपुरी भाषा वर्तते सा तु नितान्तं भिन्नैव। तत्र व्यक्तिवाचकसंज्ञाशब्दान् विहाय पारिभाषिकशब्दांश्च विहाय नहि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकोऽपि संस्कृतशब्दः समुपलभ्यते। उदाहरणरूपेण गीतायाः श्लोकद्वयं दृश्यताम्—"धर्मक्षेत्रे कुरुक्षेत्रे" तथा "दृष्ट्वा तु पाण्डवानीकम्" इति श्लोकद्वयस्य मणिपुरी-अनुवादोऽधस्ताद् दीयते—

धृतराष्ट्रन् हाय (हाय-उवाय)—

धर्मगी लम्दम् कुरुक्षेत्रदा लान् शोक्लिदुन् तिनधुवा।
ईचाशि पाण्डुगी मचाशिना तमू संजय कहि तोथ्रव॥

संजयन् हाय—

पाण्डव की लान्मीन खल्लवा, अचौव तेङ्गोल् डबदा।
तिथो दुर्योधनन् हाय चङ्शिन्दुना द्रोणाचार्यदा॥

एतादृशी मणिपुरी भाषा भवति। अस्यां भाषायां बहवः संस्कृतग्रन्था अनूदिताः सन्ति। मणिपुरीभाषाया वैचित्र्यस्य परिचयार्थं द्वित्रा ग्रन्था अन्यप्रदेशीयैरपि पण्डितैः पठनीयाः। अस्मिन् सार्वभौम-संस्कृत-प्रचार-संस्थाने तादृशा बहवः ग्रन्थाः संगृहीताः सन्ति।

अद्यापि तन्मणिपुरे परिधाय मालां
दत्त्वा पुनः शिरसि चन्दनविन्दुमेकम्।
विक्रीणतो लघुबृहद्बहु-मीनराशिं
स्मृत्वा जनान् बहु विचित्रमिवावभाति॥ ४॥

इम्फालनिवासकाले इदमेकं परमाश्चर्यकरं वृत्तमवलोकितं यत् तत्रत्या मीनविक्रेतारः शिरसि पेटकेषु बहुविधान् क्षुद्रान् लघून् बृहतश्च मीनान् धृत्वा द्वारे द्वारे च गत्वा विक्रीणन्ति परं तेऽपि गले तुलसी-मालां, ललाटे च चन्दनं धारयन्ति। अतस्ते सर्वे वैष्णवा भवन्ति परं जीविकाया हेतोः मत्स्यविक्रयं कुर्वन्ति। तदेतत् सर्वं मम विचित्रमिव प्रतिभाति स्म।

अद्यापि तन्मणिपुरे त्रिदिवं गतानाम्
श्राद्धादिकर्मसमयेऽपि सुमण्डपेषु।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संगीत-नृत्य-भजनैः सह वाद्यघोषम्
दृष्टं स्मरामि यदि विस्मयमावहामि॥ ५॥

मणिपुरे मया एका विचित्रा रीतिरवलोकिता यत् तत्र श्राद्धकर्मणि द्वादशाहे एकत्र मण्डपे श्राद्धक्रिया भवति अपरत्र च मण्डपे वाद्यघोषेण सह नृत्यं, गीतं, कीर्तनं, भजनं चापि प्रचलति। परं तत् सर्वं भक्तिमयं भवति, आध्यात्मिकं भवति, ज्ञानवैराग्यभावभरितं च भवति। मया एकस्मिन् परिवारे इदं सर्वं दृश्यं दृष्ट्वा आश्चर्यमनुभूतं परं तत् सर्वं मृतस्य जीवस्य पारलौकिक-कल्याण-साधकमेवासीदिति मयाऽनुभूतम्। तथापि इयं सर्वथा नूतना रीतिस्तत्र दृष्टा।

अद्यापि धौतवसनं वरमुत्तरीयं
उष्णीषमप्यनुपमं परिधाय शीर्षे।
वृद्धान् बुधानपि रतान् सुमृदङ्गनृत्ये
संस्मृत्य वाञ्छति मनः पुनरीक्षितुं तत्॥ ६॥

वृद्धाः पण्डिता अपि नृत्यन्ति इति वृत्तं बहूनां कृते असम्भवम्, अविश्वसनीयम्, अश्रुतचरमेव च भविष्यति। यतो भूयांसः पण्डितास्तु गाने वादने चाऽपि भृशं संकोचमनुभवन्ति, का पुनर्वार्ता नृत्यस्य? परन्तु मणिपुरनिवासिनां पण्डितानामिदमसाधारणं वैशिष्ट्यं वर्तते यत्ते वैदुष्येण सह नृत्यकलायामपि कुशला भवन्ति। ते अधो धौतवस्त्रं, स्कन्धे उत्तरीयं, शिरसि उष्णीषं च धारयित्वा, किञ्चित् शरीरं च नमयित्वा, मृदङ्गं वादयन्तः यदा गोलाकारेण नृत्यन्ति तदा तदतीव दर्शनीयं हृदयाह्लादकं च भवति।

अद्यापि मुह्यति मनोऽतिमनोज्ञसज्जं
स्मृत्वाऽद्भुतं मणिपुरी - रमणीय - नृत्यम्।
चेतो बिभेति परमद्भुतशौर्ययुक्तां
नागाप्रदेश - जन - नर्तन - रीतिमन्याम्॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मणिपुरयात्राप्रसङ्गे मया उभयविधमपि नृत्यमवलोकितम्—मणिपुरीनृत्यम्, नागानृत्यञ्च। परन्तु उभयोर्नृत्ययोः कर्पूरकज्जलयोरिव महदन्तरं भवति। एतदन्तरविषये अधिकं न उक्त्वा एतावन्मात्रमेव वक्तव्यं पर्याप्तं भवति यत् एकतो मणिपुरीनृत्ये यत्र नर्तकानां, नर्तकीनां च, वेषभूषा, सज्जाः, अलङ्करणादीनि, भावभङ्गिमा, मुखमुद्रा, गीतानि, वाद्यानि संलापाश्चेति सर्वमपि अत्यन्तं मनोहरं भवति तत्रैव अपरतो नागानृत्ये इदं सर्वमपि अत्यन्तं भयङ्करं विचित्रं च भवति। सोऽयं भेदः साक्षाद्दर्शनेनैव यथार्थतया अवगन्तुं शक्यते न लेखपठनेन।

ब्रह्मपुर—

विख्यात - ब्रह्मपुरमुत्तमविप्रवंश-
ग्रामं विशालसुरधाम न विस्मरामि।
अद्यापि यन्निखिलशास्त्रविदां बुधानां
वासात् करोति निजनाम पुरेव सार्थम्॥ ८॥

इम्फालनगरस्य एकस्मिन् पार्श्वे एतन्नाम्नी एका नदी प्रवहति। तेनैव कारणेन अस्य नगरस्य इम्फाल इति नाम प्रसिद्धम्। अस्या एव नद्या अपरस्मिन् पारे ब्रह्मपुरनामकः एकः बृहद्ग्रामः अस्ति। अस्मिन् ग्रामे ब्राह्मणानां त्रिशताधिका गृहा वर्तन्ते। विविधशास्त्रेषु प्रवीणा अत्र अनेके विद्वांसो दृष्टाः। अत्र एकं विशालं मन्दिरमपि विद्यते भगवतः श्रीकृष्णस्य अतिरमणीयम्। अत्रैव एकः श्रीगोविन्दजीनर्तनालयोऽपि वर्तते यत्र अहर्निशं नृत्यगीत-कीर्तनादीनामनुष्ठानेन मन्दिरमिदं गायकैः वादकैः नर्तकैः भक्त-जनैश्च परिवृतं भवति। अस्मादेव नर्तनालयात् "श्रीकृष्णरस-सङ्गीतसंग्रह" नामक एकः सङ्गीतग्रन्थोऽपि प्रकाशितो वर्तते। मणिपुरस्य गीतं नृत्यं च भारतप्रसिद्धं विद्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि तल्लघुपुरं लघुराजधानीं
इम्फालमत्यधिकमुग्धमनाः स्मरामि।
यत्राऽमिलत् सुरगिरः समुपासकानां
श्रद्धावतां, प्रणयिनां, विपुलः समाजः॥ ९॥

असमप्रदेशात् मणिपुरं गच्छतो मम मनसि इयं चिन्ता वारं वारं समुदेति स्म यत् तत्र केचन संस्कृतविद्वांसः, संस्कृतसमर्थकाः, संस्कृतप्रणयिनः, संस्कृतप्रचारे सहयोगकर्तारः, संस्कृतप्रचारकाणां सहायका वा मिलन्ति न वा? मणिपुरी-भाषा-साहित्यप्रेमिणां संस्कृतसाहित्यरसास्वादनस्य अभिरुचिः कदाचित् जागर्ति न वा? वाल्मीकिः व्यासः कालिदासो वा तेषां श्रुतिपथं गता न वा? परन्तु मणिपुरे इम्फालनगरं प्राप्तवतो मम इमाः सकलाश्चिन्ता व्यपगताः। संस्कृतज्ञानां, संस्कृतानुरागिणां संस्कृतसमर्थकानां, च एकं सुसंघटितं समाजं दृष्ट्वा महती प्रसन्नता च संजाता। तत्र श्रीनीलवीरशास्त्री, श्रीकालाचाँदशास्त्री, पं० व्रजविहारीशर्मा, पं० नूतनचन्द्रशर्मा, श्रीकुञ्जबिहारीसिंहप्रभृतयस्तादृशा अनेके श्रद्धालवो विद्वांसो मिलिता येषां स्मरणं सदैव मां प्रीणयति।

मणिपुरराज्यप्रशस्तिः—

साहित्य - संस्कृति - कलेतिगुणत्रयेऽपि
प्रीतिं परां निपुणतां च परां दधानम्।
अभ्युन्नतेषु नवभारतसर्वराज्ये-
ष्वन्वर्थकं मणिपुरं मणिवद् विभाति॥ १०॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १४ :

मध्यप्रदेशीयानि संस्मरणानि

इन्दौर—

वृद्धो भवान्, सपदि काशिकवास एव
श्रेयानितीति कथिते परिहाय शय्याम्।
श्रीपादशास्त्रिविदुषां द्रुतमुत्थितानाम्
तेजस्वि रूपमधुनापि मुहुः स्मरामि॥ १॥

मध्यप्रदेशे इन्दौरनगरनिवासिनः श्रीश्रीपादहसूरकरशास्त्रि-महोदयाः शासकीयसंस्कृतमहाविद्यालयस्य अध्यक्षाः वैदुष्ये वक्तृत्वे च एके अप्रतिमा विद्वांसः आसन्। ते एकदा वाराणसीमागताः। श्रीभारतधर्ममहामण्डले च मन्त्रिकटे एव तेषां निवासव्यवस्था आसीत्। पर्यङ्के शयित्वा विश्रामं कुर्वाणान् दृष्ट्वा मया प्रोक्तम्—"भवन्तः सम्प्रति वृद्धा जाताः। अतः काशीवास एव भवतां कृते सम्प्रति समुचित" इति। इदं श्रुत्वा त्वरितमेव शयनादुत्थाय तैः साटोपमुक्तम्—"काशीवासं तु निष्क्रिया जनाः कुर्वन्ति। अहन्तु अद्यापि युवा इव कार्यं कर्तुं क्षमोऽस्मि।"

अद्यापि तं सुरगिरो वरपुत्ररत्नं
श्रीमद्-हसूरकरशास्त्रिबुधं स्मरामि।
येषां समुच्छलदभङ्गगिरां प्रवाहे
सर्वे बुधाः प्रतिहतप्रतिभा अभूवन्॥ २॥

अव्यवहितपूर्वमेव मया श्रीश्रीपादशास्त्रि-हसूरकर-महोदयानां वार्धक्येऽपि अदम्योत्साहस्य, क्रियाशीलतायाश्च चर्चा कृता। परन्तु एतेनैव तेषां व्यक्तित्वस्य पूर्णः परिचयो न लभ्यते। तेषामन्येऽपि अनेके विशेषा आसन्। ते व्याकरणसाहित्यदर्शनादिशास्त्राणां प्रौढाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पण्डिताः अध्यापका आलोचका लेखकाश्च आसन्। परन्तु इतोऽप्यधिकं तेषामसाधारणं वैशिष्ट्यमासीत् तेषाम् अप्रतिमा वक्तृत्वशक्तिः। शास्त्रचर्चायां, भाषणे, वार्तालापे वा यथा तेषामप्रतिहता वाग्धारा प्रवहति स्म सा सर्वेषां श्रोतॄणां कृते विस्मयावह भवति स्म। प्रायस्ते मया सहैव वाराणस्याः कस्यापि विदुषः समीपे गच्छन्ति स्म। तत्र सर्वत्रापि मया इदं दृष्टं यत् अन्ये सर्वे महापण्डिता अपि वक्तृत्वे तेषां समक्षं अक्षमा एव भवन्ति स्म। मम सम्पूर्णे भारतभ्रमणे एतादृशः कोऽपि वक्ता न दृष्ट इति तेषां सदैवाहं स्मरणं करोमि, तादृशाश्च अन्येऽपि अनेके वक्तारो जन्म गृह्णन्तु इत्यहं वाग्देवीं सर्वदा प्रार्थये।

अद्यापि मन्मनसि चीनजनाभिनीतं
शाकुन्तलं बहुलकौतुकमातनोति।
पात्राणि यत्र सकलानि कपोलनेत्रैः
वाचा स्वरेण च विचित्रतराण्यभूवन्॥ ३॥

अद्यापि तामनिशमुज्जयिनीं मनोज्ञां
श्रद्धामयेन मनसा सततं स्मरामि।
यत्पावन - प्रथमदर्शन - मुग्धचित्ते
सर्वा मम स्मृतिमिताः कविताः कवीनाम्॥ ४॥

मेघदूतस्य अध्ययनकालादेव उज्जयिन्या सह मम रागात्मकः सम्बन्धो जातः। तदनन्तरं विविधगद्यपद्यनाटककथाग्रन्थेष्वपि पुनः पुनरुज्जयिन्याः सरस-ललित-वर्णनप्रसङ्गानामध्ययनेन ततोऽप्यधिकतरा प्रगाढता सम्बन्धे समागता। तदनु स्कन्दपुराणगतस्य अवन्तीखण्डस्यावलोकनेन, विविधग्रन्थगतावन्ती - शिव - महाकालादि-स्तोत्रपाठेन च महती श्रद्धापि हृदये समुदपद्यत। अतो बहोः कालादुज्जयनीदर्शनाय समुत्सुकमासीन्मे मनः। परन्तु अयं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिराभिलषितोऽवसरो मया तदा सम्प्राप्तो यदाऽहं कालिदास-स्मृतिसमारोहे भागं ग्रहीतुं २४.११.८२ दिनाङ्के उज्जयिनीमागच्छम्। समारोहो दिनत्रयं प्राचलत्। तत्र मया सर्वेषु कार्यक्रमेषु भागो गृहीतः। कालिदासप्रदर्शनी मया स्वयमेव आयोजिता। गोष्ठीषु भाषणानि प्रदत्तानि। कविसम्मेलने कवितापाठः कृतः। एतन्मध्ये यदा यदाऽवसरो लभ्यते स्म, नगरे भ्रमणं विधीयते स्म। दर्शनीयानि स्थानानि दृश्यन्ते स्म। काले काले महाकालस्य दर्शनं पूजनं च अनुष्ठीयते स्म यत्र विशिष्टस्वरेण गीयमानं शिवताण्डवस्तोत्रं मम कृते अत्यन्तं मनोहरं परमाकर्षकं च भवति स्म।

एतेषु दिनेषु उज्जयिनीमधिकृत्य लिखिता रचनाः या मया पूर्वमधीता आसन्, ताः सर्वा अपि मम स्मृतिपथमवतरन्ति स्म मनश्च मे अनुरञ्जयन्ति स्म।

समारोहसमाप्त्यनन्तरमपि अहं तन्नगरनिवासिनां, संस्कृत-प्रणयिनां, मम बालोपयोगिरचनाश्च श्रुत्वा मयि भृशं प्रीयमाणानां श्रीकृष्णमिश्रमहोदयानां गृहे सानन्दं स्थितः अवशिष्टं वाञ्छितं कार्यजातं समपूरयम्।

अत्र प्रवाससमये च बृहत्कथा सा
भूयो गुणाढ्यरचिता स्मृतिमागता मे।
यस्या विलोपजनितो विपुलो विषादो
नाद्यापि शान्तिमुपगच्छति नापि गन्ता॥ ५॥

उज्जयिनीनिवासिनो भूयांसो विद्वांसः आचार्याः, कवयः कथाकाराः नाटककाराश्च स्वेन जन्मना, स्वीयाभिश्चमत्कारमयीभिः कृतिभिः, स्वकीयेन धवलयशसा च उज्जयिनीं दिग्विजयिनीं व्यदधुः। तेष्वेव कविषु कथाकारेषु च गुणाढ्यो नाम एको विख्यातकीर्तिः कथाकारो बभूव येन भूतभाषायां (पैशाचीनाम्न्यां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राकृतभाषायां) "बृहत्कथा" नामको विविधकथानामाकरग्रन्थो लिखितो यः प्राकृतभाषायां 'बड्डुकहा' नाम्ना विख्यात आसीत्। परन्तु स ग्रन्थो बहोः कालात् अनुपलब्धो वर्तते। कुत्र कदा कथं तस्य विलोपो जात इति अद्यावधि स्पष्टं न जातम्। इदं वृत्तं मम हृदयं कियत् पीडयति इति वक्तुं न शक्यते। यद्यपि बृहत्कथामेवाधिकृत्य सोमनाथेन लिखितः कथासरित्सागरः, क्षेमेन्द्रविरचिता बृहत्कथा-मञ्जरी चेति पुस्तकद्वयमपि मया साकल्येन अधीतं तथापि बृहत्कथाया अभावस्य व्यथा मम हृदयान्नापगच्छति।

इदमस्माकं भारतीयानां परमं दौर्भाग्यविजृंभितमेव वर्तते यद् आवेदेभ्यः काव्य-नाटक-कथा-पर्यन्तं सहस्राधिका ग्रन्था नाममात्रावशेषा जाताः। तेषाञ्च इतिहासोऽपि समग्रतया न लिखितः केनापि विदुषा न वा लेखितः कयाचित् संस्थया इति दुःखस्य विषयो वर्तते। इममभावं पूरयितुं मम बलवती समीहा आसीत् परमिदानीन्तु वार्धक्यादस्वास्थ्याच्च मयापि न किञ्चित् कर्तुं इत्येव लिखित्वा विरमामि।

उज्जयिनी—

शिप्रा नदी, भुवनविश्रुतमन्दिरं तत्,
पुण्या गुहा, गुरुकुलं, विविधाश्रमाश्च।
वीरेन्द्रविक्रमकथा, विदुषां समज्या,
अद्यापि लोभयति मां तदिदं समस्तम्॥ ६॥

अद्यापि मालवमहीभ्रमणप्रसङ्गे
दृष्टा दशार्णविदिशोज्जयिनीप्रदेशाः।
दृश्यैर्दृशोरथ हृदो ददतेऽतिरम्यैः
श्रीकालिदासकवितास्मरणैः प्रमोदम्॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि योगिवर-भर्तृहरेः स्वरूपं
ध्यायामि तस्य गुरुगह्वर-संस्थितस्य।
योऽवाहयत् सकललोकहिताय पुण्यां
वैराग्यनीतिरतिदामपरां त्रिवेणीम्॥ ८॥

उज्जयिन्यां भर्तृहरेः गुहा सुप्रसिद्धा वर्तते यस्यां सुदूरं गत्वा भर्तृहरेः प्रस्तरमयी मूर्तिर्विराजते, अखण्डं च दीपस्तत्र प्रज्वलति। तद्दर्शनार्थं भूयांसो जनास्तत्र गच्छन्ति, पूजां कुर्वन्ति, श्रद्धासुमानि च समर्पयन्ति। तन्मूर्तेर्दर्शनकाले मम हृदये तद्विरचितानां त्रयाणामपि शतकानां विषया, विचारा, अनुभवा, उपदेशाश्च मुहुर्मुहुरुद्भवन्ति स्म, मस्तकं च प्रणतं भवति स्म तेषां लोकपरलोकसम्बन्धिनीमन्तस्तलस्पर्शिनीं च विचारधारां संस्मृत्य।

अद्यापि सुप्रथितमुज्जयिनीनगर्य्याः
श्रीसाहसाङ्कनृपतिं प्रणतः स्मरामि।
योऽन्तःपुरे खलु निजे सुरवाक्प्रचारम्
दैनन्दिनव्यवहृतौ नियतं चकार॥ ९॥

यथा कविना राजशेखरेण काव्यमीमांसायां लिखितम्—
"श्रूयते चोज्जयिन्यां साहसांको राजा, तेन च संस्कृतभाषात्मकमन्तःपुर एवेति प्रवर्तितो नियमः।"

काव्यमीमांसा, दशमोऽध्यायः

पुनश्च—काले श्रीसाहसांकस्य के न संस्कृतभाषिणः।

सरस्वतीकण्ठाभरणम् २.१५

अत्र स्थितेन नृपभर्तृहरेः स्मृता या
"धिक् तां च तं च मदनं च इमां च मां" वाक्।
गोरक्षनाथचरितं च तदद्भुतं यत्
अद्यापि मां व्यथयतीव तथाऽखिला सा॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उज्जयिनीनिवासस्य मम अपरमपि इदमेकं वृत्तं सदा मे मनो घूर्णयति स्म। तदिदं वर्तते—"धिक् तां च तं च मदनं च इमां च मां च" इति गिरा भर्तृहरिणा प्रकटीकृतः महत्तरः पश्चात्तापः, तत्कारणीभूता महाराज्ञी पिंगला, राज्ञः अश्वसेवकः, अपरा च एका वेश्या इति तिस्रः व्यक्तयः, तदनु राज्यशासनाद् विरक्तस्य भर्तृहरेः राज्यं परित्यज्य गुरुगोरक्षनाथात् दीक्षाग्रहणम्, ततो गुरोराज्ञया भर्तृहरेः महाराज्ञ्याः पिंगलायाः सविधे गत्वा "मातः भिक्षां देहीति" प्रथम-भिक्षायाचनम्, ततो भर्तृहरेः कन्था-कुण्डल-भिक्षापात्र-शृङ्गिकादि-परिग्रहैः सह साधुवेषं धृत्वा नियमितरूपेण लोके पर्यटनं भिक्षाटनञ्चेत्यादीनि वृत्तानि मम पूर्वज्ञातान्यपि उज्जयिन्यां पुनः पुनः स्मृतिपथमागत्य शरीरं रोमाञ्चयन्ति स्म, मनो व्यथयन्ति स्म "अर्धाटनघटितं घटयतीति विधातुः प्रवृत्तिं प्रवृत्तिं प्रमाणीकुर्वन्ति स्म इयं भर्तृहरेः कथा ग्रामे ग्रामे गीयते, प्रीत्या जनैः जनैः श्रूयते तथा अनया ज्ञानवैराग्यविषयिणी शिक्षा प्रसार्यते लोके। उज्जयिनी-निवासकाले इदं सर्वं भूयो भूयो विचिन्तयतो ममापि वैराग्यमिव समुत्पद्यते स्म।"

शब्दावली नृपतिभर्तृहरेः स्मृता या
"धिक् तां च तं च मदनं च इमां च मां च।"
गोरक्षनाथचरितं च तदद्भुतं यत्
अद्यापि मां व्यथयतीव कथाखिला सा॥ १०॥

एवं हि श्रूयत। राज्यं प्रशासति भर्तृहरिनृपतौ कश्चित् साधुः राज्यसभायामागत्य राज्ञे "अमरफल" नामकमेकं फलं दत्तवान्, कथितवांश्च यद् अस्य फलस्य भक्षणेन भवान् सदा युवा स्थास्यति, आजीवनं कदापि वृद्धो न भविष्यति। अक्षयं च यौवनसुखं भोक्ष्यति इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततश्च फलं गृहीत्वा तस्य च अद्भुतं फलं गृहीत्वा राजा मनसि विचारितवान्—यदि अहमेव केवलं सदा युवा तिष्ठामि, मम राज्ञी युवतिर्न तिष्ठति, तदा को लाभः? इत्थं विचिन्त्य राजा स्वराज्ञ्यै पिंगलायै फलं. दत्तवान्। पिंगलायाश्चापि एकः अन्यः जारपतिः आसीत्, राज्ञः अश्वपालकः, राजापेक्षयापि प्रियतमः। सा तत् फलं तस्मै दत्तवती। स च अश्वपालकः, तत् फलं आत्मनः एकस्यै अन्यस्यै प्रियतमायै वेश्यायै दत्तवान् येन सा चिरं तेन सह यौवनसुखं भुञ्जीयात्। परं सा विवेकिनी वेश्या "यदि राजा इदं फलं भक्षयेत् तदा युवावस्थायां स्थितः चिरं प्रजाः पालयेत्" इति मत्वा तत् फलं राजसभायां गत्वा राज्ञे समर्पितवती। राजा तत् फलं दृष्ट्वा आश्चर्यचकितो भूत्वा वेश्यां पप्रच्छ-त्वया फलमिदं कुतः प्राप्तम्? वेश्या प्राह-अश्वपालकात्। ततः अश्वपालकः आहूतः पृष्टश्च-त्वया कुतः इदं फलं प्राप्तम्? अश्वपालकः—बिभ्यन् कम्पमानः वज्राहत इव प्राह-महाराज, महाराज्ञी पिंगला इदं फलं मह्यं दत्तवती। ततोऽहम्, तस्य आज्ञानुसारमिदं फलं गृहीतवान्। त्वया पुनः कस्मै इदं फलं प्रदत्तम्? महाराज, सर्वमंगलायै वेश्यायै। महाराज, क्षमां याचे, महानेष मे अपराधः। सर्वदा दण्डनीयोऽस्मि। ततः अनूपः रक्षाकारिभिः कारागारं नीतः, दण्डितः बहुधा ताडितश्च।

ततो महाराजः सर्वमिदं रहस्यं ज्ञात्वा, इमं च विश्वासघातम-सहमानः पीडितेनान्तरात्मना सुप्रसिद्धमिमं श्लोकमुदाजहार। पद्यमिदं नीतिशतकस्य अस्ति।

यां चिन्तयामि सततं मयि सा विरक्ता
साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमुक्त्वा विरक्तमना भर्तृहरिः राज्यपरित्यागस्य निश्चयं चकार। तदनुसारं च शिरसः राजमुकुटमवतार्य, राजवेषं तुच्छवस्त्रवत् भूमौ प्रक्षिप्य, सर्वाणि आभरणानि च इतस्ततो विकीर्य, केवलम् अधोवस्त्रम् उत्तरीयं च परिधाय, सिंहासनं प्रणिपत्य, उपस्थितं शोकाकुलं जनसमूहं च नमस्कृत्य राजाप्रासादात् प्रस्थितः। राज्यसञ्चालनाय च स्वकीयं कनिष्ठभ्रातरं विक्रमं निर्दिश्य सर्वथा राज्यभारमुक्तो बभूव।

तस्मिन् समये महायोगिनो मत्स्येन्द्रनाथस्य (मछन्दरनाथस्य) शिष्यः गुरुगोरखनाथः शिप्रातः अनतिदूरवर्तिनि कुटीरे निवासं करोति स्म। भर्तृहरिः तस्मादेव दीक्षां ग्रहीतुकामः तत्समीपं प्राप्तवान्, दण्डवत् प्रणिपत्य च दीक्षादानाय तं सविनयं निवेदितवान्। गुरुगोरखनाथः तस्य सम्यक्प्रकारेण बाह्यवृत्तीनाम् आभ्यन्तरवृत्तीनां च बहुविधं परीक्षणं कृत्वा दीक्षादानं स्वीचकार। परन्तु एका कठोरतमा परीक्षा अपरापि अवशिष्टा आसीत्। यस्यामुत्तीर्णता एव वैराग्यस्य प्रधानं प्रमाणमासीत्। सा परीक्षा कीदृशी वर्तते? गुरुः प्राह—"भर्तृहरे, हठयोगे सर्वा नार्यः मातरः मन्यन्ते। किं त्वं पिंगलां 'मातः' इति कथयित्वा ततः भिक्षां याचितुं क्षमसे यदि इदं क्षमसे? तर्हि गच्छ, योगिवेषं धृत्वा, भिक्षापात्रं गृहीत्वा "मातः पिंगले, भिक्षां देहि।" इत्युक्त्वा भिक्षामानय। ततस्त्वं सिद्धयोगिपदं लप्स्यसे। यदा भर्तृहरिणा इयं गुरोराज्ञा स्वीकृता, राजप्रासादं च गन्तुम् उपचक्रमे तदा तत्रत्यैः वटुयोगिभिः भर्तृहरिः योगिवेषं धारितः। तस्य सुसंयतान् केशान् जटावत् विकीर्य, पीतं वस्त्रं परिधाप्य, स्कन्धे कन्थां (गुदड़ी) संस्थाप्य, हस्ते कमण्डलुं धारयित्वा, एकस्मिन् हस्ते वादनाय शृंगिकां ग्राहयित्वा, "अलख-निरंजन" इति मन्त्रं शिक्षयित्वा ते तं प्रासादं प्रेषितवन्तः। भर्तृहरिः योगिवेषं धृत्वा यदा राजप्रासादे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पिंगलाभवनस्य द्वारे स्थित्वा "मातः पिंगले, भिक्षां देहि इत्युक्तवान् तदा तत्र मार्गे, नगरे, व्रीथीषु, राजप्रासादे, पिंगलाभवने च कीदृशं शोकाकुलं, विषादमयं हृदयविदारकं दृश्यमुपस्थितम्, तत्सर्वमस्मिन् लेखे न वर्णयितुं शक्यते। एतत् सर्वमपि वृत्तं मया पूर्वतोऽपि हिन्दीसंस्कृतग्रन्थानामध्ययनेन सम्यगधिगतमासीत् परन्तु उज्जयिनी-निवासकाले भर्तृहरिगुफायाः तथा गुरुगोरखनाथगुहायाश्च दर्शनेन तत्र कञ्चित् कालमवस्थानेन च सा सर्वापि घटना मम प्रत्यक्षीभूता इव हृदयं द्रवीभूतं कुर्वती आसीत्।

कर्वी—

अद्याप्यहं सुरगिरः प्रथितेऽति कर्वी-
विद्यालये चयनकर्मणि संप्रवृत्ते।
अभ्यर्थिघात - भयतोऽस्य मठस्य मध्ये
लुक्कायितं निजमहो नहि विस्मरामि॥ ११॥

मध्यप्रदेशे कर्वीनगरस्य संस्कृतमहाविद्यालयः भवनदृष्ट्या, अध्ययनाध्यापनदृष्ट्या, सम्पत्तिदृष्ट्या च एका महत्त्वपूर्णा संस्था वर्तते। अस्यैव महाविद्यालयस्य कृते प्रधानाचार्यस्य चयनार्थमहं २७.१०.८० दिनाङ्के कर्वीं गतवानासम्। तत्र अपराह्ने चतुर्वादने अहं तथा अन्ये च पञ्चषा जनाः चयनार्थं समुपविष्टाः। परं तत्र पञ्चवादन-पर्यन्तं कोऽपि अभ्यर्थी नागतः। पश्चात् एतस्य किं कारणमिति जिज्ञासिते इदं कारणं ज्ञातं यत् मठस्य द्वारे कश्चिद् दुष्टः अभ्यर्थी गुप्तरूपेण हस्ते गुलिकां धृत्वा स्थितो वर्तते, कथयति च यत् यः कोऽपि अभ्यर्थी गमिष्यति तर्हि तस्याहं हत्यां करिष्यामि। इदमपि तेन कथितमासीत् यत् यदि चयनकर्तारः मां विहाय अन्यस्य कस्यापि चयनं कुर्वन्ति तदाहं तेषां हत्यां करिष्यामि। इदं सर्वं ज्ञात्वा वयं सर्वेऽपि चयनकार्यं स्थगितं कृत्वा तद्भयात् मठे एव लुक्कायिता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकहोरां चायपानादिना वार्तालापेन च यापितवन्तः। अनन्तरं मठाधीशद्वारा कतिपयेषु आरक्षिषु आहूतेषु तैः सह स्व-स्व-वासस्थानं गतवन्तः। ततश्च भोजनादिकं विधाय आरक्षिभिः सहैव स्टेशनं प्राप्ताः। मम तु हृदयं तदानीमपि कम्पत एव स्म। इयं भीतिरासीत् यत् कदाचित् अभ्यर्थी अत्रैव आगत्य अस्माकं हननं कुर्यात्। परन्तु शकटी यदा स्टेशनात् प्रचलिता तदा कथञ्चित् मम भीतिर्व्यपगता। एतादृशी एव एका घटना फैजाबादनगरेऽपि संवृत्ता आसीत्। एतद्घटनाद्वयानन्तरं मया चयनकर्मणि गमनमेव सर्वथा परित्यक्तं, संस्कृतविश्वविद्यालयश्च इदं वृत्तं सूचितः।

खजुराहो—

अद्यापि विश्वविदिते 'खजुराह' नाम्नि
स्थाने दृशा चकितया परिलोकितं यत्।
सुप्रस्तरेषु लिखितं रतिचित्रजातं
तत् कामसूत्रमिव मूर्तमहं स्मरामि॥ १२॥

मध्यप्रदेशभ्रमणप्रसङ्गे एकदा "खजुराहो" नामकं विश्व-प्रसिद्धं समस्तयुवकयुवतीनां कृते परमाकर्षणकेन्द्रं नगरं द्रष्टुमवसरः सम्प्राप्तः। इदं स्थानं छतरपुरमण्डले भवति। अस्मिन्नगरे सुबहूनि मन्दिराणि विद्यन्ते येषु सर्वेषु सर्वविधानां कामशास्त्रोक्तरति-चित्राणामुत्खननं दृष्टिगतं भवति। तानि चित्राणि दृष्ट्वा एवं प्रतिभाति यत् वात्स्यायनकामसूत्रस्य दशाध्यायात्मके द्वितीयाधिकरणे रति-सम्बन्धिनो ये विषयाः प्रतिपादिताः सन्ति तेषां मूर्तरूपाणीव तानि मन्दिराणि निर्मितानि सन्ति। एषां मन्दिराणामियमीदृशी अप्रतिम-शिल्पकलामयी संरचना विश्वस्य एकमद्वितीयं परमाद्भुतं च दृश्यं वर्तते।

अद्याप्यहोऽस्य नगरस्य विचित्रसृष्टे-
र्विश्वेऽखिलेऽपि तुलना न कदापि लभ्या।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्कारु - कौशल - कलाकृतयो विदग्धान्
आकारयन्त्यनिशमेव सुदूरदूरात्॥ १३॥

ग्वालियर—

यत्र प्रसिद्धनृपतिः स सहस्त्रबाहुः
लोकप्रयुक्त - गिरि 'सासबहू' बभूव।
अद्यापि शिल्पमणिमण्डित-देवहर्म्यं
तद् ग्वालियरनिकटवर्ति सदा स्मरामि॥ १४॥

१३.३.८२ दिनाङ्के अहं विद्याभारत्याः राष्ट्रीय-विद्वत्परिषदि संस्कृत-शिक्षणविषये भाषणार्थमामन्त्रितः ग्वालियरनगरं गतवान् आसम्। तत्रैव तत्रत्यानां जनानां मुखादिदं श्रुत्वा यत् "इतो नातिदूरे एकं सास-बहू नामकं दर्शनीयं मन्दिरं वर्तते" ममापि तन्मन्दिरं द्रष्टुमुत्कण्ठा जाता। मन्दिरस्य नाम श्रुत्वा मया इदं विचारितं यत् मन्दिरमिदं कयाचित् श्वश्र्वा बध्वा च सम्मिलितरूपेण निर्मापितं स्यात्। ततोऽहं केनापि तत्रत्येनैव जनेन सह तन्मन्दिरं द्रष्टुं गतवान्। परं तत्र मया इदं ज्ञातं यत् मन्दिरस्य यथार्थं नाम "सहस्त्रबाहु" वर्तते यस्य लोकभाषायां "सास-बहू" इति नाम प्रसिद्धं जातम्। तद्भव-शब्दस्य इदमेकं रोचकं स्मरणीयं च उदाहरणं मया प्राप्तम्।

चित्रकूट—

श्रीचित्रकूटगिरि-पर्यटने कपीनां
यत् कर्म दृष्टमधुनाऽपि न विस्मरामि।
ये भाययन्त्यनुपतन्ति च धावयन्ति
गृह्णन्ति खाद्यमपि "पाकिट"रन्ध्रमध्यात्॥ १५॥

चित्रकूटनगरेण सह मम बाल्यकालादेव घनिष्ठः सम्बन्धो वर्तते। हिन्दीभाषाया ज्ञानं मया तत्रैव प्राप्तम्। ततः अष्टाध्याय्या अमरकोशस्य च अध्ययनं मया तत्रैव कृतम्। तत्रत्ये पीलीकोठी-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महाविद्यालये मम पितृपादा अध्यापका आसन्। अतएव छात्रावस्थायां कतिपयवर्षाणि मया चित्रकूट एव यापितानि। तेषु एव दिनेषु तत्रत्यानां वानराणां, वानरीणां, लघु-लघु-वानराणां च सर्वाणि कृत्यान्यवलोकितानि, यान्यत्र सङ्केतितानि।

अद्यापि वृद्धमहिलाजन-सन्निधाने
यद् वन्य-शुष्क-बदरीफल-चूर्णलोभात्।
आहिण्डितं प्रतिदिनं स्वदितं च लब्ध्वा
तन्मे मुखं स्मृतिगतं सजलं करोति॥ १६॥

चित्रकूटक्षेत्रे असंख्या वन्यबदरीफलानां वृक्षा भवन्ति। तेषां फलानि अत्यन्तं लघु-लघूनि भवन्ति। तानि यदा शुष्काणि भवन्ति तदां तेषां चूर्णं निर्माय भोजने पाने च उपयोगः क्रियते। आम्ल-मधुररसमयानि तानि चूर्णानि भुक्त्वा पीयमानं जलं बहु स्वादिष्ठं भवति। ममापि तद् बाल्यकाले बहु रुचिकरं भवति स्म। अतस्तन्मया ग्रामीणानां गृहे गृहे वृद्धमहिला याच्यन्ते स्म, ताश्च प्रीत्या ददते स्म तथा तद् आस्वाद्यते स्म मया गृहमानीय।

प्रक्षिप्तलोष्टनिहतैः कपिभिः समन्ता-
दाकुप्य पृष्ठपतितैः मम धावितस्य।
अद्यापि तानि चकितानि विलोकितानि
भूलोठितानि पतितानि न विस्मरामि॥ १७॥

रात्रौ कदापि भवनोपरि सिंहभीतिः
भीतिर्दिने विपुल-वानर-वानरीणाम्।
अद्यापि नित्यमतिशङ्कित - मानसस्य
सा चित्रकूटवसतिर्नहि विस्मृता मे॥ १८॥

चित्रकूटे कान्तानाथपर्वतस्योपरि बम्भ्रम्यमाणा व्याघ्राः सिंहाश्च पर्वतसंश्लिष्टस्य मम निवासस्थानस्यापि उपरितने भागे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदा कदा आगच्छन्ति स्म, क्षणं तिष्ठन्ति स्म च। तेषामागमनस्य सूचना भवति स्म पर्वतस्थवानराणां पलायनैर्धावनैः कलकलैः कोलाहलैश्च। ततो वयं सर्वे सावधाना भवामः स्म। इयमाशङ्का प्रायेणास्माकं हृदये सदैव रात्रौ संजायते स्म। एतदतिरिक्तं दिने वानरवानरीणां तद्बालकानां च भीतिस्तु सार्वकालिकी एवासीत्। ते कदा, कुत्र कथं च प्रहरन्ति इति कोऽपि न जानाति। अखाद्यान्यपि वस्तूनि हरन्ति स्म। मम अष्टाध्यायी अमरकोशश्च तैर्बहुधा मम हस्तादपहृतौ, खण्डितौ भुक्तौ च। तदेव वृत्तमस्मिन् पद्ये अभिप्रेतं विद्यते। तद् बाल्यकालीनं वृत्तं साम्प्रतमपि यदा कदा स्मृति-पथमवतरति मोदयति च मानसम्।

चित्रकूटप्रशस्तिः—

श्रीराम - लक्ष्मण - विदेहसुता - पदाब्ज-
संस्पर्शनैः परमपावनतामुपेताम्।
संसारसिन्धुतरणीं हरणीमघानां
श्रीचित्रकूटधरणीं प्रणतोऽस्मि नित्यम्॥ १९॥

झाँसी—

अद्यापि भारतसुविश्रुत - वैद्य - राम-
नारायणाख्यमहनीय - मनीषिवर्यम्।
सौजन्यसिन्धुमतिसौम्यमुदारताया
मूर्तं स्वरूपमिव चेतसि भावयामि॥ २०॥

"वैद्यनाथ आयुर्वेदभवन" नाम्नी संस्था देशस्य सर्वेषु नगरेषु सुप्रसिद्धा वर्तते। अस्या एव संस्थायाः संस्थापका आसन् एते स्व-नामधन्याः श्री पं० रामनारायणशर्ममहोदया वैद्यशिरोमणयः। १.३.७४ दिनाङ्के उत्तरप्रदेशीय-संस्कृताध्यापकसम्मेलनावसरे वृन्दावने एतेषां साक्षात्कारो जातः। एतेषां स्वागताध्यक्षीयं भाषणमपि श्रुतं मया।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ममापि च उद्घाटनभाषणं तैराकर्णितम्। एवमावयोः स्वभावसाम्येन, वयःसाम्येन, विचारसाम्येन च परस्परं प्रगाढः सम्बन्धो जातः। तैः स्वकीयभवनेऽपि अहमेकदा निमन्त्रितो भोजनपानाय। तेन तेषां व्यवहारे सौजन्यस्य सद्भावनायाश्चापि परिचयो जातः। काले काले महती उदारताऽपि तेषां मया विलोकिता। सौम्यभावस्तु तेषां मुखाकृतौ सर्वदा विराजते स्म एव। एवं च मम भारतभ्रमणे ये केचन मम दृष्टौ अङ्गुलिगणनीयाः सत्पुरुषा महनीयचरिता मिलितास्तेषु इमे अन्यतमा आसन्। अतस्ते सर्वदैव मम स्मृतिमन्दिरे सुप्रतिष्ठिता विराजन्ते।

झाँसीतिनामनगरे धृतखड्गहस्ता
शौर्याकृतिः खलु बृहत्तुरगाधिरूढा।
या मूर्तिरैक्ष्यत महामहनीयराज्ञ्याः
साऽद्यापि मन्मनसि विस्मयमातनोति॥ २१॥

२४.३.७४ दिनाङ्के अहं वैद्यवर्यमहोदयैः सह तेषां गृहनगरं "झाँसीं" समागतः, तेषामेव च गृहे स्थितः, तत्रैव च भोजनपानादिकं विधाय, कञ्चित् कालं च विश्रम्य नगरभ्रमणार्थं निर्गतः। अस्मिन् क्रमे आदौ तत्रत्यं संस्कृतविद्यालयं दृष्ट्वा तत्र स्थितान् विदुषो विद्यार्थिनश्च मिलित्वा, पठनपाठनविषये च किञ्चित् संभाष्य सायं तुरगाधिरूढां धृतखड्गहस्तां महारानी लक्ष्मीबाई-मूर्तिं द्रष्टुं तत्स्थानं गतवान्। तत्र दूरादेव तां मूर्तिं दृष्ट्वा मनसि कियन्तो भावा हृदये समनुदपद्यन्त इति लिखितुं न शक्यते।

शिप्राजले मम पुरा पुनरुज्जयिन्यां
श्रद्धाऽभवत् मनसि या स्तुतिपाठहेतोः।
तां कालिदासकवितास्मरणादपेतां
स्मृत्वाऽधुनापि किल कौतुकमावहामि॥ २२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवन्ती नगरी पुण्या मुक्तिदा सर्वदेहिनाम्।
शिप्रा चैव महापुण्या वर्तते लोकपावनी॥

इत्यादिषु पौराणिकेषु वचनेषु उज्जयिन्याः शिप्रायाश्च पुण्यत्वं, पावनत्वं मुक्तिदातृत्वं च पठित्वा एतद्द्वयं प्रति मम मानसे महती श्रद्धा समुदेति स्म तथा तेनैव च भावेन अहं तत्र गतवान्। परन्तु तत्र गत्वा यदा मेघदूतस्य निम्नलिखितं पद्यद्वयं स्मृतिपथमागच्छति स्म तदा मानसं किञ्चित् श्रद्धाभावात् विचलितं भवति स्म। लौकिकाश्च विकारा मनसि उत्पद्यन्ते स्म। तत् पद्यद्वयं निम्नलिखितं वर्तते—

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्ग-प्रणय-विमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दाम-स्फुरित-चकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥ २६॥

द्वितीयं पद्यं तावत् ततोऽपि किञ्चित् अधिकमेव शृङ्गारमयम्—

यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः। ३१. उत्तरार्द्ध॥

एवं च उज्जयिन्याः शिप्रायाश्च उभयमपि योग-भोगसाधनत्वं सिद्ध्यति। मन्ये, उज्जयिनीनिवासिनामुभयविधोऽपि लाभः सुलभ एव। इदं सर्वं विचिन्त्य मम उज्जयिनीनिवासकाले परमं कौतुकं भवति स्म।

जबलपुर—

अद्यापि जब्बलपुरे नियमेन बाल्ये
प्रातर्मया प्रतिदिनं परिधावितं यत्।
यच्चातिवेगवशतः पतितं, स्मृतं तत्
स्फूर्तिं परां मयि पुनः स्थविरेऽपि धत्ते॥ २३॥

इदं छात्रावस्थाया वृत्तं वर्तते। तदानीमहं जबलपुरस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिगम्बरजैन-महाविद्यालये पठन्नासम्। तत्र छात्राणां यथा शारीरिकोऽपि विकासस्तथा बलं स्फूर्तिश्च भवेत्तदर्थं प्रतिदिनं प्रातः छात्राणां कृते धावनस्य नियमो विहित आसीत्। धावनस्य च कृते विद्यालयद्वारा मार्गः निर्मित आसीत्। तस्मिन् मार्गे यः एकवारमपि साद्योपान्तं धावति स्म स एकक्रोशं धावति स्म। अतश्छात्रा अहमहिकया अनेन नियमेन प्रतिदिनं प्रायः एकक्रोशपर्यन्तं धावनं कुर्वन्ति स्म। एष दैनन्दिनः क्रमः प्रचलति स्म। सर्वेषाञ्च कृते अनिवार्य आसीत्। तस्माद् अहमपि तत्र तथैव प्रतिदिनं धावनं करोमि स्म। तस्य क्षणं सुपरिणामो जातः यद् अधुनापि मम गतिः मन्दा न भवति। अद्यापि अहं वेगेन चलामि धावनं च कर्तुं शक्नोमि।

अद्यापि जब्बलपुरे घटितां विशिष्टां
संस्मृत्य संस्कृतसभां मुदितो भवामि॥
यत्रोत्थितो विपुलपण्डितशिष्यशिष्या-
सामान्यसंस्कृतविदां विपुलो विमर्दः॥ २४॥

अरविन्दाश्रमस्य श्रीमातुर्जन्मशतीमभिलक्ष्य प्रवर्त्यमानेषु शतसंख्यकेषु संस्कृतसम्मेलनेषु क्रमात् ३-१२-७८ दिनाङ्के जबलपुरनगरे एकदिवसीयमप्येकं सुबृहत्सम्मेलनमायोजितमासीत्। तत्राहं मुख्यातिथिरूपेण समुपस्थित आसम्। तस्मिन् सम्मेलने मयाऽयं विशेषोऽवलोकितो यदत्र विश्वविद्यालयातिरिक्तं जबलपुर-संभागस्य सर्वेषामपि संस्कृतमहाविद्यालयानां, विद्यालयानां, मठानां, मन्दिराणां चापि श्लाघनीयः सहयोग आसीत्। नगर-निवासिनां संस्कृतप्रणयिनां सम्भ्रान्तजनानामपि महान् समुदायः सम्मेलने भागं गृह्णाति स्म। स सम्मर्दः मम दृष्टौ सर्वथा अपूर्व आसीत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दतिया—

अद्यापि सा मनसि गुञ्जति मे सुपीठे
पीताम्बरेति विदिते दतियापुरस्थे।
प्रत्येक-बालकमुखात् सततं श्रुता या
नम्रा "नमामि च नमामि नमामि" वाणी॥ २५॥

मध्यप्रदेशस्य "दतिया" नामकं नगरं 'पीताम्बरापीठ' स्थान-कारणात् तत्संस्थापकानां श्रीस्वामिवर्यमहाराजानां महनीयप्रभाव-कारणाच्च प्रदेशे अतितरां प्रसिद्धं वर्तते। अत्राहं २२.३.७४ दिनाङ्के पूर्वचर्चित-वैद्यमहोदयैः वृन्दावनात् समानीतः। अत्र स्वामिमहा-राजानां दर्शनं कृत्वा, पीताम्बरासंस्कृतपरिषदः प्रकाशनानि दृष्ट्वा, तत्रत्यैः साधकैः विद्वद्भिश्च मिलित्वा सुमहान् प्रमोदो जातः। परं सर्वाधिका प्रसन्नता मम तदा जाता यदाऽहं नगरात् आसायं स्वामि-महोदयानां दर्शनार्थं समागतान् सुबहून् लघुलघुबालकान् "नमामि, नमामि, नमामि" इति पदैः स्वामिमहोदयं सश्रद्धं नमस्कुर्वतो दृष्ट-वान्। अत्र महोर्ध्वधर्मशालायां संस्कृतप्रचारगोष्ठ्यां भाषणमपि जातम्।

अद्यापि मध्यभुवि भिल्लविलासिनीनाम्
गौरेषु कोमलकपोलदलेषु नित्यम्।
उल्लिख्यमान-तिलबिम्बमवेक्षितं यत्
संस्मृत्य तन्मम मनो भजते प्रमोदम्॥ २६॥

छात्रावस्थायाम् इन्दौरनगरनिवासकाले तत्समीपवर्तिनां रतलाम, झाबुआ, धारप्रभृति-मगराणां ग्रामाञ्चलेषु निवसतां भिल्लजनानां परिवारे महिलासु एतादृशं शृङ्गारप्रसाधनं मया बहुशो विलोकितम्।

कस्मिंश्चिदासने उपविश्य, पादयोर्मध्ये च एकं बृहद् दर्पणं संस्थाप्य, तत्र मुखमवलोकयन्त्यो युवतयो यथास्थानं तिलबिम्ब-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुल्लिखन्ति स्म प्रहृष्यन्ति स्म च। तत्सर्वमद्यापि स्मृतिपथमागतं सत् मनो मोदयति। इयं रीतिर्मया अन्यप्रदेशेषु न क्वचिद् दृष्टा।

धार—

अद्यापि धारनगरीममरीं यशोभि-
र्ध्यायामि संस्कृतगिरो वसतिं विशालाम्।
यत्र स्थितस्य मम भोजगुणावलीनां
स्मृत्या मनः किमपि विह्वलतामुपेतम्॥ २७॥

नास्ति इदमविदितं संस्कृतसाहित्येतिहासविदां विदुषां यद् भारतीय-भूपतिषु धाराधीशो महाराजो भोजो विविधविषयसम्बद्धानां बहूनां महत्त्वपूर्णग्रन्थानां प्रणेता बभूव। व्याकरण-कोष-काव्यालंकारादिविषयातिरिक्तं धर्मशास्त्र-योगशास्त्र-शिल्पशास्त्र-ज्यौतिषशास्त्र-चिकित्साशास्त्रादिलौकिकविषयेष्वपि अनेके ग्रन्थाः प्रणीताः। अस्यैको महान् ग्रन्थागारोऽप्यासीत्। १४०० संख्यकानां पण्डितानां कवीनाञ्च आश्रयदातापि आसीदयम्। महाराजभोजसम्बद्धाः कथाः किंवदन्त्यश्चापि अनेकाः प्रचलिताः सन्ति। इदं सर्वं मम पूर्वत एव विदितमासीत्। अतो धारानगरीं द्रष्टुं मम बहोः कालाद् बलवती इच्छा भवति स्म। यद्यपि धारानगर्याः तद् ऐतिहासिकं वैभवं सम्प्रति समाप्तप्रायमेव तथापि उज्जयिन्याः समीपवर्तितया मया उज्जयिनीनिवासकाले सा समीहा परिपूर्णतां नीता। परं वर्तमानां स्थितिं विलोक्य मनसि बहु कष्टमजायत।

नागपुर—

अद्यापि नागपुरसन्निकटस्थितं तं
प्रीत्या स्मरामि लघु-रामगिरिं प्रशस्यम्।
यः प्रस्तरोऽपि वसतिं प्रददौ दयार्द्रो
यक्षाय मुग्धरमणी - विरहातुराय॥ २८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि भारतमहीप्रथितं पुराणं
सुश्रद्धया स्मरति नागपुरं मनो मे।
धर्मस्य संस्कृतगिरोऽप्यथ संस्कृतेर्यत्
रक्षा - प्रचार - परिवर्द्धनकेन्द्रमेकम्॥ २९॥

बदरिया—

अद्याप्यहं 'बदरिया' इति नामधेयं
ग्रामं स्मरामि बहु-विस्मय - कारिणं तम्।
यत्र प्रचण्ड - कुसुमायुध - चण्डघातै-
र्गोस्वामिनोऽपि बत गोवशगा अभूवन्॥ ३०॥

२६.१०.८० दिनाङ्के कर्वीनगरे समायोजिते एकस्मिन् संस्कृत-समारोहे भागं गृहीत्वा अहं ततो राजापुरनामकं नगरं समागतो यत् श्रीगोस्वामितुलसीदासमहाभागानां निवासस्थानरूपेण प्रसिद्धं वर्तते। इदं स्थानं गंगायाः पूर्वतटे विराजते। पश्चिमतटे च तत्रैव 'बदरिया' नामको ग्रामो वर्तते यत्र श्रीगोस्वामिमहाभागानां श्वशुरालयः आसीत्। एकदा यदा श्रीगोस्वामिमहोदयानां पत्नी रत्नावली स्वपितृगृहे अतिष्ठत् तदा तस्या वियोगमसहमाना गोस्वामिमहोदयाः श्रावणमासे, मेघे मन्दं मन्दं वर्षत्येव, रात्रौ गंगामुत्तीर्य बदरियाग्रामं प्रासवान्, श्वशुरगृहं गत्वा रत्नावलीं मिलितवान् तथा स्वकीयां वियोगवेदनां शमयामास। इदं वृत्तं मया पूर्वत एव विदितमासीदिति कौतुकवशाद् राजापुरतोऽहं बदरियाग्रामं द्रष्टुं गतवान् तथा कञ्चित् कालं तत्रैव पतिपत्नीनां विरहव्यथाया विविधाः कथाश्चिन्तयानः किञ्चिद् उद्वेलितचेता अतिष्ठम्।

भिल्लक्षेत्र—

अद्यापि भिल्लयुवतीजनवल्लभानां
रूपं विलोक्य भयकारि परिच्छदं च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुग्धाः स्त्रियश्च समवेक्ष्य न मेऽपयाता
चिन्ता तयोः सुरतसौख्य-समग्रतायाः ॥ ३१ ॥

भिल्लानां तथा अन्येषामपि वन-पर्वतवासिनां जनजातीयानां समाजे पुरुषाणां स्त्रीणां च स्वरूपं किञ्चिद् भिन्नमिव दृष्टिपथमेति, क्वचिच्च नितान्तं भिन्नं भिन्नतमं च। तत्र पुरुषास्तावत् कठोराः, रूक्षकायाः, वेषभूषादिसुसज्जारहिताः, अर्धनग्नप्रायाः, अस्त्रधारिणः दर्शने वार्तालापे च अपरिचितानां कृते किञ्चिद् भयप्रदा विलोक्यन्ते। परं तेषां स्त्रियस्तु तद्विपरीतं स्वभावे, रूपे, वेषभूषायां, प्रसाधने, आलापे, अवलोकने च प्रायेण नितरां सौन्दर्य-माधुर्य-लालित्यादि-गुणसम्पन्ना मया अवलोकिताः। एतादृश्यां विपरीतायां स्थितौ ते कथमिव समग्रतया दाम्पत्यसुखमनुभवन्तीति चिन्ता मम मनसि यदा कदाचिदवश्यमेव उदेति स्म कौतुकं च जनयति स्म।

अद्याप्यहं शबरजातिजुषां जनानां
रामाङ्कितं सकलमङ्गमदृष्टपूर्वम्।
स्मृत्वा च गीतमपि राममयं सनृत्यं
मुग्धो भवामि बहुविस्मितमानसश्च ॥ ३२ ॥

मध्यप्रदेशस्य वनवासिजनेषु केचन ईदृशाः पुरुषाः भवन्ति ये आत्मनः सर्वेष्वङ्गेषु रामनाम लेखयन्ति, मण्डलाकारेण नृत्यन्ति, मृदङ्गं वादयन्तश्च रामभक्ति-सम्बन्धि गीतं गायन्ति। ते आत्मनः शबरीकुलजातान् मन्यन्ते। एतादृशा बहवो जना मया वनवासिक्षेत्रेषु तथा हरिद्वारादिषु नगरेषु कुम्भपर्वावसरे दृष्टाः। तेषां तादृशं राम-नामाङ्कितं शरीरम्, भक्तिभावपूर्णं नृत्यगीतवाद्यादिकं च दृष्ट्वा तान् प्रति महती श्रद्धा जायते स्म। महांश्च विस्मयोऽपि समुत्पद्यते स्म।

अद्यापि मध्यभुवि भिल्लवधूटिकानाम्
आपाद-मध्य-कटि-कण्ठ-शिरः-प्रदेशान्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मृत्वा भृतान् बहुंविधाभरणैर्गरिष्ठै-
र्भारार्दितं स्वयमिवानुभवामि नित्यम्॥ ३३ ॥

मध्यप्रदेशस्य भिल्लजातीयमहिलासमाजे सर्वेष्वपि अङ्गेषु विविधानां विचित्राणां गरिष्ठानां च आभूषणानां धारणस्य पुरातनी प्रथा अस्ति यः इदानीन्तने नवयुगेऽपि प्रचलति। तेषामाभूषणानां भारस्य अनुभवः तासां महिलानां भवति न वा इत्यहं न जाने, न वा अस्मिन् विषये मया ताः कदाचित् पृष्टाः। परन्तु ता अवलोक्य अहं स्वयमेव भारार्दितो भवामि स्म। तावन्ति तथाभूतानि च गुरूणि भूषणानि धारयित्वा सर्वेषां गृहकार्याणां सम्पादनं नाम एकं विस्मयकरं कार्यमासीत् इति मयाऽनुभूयते स्म।

मन्दसौर—

अद्यापि शिल्प - कमनीयकला - विलासां
तां मन्दसौरधरणीं मुदितः स्मरामि।
या स्वीयपट्टमयवस्त्रचयैः कदाचित्
सर्वाङ्गनाजन - मनः - सुखदा बभूव॥ ३४॥

उज्जयिनीतः नातिदूरे, मन्दसौरनामकं प्राचीनं नगरं वर्तते। अत्र खृष्ट-पञ्चमशताब्द्यां यदा बन्धुवर्मा शासनं करोति स्म तदा इदं नगरं पट्टमय- (रेशमी) वस्त्राणां निर्माणस्य एकं सुप्रसिद्धं कलाकेन्द्रमासीत्। अत्र निर्मितानि पट्टमयवस्त्राणि तथा सुन्दराणि मनोहराणि च भवन्ति स्म यथा तेषां धारणं विना नारीणां सौन्दर्यसाधनानि अन्यानि अकिञ्चित्कराणि अप्रियाणि च भवन्ति स्म। बन्धुवर्म्मणः मन्दसौर-पाषाणलेखे एकं पद्यं वर्तते येन इदं वृत्तं परिज्ञायते—

तारुण्यकान्त्युपचितोऽपि सुवर्णहार-
ताम्बूलपुष्पनिधिना समलङ्कृतोऽपि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नारीजनः श्रियमुपैति न तावदग्र्यां
यावन्न पट्टमयवस्त्रयुगानि धत्ते॥

(गुप्तकालीन अभिलेख, ५-३५४)। इदं तत्रत्यवस्त्रवणिजां विज्ञापनमासीत्। पद्यमिदमहं पूर्वत एव पठितवानासम्। पठित्वा च इदं मनसि किञ्चित् कुतूहलं जायते स्म। अतः उज्जयिनीनिवासकाले इदं पट्टमयवस्त्राणां प्राचीनं व्यापरकेन्द्रं द्रष्टुं मे मनसि लालसा उत्पन्ना। ततश्चाहं कश्चित्कालार्थं मन्दसौरनिवासिना एकेन मित्रेण सह मन्दसौरं गतवान्। परं साम्प्रतिकं मन्दसौरं तु सर्वथा नवीनतामादधानं वर्तते।

मालव—

श्रीकालिदासकवितावलि - केलिकुञ्जं
संगुञ्जितं मधुरमालवरागगीतैः।
साहित्य - संस्कृति - कलादि - विहारमञ्चम्
अद्यापि मालवमहं भ्रमितुं समीहे॥ ३५॥

प्राचीनसाहित्ये वर्णितो मालवदेशः सम्प्रति मध्यप्रदेशस्य विदिशा, अवन्ती, राजगढ, शाजापुर, देवास, इन्दौर, उज्जैन, मन्द-सौर, रतलाम, प्रभृतीनि नगराणि क्रोडीकरोति। एतत्प्रदेशस्य अपूर्वा प्राकृतिकी छटा, कालिदासप्रभृति-विश्रुतमहाकवीनां जगन्मनोहराः कविताविलासाः, जयदेवादिगीतकारैरुपयुक्तः श्रुतिमधुरो मालव-रागः, सहित्य-संस्कृति-कलाशिला-लेखादीनां गौरवमयी समृद्धिः, विक्रमादित्य-वाक्पतिराजमुञ्ज-भोजदेवादीनां मालवमहीपतीनां विश्वविश्रुता यशोगाथाश्चेत्यादयोऽनन्यसाधारणा अनेके विशेषाः सन्ति। पुरातनो मालवप्रदेशो नाम सम्प्रति मध्यप्रदेश इत्युच्यते।

रीवां—

अद्यापि मे ऋषिकुमार इति प्रसिद्धः
स्वामी सुधीर्न खलु विस्मरणं प्रयाति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मध्यप्रदेशगत - संस्कृतरक्षणार्थं
कं कं प्रयासमकरोन्नहि योऽविरामम्॥ ३६॥

यदा मध्यप्रदेशे संस्कृतशिक्षाया व्यवस्था ह्रासोन्मुखी जायमाना आसीत् तदा तन्निवारणाय तद्विषये मध्यप्रदेशीय-शासनस्य ध्यानाकर्षणाय च रीवां नगरस्थितस्य ऋषिकुञ्जाश्रमस्य संस्थापकैः सुप्रसिद्ध - संस्कृतसेवापरायणैः, श्रीस्वामि-ऋषिकुमारमहोदयैः रीवांनगरे १९ दिसम्बर १९६२ दिनाङ्कात् २९ दिसम्बरपर्यन्तं दशदिवसव्यापि एकं विराट् संस्कृतसम्मेलनमायोजितं यत्र ममापि उल्लेखनीयं योगदानमासीत्। सम्मेलनानन्तरं तत्प्रस्तावानां कार्यान्वयनाय शासनसमक्षं तत्प्रस्तुतीकरणाय च एका समितिः निर्मिता यस्या अहं मन्त्री निर्वाचितः। अनन्तरं सर्वे सम्मिलिताः सदस्याः शासनसमक्षं सर्वा अपि संस्कृतशिक्षणसमस्या उपस्थापयितुं मुख्यमन्त्रिणं श्रीद्वारकाप्रसादमिश्र-महोदयं मिलितुं भोपालं गताः। अहमेकदा एकाकी अपि मुख्यमन्त्रिमहोदयं मिलितुं गतः।

यद्यपि शासनस्य वैमुख्यादेतेषां प्रयासानां यथाभिलषितं फलं न प्राप्तं तथापि स्वामिनां श्रीऋषिकुमारमहोदयानां प्रयासः, परिश्रमः, अनेकधा शासनाधिकारिणां सविधे परिधावनम्, सभा-समिती-नामायोजनं, तदर्थं द्रव्यसंग्रहः, पण्डितसमाजस्य च संघटनञ्चेत्यादि सर्वमपि तेषां कार्यजातमवर्णनीयमासीत्।

एतत्सन्दर्भे विशेषपरिज्ञानाय श्रीस्वामिमहोदयैर्लिखितं निम्नांकितं पुस्तकं द्रष्टव्यम्—

"मध्यप्रदेश में सांस्कृतिक क्रान्ति"

पृष्ठ सं० ३३३ प्रकाशक-ऋषिकुञ्जाश्रम,
पंचमठा, रीवां- (म०प्र०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सरगुजा—

अद्यापि कौरवमणिर्गहिरागुरुर्मे
श्रद्धान्विते हृदि विराजत एव नित्यम्।
वन्येषु यः सुरगिरो विपुलं प्रचारं
कर्तुं न कं कमकरोदनिशं प्रयासम्॥ ३७॥

मध्यप्रदेशे सरगुजानामके वनवासिप्रधाने मण्डले "कैलासनाथगुफा" नामकमेकं स्थानं वर्तते यत्र एकः संस्कृतमहाविद्यालयः प्रचलति। अयं विद्यालयः एतन्मण्डलीयगहिरा-ग्रामवास्तव्येन एकेन 'कौरवा' जातीयेन रामेश्वर-नामकेन भद्रपुरुषेण संस्थापितः सञ्चालितश्च। अयं महोदयः गुणेन, धर्मेण, स्वभावेन च गहिराग्रामवासिभिः गुरुवन्मन्यते अतः 'गहिरागुरु' इति नाम्ना प्रसिद्धिं गतः। एते विद्यालयस्थापनद्वारा, यज्ञाद्यनुष्ठानद्वारा, छात्रवृत्तिप्रदानद्वारा, धर्मप्रचारद्वारा, कीर्तनभजनादीनामायोजनद्वारा, तस्मिन् वनवासिक्षेत्रे अहरहः प्रसरतः क्रिश्चियनधर्मस्य प्रतिरोधद्वारा च संस्कृतस्य संस्कृतेश्च महान्तः प्रचारकाः संरक्षकाश्चेति मया प्रत्यक्षमवलोकितम्।

अस्मिन् स्थाने अहं १७.५.६५ दिनाङ्के महाविद्यालयस्य वार्षिकोत्सवे भागं ग्रहीतुं द्वित्राणि दिनानि न्यवसम्।

सागर—

अद्यापि सागरपुरस्थित - विश्वविद्या-
पीठस्य संसदमहं हृदि चिन्तयामि।
दैव्या गिरो नवनवाःकृतिपाठका नो
सन्तीति यत्र विषयेऽजनि भूरिचिन्ता॥ ३८॥

१९६५ तमखृष्टीयसंवत्सरे मईमासस्य २१ दिनादारभ्य ३० दिनं यावत् "आधुनिक-संस्कृत-साहित्यानुशीलनम्" इति विषयमादाय सागरविश्वविद्यालयस्य संस्कृतविभागेन एका परिसंवादगोष्ठी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समायोजिता आसीत्। विभागाध्यक्षाः डॉ० रामजी उपाध्यायमहोदया अस्या गोष्ठ्या मुख्या आयोजका आसन्। डॉ० विश्वनाथ भट्टाचार्याश्च सहायकाः। विभिन्न-प्रदेशैः भूयांसो वक्तारः शोधप्रबन्धपाठकाश्च समवेता आसन्। आधुनिक-संस्कृतसाहित्य-निर्माणविषयमवलम्ब्य भूयसी चर्चा जाता। अभिनव-साहित्यस्य दिग्दर्शनमपि बहुभिः कृतम्। परन्तु अभिनवसाहित्यस्य पाठकानाम-भावमभिलक्ष्य प्रायः सर्वैरेव चिन्ता प्रकटीकृता।

एतत्समारोहस्य विषये विशेषपरिज्ञानाय "आधुनिक संस्कृत-साहित्यानुशीलनम्" इति पुस्तकं द्रष्टव्यम्। प्राप्तिस्थानम्—संस्कृतपरिषद्, सागर विश्वविद्यालय, सागर, मूल्यम्-७.००

सांची—

अद्यापि विस्मृतिमितानि न तानि साँची-
स्तूपानि भव्यशिखराणि मनोहराणि।
तत्तोरणानि च बृहन्ति च मन्दिराणि
शिल्पीय - कौशल-कलाप-निदर्शनानि॥ ३९॥

२-१२-६७ दिनाङ्के अहं मध्यप्रदेशीयशासनद्वारा तत्र सचिवालये समायोजितायां संस्कृतशिक्षापरिषदि भागग्रहणार्थं भोपालं गतवानासम्। तत्र परिषत्प्रसङ्गेन त्रिचतुराणि दिनानि अवस्थातुं यः अवसरो मया प्राप्तस्तन्मध्ये भोपालसमीपवर्तिषु कतिपयेषु दर्शनीयस्थानेषु भ्रमणस्यापि मम अपूर्वो लाभः सञ्जातः। तेषु साँचीनगरे अशोकादि-बौद्धनृपतिभिः निर्मापितानां स्तूपानामव-लोकनं मे सर्वापेक्षया महनीयतमो लाभ आसीत्। इदं स्थानं भोपालात् २० मीलदूरे पूर्वोत्तरदिशायामवस्थितं वर्तते। अत्र अनेकैः स्तूपैः सह चतुर्भिस्तोरणैर्बहूनां विहाराणां मन्दिराणां चाप्यवलोकनं परमाह्लाद-करमासीत्। स्तूपानामधिका संख्या, तेषु खचितानि नानाविधानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्राणि च सर्वप्रथमं मया अत्रैव अवलोकितानि। भारतीयस्थापत्यकलाया मूर्तिकलायाश्च इदमप्येकमप्रतिमं निदर्शनं वर्तते।

अद्यापि शिष्यसदृशान् खलु सारमेयान्
शिक्षालये निवसतो नियमानुरूपम्।
चौरानुगन्थनकलाः परिशिक्षमाणान्
स्मृत्वा मनो भवति कौतुकितं नितान्तम्॥ ४०॥

इदं सर्वेषां सुविदितं वर्तते यत् पुलिसजनाः प्रायेण चौराणां, चोरितानां वस्तूनां च अन्वेषणाय अभिज्ञानाय च कुक्कुराणां प्रयोगं कुर्वन्ति। कुक्कुराश्च यत्र चौरो भवति यत्र वा चोरितं धनं भवति तत्रैव गच्छन्ति, गत्वा च तं जनं, तत् स्थानं वा प्रायेण जिघ्रन्ति, स्पृशन्ति तेन च चौर्यस्य सर्वं रहस्यं ज्ञायते।

ये कुक्कुरा इदं कार्यं कुर्वन्ति ते अस्यां कलायां प्रशिक्षिता भवन्ति। एतादृशमेकं प्रशिक्षणस्थानं वैद्यवर्य-श्रीरामनारायण-शर्महोदयैः सह वृन्दावनात् झांसीं गच्छता मया मार्गे अवलोकितम्। तस्य स्थानस्य नाम विस्मृतं मम सम्प्रति। परं तत्र कुक्कुराणां छात्रावासं, तेषां प्रकोष्ठं, तेषां प्रशिक्षणं, तेषां चंक्रमणम्, अनुशासितं जीवनं, तेषु च कलह-कोलाहलादीनामभावं दृष्ट्वा, शान्तं नीरवं च तत्रत्यं वातावरणं निरीक्ष्य मम अभूतपूर्व आनन्दः समजनि। गुरुकुले इव च तस्मिन् स्थाने मम श्रद्धा जाता या अद्यापि मम मनसि विराजते एव।

कुक्कुरद्वारा चोरितवस्तूनामन्वेषणस्य कथा पुरातनी अस्ति। एतादृशी एव देवानामेका "सरमा" नाम्नी शुनी आसीत् यया पणिभिरपहृतानां गवामन्वेषणं कृतं, यस्य चर्चा ऋग्वेदे वर्तते। सरमायाः पुत्रत्वसम्बन्धादेव कुक्कुराः सारमेया इति कथ्यन्ते।

सिवनी—

अद्यापि मत्प्रियसखा सिवनीस्थ-पाली-
वालोऽनिशं वसति मे हृदये दिनेशः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतानि यस्य विविधानि मनोहराणि
चेतः स्मृतानि रमयन्त्यपि खेदयन्ति ॥ ४१ ॥

मध्यप्रदेशे वारासिवनी नामकं लघु नगरमेकं वर्तते। तत्रत्ये उपाधि-महाविद्यालये एके प्राचार्या आसन् श्री दिनेश पालीवाल एग.ए., बी.टी. महोदया ये प्राचार्याः सन्तोऽपि संस्कृत-प्रचारार्थं संस्कृत-गीतानि अपि लिखन्ति स्म, प्रकाशयन्ति स्म तथा वृद्धावस्थायामपि स्वयं सर्वत्र निःसंकोचं गायन्ति स्म। एकदा काश्याः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये तदानीन्तनानां कुलपतीनां श्रीमदाचार्यबदरीनाथशुक्लमहोदयानामुपस्थितौ पालीवालमहोदयानां गजल-कौवाली-लोकगीतादिध्वनिषु संस्कृतगीतानां गायनस्य अतीवाकर्षकः कार्यक्रमः समायोजितोऽभूत्। संस्कृतप्रचारक्षेत्रे एतादृशा जना विरला एव दृष्टिमागताः। तेषामत्र मत्संस्थाने आगमनेन, तेषां मधुरालापेन, निर्व्याजव्यवहारेण, सङ्गीतश्रवणेन च यादृशः खलु तदानीं मया आनन्दसन्दोहोऽनुभूयते स्म, तदभावे तादृश एव इदानीं खेदोऽप्यनुभूयते।

पालीवालमहोदयेन स्वनगरे एका लोकसंस्कृतपरिषन्नाम्नी, संस्थापि संस्थापिता ततश्च पुस्तकद्वयं प्रकाशितम्।

मध्यप्रदेशप्रशस्तिः—

श्रीकालिदासकवितावलि - केलिकुञ्जं
संगुञ्जिता मधुरमालवरागगीतैः।
श्रीभोजविक्रमयशोधवला कवीनां
क्रीडास्थली जयन्ति मालवभूमिरेषा ॥ ४२ ॥

✯

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १५ :

महाराष्ट्रप्रदेशीयानि संस्मरणानि

अजन्ता—

अद्यापि ता बहुविधा वितता अजन्ता-
नाम्न्यो गुहा नहि गता नयनाञ्चलाभ्याम्।
यासामसंख्य - विविधाकृति - चित्रमाला-
सौन्दर्यमद्भुतमलङ्करणं जगत्याः॥ १॥

महाराष्ट्रप्रदेशस्य औरंगाबादनगरात् शताधिक-किलोमीटर-दूरे अवस्थितायाम् अजन्तापर्वतमालायां शिल्पकलाप्रवीणैः निर्मितासु गुहासु यानि विविधानि, विचित्राणि कलामयानि भित्तिचित्राणि उत्कीर्णानि सन्ति तानि शिल्पजगतः अद्भुतानि निदर्शनानि सन्ति। वास्तुकारैः कलाकारैश्च कठोरशिलाखण्डानां कृन्तनेन छेदनेन त्रोटनेन घर्षणेन च या विशाला विशालाः कृत्रिमा गुहा निर्मितास्तासां कलात्मकतां निरीक्ष्य विश्वस्य पर्यटका आश्चर्यचकिता भवन्ति।

एवमेव औरंगाबादमण्डले एव ततो नातिदूरे "एलोरा" नामकेऽपि स्थाने गुहाः चित्राणि मूर्तयः मन्दिराणि च जगतो विस्मयावहानि विद्यन्ते।

मया मुम्बईनिवासकाले तत एव एकेन मित्रेण सह गत्वा इदं सर्वमवलोकितम्।

अद्यापि मे स्मृतिपथं न जहाति "एली-
फेंटा" गुहा जलधिमध्यगता ललामा।
या पार्वती-शिव-विवाहशुभस्थलीव
शम्भोः कुटुम्बवसती रचितेव भाति॥ २॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बम्बईनगरनिवासकाले एव इदं स्थानं मया एकेन मित्रेण सह दृष्टम्। स्थानमिदं बम्बईतः अग्रे अरबसागरे द्वीपरूपेण विख्यातं वर्तते। अत्र गुहासु अनेकानि मन्दिराणि, ब्रह्म-विष्णु-शिवादीनां मूर्तयः विशेषतो भगवतः शङ्करस्य जीवनेन परिकरेण च सम्बद्धानि मूर्तिचित्राणि च दर्शकाणां कृते बहु-आकर्षकाणि भवन्ति।

कल्याणमञ्चमनिशं विविधैः प्रयोगैः
कल्याणसाधनरतं खलु भारतस्य।
तन्मन्त्रि - रक्षक - सभापति - कर्मनिष्ठां
ध्यात्वाऽधुनापि सुतरां मुदितो भवामि॥ ३॥

१९७७ तमे ईसवीये वत्सरे संस्थापितं भारतकल्याणमञ्चनामकं संस्थानं, तस्य संरक्षकाः सभापतयो मन्त्रिणः सदस्याश्च कियतीं निष्ठां हृदये निधाय एतत्संस्थानमाध्यमेन विविधैरुपायैः देशसेवायां संलग्नाः सन्तीति मया मञ्चस्य चित्रकूटे समायोजिते (१०.२.१९९१) महाधिवेशने दिनत्रयमवलोकितम्। अस्याः संस्थायाः सभापतयः अहमदाबादनिवासिनः म.म. पद्मश्री, विद्यावाचस्पति, श्रीकेशवराम-काशीराम शास्त्रिणः एके प्रख्याता विद्वांसः सन्ति। महामन्त्रिणः पं० श्रीद्वारकाप्रसादपाटोदिया महोदया एके भारतीयसंस्कृतेः समाजस्य च कर्मठाः सेवकाः सन्ति। अस्याः संस्थाया उद्देश्येषु "ये विद्वांसः सेवावृत्तिं, श्ववृत्तिं, चाटुकारितां च परित्यज्यअन्तरात्मनः प्रेरणानुसारं निःस्वार्थबुद्ध्या साहित्यसेवां कुर्वन्ति तेषां कृते "भारतगौरव" नामकं सम्मान-दानमपि एकं मुख्यमुद्देश्यं वर्तते। तदनुसारं प्रतिवर्षमेकः कोऽपि विशिष्टः साहित्यसेवी विद्वान् सम्मानितः क्रियते। तदनुसारं मञ्चेन १०.२.१९९१ दिनाङ्के अहमपि "भारतगौरव" सम्मानेन सम्मानितः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नागपुर—

चेत् संस्कृतं भवति भारतराष्ट्रभाषा
किं वा भविष्यति तदा खलु सैन्यगीतम्।
श्रीगोलवल्करमहोदयवाच एता
अद्यापि मां क्वयितुं समुदीरयन्ति॥ ४॥

एकदा प्रचारप्रसङ्गेन अहं नागपुरं गतवान् आसम्। तत्र ९.९.४९ दिनाङ्के डॉ० हेडगेवार-भवने माननीयानां श्रीगोलवलकर (गुरुजी) महोदयानां साक्षात्कारो जातः। तत्र संस्कृतसम्बन्धे विविधचर्चाभिः सह श्रीगुरुजीमहोदयैः उपर्युक्तं प्रश्नमुत्त्थाप्य अहं सैन्यगीतमेकं लिखितुं प्रेरितः ततो मया—

"कदम कदम बढाये जा, खुशी के गीत गाये जा
ये जिन्दगी है कौम की कौम पै लुटाये जा"

इति प्रचलितसैन्यगीतध्वनिमनुसृत्य गीतमेकं लिखित्वा तेभ्यः समर्पितं तेन ते भृशं प्रसन्ना जाताः। मन्निर्मितं तद् गीतमत्र अधस्तादुल्लिख्यते—

सादरं समीयताम्
वन्दना विधीयताम्
श्रद्धया स्वमातृभू-समर्चना विधीयताम्। सादरं........
आपदो भवन्तु वा विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयताम्
वीरता विधीयताम्
निर्भयेन चेतसा पदं पुरो निधीयताम्। सादरं.........
प्राणदायिनी इयम् त्राणदायिनी इयम्
शक्ति-भुक्ति-मुक्तिदा, सुधाऽनपायिनी इयम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतदीय - वन्दने
सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम्। सादरं........

अद्यापि नागपुरवर्तिविदां वरेण्यं
वर्णेकरं निखिलपण्डितमौलिरत्नम्।
साहित्यवारिनिधिमन्थनमन्दरं तन्-
मित्रं मदीयममरं हृदि भावयामि॥ ५॥

वाराणसीतः हैदराबादनगरं गच्छता मया मार्गे ५.९.५९ दिनाङ्के नागपुरे अवतीर्य पञ्चषाणि दिनानि तत्रैव निवासः कृतः ब्रह्मकर्मवर्धिन्यां संस्कृतपाठशालायाम्। तदनन्तरं नगरभ्रमणप्रसङ्गे विद्वत्समागमप्रसङ्गे च डॉ० श्रीधरभास्करवर्णेकरमहोदयानां साक्षात्कारः संजातः। ततः "संस्कृतभाषा-प्रचारिणी" प्रमुखसंस्थासु आवयोः भाषणान्यपि जातानि। एवं तैः सेह मम घनिष्ठः परिचयः सम्बन्धश्च संजातः।

डॉ० वर्णेकरमहोदया न केवलं परीक्षोपाधिधारिण एवासन् प्रत्युत वेदव्याकरणसाहित्यदर्शनेतिहासादिशास्त्रेषु अन्तस्तलावगाहिनः कलाप्रवीणा विचक्षणाः पण्डिता आसन्। सुरभारत्या सह बंगला-मराठी-हिन्दी-आंग्ल-फ्रेंचप्रभृतिभाषास्वपि तेषां प्रगाढं वैदुष्यमासीत्। वर्णेकरमहोदयानां कृतिषु "शिवराज्योदय" नामकं महाकाव्यं संस्कृतसाहित्यस्य एकं सुप्रतिष्ठितं ग्रन्थरत्नं विद्यते। अनुसन्धानात्मकग्रन्थेषु "गीर्वाणवाङ्मयकोश" नामकस्तेषां चतुर्षु खण्डेषु प्रकाशितः संस्कृतसाहित्येतिहासात्मको महाग्रन्थः सर्वानपि इतिहासग्रन्थानतिशेते। प्रज्ञायाः प्रतिभायाश्च मूर्तस्वरूपास्ते 'प्रज्ञाभारती' इति पदव्या विभूषिता आसन्। परन्तु तेषां यत् सरलम्, आडम्बररहितं, निश्छलं, तपोमयञ्च स्वरूपं दृष्टं तदेव मत्कृते नितरामाकर्षकं तथा श्रद्धास्पदमासीत्, चिरस्मरणीयञ्च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रीतिः परा दिविषदां गिरि मुस्लिमस्य
तस्याश्च मुस्लिमगृहे किलकिञ्चितानि।
तन्मुम्बईनगरवृत्तमभूतपूर्वं
स्मृत्वाऽधुनापि हृदयं बहु मोमुदीति॥ ६॥

मुम्बईनगरनिवासकाले मम यत् सर्वाधिकं विस्मयान्वहं प्रमोदावहं च वृत्तमासीत् तदासीत् श्रीगुलामदस्तगीर अब्बास अली विराजदारमहोदयानां साक्षात्कारः। एते मुम्बईनिवासिनः एके मुस्लिम-संस्कृतपण्डिता आसन् ये तत्रत्यैः संस्कृतपण्डितैः सह मिलित्वा सर्वदा संस्कृतप्रचारौपयिकेषु सर्वविधेषु कार्यकलापेषु सर्वविधं सहयोगं ददति स्म। संस्कृतशिक्षण-शिविराणां संचालने, संस्कृत-भाषणे, संस्कृत-लेखने, संस्कृत-सभासम्मेलनादिषु सक्रियभागग्रहणे तथा संस्कृतसेवायै देशस्य सर्वेष्वपि भागेषु भ्रमणे एतेषां हार्दिकी स्वाभाविकी च प्रवृत्तिरासीत्। इतोऽप्यधिकं वैशिष्ट्यं मया इदमप्येकं सविस्मयमवलोकितं यत् न केवलमेतेषां व्यावहारिकी संस्कृतभाषा आसीत् अपितु विवाहादिषु निमन्त्रण-पत्राण्यपि संस्कृतभाषयैव प्रकाश्यन्ते स्म।

इतः पूर्वं बङ्गभाषायाः "से कालेर कथा" इति नामके ग्रन्थे मया पठितमासीत् यत् बङ्गेषु कश्चिद् आलीवर्दीनामकः नवाबः आसीत्। स यदा दिवंगतस्तदा तस्य दौहित्रेण तदीयश्राद्धदिवसे संस्कृत-पण्डितानां कृते यन्निमन्त्रणपत्रं प्रेषितं तत् शार्दूलविक्रीडित-वृत्ते संस्कृतपद्यमयमासीत्। ततः परं मया अत्रैव संस्कृते निमन्त्रण-पत्रमवलोकितम् एकस्मिन् मुस्लिमपरिवारे। तदेते श्रीदस्तगीर-महोदयाः संस्कृतभाषाया व्यवहारे संस्कृतपण्डितानप्रि अतिशेरते इति सर्वथा अभिनन्दनीयाः सर्वेषामपि संस्कृतप्रणयिनाम्। उपर्युक्त-निमन्त्रणपत्रस्य पद्यं निम्नाङ्कितं वर्तते—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खोदा पादारविन्दद्वयभजतपरो मातृतातो मदीयः
आलीवर्दीनवाबो विविधगुणयुतोऽल्लामुखः पश्चिमास्यः।
मर्त्यं देहं जहौ स्वं अवसरमलुकः सीरजद्दौलवाना
याचेऽहं मां भवन्तो गलधृतवसने शुद्धतां सज्जयन्ताम्॥

'से कालेर कथा' (बंगला)

पुस्तकमिदं मया होशियारपुरे विश्वेश्वरानन्दशोधसंस्थाने पठितम्। अतः सम्प्रति पृष्ठसंख्या न स्मर्यते।

पूना—

अद्यापि नैकविधपण्डितवासभूमिं
तद् पुण्यपतनमहं सततं स्मरामि।
यद् विश्रुतं सपदि संस्कृतसर्वविद्या-
संशोधना - पठन - पाठन - सिद्धपीठम्॥ ७॥

७.११.५९ दिनाङ्के धारवाडनगरात् प्रस्थाय अहं ८.११.५९ दिनाङ्के सायंकाले पूनानगरं संप्राप्तः। पूनानगरे तदानीं मम कोऽपि परिचितो नासीत् परन्तु "पं० गणेशशास्त्री शेण्डे" महोदयानां नाम्ना अहं परिचित आसम्। ते गीर्वाणवाग्वर्धिनीसभाया मन्त्रिण आसन्। अतः सर्वप्रथममहं 'शनिवारपेठ' स्थितं तेषामेव गृहं सायंकाले किञ्चित् तमसि प्रसर्पति प्राप्तवान्। सौभाग्यवशात् ते तदानीं गृह एव विराजमाना आसन्। सत्वरमेव मिलिताः। परिचये प्रदत्ते आगमन-प्रयोजने च निवेदिते भृशं प्रीता अभवन्। ततः परं तत्क्षणमेव तेषां पत्नी, आयुर्वेदशास्त्रमधीयाना तेषां विदुषी पुत्री, पुत्रपौत्रादयश्च सर्वे परिवारसदस्या अपि सम्मिलिताः। चिरपरिचिता इव ते अत्यन्तं प्रमुदिता आसन्। ममापि च स्वपरिवारे आगमनमिव सुमहदानन्द-सन्दोहः समुदपद्यत। रात्रौ भोजनानन्तरं च निशीथपर्यन्तं विविधाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतप्रचारकथाः प्रावर्तन्त, अग्रिमदिवसानां कृते कार्यक्रमाश्च निर्धारिता अभूवन्।

श्री शेण्डेशास्त्रिमहोदयानां भवने निवासकाले मया यद् यत् सुखं सौविध्यं चाधिगतं तत्सर्वमेकस्मिन् पद्ये वर्णितं, तन्निम्नलिखितं वर्तते—

वासो राजपथे, गृहस्य निकटे यानानि, रम्याः कथाः
शय्या-भोजन-पान-सौख्यमखिलं स्वेच्छानुकूलं सदा।
स्नानं चोष्णजलेन नित्यमुषसि स्वादिष्ठ-टी-पानकं
विद्वद्वर्य-गणेशशास्त्रिसदने किं किं न लब्धं सुखम्॥

अद्यापि कर्षति पुणे हृदयं मदीयं
काशीव संस्कृतगिरो नगरीयमन्या।
यत्रानिशं वहति संस्कृति-धर्म-शिक्षा-
साहित्य-संगममयो विमलः प्रवाहः॥ ८॥

पुणेनगरी वाराणसी इव एकं सुप्रतिष्ठितं सारस्वतं केन्द्रं वर्तते। अत्र संस्कृतभाषा-संस्कृतसाहित्य-भारतीयसंस्कृति-पुरातत्त्व-प्रभृतिविषय-सम्बद्धानि बहूनि प्रतिष्ठानानि विद्यन्ते। यथा-भण्डारकर ओरिएन्टल रिसर्च इन्स्टीट्यूट, डेक्कन कालेज, तिलक विद्यापीठ, वैदिक संशोधन मण्डल, इतिहास संशोधन मंडल, महाराष्ट्र परिषद्, गीर्वाणवाग्वर्धिनी सभा, अष्टाङ्ग आयुर्वेद कालेज इत्यादीनि। एवमेव योगेश्वरपाठशाला, फडकेपाठशाला, घैसास पाठशाला चेति नामभिरनेका वेदपाठशाला अपि प्रचलन्ति।

अद्यापि पुण्यतिलकस्मृतिमन्दिरं तत्
तत्रत्यवस्तुनिवहश्च विलोकितो यः।
तत् संस्कृतं मम वपुश्च, मनो, मतिं च
रोमाञ्चितं विचलितं चकितां करोति॥ ९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि शंसति मनो मम तद् महारा-
ष्ट्रीयं सुशासनमलं बहुमानपूर्वम्।
यत् पण्डितान् सुरगिरो दिवसोपलक्ष्ये
सम्मानयत्यतितरां प्रतिवर्षमेव॥ १०॥

महाराष्ट्रप्रदेशस्य शासनं १९७२ तमेसवीयवर्षत एव प्रतिवर्षं संस्कृतदिवसोपलक्षे केषाञ्चित् महाराष्ट्रप्रदेशीयानां केषाञ्चिद् अन्यप्रदेशीयानामपि प्रत्येकं पञ्चविंशतिसहस्ररूप्यकैः, सम्मानपत्रेण, उत्तरीयादिना च सम्मानयति। शास्त्रस्य योजनाया अस्याः पुरस्कर्तारौ मुख्यसमायोजकौ च वर्तेते श्री पं० घुंढिराजकवीश्वरमहोदयस्तथा श्री पं० गुलामदस्तगीरमहोदयश्च। मुम्बईनगरस्य सर्वासामपि संस्कृतसम्बन्धिप्रवृत्तीनां प्रमुखौ कर्णाद्धारौ इति तावपि सर्वथा अभिनन्दनीयौ।

स्वाधीनता - प्रथम - पावनमन्त्र - दात्री
वेदादिशास्त्र - परिरक्षण - बद्धकक्षा।
प्राचीन - नव्य - मत - मन्थनदण्डभूता
पुण्या 'पुणे' विजयते नगरी जगत्याम्॥ ११॥

पुणेपुर्याः त्रिविधं महत्त्वं सदैव मम हृदये तां प्रति सुमहतीं श्रद्धां समुत्पादयति। तत्र सर्वप्रथमं महत्त्वमिदं वर्तते यद् अत्रैव तत्र भवता श्रीबालगंगाधरतिलकमहोदयेन *"स्वराज्य हमारा जन्मसिद्ध अधिकार है"* इति महामन्त्रो देशवासिभ्यः प्रदत्तः। द्वितीयं महत्त्वमिदं वर्तते यत् अत्र विभिन्नाभ्यः संस्थाभ्यः पूर्वसूचिताभ्यः वेदब्राह्मणारण्यकोपनिषद्ग्रन्थानां रामायणभारतप्रभृतीनां च महत्त्व-पूर्णग्रन्थानां प्रामाणिकानि संस्करणानि प्रकाशितानि सन्ति। अस्य नगरस्य यः सर्वाधिकमहत्त्वस्य विषयो वर्तते स धर्मस्य धर्मशास्त्राणां च आमूलचूलं सूक्ष्मविवेचनमस्ति। धर्मविचारका विद्वांसः प्रायेण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्विधा उपलभ्यन्ते। यथा—सनातनपक्षपातिनः, संशोधनवादिनः परिवर्तनवादिनश्च। एतदतिरिक्तं शास्त्रप्रामाण्य-वादिनः तर्कप्रामाण्यवादिनश्चेति अन्यदपि भेदद्वयं वर्तते विदुषाम्। अपरे पुनः विज्ञानसमर्थितमेव धर्मं स्वीकर्तुमीहन्ते। एवं धर्मसम्बन्धे विविधाः पक्षा विचारकोटौ इदानीमाटीकन्ते। एतेषु सर्वेष्वपि पक्षेषु पुणेनिवासिनां विदुषां स्वस्वमतानुसारं गहनमन्थनोपेता अनेके ग्रन्थाः प्रकाशिताः सन्ति। हिन्दुसमाजस्य संघटनविषयेऽपि केषाञ्चित् बलवती चिन्ता। नवीन-हिन्दुधर्मस्य स्वरूपनिर्धारणेऽपि अनेके बद्धपरिकराः। एतादृशा मराठीभाषायां लिखिता भूयांसो ग्रन्था मया संगृहीताः, पठिताः, पठ्यन्ते च। धर्मविषये एतादृशी विपुला ग्रन्थसम्पत्तिः कस्यामपि अन्यस्यां भारतीयभाषायां मया न दृष्टा। अत एव पुणेनगरं प्रति तथा तन्निवासि-विद्वद्वृन्दं च प्रति मदीया हार्दिकी श्रद्धा परन्तु इमे सर्वे ग्रन्थाः प्रायेण मराठीभाषायां लिखिताः, अतः अन्येषां कृते उपयोगिनो न भवन्तीति किञ्चित् खेदोऽपि जायते।

बम्बई—

तद् मुम्बई - नगर - मण्डन - भारतीय-
विद्याप्रचारभवनं हृदि राजते मे।
अद्यापि भारतभुवो महनीयतायाः
कीर्तिध्वजीभवति यज्जगतीतलेऽस्मिन्॥ १२॥

१६.११.५९ दिनाङ्के पूनानगरात् प्रस्थाय, मध्ये दिनद्वयं थानानगरे स्थित्वा तत्रत्यैः कतिपयैः पण्डितैश्च मिलित्वा २०.११.५९ दिनाङ्के अहं बम्बईमहानगरं सम्प्राप्तः। अस्य नगरस्य महद् वैभवं महतीं ख्यातिं च श्रुत्वा मम नगरमिदं द्रष्टुं वलवती बहोः कालाद् स्पृहा जागर्ति स्म। सा च शुभसंयोगवशाद् अस्यां यात्रायां परिपूर्णतां गता। अत्रागत्य मया जे०टी० संस्कृतमहाविद्यालयः (ग्वालियरटेंक)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाणीविहार संस्कृतमहाविद्यालयः (माटुंगा) श्रीविश्वनाथ संस्कृत महाविद्यालयः (विलेपारला) तथा ब्राह्मणसभाकार्यालयश्चेत्यादिषु स्थानेषु निवासः कृतस्तथा गोष्ठीषु सभासु च भाषणान्यपि विहितानि।

परन्तु अस्मिन्नगरे सर्वापेक्षया समधिकरूपेण यद् द्रष्टुमाकांक्षितं प्रतीक्ष्यमाणं च वस्तु आसीत् तदासीत् बम्बईनगरस्य मध्ये मध्यमणिरिव विराजमानं भारतीय-विद्या-भवनम्। अत्र भवनस्य कार्यकलापानां प्रकाशनानाञ्च अवलोकनानन्तरं भवने संस्कृतकार्यसम्पादकैः श्री भाईशंकर पुरोहितमहोदयैः, भवनसचिवैः श्रीदेवमहोदयैः ततश्च भवनस्य अध्यक्षैः विद्वद्वर्यैः श्री कन्हैयालाल माणिकलालमुंशीमहोदयैश्चापि मिलितुं सुदुर्लभोऽवसरः सम्प्राप्तः। वार्ताप्रसङ्गे भवनस्यैव संस्कृतप्रचार- सम्बन्धिषु कार्यकलापेषु वैतनिकरूपेण सहयोगप्रदानाय अहं श्रीमुंशीमहोदयैरनुरुद्धः। परं वाराणसीं परित्यज्य तत्र निवासो मत्कृते अनुकूलः नासीत्। पुनश्च वेतनं गृहीत्वा कस्यापि कार्यस्य सम्पादनमपि मद्विचारानुरूपं नासीदिति सविनयं निवेद्य अहं स्वकीयमाश्रमस्थानं समागतः। ततः परमन्येषामपि बहूनां शैक्षणिक-सांस्कृतिक-प्रतिष्ठानानामपि अवलोकनं कृतम्।

तं बम्बईनगररत्नमनेकशः सो-
मैयाभिधं नरमणिं प्रणतः स्ववीमि।
यत्प्राप्तभूरिविभवेन चलन्त्यनेके
शिक्षालयाः सुरगिरः प्रवराः पुरेऽस्मिन्॥ १३॥

भारते मुम्बईनगरं सर्वेष्वपि क्षेत्रेसु अग्रगण्यं पदमधिष्ठितवतां बहूनां नररत्नानां रत्नाकर इव महनीयं निधानमस्ति। तेष्वेव नररत्नेषु एके सुगृहीतनामधेया उद्योगपतयः सन्ति श्रीकरमसज़ी जेठाभाई सोमैया (क.जे.सोमैया) महोदया ये संस्कृतभाषायाः प्रचाराय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरभारतीसोमैयाट्रस्ट नाम्ना एकं न्यासं स्थापितवन्तः। एतन्न्यासद्वारा बहुषु स्थानेषु बहुविधानां संस्कृतसम्मेलनानां शिक्षकपरिषदां च आयोजनेन, बम्बईनगरे तथा तत्समीपवर्तिषु नगरेषु च संस्कृतशिक्षणकेन्द्राणां सञ्चालनेन, संस्कृतपण्डितानां सम्मानेन, छात्रवृत्तिप्रदानेन, संस्कृतदिवसादि-विविधसामयिककार्य-कलापा-नामनुष्ठानेन च संस्कृतसेवाक्षेत्रे यादृशं व्यापकं विपुलं च योगदानं क्रियते तत् सर्वथा असाधारणमिति वक्तुं शक्यते। सम्पूर्णेऽपि भारते भ्रमता मया न कुत्रापि कोऽपि एतादृशः संस्कृतप्रणयी उद्योगपतिर्दृष्टो यः संस्कृतसेवायै एतावत् स्वकीयं धनं व्ययीकुर्यात्। अस्मिन् विषये श्री सोमैयामहोदयानां किमपि उपमानं नास्ति। अत एव मदीये हृदये श्रीसोमैयामहोदयं प्रति महती हार्दिकी श्रद्धा एवं सद्भावना सदैव राराज्यमाना तिष्ठति। एतादृशी एव च अन्येषामपि उद्योगपतीनां सुमतिर्भूयादिति सदा भगवन्तं प्रार्थये।

अद्यापि मत्स्मृतिगता विदुषी क्षमा सा
चान्द्री कलेव सुषमावलयं वहन्ती।
यस्या अनेककृतयः कविताकलाया
अत्युत्तमानि ललितानि निदर्शनानि॥ १४॥

पण्डिता 'क्षमाराव' इत्यभिधानं न केवलं मुम्बापुर्याः प्रत्युत निखिलभारतीयसंस्कृतकविसमाजे श्रद्धेयतया स्पृहणीयतया च स्मर्यते। इयं गौरवर्णेन अनुपमकवित्वशक्त्या च सर्वशुक्ला सरस्वतीत्युपमया जेगीयमाना स्वर्गीय-श्रीशङ्कर पाण्डुरङ्गस्यु दुहिता तथा श्रीराघेवन्द्ररावस्य सहधर्मिणी आसीत्। पाश्चात्त्यशिक्षाशिक्षिता चेयं प्रचुरधनसम्पन्नतया फ्रान्सदेशस्य राजधान्यां पेरिसनगर एव निवासं करोति स्म। अनया विरचितानि दशकृतिरत्नानि कुसुमानीव नूतनं संस्कृतसाहित्योद्यानं विभूषयन्तिं सुरभीकुर्वन्ति च। मुम्बई-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निवाससकाले बहुधा मया एतस्या भवने गमनस्य, मधुरालापस्य, संस्कृतचर्चायाश्च अविस्मरणीयोऽवसरः सम्प्राप्यते स्म।

अद्यापि वीक्ष्य कविमौलिमणेः क्षमाया
गेहे श्रियः सुरगिरश्च सहैव वासम्।
दिष्ट्या सतां हितकरी कविकालिदास-
स्याशाभवत् फलवतीत्यनुभावयामि॥ १५॥

महाकविना कालिदासेन विक्रमोर्वशीये नाटके भरतवाक्यद्वारा श्रीसरस्वत्योः सङ्गतेः शुभाकाङ्क्षा प्रकटीकृता। तत् पद्यमीदृशं वर्तते—

परस्परविरोधिन्योरेकसंश्रयदुर्लभम्।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्॥

कवेरियं महत्त्वपूर्णा लोकहितकरी च शुभकामना कुत्र कुत्र फलवती जाता इत्यहं न जाने परं क्षमादेव्या गृहे अवश्यं फलीभूता अभवदिति मे संजातः निश्चयः। मन्ये, एतेन महाकवेरन्तरात्मन-स्तुष्टिरवश्यमेव सञ्जाता भविष्यति।

महाराष्ट्रप्रशस्तिः—

नाम्नैव नो, सकलराष्ट्रगुणैर्विशिष्टैः
ख्यातस्तथा प्रथित - कीर्ति - नृपैरनैकैः।
सम्पूर्णभारतमही - महितो महारा-
ष्ट्राख्यः प्रदेश इह कस्य न वन्दनीयः॥ १६॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १६ :

राजस्थानप्रदेशीय-संस्मरणानि

अद्यापि विस्मरति मे हृदयं न राज-
स्थाने बहुप्रचलितां बहुधा च भुक्ताम्।
अत्यन्तमिष्टमधुरां घृतमर्दिताङ्गीं
तां चूरमां मृदुलदालियुतां च वाटीम्॥ १॥

अजमेर—

अद्यापि मत्स्मृतिगता अजमेरवर्ति-
ख्वाजा-पवित्रदरगाह-शुभस्थली सा।
या भिन्नभिन्न-मत-जातिजुषां जनानां
श्रद्धास्पदं मिलनमन्दिरमेकमासीत्॥ २॥

आबू—

पुण्यस्थलानि विविधाश्रममन्दिराणि
रम्या वनोपवन-कुण्ड-गुफा-शिलाश्च।
नक्कीह्रदो विविधशिल्पकला ललामा
आबूपुरः सकलमेव गिरामगम्यम्॥ ३॥

नित्यं निसर्गरमणीयतराणि राज-
स्थानावनी - विमलकीर्ति - विभूषणानि।
दृष्टानि बाल्यसमयेऽपि न विस्मृतानि
अद्यापि शैलनगरी - वरवैभवानि॥ ४॥

शैलनगरी–माउण्ट आबू नामकं सुप्रसिद्धं पर्वतीयं नगरं यद् राजस्थानप्रदेशस्य सर्वाधिकं रमणीयं महत्त्वपूर्णं च दर्शनीयस्थलं मन्यते, ऐतिहासिकं सास्कृतिकं च। तदभिलक्ष्यैव उपरितनं पद्यं लिखितम्। अत्र मया पितृपादैः सह बहुधा आगते सर्वमवलोकितं च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जयपुर—

अद्याप्यहं जयपुरस्य सदा स्मरामि
तं होलिकादिवसमद्भुतमद्वितीयम्।
यस्मिन् दिनेऽमित-अबीरगुलाल-पातैः
संजायते नु मरुभूरपि रङ्गभूमिः॥ ५॥
अद्यापि तज्जयपुरस्य दिनं स्मरामि
निर्धारकं यदभवन्मम जीवनस्य।
यस्मिन् गिरं गिरिधराख्यमहामतीनां
श्रुत्वा व्यचिन्तयमहं निजभाविमार्गम्॥ ६॥

यदा मम पितृपादाः ब्यावरनगरे अध्यापयन्ति स्म तदा तत्र गमनागमनकाले मध्ये अनेकधा जयपुरे अवतरणस्य त्रिचतुराणि दिनानि निवासस्य च अवसरो लभ्यते स्म। तेषु दिनेषु यदा यदा काचित् सभा वा गोष्ठी वा संस्कृतसम्मेलनं वा भवति स्म तदा तदा पित्रा सह अहमपि तत्र तत्र भागं गृह्णामि स्म। तेषु दिनेषु संस्कृतभाषणस्य यत्किञ्चित् अर्थमवगतुं मम योग्यता आसीत्। अतः सभासम्मेलनादिषु भागग्रहणे मम अधिका रुचिर्भवति स्म।

ईदृशेषु प्रसङ्गेषु एकदा एकस्मिन् महति संस्कृतसम्मेलने महामहोपाध्याय श्री गिरिधरशर्मचतुर्वेदमहोदयानां भाषणमासीत्। तेषां भाषणं श्रुत्वा ममेयं प्रबला समीहा समजायत यत् अहमपि एतादृशं भाषणं दत्त्वा स्वजीवने संस्कृतप्रचारकार्यमेव करिष्यामि, नान्यत् किमपि। तद्दिनादेव छात्रावस्थायामेव च मया संस्कृत-प्रचारकार्यं प्रारब्धम्। अतोऽहं परमसम्माननीयान् श्रीचतुर्वेद-महोदयान् प्रेरणाप्रदान् मन्ये। पश्चात् तेषां मार्गदर्शनं, प्रोत्साहनं सहयोगश्चापि लभ्यते स्म। अनन्तरं मम अध्ययनकार्ये समाप्ते श्रीचतुर्वेदमहोदयाः अखिलभारतीयसंस्कृतसाहित्य-सम्मेलनस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्त्रिणः कार्यभारं वोढुं मां कथितवन्तः परं मम स्वतन्त्रतया एव प्रचारकार्यं कर्तुं संकल्पः आसीत् अतस्तेषामाज्ञापालने मया असमर्थता प्रकटीकृता। ततः श्रीकेदारनाथसारस्वत-महोदया इदं पदं स्वीकृतवन्तः तस्य निर्वाहं च सम्यक् प्रकारेण कृतवन्तः। अनन्तरं डॉ० मण्डनमिश्रमहोदया बहुवर्षपर्यन्तं सम्मेलनस्य महामन्त्रिणो भूत्वा सम्मेलनं समुन्नतेश्वरमं शिखरं प्रापितवन्तः।

दीव्यन्ति ता जयपुरस्थित-वेधशाला
नक्षत्र - राशि - गणना - गति - सूचयित्र्यः।
अद्याप्यहो प्रथमदृष्टिपथं गता या
विस्मापयन्ति बलवन्ननु मानसं मे॥ ७॥

यन्त्रादिसाहाय्येन ताराणां ग्रहाणां सूर्यस्य चन्द्रस्य च सूक्ष्मरूपेण निरीक्षणस्य तेषां स्थितेः परिज्ञानस्य च यत् कार्यं ज्योतिर्विद्भिर्विधीयते तद् वेध इति कथ्यते। इदं च कार्यं यस्मिन् स्थाने दूरदर्शनादिविविधयन्त्रमण्डिते विधीयते तद् "वेधशाला" कथ्यते। विश्वस्य विभिन्नेषु समुन्नतदेशेषु बहोः कालात् वेधशालानां निर्माणमारब्धम्, तद्द्वारा च आकाशमण्डलस्थितानां ज्योतिषां सम्यक् परिज्ञानं विधीयते। तथैव महाराजेन द्वितीय-जयसिंहेन च अष्टादशशताब्द्यां जयपुरे वेधशालाया निर्माणं कारितम्। तदेतत् जयपुरस्य आकर्षकेषु वस्तुषु सर्वाधिकमाकर्षणकेन्द्रं वर्तते। अत्र सर्वदैव एतद्विद्याव्यसनिनो विद्वांसः समागत्य अध्ययनमनुसन्धानञ्च कुर्वन्ति।

या शूरवीर-जननी धरणी धरित्र्या
या भारतीयजन-गौरवकीर्ति-गाथा।
या दिव्यदुर्गशतमण्डित-भूमिभागा
अद्यापि तां मरुभुवं भ्रमितुं समीहे॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धन्यो वरेण्य इतिहासविदां स राज-
स्थानाभिधो विजयते खलु देश एषः।
अद्यापि यस्य तरसा यशसा महिम्ना
राजन्वती भवति भारतभूमिरेषा॥ ९॥

माननीयाः श्रीमोतीलालशर्ममहोदयाः अध्यापनेन, प्रवचनेन, ग्रन्थप्रणयनेन च वैदिकज्ञानविज्ञानक्षेत्रे देशे विदेशेषु च परमां ख्यातिमलभन्त। एते विद्यावाचस्पतिश्रीमधुसूदनशर्मझामहोदयानां प्रधानशिष्या आसन्। यथा श्रीझामहोदयैः वैदिकज्ञानविज्ञानरहस्य-माश्रित्य अनेके ग्रन्था लिखितास्तथैव श्रीमोतीलालशर्ममहोदयैरपि वेदेषु उपनिषत्सु पुराणेषु च विद्यमानानां बहूनामज्ञातपूर्वाणां वैज्ञानिकतत्त्वानां समुद्घाटनं विधाय, भारतीयां संस्कृतिञ्च नूतनया दृशा व्याख्याय संस्कृतभाषायाः संस्कृतसाहित्यस्य संस्कृतसमाजस्य च सुमहद् गौरवं वर्द्धितम्। जयपुर-निवासकाले एकस्मिन् दिने श्रीमोतीलालशर्मणां गृहे द्वाभ्यामपि गुरुशिष्याभ्यां लिखितानां पुस्तकानां पाण्डुलिपीनां च बृहत्संभारं दृष्ट्वा मम महदाश्चर्यमजायत। एवमेव श्रीझामहोदयानां वरिष्ठशिष्यैः म०म० श्रीगिरिधरशर्म-चतुर्वेदमहोदयैरपि वैदिकज्ञान-विज्ञानविषये अनेके ग्रन्था लिखिताः, बहूनि भाषणानि प्रदत्तानि, बहवश्च आधुनिका विद्वांसः प्रभाविताः। वाराणसेयः पुरातत्त्वविद् विख्यातो विद्वान् डॉ० वासुदेवशरण-अग्रवालमहोदयोऽपि एतैः सर्वैः प्रभावितो वैदिकविज्ञानानुसन्धाने प्रावर्तत तत्प्रतिपादने च। अस्यामेव परम्परायां जयपुरनिवासिनो राजस्थानपत्रिकाया विख्याता यशस्विनः सम्पादकाः श्रीकर्पूरचन्द्र-कुलिशमहोदया अपि वैदिकविज्ञानस्य प्रचारे तत्सम्बन्धिनां ग्रन्थानां प्रकाशने निरन्तरं प्रवृत्ता वर्तन्ते। एवमहं वर्तमानसमये जयपुरनगरं वैदिकसाहित्यानुसन्धानस्य प्रधानं केन्द्रं प्रकाशस्तम्भं च मन्ये।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यच्च पुनर्नगरेऽस्मिन् महाराजासंस्कृतमहाविद्यालयः, आयुर्वेदमहाविद्यालयः, राजस्थान—संस्कृतअकादमी चेत्यादयोऽनेकाः सुप्रतिष्ठाः संस्था अपि प्रचलन्ति। 'संस्कृतरत्नाकरः', 'भारती' चेति द्वे पत्रिके अपि अत्र प्रकाश्येते। श्रीवृद्धिचन्द्रशास्त्रिणः, नारायण–शास्त्रिकांकरः, श्रीनवलकिशोरशर्मा कांकरश्चेत्यादयो बहवो विद्वांसः, लेखकाः, वक्तारः पत्राकाराश्चाप्यत्र पुरे विराजन्ते। एवं च सर्वमिदं दृष्ट्वा पुरमिदं सुरभारत्याः पुरमिव मे प्रतिभाति स्म।

डूंगरपुर—

अद्यापि डूंगरपुरस्थ–गणेशराम-
शर्म्माभिधं बुधमणिं सततं स्मरामि।
यल्लेखने कविकृतौ वचने प्रबन्धे
गीतौ सदा प्रवहति स्म सुधाप्रवाहः॥ १०॥

राजस्थानप्रदेशस्य डूंगरपुराख्ये नगरे (सिघाडा बाजार, घूँघटा गली) श्रीगणेशरामशर्म्माभिधाना विद्वांसोऽभूवन्। ते लेखकाः कवयो गीतकाराश्च आसन्। तेषामनन्यसाधारणं वैशिष्ट्यमिदमासीद् यत् तेषां स्वभावे, व्यवहारे, लेखेषु, कवितासु, गीतेषु, भाषणेषु, साक्षात्कारे च सर्वत्र सौन्दर्यस्य माधुर्यस्य च धारा प्रवहति स्म। तेषामक्षराणि च नितान्तमक्षिरमणीयानि भवन्ति स्म। राजस्थानभ्रमणकाले मया तेषां साक्षात्कारः कृतः परिचयश्च लब्धः। तदारभ्य तेषां स्मृतिः सदैव मम हृदयमान्दोलयति।

पुष्कर—

तत् पुष्करं प्रवरतीर्थमथैकमात्रं
तद् ब्रह्मणश्च खलु मन्दिरमद्वितीयम्।
यत्स्नान - दर्शन - परिक्रमणादि - सौख्यं
नाद्यापि विस्मरति लुब्धतरं मनो मे॥ ११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बीकानेर—

अद्यापि संस्कृत - सुधीजनशोभि बीका-
नेराभिधं पुरवरं सततं स्मरामि।
यत् स्वीयशैक्षिकगुणोन्नयनेन राज-
स्थाने पदं गुरुतरं नितरां बिभर्ति॥ १२॥

बीकानेरनगरं राजस्थानस्य एकं प्रमुखं प्रसिद्धं राजाश्रयेण सौभाग्यशालि च नगरं वर्तते। अत्र मया वारद्वयं यात्रा विहिता। प्रथमयात्रा स्वेच्छया संस्कृतप्रचारमुद्दिश्य विहिता असीत्। तस्मिन् संमये सौभाग्यवशादत्र द्वौ घनिष्ठौ मित्रप्रवरौ आस्ताम्। द्वावपि विद्वांसौ लेखकौ, वक्तारौ, संस्कृतसमाजे लोके च प्रसिद्धौ प्रतिष्ठितौ च। तयोराद्यः उत्तरप्रदेशान्तर्गत-देवरिया-मण्डलस्य निवासी, मम तीर्थ्यश्च आसीत्।

द्वितीयो मम सुहृत्प्रवरः श्रीविश्वनाथमिश्रः साहित्ये व्याकरणे च प्रौढपाण्डित्यं भजमानो बीकानेरे सुप्रतिष्ठितस्य ब्रह्मचर्याश्रमस्य प्रधानाचार्यपदमलङ्करोति स्म। अस्यैव परिवारे मम निवासः आसीत्। एतस्यैव सहयोगेन साहचर्य्येण च अहमत्र पब्लिकपार्क, संस्कृतविद्यापीठ, नागरीभण्डार, पञ्चमन्दिर, टीचर्सट्रेनिंगकालेज, महाविद्यालय इत्यादिस्थानेषु प्रचारं कृतवान्। अत्र १६-८-६८ दिनाङ्कात् २५-८-६८ पर्यन्तमहमासम् अस्मिन् नगरे मम द्वितीया यात्रा अरविन्दाश्रमस्य श्रीमातुः शतवर्षिकीप्रसङ्गे समायोजयिष्यमाणस्य सम्मेलनस्य मुख्यातिथिरूपेण जाता।

किञ्चैकमस्य नगरस्य विशेषभोज्यं
किं वर्णयामि भुजियेति जगत्प्रसिद्धम्।
अद्यापि यत् स्मरणतोऽपि ममान्तरङ्गं
स्फूर्तं च मे रसमयीं रसनां विधत्ते॥ १३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बीकानेरस्य भुजिया सम्पूर्णे देशे प्रसिद्धा वर्तते। कदाचित् विदेशेष्वपि एतस्या निर्यातो भवति। मया बीकानेरे अनेका विशाला भुजियानिर्माणशाला अवलोकिताः। प्रायः चायेन सह दिने अनेकवारं तस्या उपयोगः क्रियते स्म। तस्या अत्युग्रकटुतिक्तमयं स्वादं स्मृत्वा अद्यापि मे शरीरं गनगनायते रसना च रसमयी जायते।

श्वानं निहत्य न गतिः सुभगेति बीका-
नेरस्थितैः पुरजनैः परिपालितानि।
अद्यापि तानि भवने भवने स्थितानि
बुक्कन्ति कुक्कुरकुलानि न विस्मृतानि॥ १४॥

संस्कृतप्रचारेण सह बीकानेरस्य एकं मनोरञ्जकं वृत्तमपि मम स्मृतिपथमेति। एकदा श्रीविश्वनाथमिश्रप्रभृतयः अनेके विद्वांसः अहं च सायंकाले एकस्मिन् समारोहे भागं ग्रहीतुं गताः। अस्माकं भोजनस्य व्यवस्था तत्रैव आसीदिति आगमने विलम्बो जातः। ततो दशवादने यदा वयं प्रस्थितास्तदा मार्गे एकस्य गृहस्य समीपे उपविष्टा दश-पञ्चदश कुक्कुराः मां दृष्ट्वा बुक्कितुं प्रारब्धवन्तः पृष्ठपतिना भ्राजिताः। ततो मया विदुषः प्रति कथितम्—कथं न एते समीपस्थ-गृहस्थिता जना एतान् कुक्कुरान् न ताडयन्ति पलाययन्ति वा तदा नैरुक्तम्—अत्रत्यानां जनानामियं धारणा अस्ति यत् कुक्कुराणां ताडने महान् दोषो भवति, गतिश्च शोभना न भवति, अतः अत्र कुक्कुराः पाल्यन्ते, पोष्यन्ते, लाल्यन्ते, न तु ताड्यन्ते।

अद्यापि तन्मरुभुवो भवनेषु दृष्ट्वा
भूयोऽवगाह-गत-सञ्चितवारि गेहम्।
श्रीकालिदासकविता स्मृतिमेति सा मे
ग्रीष्मर्तुवर्णनपरा नितरां यथार्था॥ १५॥

छात्रावस्थायां ब्यावरगरनिवासकाले राजस्थाने जोधपुर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जयपुर-अजमेर – प्रभृतिषु नगरेषु भ्रमणस्य मया अनेकधा आनन्दप्रदोऽवसरः सम्प्राप्तः। तत्र इदं दृष्टं मया यद् ग्रीष्मकाले तापाधिक्यात् जलस्याल्पतायां दैनिककार्यसञ्चालनार्थं गृहे गृहे महतो महत्सु कुण्डेषु जलसञ्चयः क्रियते। यदा कदा निरन्तरं स्नाने उपयुज्यमानत्वात् स सञ्चयोऽपि क्षीयते, समाप्तिं च गच्छति। इमां स्थितिं दृष्ट्वा कालिदासेन ऋतुसंहारे वर्णितस्य ग्रीष्मकालस्य प्रथमः श्लोकः मम सदैव जिह्वाग्रे उपतिष्ठते स्म। स च श्लोकः अयमस्ति अधस्तनः—

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदाऽवगाह–क्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये॥ १.१॥

मन्ये, महाकविना कालिदासेन राजस्थानस्यैव इमां स्थितिं मनसि निधाय इदं विशेषणपदं प्रयुक्तं स्यात्।

अद्यापि तं सरस–सौम्यतर–स्वभावं
श्रीभट्टदेवकविवर्यमहं स्मरामि।
यस्यातिनूतन - कवित्वकला - विशेषो
देशे ससर्ज रुचिरां सरणिं नवीनाम्॥ १६॥

राजस्थानीयजयपुरनिवासिनः कविकुलमौलिमुकुटायमानाः विद्वद्वरेण्याः श्रीभट्टमथुरानाथशास्त्रिमहोदयाः पद्येऽस्मिन् चर्चिताः सन्ति। एभिः सह साक्षात्कारो मम अत्रैव वाराणस्यां समायोजिते अखिल-भारतीय-संस्कृतसाहित्यसम्मेलने सञ्जातः, परिचयो लब्धो गाढतरं सौहार्दं च अजायत। एभिर्विविधान् विषयानवलम्ब्य कवित्त-घनाक्षरी – सवैया – दोहा – चौपाई – छप्पय – कुण्डलियाप्रभृतिषु हिन्दीच्छन्दस्सु, विविधेषु गजलच्छन्दःसु, ठुमरी – दादरा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लावनीप्रभृतिषु प्रादेशिकगीतिच्छन्दस्सु निबद्धानां च अत्यन्त-सरस-मधुर ललितकवितानां "साहित्यवैभवम्" नाम्ना एकः सार्द्धषट्शत-पृष्ठात्मको महान् ग्रन्थो लिखितः प्रकाशितश्च। पुस्तके कवितासु वर्णितविषयानुसारीणि त्रयस्त्रिंशत् चित्राण्यपि प्रकाशितानि। सम्पूर्णे संस्कृतसाहित्ये इयमद्वितीया कृतिर्वर्तते। साहित्यरसिकैः पण्डितैरेषा रचना यथाकथञ्चिदपि अवश्यमवलोकनीया इति मे साग्रहं निवेदनम्। गोरखपुरनिवासिभिः श्री श्रीनिवासशर्मवैद्यवर्य्यैः प्रदत्ता अस्य पुस्तकस्य एका प्रतिः मदीये संस्थाने सुरक्षिता वर्तते। एतदनिरिक्त-मेतादृशमेव "गोविन्दवैभवम्" जयपुरवैभवम् इति नाम्ना अपरमपि श्रीभट्टमहोदयानां रचनाद्वयं वर्तते।

भट्टमहोदयानामिमा अपूर्वाः कृतयः संस्कृतकाव्यरचनायां नवयुगस्य प्रवर्तनमकार्षुरिति निस्सन्देहं वक्तुं शक्यते।

अद्यापि ता मरुभुवो महिला अनेका
दृष्टा मदीयहृदि विस्मयमावहन्ति।
श्रोणीतटेऽतिविकटेऽपि न याः कदाचित्
यक्षप्रियेव गमनेष्वलसा अभूवन्॥ १७॥

ब्यावर—

अद्यापि बाल्यसमये मरुभूप्रसिद्धे
तद् - ब्यावरेतिनगरे पठता मयाऽदौ।
दृष्टानि जैनमुनि-केशविलुञ्चनानि
रोमाञ्चयन्ति जनयन्ति मतिभ्रमं च॥ १८॥

ऊर्ध्वं सुतप्तघनलौहमिवोद्वमन्तीं
ज्वालामधश्च सिकताऽग्निकणान् किरन्तीम्।
स्मृत्वा निदाध-मरुभूमिमसह्यतापा-
मद्यापि तप्तमिव नैजमवैमि देहम्॥ १९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि तन्मरुभुवि प्रखरे निदाघे
सूर्ये तपत्यतिशयं भ्रमता समन्तात्।
ग्रन्थेषु या तु पठिता मृगतृष्णिका सा
साक्षात्कृता भ्रमयतीव मनः स्मृता मे॥ २०॥

अस्मादृशैः सर्वैरपि संस्कृतसाहित्याध्येतृभिः विविध-ग्रन्थेषु मृगतृष्णाशब्दः पठ्यते तदर्थश्च ज्ञायते परं तस्याः कीदृशं स्वरूपं भवतीति तत् राजस्थाने ग्रीष्मकाले भ्रमणेनैव साक्षात्कर्तुं शक्यते। तन्मया राजस्थानप्रदेशे बसयानद्वारा भ्रमणकाले, रेलयानद्वारा यात्रासमये च सम्यगनुभूतम्। तदानीं गगनं नृत्यदिव भाति स्म।

अद्यापि तान् जयपुरीय-मनीषि-मोती-
लालाख्यवेदविदुषो बहुधा स्मरामि।
येषां निगूढ-बहुविस्तृत-वेदभाष्याऽ
टव्यां मुदा बहुबुधाः सुचिरं भ्रमन्ति॥ २१॥

अद्यापि बाल्यसमयस्य सुहृद्वरेण्यं
श्रीचन्द्रशेखरमहं सततं स्मरामि।
यस्यावलोक्य द्रुतभाषणशक्तिमग्र्यां
जातेर्ष्यया ननु ममापि तथैव शक्तिः॥ २२॥

एते एव पश्चात् जगन्नाथपुर्य्यां गोवर्धनपीठाधीश्वरा जाताः।

"ब्यावर" नगरनिवासकालेऽहं तत्रत्यसनातनधर्महाईस्कूल-स्याभ्यन्तरे सञ्चाल्यमाने संस्कृतविद्यालये कनिष्ठकक्षायामधीयान आसम्। तस्मिन्नेव च विद्यालये वरिष्ठकक्षायामेको गुर्जरप्रदेशीय-श्छात्रोऽपि अध्ययनं करोति स्म। स अत्यन्तं सुयोग्यो मेधावी प्रतिभावान् संस्कृतसंभाषणे च नितान्तं पटीयान् आसीत्। स आत्मनो वाक्पटुतया वाचालतया च सर्वानपि, लघून् बृहतो वा छात्रान् पराभवन्निव, वने सिंह इव च गर्जन् तिष्ठति स्म। तस्य एतादृशीं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वातिशायिनीं स्थितिं प्रवृत्तिं च दृष्ट्वा मम हृदये महती ईर्ष्या समजायत। ततो मया त्रिचतुरमासाभ्यन्तर एव तादृशीं योग्यतां लब्ध्वा तं पराभवितुं तत्समानतां वा कर्तुं संकल्पः कृतः। तदारभ्य अहं कठोरं परिश्रमं कर्तुमारब्धवान्। सर्वविधानां सर्वेषामपि सुबन्त-तिङन्त-कृदन्तरूपाणां कण्ठस्थीकरणे अहोरात्रमेकीकृत्य प्रावर्तिषम्। ततो मया तादृशीं योग्यतां सम्पाद्य तेन सह तथैव वक्तुं स्पर्धितुं च प्रारब्धं, तेन च मम महती प्रसन्नता जाता। परं शास्त्रीयज्ञाने तु स तदापि मदपेक्षया वरिष्ठ एवासीत्। अयमेव च महानुभावो निजेन पाण्डित्येन जयपुरे महाराजा-संस्कृतमहाविद्यालयस्य प्रधानाचार्यपदे प्रतिष्ठितः, तदनन्तरं च पुर्यां गोवर्द्धनपीठस्य शङ्कराचार्यपदे प्रतिष्ठितः, परमं गौरवं प्रतिष्ठां च प्राप्तवान्।

एतस्यैव वाक्पटुत्वहेतोर्मयि ईर्ष्या उत्पन्ना, ततश्चाहमपि ईर्ष्याहेतोर्वाक्पटुः जातः। संस्कृतभाषणस्य च मम तस्मिन्नेव काले समीचीना गतिः जाता। अत्राहं तेषामेव आधमर्ण्यं स्वीकरोमि, कृतज्ञतामावहामि, भूयो भूयश्च तेषां स्मरणं करोमि।

अद्यापि तं दिवसमेकमभूतपूर्वं
काले गतेऽपि बहुले सततं स्मरामि।
सम्पूर्णराष्ट्रजनतामहितो महात्मा
गान्धी यदा प्रथमदृष्टिगतोऽभवन्मे॥ २३॥

ब्यावरनगरे निवसतो मम जीवने तद् दिनं सर्वाधिकमहत्त्वपूर्णं सर्वाधिकसौभाग्यमयञ्च आसीद् यदाहं भारतीयस्वातन्त्र्यसंग्रामस्य सेनापतेर्महात्मनो गान्धिमहोदयस्य प्रथमदर्शनमकरवं तथा तदीय-भाषणश्रवणस्य प्रथमं शुभावसरं लब्धवान्। यद्यपि तदानीमहं द्वादशवर्षीय एवासम्, देशकालपरिथितेः स्वातन्त्र्यसंग्रामस्य च गतिविधीनां नितरां न्यूनमेव ज्ञानमासीत् तथापि तेषां भाषणेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपदेशेन च प्रभावितो भूत्वाहं तदानीमेव संकल्पत्रयं गृहीतवान्—एकं खादीवस्त्रधारणस्य, द्वितीयं स्पर्शास्पर्शपरम्परायाः परित्यागस्य, तृतीयं च देशसेवायाः। देशसेवाकृते धनार्जनं परित्यज्य निःस्वार्थरूपेण संस्कृत-भाषायाः प्रचारमेव कर्तुं मया निश्चयो विहितो यः खलु अद्यावधि निराबाधं प्रचलति। परन्तु मम जीवने आडम्बरहीनता, संकल्पपालने दृढता, सर्वैः सह मैत्रीभावः, उच्चनीचभावनायाः परित्यागः, अस्पृश्यैरपि सह बन्धुभावश्चेत्यादयो ये केचन सद्विचारा अद्यापि मयि किञ्चिदलक्ष्यन्ते ते सर्वेऽपि महात्मनां दर्शनस्य गान्धीवादस्य च प्रचारस्यैव फलानि आसन्, साम्प्रतमपि च वर्तन्ते। वेदाचार्यपरीक्षाया अन्तिमे वर्षे यन्मया अध्ययनं परित्यक्तं तत्रापि महात्मनां स्वतन्त्रता-आन्दोलनमेव प्रधानं कारणमासीत्।

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १७ :

बङ्गप्रदेशीयानि संस्मरणानि

कलकत्ता—

अद्याप्यसौ वसति मे हृदि मित्र-बद्री-
नारायणो झँवरवंशमणिः सदैव।
यः केवलं न मम देहहिताय, किन्तु
संस्थाहिताय च बहूनकरोत् प्रयासान्॥ १॥

कलकत्तानिवासी श्रीबद्रीनारायणझँवरमहोदयो मम अङ्गुलि-गणनीयेषु हितचिन्तकेषु सहायकेषु च अन्यतम आसीत्। अनेन सह परिचयस्य प्रगाढसम्बन्धस्य च इतिवृत्तं निम्नाङ्कितं वर्तते।

श्रीबद्रीनारायणमहोदयस्य कनिष्ठभ्राता श्रीसोहनलालझँवर-महोदयः एम.ए. संस्कृतविद्वान् अस्ति। एकदा सम भ्रमणप्रसङ्गेन वाराणसीमागतो मम संस्थानमपि समागतः। तदानीमहं यक्ष्मरोगेण पीडितः औषधार्थं क्वचिद् गतवान् आसम्। तदानीं च औषधसेवने ३००रूप्यकाणां मासिको व्ययो भवति स्म। तदेतत् सर्वं ज्ञात्वा चिन्तान्वितो दुःखितश्च श्रीसोहनलालमहोदयः कलकत्तां गत्वा स्वज्येष्ठभ्रात्रे सर्वमिदं सूचितवान् मम च औषधसेवनाय आरोग्य-लाभाय च प्रतिमासं शतत्रयं प्रेषयितुं निवेदितवान्। श्रीबद्रीनारायण-झँवरमहोदयेन सह मम कश्चन परिचयः सम्बन्धो वा नाऽसीत्। आवयोः नाम्नाऽपि परिचयो नासीत्। तथापि स्वकनिष्ठभ्रातृद्वारा मम परिचयं ज्ञात्वा मम संस्थानस्य च कार्यकलापं श्रुत्वा श्रद्धया उपकारभावनया च प्रतिमासं शतत्रयं प्रेषयितुं प्रारब्धवान्। अनन्तर-मारोग्यलाभे जाते अकारणकरुणार्द्रहृदयं श्रीझँवरमहोदयं द्रष्टुं मे बलवती इच्छा जाता, निवेदिता च मया सेयमिच्छा श्रीझँवरमहोदयाय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः श्रीझँवरमहोदयेन पत्रद्वारा सहर्षमहं कलकत्तायात्रायै निमन्त्रितः। ततोऽहं शुभमुहूर्ते वारणसीतो देहरादूनएक्सप्रेसयानेन सायं चतुर्वादने प्रस्थितः प्रातश्च नववादने हबड़ास्टेशनं सम्प्राप्तः। तदानीं श्रीझँवरमहोदया मां नेतुं स्टेशनं सम्प्राप्ता आसन्। परन्तु आवयोः कदाचित् साक्षात्कारो नासीत्। तत्कथमहं तं परिचिनुयां स वा मां परिचिनुयात्? विषमा समस्या आसीत्। परन्तु मम झँवरमहोदयस्य च अन्तरात्मनः प्रगाढस्नेहवशात् काकतालीयन्यायेन परस्परं साम्मुख्ये ज़ाते परिप्रश्नेन परिचये ज्ञाते ममापि तस्य च महत् संकट़मपगतम्, महती च प्रसन्नता जाता। ततस्ते मां स्वकारयानेन स्वनिवासस्थानं नीतवन्तः सर्वविधां चं मत्सुविधोचितां व्यवस्थां कृतवन्तः। अनन्तरं विस्तृतरूपेण संस्थाविषयिणी वार्ता अजायत। शनैः शनैश्च प्रगाढः सम्बन्धो जातः। महती प्रीतिश्च आवयोः समवर्धत।

इयं मम कलकत्तायाः तृतीया यात्रा आसीत् या ६.१२.६२ दिनाङ्के प्रारब्धा। इतः परमपि पञ्चवारं मम कलकत्तायात्रा अभूत्। आसु सर्वास्वपि यात्रासु मम निवासः श्रीझँवरमहोदयानामेव गृहे परिवारे च भवति स्म तथा सर्वास्वपि यात्रासु श्रीझँवरमहोदयाः मम संस्थानस्य निमित्तं भवनक्रयणस्य कृते, पुस्तकप्रकाशनस्य च कृते द्रव्यसंग्रहाय मां गृहीत्वा बहूनां धनाधिपानां निकटे गच्छन्ति स्म, कुशलतया प्रभावकारिरूपेण च मम पक्षमुपस्थापयन्ति स्म तथा द्रव्यसंग्रहं कुर्वन्ति स्म। अस्मिन् प्रसङ्गे तैः विभिन्नसमये ये ये संस्कृतप्रणयिनो धनपतयः प्रार्थितास्तेषां नामानि अधस्तनानि सन्ति—

श्री बिड़ला, भर्तृहरिजी सिंहानिया, श्रीसीतारामजी सेक्सरिया, श्रीरामकुमारजी भुवालका, श्रीभागीरथजी कानोडिया. श्रीनथमलजी भुवालका, श्रीनागरमलजी पेडीवाल,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराधाकिशनजी कानोडिया, श्रीयुगलकिशोर जी माहेश्वरी; तथा श्री किशोरीलालजी टंटनिया।

अद्यापि सा प्रथमजा मम कालिकात्ता-
यात्रा न विस्मृतिमिता बहुविस्मृताऽपि।
यस्यामहं प्रथमवासर एव वास-
प्राप्त्यै महाविकटसंकटमन्वभूवम्॥ २॥

प्रथमबङ्ग्यात्रायामहं अयोध्यातः प्रस्थाय ८.९.५८ दिनाङ्के कलिकात्तायाः सुविख्यातं हबड़ा शकटस्थानं दिने द्विवादने प्राप्तवान्। तत्र अल्पाहारग्रहणानन्तरमहं कुलीजनमेकमादाय पादाभ्यामेव गंगातटस्थितमेकं मन्दिरं गन्तुं प्रस्थितः। तस्मिन्नेव मन्दिरे मम निवासाय व्यवस्थां कर्तुं तन्मन्दिरव्यवस्थापकाय एकं पत्रं दत्तमासीत् अयोध्यावासिना मदीयेन एकेन साधुमित्रेण। तत्पत्रं लब्ध्वा अहं तत्र निवासविषये पूर्णविश्वस्त आसम्। परन्तु मन्दिरं प्राप्य तदभ्यन्तरे च प्रविश्य यदाहं प्रबन्धकाय तत्पत्रं प्रदत्तवान् तदा तेन मिथ्या आश्चर्यमभिनीय प्रोक्तम्—"अरे, इदं पत्रं केन दत्तम्? एनन्तु अहं जानाम्येव न! केनापि प्रतारितो भवान्" इति। तस्येदमुत्तरं श्रुत्वा अहं सविनयमुक्तवान्—"महाराज! भवितुमर्हति इदम्। परन्तु इदानीमहं कुत्र गमिष्यामि सायंकाले? अतः अद्य रात्रौ निवासाय स्थानं दीयताम्? पुनरहं श्वः दिने स्थानान्तरमन्वेषयिष्यामि।" परन्तु बहुधा मया अनुनये कृतेऽपि स्थानं दातुं स न स्वीकृतवान्। एवं वृत्ते, तस्मिन् समये मम घोरा चिन्ता समजायत। सूर्ये अस्तं गच्छति, तमसि च प्रसर्पति, अपरिचिते स्थाने कुत्र गच्छेयमिति चिन्तयन् गत्यन्तराभावात् ततो वस्तूनि गृहीत्वा तेनैव कुलीजनेन सह शनैः शनैः पादनिक्षेपं कुर्वन् अग्रे गन्तुं प्रवृत्तः। ततो दैवयोगात् किञ्चिद्दूरमेव गते मयि एकमन्यत् मन्दिरं प्राप्तं यस्य संस्कृतज्ञेन प्रबन्धकेन तस्मिन्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समये न केवलं मम निवासस्य अपितु सुस्वादुभोजनस्यापि व्यवस्था कृता, यथेच्छं निवासाय च आश्वासनं प्रदत्तम्। इयं मम प्रथम-बङ्गयात्रायाः प्रथमदिनस्य घटना वर्तते। तस्मिन् दिने मम या अकस्माद् अभूतपूर्वा चिन्ता समुत्पन्ना तस्याः कदापि विस्मरणं न जायते। मन्दिर-प्रबन्धकश्च कश्चन त्रिपाठिमहोदयः सदा मम हृदये विराजते।

आलोक्य संस्कृतकलानिलयं, विचिन्त्य
तत्स्थापनं तदितिवृत्तचयं च सर्वम्।
अद्यापि मे मनसि घूर्णति देवभाषा-
सम्बन्धितो बृटिश - हिन्दु - विचारभेदः॥ ३॥

कलिकातायाः "संस्कृतकालेज" नामकं सुप्रतिष्ठितं संस्कृतविद्याकेन्द्रं मम पूर्वत एव सम्यग् विदितमासीत्। अतः कलिकातायाः प्रथमयात्रामहं सर्वप्रथमं तदेव महता औत्सुक्येन द्रष्टुं गतवान्। ततः कालेजं, तस्य पुस्तकालयं, तस्य प्रकाशनानि, तस्य तरुलताकुसुम-मण्डितं परिसरं च समवलोक्य तथा तदानीन्तनान् तत्रत्यान् विदुषश्च मिलित्वा महान्तं प्रमोदमन्वभवम्। परन्तु अस्य महतः प्रतिष्ठानस्य प्रारम्भकालीनमितिहासं ज्ञात्वा किञ्चिदाश्चर्यमपि अन्वभूवम्। स च एवंविधो वर्तते—

१८५७ तमे खृष्टाब्दे यत् पलासीयुद्धं जातं ततः परं प्रायेण सार्द्धशताब्दीपर्यन्तं युद्धव्यापृता ईस्ट इण्डिया कम्पनी केवलं भारते स्वशासनस्य व्यवस्थायां तथायातादार्ढ्यसम्पादने एव व्यस्ता आसीत्। देशस्य शिक्षादिविषयेषु तया दृष्टिपातो न विहितः। परं शनैः शनैः राज्यव्यवस्थायां सुव्यवस्थितायां बृटिशशासनेन कोलब्रुक्प्रभृतीनां केषाञ्चिद् भारतहितचिन्तकानां बृटिश - अधिकारिणामनुरोधेन भारतीयानां शिक्षाविषयेऽपि ध्यानं दातुमारब्धम्। तत्फलस्वरूपं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१८२४ तमस्य खृष्टाब्दस्य पञ्चविंशे फरवरीदिनाङ्के संस्कृतकालेजस्य शिलान्यासो महता समारोहेण सह सम्पन्नः। एतद्भवननिर्माणार्थं च शासनेन एकलक्षं विंशतिसहस्ररूप्यकाणि च स्वीकृतानि।

एतत्कालेजस्य स्थापना बृटिशशासनेन केवलं वेद-व्याकरण-साहित्यादि-भारतीय-विद्यानामेव अध्यापनार्थं संरक्षणार्थं च विहिता येन भारतीयाः प्रसन्नाः सन्तुष्टाश्च भवेयुः। अन्यथा आङ्गलभाषायाः पाश्चात्त्यशिक्षावर्तिनामाधुनिकविषयाणां च शिक्षणेन तत्प्रचारेण च कदाचित् भारतीयविद्यानुरागिणां मनसि बृटिशशासनं प्रति दुर्भावना भवितुमर्हतीति आशंकया तैः संस्कृतकालेजस्य पाठ्यविषयेषु आधुनिकविषयाणां सन्निवेशो न विहितः। परन्तु राजाराममोहनराय-महोदयस्य मते बृटिशशासनस्य इदं कार्यं भारतीयानां कृते हितसाधकं नासीत्। ते भारतीयानां हितसाधनाय तेषां कृते तानेव विषयान् आवश्यकान् मन्यन्ते स्म ये पाश्चात्त्यशिक्षालयेषु पाठ्यन्ते। तेषामेतदपि दृढं मतमासीद् यत् संस्कृतभाषा नितान्तं कठिना अस्ति। अतः तस्याः पूर्णज्ञानार्थमेव सम्पूर्णमायुरपेक्षितं भवति। तस्यां भाषायां ये विषयाः भवन्ति शास्त्राणि वा वर्तन्ते तेषामपि वर्तमानयुगे कापि उपयोगिता नास्ति। अतः श्रीराजाराममहोदयेन बृटिशशासनस्य शिक्षासमितिं प्रति स्वकीयः विचारः प्रेषितः तथा संस्कृतकालेजे प्रस्तावितस्य भारतीयविद्यानामध्यापनस्य प्रबलो विरोधो विहितः। परन्तु बृटिशशिक्षासमित्या तेषां विरोधस्य उपेक्षां कृत्वा भारतीय-विद्यानामपि महत्ता आवश्यकता च स्वीकृता। मया यदा इदं सर्वमितिवृत्तं विस्तरेण पठितं तदा मन्मनसि कदाचिद् बृटिशपक्षः रोचते स्म कदाचिच्च श्रीरायस्य मतं समुचितं प्रतिभाति स्म। पुनश्च बृटिशजनद्वारा संस्कृतस्य पक्षपातः, भारतीयद्वारा च संस्कृतस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरोधः इदमपि एकं विस्मयकरं वृत्तमासीत्। एवं च अयं सर्वोऽपि प्रसङ्गस्तदानीं मम मस्तके सदैव घूर्णते स्म चक्रवच्च भ्रमति स्म। संस्कृतकालेजस्य स्थापनायाः सञ्चालनस्य च प्रसङ्गोऽयं नितान्तं रोचको वर्तते। एतस्य सर्वस्यापि इतिवृत्तस्य सविस्तरपरिज्ञानाय जिज्ञासुभिः निम्नलिखिता ग्रन्था नूनमवलोकनीयाः—

१–कलिकाता संस्कृत कालेजेर इतिहास, भागद्वयम् (बंगला) ले. श्री व्रजेन्द्रनाथ वन्द्योपाध्याय, प्र.–संस्कृतकालेज, कलकत्ता

२–भारतीय संस्कृतिर उत्तराधिकार– (बंगला) ले. डॉ० ध्यानेश नारायण चक्रवर्ती, कलकत्ता, मू० २५.००

३–Linguistic and Educatonal Aspirations under a colonial System, by-नरेन्द्रकुमार शर्मा, दिल्ली–मू० ६०.००

अद्यापि भो मम गता क्व नु सा उपानत्?
आस्तां, गता यदि गता, स्थविराऽपि साऽसीत्।
आयङ्गरेति विदितस्य गिरं सहास्या-
मेतामनन्तशयनस्य सदा स्मरामि॥ ४॥

१.७.६७ दिनाङ्के कलिकातानगरे समायोजिते अ.भा. संस्कृत-साहित्यसम्मेलनस्य वार्षिकाधिवेशनेऽहं सम्मिलित आसम्। नगरानुरूपमेव समृद्धतमरूपेण अधिवेशनं सुसम्पन्नं सफलं च सञ्जातम्। अत्रैकं मनोरञ्जकं वृत्तमिदं जातम्। अधिवेशनस्याध्यक्षा बिहारप्रदेशस्य राज्यपालाः श्री अनन्तशयनम् आयङ्गारमहोदयाः सभाया अवसाने यदा सभाभवनात् बहिरागतास्तदा तेषामुपानत् केनापि अपहृता वा विनष्टा वा। तदा तेषां रक्षका यदा तदन्वेषणं कुर्वन्ति स्म, तैर्मां प्रति सहास्यमुक्तम्—"अयि भोः, त्यज्यताम्, यदि गता, गच्छतु। सा नवीनाऽपि नासीत्, वृद्धा आसीत्"! इदं श्रुत्वा सर्वे जनाः साट्टहासं हसितवन्तः। क्षणं महान् विनोदो जातः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि तस्य हबडास्थितदिव्यसेतोः
शिल्पीयकौशलकलां सततं स्मरामि।
यत्कारु-चारु-रचना जगतोऽद्वितीया
कं दर्शकं न पुरुषं चकितं करोति॥ ५॥

कलंकत्तानगरस्य हुगली नद्या उपरि निर्मितः हबड़ा-स्टेशनसमीपवर्ती सेतुः (हबड़ा का पुल) विश्वे शिल्पकलाया एकं परमाद्भुतं निदर्शनमस्ति। हबड़ास्टेशनतो दूरादेव यदा यात्रिणां सेतुरयं सर्वप्रथमं दृष्टिगोचरीभवति तदा सर्वे यात्रिणः किमिदम् इति आश्चर्यचकिता भवन्ति। अस्य सेतोरधस्तात् स्तम्भा न भवन्ति। केवलं नद्याः द्वयोः पार्श्वयोः यन्त्रयोगेन बलादाकृष्टस्तिष्ठति। आधारस्तम्भाभावेऽपि निर्माणकौशलेन तस्य नद्यां पतनस्य भीतिर्नास्ति। किं बहुना, विश्वस्य इमां चमत्कारमयीं शिल्पकलां द्रष्टुं कलानुरागिभिरेकदा कलकत्ताया यात्रा अवश्यं करणीया एव।

अद्यापि विश्रुत - रवीन्द्रसरोवराख्ये
स्थाने रवीन्द्रकवितारसपानगोष्ठ्याम्।
बङ्गीयमञ्जुकविता विविधाः श्रुता या
ताः संस्मृता बहु मनः परिरञ्जयन्ति॥ ६॥

१६.११.८६तः १८.१२.८६ पर्यन्तं मम कलिकातानिवासकाले एकदा रवीन्द्रसरोवराख्ये स्थाने समायोजितायां रवीन्द्रमेलायां गमनस्य मया अत्यन्तमाह्लादकोऽवसरः सम्प्राप्तः। मेलायां सर्वसाधारणोपयोगिवस्तु-क्रयविक्रयातिरिक्तं वैशिष्ट्यमिदमासीत् यत् तत्र बंगलाकवितापाठस्य बङ्गीयसङ्गीतस्य रवीन्द्रसङ्गीतस्य च सुबृहदायोजनं विहितमासीत्। मम पूर्वत एव बङ्गभाषायाः, तत्कवितानां, तद्गीतानां च परिज्ञानमासीत्, रवीन्द्रसाहित्यमपि मयाऽधीतमासीत् परं कवितापाठस्य गीतगानस्य च यादृशी शैली;

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यादृशः स्वरः, यादृशः भावभङ्गिमा मया तत्रावलोकितः श्रुतश्च स मत्कृते सर्वथा अपूर्व एवासीदिति मया तत् सर्वदैव संस्मर्यते।

अद्यापि तानि मदयन्ति मनः स्मृतानि
सम्पूर्णभारतमही - बहुचर्चितानि।
रागादिमुक्तमनसामपि मोहनानि
शश्वन्मृदूनि वदने रसगोलकानि॥ ७॥

रसगुल्लानामकं मिष्टान्नं भारते सम्प्रति सर्वत्रैव लभ्यते परन्तु तस्य यादृशं प्राधान्यं, बाहुल्यं, सौलभ्यं च बङ्गप्रदेशे वर्तते तथा अन्यत्र नास्ति। मिष्टान्नेषु इदं यथा मुखे निक्षेपमात्रेण अनायासमेव उदरगतं भवति न तथा अन्यत् किमपि मिष्टान्नम्। एकदा आन्ध्रप्रदेशस्य सिकन्दराबादनगरे सरल-संस्कृतप्रचार-समितेरधिवेशनं समायोजितमासीत्। तत्र मुख्यातिथिरूपेण भाषमाणः तत्रत्यः शिक्षासचिवः कथितवान्—"संस्कृतं सरलं वर्तते, तथापि तादृशं सरलं नास्ति यथा कलिकातायाः रसगुल्ला भवति" यद् अनायासेनैव उदरस्थं कर्तुं शक्यते। परं संस्कृते परिश्रमस्यावश्यकता भवति।

बङ्गेषु एवं श्रुतं मया—बङ्गीयाः अधिकं मधुरं भुञ्जते अतएव ते विशिष्टा विद्वांसो भवन्ति।

अद्यापि तस्य हबड़ाशकटालयस्य
स्मृत्वैव सम्भ्रममुपैमि बृहत्स्वरूपम्।
यः सर्वदैव प्रचलत् - प्रवदत् - प्रधावत्-
खादत् - पिबत् - व्रजदनन्तजनैरुपेतः॥ ८॥

कलकत्तानगरस्य हबड़ाशकटालयः (स्टेशन) भारतस्य कतिपयेषु बृहत्तमेषु शकटालयेषु अन्यतमो वर्तते। अत्रागत्य तस्य अपर-संसारमिव अपरिमित-जनसंकुलं स्वरूपं दृष्ट्वा महान् विस्मयो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवति। प्रचलन्तः प्रवदन्तः प्रधावन्तः, खादन्तः, पिबन्तः, व्रजन्तश्च सहस्राधिका जना दृश्यन्ते। विभिन्नशकटेभ्यः अवतरतां विभिन्नशकटांश्च आरोहतां जनानां महान् सम्मर्दः अवतरणस्थले (प्लैटफार्म) गमनागमनं बलवद् बाधते। क्षणमात्रमपि कालः तिलमात्रमपि च स्थलं जनै रिक्तं न दृश्यते। एवं च स्थानमिदं सर्वेषां कृते नूनं विस्मयावहं भवति।

पाके नृशंसयवनैर्भृशमाहतानां
हिन्दू-युव-स्थविर-बालक-योषितानाम् ।
दृश्यं व्यलोकि अधिस्यालदहं मया यत्
अद्यापि तत्स्मृतिगतं विधुनोति चेतः॥ ९॥

मम कलकत्तानिवासकाल एव भारत-पाकिस्तानयोर्विभाजनं जातमासीत्। स्वतन्त्ररूपेण पाकिस्तानस्य घोषणासमकालमेव तत्रत्यैर्मुस्लिमजनैस्तत्रत्या हिन्दवः स्वकीयां सर्वामपि भूमि-भवन-धन-संपत्तिं परित्यज्य पलायनार्थं यवनैः यथा मारिताः ताडिताः उत्पीडिताः दण्डिताः खण्डिताः प्रक्षिप्ताः तत्सर्वं भारतीयेतिहासस्य एका भीषणतमा घटना आसीत्। अस्मिन्नेव क्रमे तादृशान् जनान् आदाय पाकिस्तानात् यदा कानिचित् शकटानि कलकत्तानगरस्य स्यालदहस्टेशनमागतानि तदा शकटस्थानां हिन्दूनरनारीणां बालकबालिकानां च आर्तस्वरं श्रुत्वा तेषां दुर्दशां च दृष्ट्वा तत्रस्थानां जनानां हृदये यादृशी पीडा यादृशी च प्रतीकारभावना समजायत सा वर्णयितुं न शक्यते। संयोगवशादहमपि तत्र उपस्थितो यादृशं दृश्यमपश्यं तत् अद्यापि स्मृतं सद् वपुः रोमाञ्चितं करोति।

तारकेश्वर—

स्वप्ने मिलिष्यति हरिर्मम कार्यसिद्धि-
र्नूनं भविष्यति हृदीति विचिन्तयन्तः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि तारकमठस्थित-भक्तलोकाः
स्वप्नप्रतीक्षणपरा नहि विस्मृता मे॥ १०॥

कलकत्तासमीपवर्तिनः तारकेश्वरनगरस्य सुप्रसिद्धे मठे समायोजिते बङ्गीयसारस्वतसमाजस्य वार्षिकाधिवेशने सम्मिलितुं २.९.५८ दिनाङ्के अहं तारकेश्वरमठं सम्प्राप्तः। अधिवेशने बङ्गीयविदुषां, सभापति—श्रीकालीपदतर्काचार्यमहोदयानां च भाषणं श्रुत्वा स्वयं चापि भाषित्वा मठसमीपवर्तिनि तारकेश्वरमन्दिरे दर्शनार्थमहं सायंकाले गतवान्। तस्य मन्दिरस्य विषये इयं प्रसिद्धिरासीद् यत् तत्र गतानां भक्तानां शयनकाले स्वप्ने भगवान् दर्शनं ददाति, तेषां मनोरथं च पूरयति। अनेन विश्वासेन बहवो भक्तजनास्तत्र गच्छन्ति तथा दिने च रात्रौ च स्वप्नस्य प्रतीक्षायां सदा शयाना एव तिष्ठन्ति। तत्र तथाविधान् स्त्रीपुरुषान् दृष्ट्वा मम महान् विस्मयो जातः। दृश्यं च तद् विस्मृतिं न गच्छति।

अद्यापि शैलशिखरेन्द्रसमं कवीन्द्रं
नित्यं स्मरामि जगतो जनमद्वितीयम्।
यन्निर्गता ननु पुनन्ति जगत् समस्तं
साहित्य - संस्कृति - कवित्व - कलाप्रवाहाः॥ ११॥

नवद्वीप—

अद्यापि मत्स्मृतिगतं प्रथितं नवद्वी-
पाख्यं पुरं निखिलबङ्ग-शिरःकिरीटम्।
यद् भूतले सुविदितं नवतर्कविद्या-
चैतन्यभक्तिमतयोः खलु सिद्धपीठम्॥ १२॥

बङ्गेषु नवद्वीपं संस्कृतविद्यायाः विशेषतो नव्यन्यायशास्त्रस्य सुप्रसिद्धं शिक्षणकेन्द्रं वर्तते। एतद्विषये विशेषपरिज्ञानाय निम्नलिखिता ग्रन्था द्रष्टव्याः—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१. नवद्वीपमहिमा (बंगला) ले. कान्तिचन्द्रराढी।

२. नवद्वीपे संस्कृत चर्चार इतिहास (बंगला) ले. गोपेन्दुभूषण सांख्यतीर्थ।

एवमेव वैष्णवधर्मस्य विशेषतः महाप्रभु-चैतन्यदेवप्रवर्ति-तस्य भक्तिसङ्गीत-प्रधानस्य वैष्णवधर्मस्यापि इदं प्रधानं स्थानं वर्तते। वस्तुतस्तु अस्मिन् स्थाने तर्कशास्त्रम्, काव्यकला, तन्त्रशास्त्रम्, श्रीकृष्णभक्तिश्चेति चत्वारोऽपि विषयाः कालक्रमेण पूर्णतां गता आसन्। यथा नवद्वीपस्य विद्वन्मौलिमणिना श्रीरघुनाथशिरोमणिना साटोपमुक्तम्—

तर्केषु कर्कशधियो वयमेव नान्ये
काव्येषु कोमलधियो वयमेव नान्ये।
तन्त्रेषु यन्त्रितधियो वयमेव नान्ये
कृष्णेषु संयतधियो वयमेव नान्ये॥

नवद्वीपमहिमा (बंगला पृष्ठ. १४०)

अस्मिन्नगरेऽहं तारकेश्वरमठे समायोजितस्य बङ्गीय-सारस्वत-समाजस्य वार्षिकोत्सवे भागं गृहीत्वा २१.९.५९ दिनाङ्के महता औत्सुक्येन श्रद्धया सह संप्राप्तः। तत्र एकं रेक्सायानं गृहीत्वा विद्वद्वरश्रीगोपेन्दुभूषणतर्कतीर्थमहाशयस्य गृहमन्वेषयितुं प्रवृत्तः। गृहे अलभ्यमाने मया रेक्साचालकः प्रोक्तः—"*भाई, पता लगाओ, वह घर कहाँ है?*" तदा रेक्साचालकः किञ्चित् कुपितो भूत्वा बङ्गभाषया प्रोक्तवान्—"*आपनी अनुसन्धान करुन, आमि जानि ना*" इति। तस्य अनुसन्धानशब्दं श्रुत्वा मम आश्चर्यमभूत्। परं बङ्गीया मुस्लिमजना अपि एतादृशान् बहून् संस्कृतशब्दान् प्रयुञ्जते। एतादृशः खलु बङ्गेषु वाग्व्यापारः प्रचलति। ततः परं श्री तर्करत्नमहाशयाः मिलिताः। तैः मम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निवासाय भोजनाय च तत्रत्ये संस्कृतमहाविद्यालये व्यवस्था कृता। सर्वोऽपि मम आयासो व्यपगतः। तदानीं तत्र षोडश छात्रा न्यायशास्त्रस्य अध्ययनं कुर्वन्ति स्म। तैश्छात्रैः सह तथा तर्करत्नमहोदयैः सह संस्कृतचर्चायां तथा संस्कृतविद्वद्भिः सह मधुरालापैश्च भूयानानन्दमयः समयो व्यतीतः। एतन्मध्ये २३.९.१९ दिनाङ्के श्रीतर्करत्नमहोदयैः बङ्गविबुध-जननीसभाया माध्यमेन नवद्वीप-निवासिनां संस्कृतविदुषां संस्कृतप्रणयिनाञ्च एका सभा समायोजिता यस्यां संस्कृतप्रचार-सम्बन्धिषु विषयेषु बहूना विदुषां भाषणन्यभूवन्।

अस्मिन् पुरे खलु पुरा वसतां बुधानां
या याः कथा बहुविधाः पठिताः श्रुता वा।
अद्यापि ताः स्मृतिगता हृदयं मदीयं
विस्मापयन्ति बहुधा च तुदन्ति चापि॥ १३॥

विषयेऽस्मिन् "नवद्वीप महिमा" पुस्तकं पठनीयम्।

भावातिरेकवश - विह्वलित - स्वराणि
चेतोहराणि गलदश्रुविलोचनानि।
अद्यापि बङ्ग - वनिताजन - कीर्तनानि
आर्द्रे दृशौ विदधति स्मृतिमागतानि॥ १४॥

धार्मिके बङ्गीयसमाजे, तत्रापि महिलासु, विशेषतश्च विधवासु कीर्तनभजनादीनां गानस्य विशेषप्रचारो दृश्यते। एतादृशान्यनुष्ठानानि मठ-मन्दिरेषु प्रायः प्रतिदिनमेव सायं प्रातः प्रचलन्ति। भक्तिभाव-भरितानि, करुणारसार्द्राणि हृदयद्रावकाणि च तानि कीर्तनानि श्रुत्वा यः कोऽपि जनो विह्वलो भवति। ममापि च तानि कीर्तनानि स्मारं स्मारं, तासां महिलानां भावमुग्धानि मुखमण्डलानि च ध्यायं ध्यायं अद्यापि हृदयं द्रवीभूतं जायते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि तत्पुरनिवासिनि साधुवर्गे
चैतन्यभक्तिरसिकेऽप्यथ भक्तवृन्दे।
या नम्रता सरलता च परा व्यलोकि
अद्यापि मां किमपि शिक्षयति स्मृता सा॥ १५॥

नवद्वीपे वैष्णवसाधूनां महाप्रभुचैतन्यदेवभक्तानां च वैष्णवानां बहवो मठा मन्दिरणि लघूनि च वृहन्ति च विद्यन्ते। एतेषु मया पर्यायेण प्रतिदिनं प्रातः सायं च दर्शनार्थं, साधुभिः सह मिलनार्थं च गम्यते स्म, कञ्चित् कालं विरम्यते स्म, वार्तालापादिना प्रसादग्रहणेन च कश्चित् समयो नीयते स्म। अस्मिन् प्रसङ्गे तत्रत्येषु साधुजनेषु भक्तेषु च यादृशी विनम्रता, सरलता च मया दृष्टा तादृशी अन्यत्र कुत्रापि न दृष्टा। ते अत्यन्तं मधुरां वाणीं वदन्ति स्म, अत्यन्तं नतेन शिरसा प्रणमन्ति स्म, अत्यन्तं विनम्रतया द्वारपर्यन्तं प्रापयन्ति स्म तथा अत्यन्तं मृदुलया वाचा "पुनराय आसबेन" (पुनरपि आगन्तव्यम्) इत्युक्त्वा प्रणम्य बद्धाञ्जलयश्च भूत्वा विसर्जयन्ति स्म।

पुराणेषु भक्तिग्रन्थेषु च वैष्णवानां यत् स्वरूपं वर्णितमस्ति तत् नवद्वीपस्यैव वैष्णवेषु, विशेषतः चैतन्यभक्तेषु च साक्षादवलोकितम्। तेभ्यो मयापि कापि विनम्रतायाः शिक्षा गृहीता। शास्त्रोक्तानि कानिचिद् आदर्शवैष्णवलक्षणान्यत्र लिख्यन्ते—

विमलमतिरमत्सरः प्रशान्तः
शुचिचरितोऽखिलसत्त्व - मित्रभूतः ।
परहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः॥

विष्णुपुराण. ३.७.२४

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥
भगवद्गीता. १२.१३-१४

श्रीकालिदासकवि - संस्कृतवाक्प्रसङ्गे
श्रीमद्रवीन्द्रकवि - कीर्तित - चारुचर्चाम् ।
अद्यापि बङ्गधरणीभ्रमणे श्रुतां तां
संस्मृत्य वाङ्मयसुखं द्विगुणं लभेऽहम्॥ १६॥

बङ्गेषु भ्रमणकाले सभासम्मेलनादिषु विद्वद्गोष्ठीषु वा संस्कृतवाङ्मयस्य वैशिष्ट्य-प्रतिपादनप्रसङ्गे कालिदासस्य रचनानां, तदभिलक्ष्य कवीन्द्ररवीन्द्रनाथठाकुरद्वारा लिखितानामालोचनानाञ्च सर्वत्र चर्चा श्रूयते स्म। एतेन मम द्विगुणितो लाभो भवति स्म। एकस्तु कालिदास-रचनानामश्रुतपूर्वस्य अकल्पितपूर्वस्य च लालित्यस्य परिज्ञानम्। द्वितीयश्च साहित्यसम्राजा श्रीठाकुरेण सुललित-सरस-संस्कृतबहुल-बङ्गभाषया लिखितानां गूढ-कोमल-हृदयस्पर्शि-भावसम्भृतानां विवेचनानामनुशीलनम्। कालिदास-कृतीनामेकैकं श्लोकमेकैकं शब्दं च परिगृह्य श्री ठाकुरमहाशयेन या नवा नवा भावसृष्टिः कृता तस्याः परिज्ञानाय निम्नलिखिता ग्रन्था अवलोकनीयाः।

१. रवीन्द्रनाथ ओ संस्कृतसाहित्य (बंगला) ले. कल्याणी शंकर घटक, वर्धमान विश्वविद्यालय वर्धमान, मूल्यम्-३०.००

२. रवीन्द्रकाव्ये कालिदासेर प्रभाव (बंगला)

३. प्राचीन साहित्यं (बंगला) ले. रवीन्द्रनाथ ठाकुर, शान्तिनिकेतन्।

अद्यापि हृद्यतममोहकभावरम्या
दैव्या गिरो मृदुपदावलिकोमलाङ्गी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सङ्गीत - सान्द्र - मधुरध्वनिमुद्गिरन्ती
बङ्गीयवाक् सततमेव मुदं प्रसूते॥ १७॥

बङ्गभाषाया एतादृशवैशिष्ट्यस्य "जनगणमन" तथा "वन्देमातरम्" इति गीतद्वयेन वयं सर्वेऽपि सदैव अनुभवं कुर्मः। इदानीं रवीन्द्रनाथठाकुरस्य ईदृशमेव एकं गद्यमवलोक्यतां यत् "केकाध्वनि" इति शीर्षकेण लिखितस्य ललितनिबन्धस्य लघीयान् अंशः अस्ति। यथा—

"नववर्षागमे गिरिपादमूले लताजटिल-महारण्येर मध्ये ये मत्तता उपस्थित हय, केकारव ताहारि गान। आषाढे श्यामायमान तमालताली वनेर द्विगुणतर घनायित्त अन्धकारे मातृस्तन्यपिपासु ऊर्ध्वबाहु शत-सहस्र शिशुर मतो अगण्य शाखा-प्रशाखार आन्दोलित मर्ममुखर महोल्लासेर मध्ये रहिया रहिया केका तारस्वरे ये एकटि कांस्ये क्रेङ्कारध्वनि उत्थित करे, ताहाते प्रवीण वनस्पति मण्डलीर मध्ये अरण्यमहोत्सवे प्राण जागिया उठे।" सञ्चिता।

एताद्दृश-ललित-मधुर-सरसानां बङ्गभाषाया हृद्यानां गद्यपद्यानां पाठेन मया छात्रावस्थायामेव सुमहानानन्दोऽनुभूतः- बङ्गभाषामधीत्य अन्येऽपि संस्कृतज्ञा ईदृशमान्दमनुभवन्तु इति मे हार्दिकी आकाङ्क्षा।

अद्यापि मुस्लिमजना अबुधा बुधा वा
सर्वेऽपि संस्कृतबुधैरभिनन्दनीयाः।
येषां वचस्सु रचनासु च भाषणेषु
न क्वापि संस्कृतगिरं प्रति भेदबुद्धिः॥ १८॥

"सर्वेऽपि मुस्लिमजनाः स्वकीयाम् उर्दूभाषामेव सर्वथा समाद्रियन्ते न तु संस्कृतभाषां प्रति तेषां कश्चन समादरभावः संस्कृतशब्दानां प्रयोगो वा क्वचिद् दृश्यते" इति वर्तते बहूनां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिन्दुजनानां हिन्दीप्रदेशवासिनां पण्डितानां वा चिरन्तनी धारणा। परन्तु बङ्गप्रदेशे एतद्विपरीतं सर्वेऽपि मुस्लिम-लेखकाः कवयश्च बङ्गभाषया सह प्रभूतमात्रायां संस्कृतशब्दानां, सन्धिसमासयुक्तानां शब्दानां, सुबंन्ततिङन्तपदानां, संस्कृतभाषाया उक्तीनां च प्रयोगं कुर्वन्ति स्वकीयरचनःसु भाषणेषु चेति मया बहुशः श्रुतं दृष्टं पठितञ्च। अत्र तादृशानि कानिचिदुदाहरणानि विभिन्नग्रन्थेभ्यः प्रदीयन्ते—

१. सैयद मुजतवा आली विरचिते पञ्चतन्त्राख्ये बङ्गला पुस्तके—

रोषे-क्रोधे, गर्जन-तर्जने, मृदुशान्त नूपुर-झङ्करण, अंधेर हस्तीदर्शनेर न्याय, अथ च, पश्य पश्य, कपर्दकहीन, इत्यादि।

२. "पूर्वपाकिस्तानेर प्रबन्धसंग्रह" पुस्तके लेखक-विषय-सूची—

लेखक	*विषय*
आवू अहसान	साहित्ये साम्प्रदायिकता
एस.एम.रहमान	साम्प्रदायिकता ओ संस्कृति
बदरुद्दीन उमर	बांगाली संस्कृतिर संकट
अबुल फजल	संस्कृति आमादेर उत्तराधिकार
काजी मो. हुसेन	साहित्ये व्यक्तित्व इत्यादि

३. सुप्रसिद्ध कवि नजरुल इस्लाममहोदयस्य काश्चन पंक्तयः—

उत्थान आमि पतन आमि अचेतन-चिते चेतन,
विश्व-तोरणे वैजयन्ती मानव-विजय-केतन।

× × ×

दुर्गम गिरि, कान्तार-मरु, दुस्तर पारावार,
लंघिते हवे रात्रि-निशीथे, यात्रीरा हुँसियारा
(सञ्चिता)

अद्यापि बङ्ग - धरणी - नयनाभिरामा
ग्रामाः स्मृता मम मनो बहु नन्दयन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वल्ली - प्रसून - कदलीफल - पुष्कराद्यै -
र्ये सर्व एव ललितोपवनीभवन्ति॥ १९॥

कश्चन जनः कस्या अपि दिशो बङ्गप्रदेशं प्रविशतु, तत्र प्रथमग्राम एव अन्य-पार्श्ववर्तिप्रदेशीयग्रामेभ्यः काचन अपूर्वैव रमणीयता दृष्टिगोचरीभवति। प्रत्येकं ग्रामे एका पुष्करिणी भवति, यत्र ग्रामवासिनां पात्रमार्जन - वस्त्रप्रक्षालन - स्नानादिकर्माणि सौविध्येन सम्पाद्यन्ते। सर्वेषां च गृहे गृहे कदलीफ़लानि बहुलतया उपलभ्यन्ते। सर्वे च गृहा विविधैः पुष्पैः लताप्रतानैश्च सर्वतः सुशोभिता भवन्ति। एवं च सर्वोऽपि ग्रामः उद्यानमिव नितान्तं रमणीयः प्रतिभाति। इदं मया तत्रत्यग्रामेषु भ्रमणद्वारा साक्षादनुभूतम्। कलकत्तानिवासकाले एकदा डॉ० ध्यानेशनारायण चक्रवर्तिमहोदयानाम् "ऋषिधाम" नामकं ग्राममहं गतवान्। अन्यदा च भाटपाडानामकं ग्रामं गतवान्। संस्कृते भद्रपल्ली-नामकमिदं स्थानं २४ परगनामण्डलान्तर्गतं कलिकातातो नातिदूर-वर्ति बहूनां विख्यातविदुषां जन्मभूमिरस्ति। एकदा हुगली-मण्डलान्तर्गते चूचुडास्थानेऽपि संस्कृतसम्मेलनमुद्दिश्य गमनस्य मया शुभावसरो लब्धः। एतादृशेष्ववसरेषु भ्रमणप्रसङ्गे बङ्गीय-ग्रामाणां रमणीयतां दृष्ट्वा मम महान् प्रमोदः संजायते स्म।

अद्यापि बङ्गविदुषामिममेकमात्रं
स्मृत्वा प्रमादमनिशं ज्वलतीव चेतः।
यत्कारणादमितहिन्दुजनोपमर्दी
'काला पहाड़' उदितो यवनो नृशंसः॥ २०॥

एवं श्रूयते पूर्वबङ्गप्रदेशे कश्चन ब्राह्मण आसीद् यः पश्चाद् यवनो बभूव। अनन्तरं स पुनरपि ब्राह्मणो भवितुमैच्छत् परं स तदानीन्तनैः ब्राह्मणैः पण्डितैश्च नाङ्गीकृतः। ततः स कुपितो भूत्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भयंकररूपेण हिन्दूनां हिन्दूनरपतीनां, हिन्दूमन्दिराणां च विध्वंसं कृतवान्। परं यदि स हिन्दुभिः पण्डितैश्च स्वसमाजे गृहीतः अभविष्यत् तदा बङ्गप्रदेशस्य इयती गतिर्न अगमिष्यत्। एतादृशी एव घटना कश्मीरेष्वपि अजायत। एतत् सर्वमपि तदानीन्तनानां हिन्दूनां पण्डितानाञ्च मतिभ्रमस्य फलं वर्तते। अदूरदर्शितायाश्च।

अद्यापि बङ्गधरणी - पुरुषाङ्गनानां
हृद्यानि रम्यमधुराणि सुकोमलानि।
नामानि यानि पठितानि तथा श्रुतानि
चेतो मदीयमनिशं परिरंजयन्ति॥ २१॥

भारतस्य विभिन्नप्रदेशवासिनां सर्वेषामपि स्त्रीपुरुषाणां नामानि भवन्त्येव परं बङ्गप्रदेशवासिनां यादृशानि सुन्दराणि सुकोमलानि विशिष्टभावव्यञ्जकानि च नामानि भवन्ति न तथा अन्यप्रदेश-वासिनाम्। तादृशेषु नामसु यानि मम अधिकं प्रियाणि भवन्ति तानि कानिचित् अधस्तान्निर्दिश्यन्ते—वारिदवरण घोष, नीहाररंजन राय, शिशिरकुमार, हिमांशुभूषण भट्टाचार्य, अर्धेन्दुशेखर, कुमुदरंजन मल्लिक, सुधांशुकुमार हालदार, वृन्दावन चन्द्र, मनोरंजन शास्त्री, नलिनीकान्त, गोपिकामोहन भट्टाचार्य, चपलाकान्त भट्टाचार्य इत्यादि।

अद्यापि बङ्गभुवि मुस्लिमगायकेभ्यः
श्रीकृष्णभक्तिमय - गीतचयाननेकान्।
श्रुत्वा मदीयहृदि मुस्लिमहिन्दुमध्ये
सम्भावनाऽभ्युदयते सहयोगितायाः॥ २२॥

बङ्गभुवि भ्रमणकाले यत्र तत्र मया मुस्लिमगायकानां, विशेषतो भिक्षुकगायकानां मुखात् कृष्णभक्तिगीतानां श्रवणस्यापि अनेके अवसरा लब्धाः। यदि तादृशगीतानां समाजे विपुलः प्रचारः स्यात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तर्हि हिन्दुमुस्लिमसमाजे परस्परं सद्भावनाया वातावरणं निर्मितं भवितुमर्हति। कृष्णभक्त-मुस्लिमकवीनां विषये विशेषपरिज्ञानाय निम्नाङ्कितौ ग्रन्थौ अवलोकनीयौ प्रचारणीयौ च।

१-कृष्णभक्त मुसलमान कवि, ले०-डा० नूरजहाँ बेगम, प्र. जवाहर पुस्तकालय, सदर बाजार, मथुरा, मूल्यम्-५५.००

२-हिन्दी के मुसलमान कवियों का कृष्णकाव्य, ले०-डा० साधना निर्मय, प्र० साहित्यभवन प्रा०लि०के०पी०कक्कड रोड, इलाहाबाद, मूल्यम्-५५.००

अद्यापि काजि नजरुल इस्लामनाम्ना
ख्यातं कवीन्द्रमधिकं वृणुते मनो मे।
यो मुस्लिमोऽपि रचनासु निजासु हिन्दू-
देवान् तथा तदुपमाश्च उदाजहार॥ २३॥

कलकत्तानिवासी काजी नजरुल इस्लामनामकः क्रान्तिकारी कविः बङ्गेषु काव्यरचनावैशिष्ट्येन नितरां ख्यातिमापन्नः काव्यकर्तृषु महनीयतमं स्थानं भजते। कवीन्द्ररवीन्द्रनाथठाकुरस्य कवितानां रसास्वादनेन सह अस्यापि बङ्गीयरचनानां रसास्वादनस्य प्रवृत्तिर्मे बहोः कालात्पूर्वमेव संजाता। अस्य रचनासु इदमेकं वैशिष्ट्यं वर्तते यदयं मुस्लिमकविर्भूत्वापि हिन्दूदेवीदेवानां नाम्नां, गुणानां, स्वभावस्य, प्राशस्त्यस्य वा उल्लेखं करोति। अस्य कवेरेतस्याः प्रवृत्तेः कतिचिन्निदर्शनानि अधस्तात् प्रदर्श्यन्ते।

अनेन अनेकानि गीतानि गीतकाव्यानि च निर्मितानि। तेषु "अग्निवीणा, विषेर वांशी, सञ्चिता" इति त्रीण्येव पुस्तकानि मया पठितानि। अतः एतेभ्य एव कानिचिद् उद्धरणानि दीयन्ते—

१-मम ललाटे रुद्रभगवान ज्वले.......

२-महाप्रलयेर आमि नटराज..........

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३–आमि पिनाकपाणिर डमरु त्रिशूल.........
४–आमि छिन्नमस्ता चण्डी.........
५–आमि परशुरामेर कठोर कुठार........
६–अमि विद्रोही भृगु........
७–हर हर शंकर हर व्योम.........
८–गाहउद्गाता ऋत्विक्गान, अग्निमन्त्रशक्ति श्रीर.......
९–देश–द्रौपदीर वस्त्र हरते पारल ना दुःशासन–चोर।
१०–कोथा हय नाग–नाशी जनमेजय याग.....

ग्रन्थत्रय नाना पृष्ठ.

तद् विस्तृतं खलु पुरातनपुस्तकानां
प्राप्तिस्थलं प्रियतमं नहि विस्मृतं मे।
अद्यापि यत्र गमनाय मदीयचेत्तो
लालायितं भवति भूरि समुत्सुकं च॥ २४॥

कलकत्तानगरस्य मध्यभागे कालेजस्ट्रीट नामकमेकं स्थानं वर्तते यत्र मार्गस्य उभयपार्श्वे पुरातनपुस्तकानां सुविस्तृते स्वच्छे परिसरे पुस्तकानां शताधिका विपणयः पंक्तिबद्धरूपेण सुसज्जितरूपेण च विलसन्ति। अत्र सुदुर्लभानि बङ्गभाषापुस्तकानि बङ्गलिप्यां मुद्रितानि संस्कृतपुस्तकानि च प्रचुरमात्रायां लभ्यन्ते। वङ्गलिप्यां मुद्रितं "शब्दकल्पद्रुम" कोशस्य भागद्वयं मया अत्र अष्टादशरूप्यकैरेव प्राप्तं यदिदानीं सप्तसहस्त्ररूप्यकैरपि न लभ्यते। पुनश्च अस्य स्थानस्य इदमपि एकं वैशिष्ट्यं भवति यदत्र अत्यन्तं जीर्णशीर्णान्यपि पुस्तकानि एकेन सुन्दरेण पत्रावरणेन आवृत्य तदुपरि च कलात्मकरूपेण पुस्तकानां नामानि विलिख्य विपणेरग्रे उपस्थाप्यन्ते। तानि बलाद् दर्शकानां लोचनानि चेतांसि च हरन्ति।

बम्बई, मद्रास, हैदराबाद, अहमदाबाद, पूना, दिल्ली, प्रभृतिषु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नगरेष्वपि पुरातन-पुस्तक-विक्रयस्थानानि भवन्ति। तान्यपि सर्वाणि मया अवलोकितानि परं यादृशी सज्जा, सौष्ठवं, बहुलता, रमणीयता कलकत्तायां दृष्टा न तादृशी अन्यत्र कुत्रापि। इदं बङ्गीयानां विद्यानुरागं पुस्तकप्रियततां च प्रमाणीकरोति।

बङ्गभाषायाम् आंग्लभाषायां च बङ्गीयसंस्कृतसाहित्येतिहास-विषये बहूनि पुस्तकानि प्रकाशितानि विद्यन्ते। तेषु मया परिज्ञातानां केषाञ्चित् पुस्तकानां नामानि अधस्तात् निर्दिश्यन्ते।

१-संस्कृतसाहित्ये बांगालीर दान (बंगला) ले० सुरेश चन्द्रवन्द्योपाध्याय, प्रकाशक-संस्कृतपुस्तकभण्डार, विधान सरणि, कलकत्ता, मूल्यम्-२५.००

२-प्राचीन भारतीय साहित्य ओ बांगाली उत्तराधिकार (बंगला) ले० जाह्नवीकुमार चक्रवर्ती, प्रकाशक डी० एम० लाइब्रेरी विधानसरणि, कलकत्ता, मूल्यम्-२५.००

३-Bengal's Contribution to Sanskrit Grammar, ले०-कालीचरण शास्त्री, प्रकाशक संस्कृत कालेज कलकत्ता,

मूल्यम्-२०.००

४-बंगीय संस्कृत अध्यापक जीवनी (बंगला) ले०-श्रीहेमचन्द्र भट्टाचार्य, सिद्धान्त विद्यालय, ४६, देवलेन, कलकत्ता, ३८४ पृष्ठात्मकेऽस्मिन् ग्रन्थे एतावतामेव विदुषां जीवनी प्रकाशिता वर्तते।

५-बंगीय महामहोपाध्याय जीवनी, ले०-श्रीहेमचन्द्र भट्टाचार्य, प्रकाशक-प्रगति प्रकाशनी, विधान सरणि, कलकत्ता,

मूल्यम्-१२.००

पुस्तकेऽस्मिन् ६९ महामहोपाध्यायानां जीवनचरितानि विद्यन्ते।

Bengal's Contribution to Sanskrit Literture.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ले०–कालीकुमार दत्त शास्त्री, प्रकाशक–संस्कृत कालेज, कलकत्ता, मूल्यम्–१२.००

शान्तिनिकेतन—

अद्यापि बङ्गभुवि शान्तिनिकेतनाख्यं
स्थानं स्मरामि ननु सार्थकनाम नित्यम्।
यस्मिन् मया त्रिचतुराणि दिनान्युषित्वा
सार्थोऽन्वभावि सकलः खलु शान्तिपाठः॥ २५॥

शान्तिनिकेतने निवसता मया तत्रत्येषु सर्वेषु प्राध्यापकेषु, छात्रेषु, बालक–बालिकासु, अधिकारिषु, कर्मचारिषु च सर्वदैव शान्तिः संयमः सौम्यभावश्च अवलोकितः। तेन शान्तिनिकेतनमिति नाम सर्वथा सार्थकमनुभूतम्। वैदिकः शान्तिपाठश्च तत्र न केवलं वचसि प्रत्युत व्यवहारेऽपि साक्षात्कृतः। इदमस्य स्थानस्य वैशिष्ट्यमासीत्।

बङ्गप्रदेशगत – शान्तिनिकेतनं तत्
अद्यापि पुण्यतरतीर्थमहं नु मन्ये।
प्राच्यः प्रतीच्य इति यत्र उभौ तरङ्गौ
सङ्गेऽनुमिल्य वहतो जगतो हिताय॥ २६॥

अद्यापि मन्मनसि शान्तिनिकेतनस्य
सत्रादिमे शुभदिने समुदीरितानि।
प्राच्यप्रतीच्य – मतिविभ्रम – भञ्जनानि
मन्त्रोपमानि वचनानि सदा स्फुरन्ति॥ २७॥

शान्तिनिकेतने प्रतिवर्षं सत्रारम्भकाले कानिचित् उद्देश्यरूपाणि अस्याः संस्थायाः संकल्पवाक्यानि निगद्यन्ते यानि मम दृष्टौ आर्षवचनोपमानि मन्त्रोपमानि च प्रभावोत्पादकानि भवन्ति स्म। सर्वेषां परिज्ञानाय तानि सत्रारम्भवाक्यानि अधस्तादुल्लिख्यन्ते—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"अथेयं विश्वभारती। यत्र विश्वं भवति एकनीडम्। प्रयोजनमस्याः समासतो व्याख्यास्यामः। एष नः प्रत्ययः। सत्यं ह्येकम्। पन्थाः पुत्रस्य नैकः। विचित्रैरेव हि पथिभिः पुरुषा नैकदेशवासिन एकं तीर्थमुपापसर्पन्ति इति ह विज्ञायते। प्राची प्रतीची चेति द्वे धारे विद्यायाः। द्वाभ्यामप्येताभ्यामुपलब्धव्यमैक्यं सत्यस्याखिललोकाश्रयभूतस्य इति नः संकल्पः।

एतस्यैवैक्यस्य उपलब्धिः परमो लाभः, परमा शान्तिः परमञ्च कल्याणं पुरुषस्य इति हि वयं विजानीमः।

सेयमुपासनीया नो विश्वभारती विविधदेशग्रथिताभिर्विचित्रविद्या-कुसुममालिकाभिरितिचैव प्राच्याः प्रतीच्याश्चेति सर्वेऽप्युपासकाः सादरमाहूयन्ते। तदिदमनुज्ञायताम्, तदिदमनुमन्यताम्, तदिदमनुष्ठीयताम्।

इदमस्माभिरनुज्ञायते, इदमस्माभिरनुभूयते, इदञ्च वयमनुतिष्ठामो यावच्छक्यं यथाज्ञानं च। तदिदमृध्यताम्, तदिदं समृध्यताम्।"

—विश्वभारतीनियमावलीतः

अस्मिन् युगे सुरगिरो विदुषां नु वेषो
किं प्राक्तनो भवतु वाऽधुनिकोऽथ मान्यः।
अस्मिन् नवीनविषये चलितो विवादो
नाद्यापि मत्स्मरणतोऽपगतो न शान्तः॥ २८॥

शान्तिनिकेतननिवासकाले एकदा डॉ० सिद्धेश्वरभट्टाचार्यमहोदयानामाध्यक्ष्ये एका संस्कृतविषयिणी सभा समनुष्ठीयत। तत्र अन्यविषयैः सह अयमप्येको विषयः समुत्थापितः केनापि विदुषा यत् आधुनिकानां संस्कृतपण्डितानां संस्कृतप्रोफेसराणां च कीदृशो वेषः स्याद् येन पण्डितानामाधुनिकता तथा अंग्रेजीविद्यालया-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यापकानां संस्कृतज्ञता परिचीयेत। यतः संस्कृतपण्डितेषु केवलं प्राचीनता, नवीनाध्यापकेषु च केवलं सर्वथाऽधुनिकता तयोः साङ्गत्ये, सहयोगे, सहकार्यकर्तृत्वे, सहभोजनपानादिषु च बहु बाधिका भवति। विषयेऽस्मिन् बहुभिर्बहु भाषितं, परं कुत्रापि सहमतिर्न जाता।

बङ्गप्रदेशप्रशस्तिः—

साहित्य - संस्कृति - समर्चन पुण्यशालां
संगीत-नृत्य-नटशास्त्र-कलैकभूमिम् ।
श्रीरामकृष्ण - अरविन्द - विवेक - राजा -
जन्मस्थलीं वरदबङ्गमहं नमामि॥ २९॥

यद्-भाषया विरचितं द्वयमद्वितीयं
राष्ट्रीयगीतमतिरम्यतरं समेषाम्।
राष्ट्रीयभावभरितं हृदयं विधत्ते
सा बङ्गपुण्यधरणी सततं प्रणम्या॥ ३०॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १८ :

हरियाणाप्रदेशीयानि संस्मरणानि

अम्बाला—

एतत्प्रदेशमहितं कमनीयमम्बा-
लाख्यं पुरं प्रियतमं मम सर्वदैव।
यत्र स्थितस्य मम ते विविधा विशेषा
अद्यापि मत्स्मृतिगता जनयन्ति मोदम्॥ १॥

चण्डीगढ़निवासकाले मया तत्रैव स्थित्वा ततो विभिन्नेषु नगरेषु भ्रमणं प्रचारकार्यं च विधीयते स्म। अस्मिन्नेव प्रसङ्गे चण्डीगढ़तो मया एकदा अम्बालानगरस्यापि यात्रा विहिता। इदं नगरं हरयाणा-प्रदेशस्य एकं मुख्यतमं दर्शनीयं स्थानं वर्तते रमणीयं च। अस्मिन् नगरे एकः सर्वसाधनसम्पन्नो बृहति परिसरे च स्थितः सनातनधर्म-संस्कृतमहाविद्यालयो वर्तते यत्राहं त्रिचतुराणि दिनानि सानन्दं स्थितः प्रचारकार्यं च कृतवान्। एतन्निकट एव एकः सुविशालः सनातन-धर्मकालेजोऽपि विद्यते। इदमपि स्थानं धर्मस्य सर्वविधशिक्षायाश्च प्रधानं केन्द्रं वर्तते। एतदतिरिक्तं नगरस्यास्य सुविख्यातं सुप्रतिष्ठितं च शिक्षाकेन्द्रं वर्तते डी०ए०वी० कालेज इति। अत्रत्यं वातावरणं संस्कृतमयं दृष्ट्वा मम महदाश्चर्यमभूत्। परं तस्य कारणमिदमासीद् यत्तत्रत्यः प्रधानाचार्यः संस्कृतस्य संस्कृत-व्यवहारस्य च महान् पक्षधरः आसीत्। अतस्तत्रत्या भूयांसः शिक्षकाः छात्राश्च संस्कृतेनापि किञ्चिद् व्यवहरन्ति स्म। अपरञ्च अत्र पण्डितमदनमोहन-मालवीयमहोदयैः धर्मप्रचारार्थं प्रतिष्ठापितो विशालकाय एकः सनातनधर्मपुस्तकालयोऽपि वर्तते यत् धर्मसंस्कृतिचर्चाया एकं प्रमुखं केन्द्रं वर्तते। परं तत्र स्थाने स्वच्छतायाः पुस्तकानां सुरक्षायाश्च शोभना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यवस्था नासीदिति दृष्ट्वा मम कष्टमभूत्। पुनश्च नगरमिदं भारतीयसेनाया अपि एकं विशालं महत्त्वपूर्णं च केन्द्रमस्ति। अस्य विशाले, स्वच्छतमे, रमणीये च परिसरे एकं मनोहरं मन्दिरमपि मया दृष्टम्। परं श्लोकानां स्तोत्राणां च शिक्षणाय कापि उत्तमा व्यवस्था नासीत्। अस्य चर्चायां जातायां तत्रत्येन श्रेष्ठाधिकारिणा अनुरुद्धः सन् कांश्चित् सुशिक्षितान् सैनिकानहं कानिचित् स्तोत्राणि शिक्षितवान्। अत्र अनेके भोजपुरीभाषिणः अपि सैनिका आसन्। तेन अत्र मम भ्रमणं निवासश्च अतिशयसुखप्रदो जातः। "पञ्जाबी" सैनिकानां संस्कृतश्लोकानामुच्चारणे काचिद् अधिका त्रुटिर्भवति स्म। तेन तत्र मे कश्चन अधिक एव कालो व्यतीतः।

कुरुक्षेत्र—

अद्याप्यहं तदवनीप्रथितं कुरूणां
क्षेत्रं स्मरामि सविशेषमनेकवारम्।
यत्र स्थितस्य मम कौरव-पाण्डवानां
गाथाऽखिला मनसि चित्रमिवाचकासत्॥ २॥

कुरुक्षेत्रे एकदा सप्तदिवसात्मकं वैदिकसम्मेलनमायोजितमासीत्। तत्रैव भागं ग्रहीतुमहं १५.१.८७ दिनाङ्के गोरखपुरतः आचार्यश्रीकेशवचन्द्रमिश्रमहोदयेन सह कुरुक्षेत्रं प्रति प्रस्थानं कृतवान्। दिल्लीमार्गेण च कुरुक्षेत्रं प्राप्तवान्, प्रातः नववादने।

अस्य सम्मेलनस्य समायोजका मुख्याधिकारिणश्च श्रीदेवेन्द्रनाथब्रह्मचारिमहोदयाः हरिद्वारनिवासिनो मम पूर्वपरिचिता आसन्। अतो मम निवासे भोजनपानादिषु च कापि असुविधा न जाता। सम्मेलनसमयातिरिक्तेषु अवसरेषु मया तत्रत्येषु ऐतिहासिकेषु धार्मिकेषु च स्थानेषु भ्रमणं विधीयते स्म। परं चेतसि सदैव कौरव-पाण्डवानां कथा एव स्मृतिपथमायान्ति स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि जोतिसर - नाम लघुस्थलं तत्
मन्ये महामहिमशालि समस्तभूमौ।
श्रीकृष्णवक्त्रगदिता खलु यत्र गीता
गीतं समस्तजगतोऽभवदेकमात्रम्॥ ३॥

कुरुक्षेत्रस्य परिधौ त्रिशताधिकानि तीर्थस्थानानि भवन्ति। तेषु थानेश्वर, चन्द्रकूप, कालीभद्र मन्दिर, बाणगंगा, रत्नयज्ञ, कुबेरतीर्थ, दधीचितीर्थ, सूर्यकुण्ड, सोमतीर्थ, विष्णुपद, ज्योतिसर इत्यादीनि तीर्थानि विशेषरूपेणा प्रसिद्धानि मान्यानि च वर्तन्ते। एतेष्वपि ज्योतिसरनामकं तीर्थं विशेषमहत्त्वं भजते। यतः भगवता श्रीकृष्णेन अस्मिन्नेव स्थाने अर्जुनं प्रति गीताया उपदेशः प्रदत्तो यः विश्वे सर्वासु भाषासु प्रकाशितं वर्तते। तेन स्थानमिदं विशिष्टां विख्यातिमभजत्।

अद्यापि तां कुरुमहीं विततां सुदूरं
नित्यं स्मरामि चकितो रणरङ्गभूमिम्।
यस्याः समस्तकणिका अधुनापि चेतो
रोमाञ्चयन्ति खलु रक्तिमवर्णभाजः॥ ४॥

दिल्लीतः ट्रेनद्वारा कुरुक्षेत्रगमनकाले कुरुक्षेत्रात् पूर्वत एव या विस्तृता भूमिर्दृश्यते स्म सा महाभारतकाले कौरवपाण्डवानां रणस्थली आसीत्। तदानीमुभयपक्षयोः बहूनां सैनिकानां, योद्धृणां हयगजादीनां च रक्तप्रवाहात् स विस्तृतो भूखण्डो रक्तमयो जात आसीत्। अतस्तस्य भूखण्डस्य एकैका कणिका अपि रक्तवर्णा प्रतीयते साम्प्रतमपि। तत् सर्वं दृष्ट्वा पुरातनं च महासंग्रामं स्मृत्वा शरीरं रोमाञ्चितं भवति स्म।

पानीपत—

पानीपते च कुरुभूमिसमीपसंस्थे
यद् भीषणानि समराण्यभवन् त्रिवारम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याप्यहं तदखिलं ननु तद्धरित्र्याः
युद्धप्रियप्रकृतिजं फलमित्यवैमि ॥ ५ ॥

कुरुक्षेत्रसमीपवर्तिनि पानीपतनगरे मुस्लिमानां, मराठानां, बृटिशजनानां च वारत्रयं भीषणं युद्धं जातम्। प्रथमं १५२६तमे खृष्टाब्दे, द्वितीयं १५५६तमे खृष्टाब्दे तथा तृतीयं १७६१तमे खृष्टाब्दे। तृतीययुद्धे बृटिशजनानां विजयो जातः।

पानीपते इदं यद् ऐतिहासिकं भारतभाग्यनिरूपकं भीषणं युद्धमजायत तत् तस्या युद्धप्रियाया भूमेरेव प्रभाव इति भावो मम पुनः पुनः बुद्धौ उत्पद्यते स्म। तदानीमहं दिल्लीनिवासकाले तत्र भ्रमणार्थं गतवान् आसम्।

अद्यापि मे कुरुभुवि भ्रमतः कुतश्चित्
शब्देषु मत्-श्रुतिपुटं समुपागतेषु।
युद्धस्थ - केशव - करस्थित - पाञ्चजन्यः
शङ्खो ध्वनिं कुरुत इत्यवगम्यते स्म॥ ६ ॥

सम्मेलनदिनेषु कुरुक्षेत्रनिवासकाले दिने रात्रौ च दशवादनपर्यन्तं यत्र तत्र मन्दिरेषु, आश्रमेषु, विद्यालयेषु, मठेषु, आपणेषु च भ्रमणं भवति स्म। तस्मिन् समये यदि कुतश्चिद् गम्भीरो भयङ्करश्च ध्वनिः कर्णयोः प्रविशति स्म तदा गीतायाः प्रथमाध्याये चर्चितानां पाञ्चजन्यादिशंखानां ध्वनेः स्मरणं जायते स्म। यतस्तस्मिन् काले भगवान् श्रीकृष्णस्तथा पाञ्चजन्यमित्येतयोर्द्वयोरेव सदा हृदये निवास आसीत्।

बहालगढ़—

अद्यापि शाब्दिकसुधीजनमौलिरत्नं
श्रीमद्युधिष्ठिरबुधं प्रणतः स्मरामि।
दिव्यं बहालगढ़वर्ति यदीयगेहं
श्रीपाणिनेर्भवनमन्यदवैमि नव्यम्॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महापण्डिताः श्रीमन्तः युधिष्ठिरमीमांसकमहोदयाः वैदिक-साहित्यस्य, व्याकरणशास्त्रस्य, मीमांसादर्शनस्य च सुविख्याता विद्वांसः अवर्तन्त। हरयाणाप्रदेशस्य सोनीपतनगरे, ततश्च तत्समीप-वर्तिनि बहालगढ़नगरे एभिः स्वकीयं कार्यजातं प्रारभ्यत। एतेषां गृहे वेदविषयकं व्याकरणशास्त्रविषयकं च यद् अध्ययनम्, अध्यापनम्, अनुसन्धानम्, लेखनं, प्रकाशनं, पर्यालोचनं च अहर्निशं प्रचलति स्म तद् सर्वमवलोक्य तेषां भवनं पाणिनेरपरं नूतनं भवनमिव अहं भावयामि स्म। महर्षेः पाणिनेः शालातुरस्थितं भवनं कीदृशमासीत्, किं किं च तत्रानुष्ठीयते स्म इति मया न ज्ञायते परं तेषां नूतनं भवनन्तु बहालगढ़े अवलोकितमेव।

श्रीमीमांसकमहोदयस्य हिन्दीभाषायां संस्कृतभाषायां च लिखितानां समग्रकृतीनां विशेषपरिज्ञानाय तैरेव लिखितं निम्नाङ्कितं पुस्तकं द्रष्टव्यम्—

आत्मपरिचय, प्राप्तिस्थान–युधिष्ठिरमीमांसक, बहालगढ, सोनीपत, हरियाणा, मूल्यम्–१००.००

भिवानी—

अद्यापि विस्मरति नो हृदयं, भिवानी-
त्याख्ये पुरे सुरगिरः समितौ गतेन।
यद् वीक्षितं यदपि लब्धमभूतपूर्वं
यत् मुस्लिमस्य विबुधस्य मुखात् श्रुतं च॥८॥

१९७८ तमस्य खृष्टाब्दस्य दिसम्बरमासे संभवतः ७-८-९ तारिकासु हरियाणाप्रदेशस्य प्रसिद्धे भिवानीनगरे एकं बृहत् संस्कृतसम्मेलनं समायोजितमासीत्। सम्मेलनस्य मुख्यसमायोजकाः डॉ॰ श्रीरामेश्वरदत्तशर्माणः आसन्। एते न केवलं भिवानीनगरस्य अपितु हरियाणाप्रदेशस्य संस्कृतसेवापरायणेषु विद्वत्सु मुख्यतमतां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भजन्ते स्म। एतेषामेव निमन्त्रणपत्रमासाद्य अहं महत्या उत्कण्ठया दिल्लीतो भिवानीं प्रति प्रस्थानं कृतवान्।

सम्मेलनेऽस्मिन् एके मुस्लिमविद्वांसोऽपि समागता आसन्। तैरेकं विचित्रं वृत्तं श्रावितम्। तैः कथितम्—"तैः यदा संस्कृतशिक्षायाः प्रारंभकाले गृहे रामशब्दस्य रूपाणि पठ्यन्ते स्म तदा तेषां पितामहः तत् श्रुत्वा बहु प्रकुपितो भवति स्म। तस्य रामशब्दस्य श्रवणं बहु धर्मविरुद्धं कष्टकरं च जायते स्म।" इदमेकं विनोदकरं क्लेशकरञ्चापि नवीनं वृत्तमासीत्।

भिवानीनगरस्य विद्यामार्तण्डश्रीसीतारामशास्त्रिमहोदयैः संस्थापितः ब्रह्मचर्याश्रमोऽपि प्राचीनत्वेन, विशालतया, शिक्षावैशिष्ट्येन च किमपि अनुपमं गौरवमावहति। तत्राहं दिनद्वयं स्थित्वा अध्यापकैः छात्रैश्च सह परमं प्रमोदमन्वभवम्। एकदा प्रातः प्राचार्यैः मम सेवां कर्तुं निर्दिष्टा ब्रह्मचारिणो यदा सकृदेव अभिपत्य केचिद् पादौ धृत्वा, केचित् हस्तौ धृत्वा, केचित् शिरो धृत्वा, केचित् च पृष्ठे तैलं मर्दयन्तः सेवां कर्तुं प्रारब्धवन्तस्तदा मम संकटमिव संवृत्तम्। तत्रत्या ब्रह्मचारिणश्च न खलु उत्तरप्रदेशवत् दुर्बला अपितु हृष्टपुष्टकलेवराः बलवन्तश्च भवन्ति। इतोऽप्यहं तेषां सेवां ग्रहीतुमसमर्थ आसम्। अतस्ते मया वारिताः कथं कथमपि कष्टेन मां परित्यक्तवन्तः।

अस्य नगरस्य विशिष्टेषु आकर्षणकेन्द्रेषु विद्वद्वरेण्येषु श्री १०८ पं० सत्यदेववासिष्ठमहोदयाः सर्वाधिकं गौरवं भजन्ते—

विद्यया बपुषा वाचा वस्त्रेण विभवेन च।
वकारैः पञ्चभिर्युक्तो नरो भवति पूजितः॥

इति प्रसिद्धं पद्यं सर्वांशरूपेण तेषु सङ्घटते स्म। विद्यादृष्ट्या तैः विष्णु-सहस्रनामस्तोत्रस्य यद् वेदप्रमाणोपबृहितं भागद्वयात्मकं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सत्यभाष्यम् १३५० पृष्ठात्मकं, रमणीयतम-वर्ण-कर्गाज-मुद्रण-आवरणपृष्ठादिसुशोभितं प्रकाशितं तदेव तेषां विविधशास्त्रीय-वैदुष्यस्य विपुलं प्रमाणं वर्तते। एवमेव तेषामेकं सत्याग्रहनीतिकाव्यं नाम पुस्तकं प्रकाशितं वर्तते येन तेषां नीति-राजनीति-विषयकं वैदुष्यं प्रकटीभवति। अन्ये सर्वे गुणास्तु तेषां साक्षात्कारेणैव अवगन्तुं शक्यन्ते।

दिल्लीस्थ-क़िरोड़ीमलमहाविद्यालये संस्कृतप्राध्यापकाः पण्डित शिवनारायणशास्त्रिमहोदया इदमेव नगरं जन्मना विभूषयन्ति। एते व्याकरणशास्त्रस्य भाषाविज्ञानस्य च विश्रुता विद्वांसो बहूनां ग्रन्थानां च लेखका एते संस्कृतसेवाक्षेत्रेऽपि महनीयं स्थानं भजन्ते।

यमुनानगर—

भागीरथीव यमुनानगरे वहन्ती
या मे गता श्रुतिपथं खलु देववाणी।
श्रीसत्यदेवपरिवारजनेष्वभीक्ष्णं
साद्यापि मत्स्मृतिगता ध्वनतीव चित्ते॥ १॥

हरयाणाभ्रमणकाले मया सर्वप्रथमं यमुनानगरे सुप्रसिद्ध-संस्कृतसेविनां श्रीसत्यदेववर्ममहोदयानां गृहं गतम्। तत्र तेषां सर्वेषामपि परिवारजनानां छात्राणां च मुखेभ्यः सदा संस्कृतवाणीं श्रुत्वा संस्कृतमयं च वातावरणं दृष्ट्वा मम अभूतपूर्वो हर्षो जातः। मया एवमनुभूतं यमुनानगरे इयं कापि गङ्गाया धारा प्रवहतीति।

श्रीवर्ममहोदयाः स्वयं विश्रुता विद्वांसः आसन्। तेषां पत्नी अपि विदुषी, तदानीं हरयाणाप्रदेशस्य स्वास्थ्यमन्त्रिपदे सा विराजमाना आसीत्। पुत्रौ च द्वौ संस्कृतज्ञौ संस्कृतभाषिणौ च।

अद्यापि मे वसति चेतसि सत्यदेवो
वर्म्मा सदा सुरगिरो निरतः प्रचारे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

य: संस्कृते सरलपद्यचयैः "कुरानं"
रम्यैरनूद्य कृतवान् बुधबोधगम्यम्॥ १०॥

श्रीसत्यदेववर्मणां संस्कृतप्रचारातिरिक्तं यद् अतिशयमहत्त्वपूर्णं कार्यं वर्तते तदस्ति सुप्रसिद्धस्य "कुरान" ग्रन्थस्य सार्धत्रिशत-पृष्ठात्मकः, ५०४श्लोकात्मकः संस्कृतानुवादः। इतः पूर्वं मया "गुलिस्तां" नामकस्य फारसीभाषाया महतः ग्रन्थस्य डॉ० धर्मेन्दनाथशर्मकृतः संस्कृतानुवादः दृष्ट आसीत्। परं तदपेक्षयापि विशालमिदम् अरबीभाषाया ग्रन्थस्य संस्कृतानुवादं दृष्ट्वा मे महदाश्चर्यं महांश्च आनन्दः संजातः। वाइविलस्यापि संस्कृतानुवादो मया दृष्टः परं सोऽपि ईदृशं वैशिष्ट्यं न बिभर्ति। अतः श्री सत्यदेव-वर्मणामयमनुवादः वैदेशिकभाषाग्रन्थानामनुवादेषु सर्वाधिको विशिष्टतर इति निःसंशयं वक्तुं शक्यते।

हरियाणा-प्रशस्तिः—

श्रीकृष्णचन्द्र - पदपङ्कज - धूलि - धन्या
श्रीकृष्णकण्ठपरिनिर्गत - गीत - रम्या।
श्रीकृष्णशङ्ख - विजयध्वनि - निर्विशङ्का
शौर्यस्थली विजयते हरियाणभूमिः॥ ११॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: १९ :

हिमाचलप्रदेशीयानि संस्मरणानि

डेरा बाबारुद्रू—

अद्यापि पञ्चनदवर्ति - सुतीर्थ - डेरा-
बाबास्थलं स्मृतिगतं बहुहर्षदं मे।
यत्र स्थितस्य मम पञ्चनद-प्रदेश्या
विद्वज्जना: सहृदया मिलिता अनेके॥ १॥

पञ्जाबभ्रमणप्रसङ्गे १२.६.७० दिनाङ्के अहं होशियारपुरं गत्वा तत्रत्ये विशेश्वरानन्द-शोधसंस्थाने पञ्चदिनानि स्थितवानासम्। ततश्चाहं २०.६.७० दिनाङ्के कतिपययोजनवर्ति तत्रत्यं सुप्रसिद्धं पुण्याश्रमं डेराबाबारुद्रुनामकं स्थानं गतवान् यत्र एकेन मठेन एकस्य बृहद्-यज्ञस्य आयोजनं विहितमासीत्। यज्ञेऽस्मिन् तत्प्रदेशीया अनेके वैदिका अन्यशास्त्रविदश्च भूयांसो विद्वांस: सम्मिलिता आसन् येषां परिचयस्य सौहार्दस्य च मम महान् लाभो जात:। परं तत्र गमनस्य मम. सर्वाधिको लाभ आसीत् शिमलानिवासिनां श्री पण्डितदिवाकरशर्मशास्त्रिणां परिचय:। एते शिमलासंस्कृतमहा-विद्यालयस्य प्रधानाचार्या:, "दिव्यज्योति:" मासिकपत्रिकाया: सम्पादका:, संस्कृतप्रचारक्षेत्रे च अग्रगण्या: सौजन्यमूर्तयो विद्वांस: आसन्। एभि: सह परिचये सौहार्दे च जाते मम एभिरेव सह शिमलां गन्तुं बलवती आकांक्षा उदपद्यत। तावत्कालपर्यन्तमहं शिमलां न गतवान् आसम्। अत: श्रीशास्त्रिणां समक्षं मया एषा स्वकीया आकांक्षा यदा प्रकटीकृता ततस्तै: सहर्षमयं मदीय: प्रस्ताव: स्वीकृत:, द्वितीयदिने च आवां शिमलायै बसद्वारा प्रस्थानं कृतवन्तौ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिमलाचलप्रदेशे संस्कृतप्रचारस्य मम इत एव शुभारम्भो जातः। तस्मादयं प्रमोदमयः प्रसङ्गः सदैव मम स्मृतौ विराजते।

शिमला—

अद्यापि संस्मरति मे हृदयं कृतज्ञं
श्रीमद्दिवाकरसुधी - गृह - संस्थितस्य ।
नित्यं सुखासन-सुयोजनपान-शय्या-
गोष्ठी-प्रचार-गिरिचङ्क्रमणानि नित्यम्॥ २॥

२६.६.७० दिनाङ्के डेराबाबारुद्गुतः प्रातः प्रस्थितौ आवां रात्रौ नववादने गृहं प्राप्तवन्तौ। मार्गे मया इदम्प्रथमतया भयङ्करं शैत्यमनुभूतम्। अतः शास्त्रिमहोदयानां परिवारेण अत्यन्तमुष्णस्य चायपानस्यादौ व्यवस्था विहिता। ततः परं तादृशस्यैव भोजनस्य। अनन्तरं शास्त्रिमहोदयैः सह सुखालापे कञ्चित् समयं गमयित्वा आदौ बसयात्राया श्रान्तिमपनेतुं शीघ्रमेव मदर्थे उपकल्पितं शयनतल्पमाश्रितवान्।

ततः परं द्वितीयदिनात् सम्पूर्णे शिमलाक्षेत्रे समीपवर्तिषु ग्रामाञ्चलेषु च क्वचिद् यानेन, क्वचित् पादाभ्यां च प्रचारकार्यमारब्धम्। तच्च सर्वं कार्यं श्रीशास्त्रिमहोदयानां सहयोगेन सम्यक् सम्पन्नताम-गमत्। परं शास्त्रिमहोदयानां गृहे निवासकाले एका महती चिन्ताऽपि मम चेतसि सदा समुत्पद्यते स्म। सा चेयमासीत्—शास्त्रिमहोदयानां द्वे कन्ये परिणयोचिते वयसि वर्तमाने आस्ताम्। ते उभे अपि दर्शं दर्शं ममेयं चिन्ता भवति स्म—एतयोः विवाहार्थं प्रभूतं धनमपेक्ष्यते। कथं शास्त्रिमहोदया अल्पेन आयेन इमं महान्तं भारं वोढुं समर्था भविष्यन्ति? परं संकोचवशान्मया वार्तेयं तेषां पुरतो न प्रचाल्यते स्म। परं चिन्तायाः प्राबल्यात् अशान्ततया च एकदा मयेयं चिन्ता शास्त्रिणां पुरतः समुपस्थपिता एव। ततः शास्त्रिभिर्विहस्य उक्तम्—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'शास्त्रिवर्याः, अस्माकं प्रदेशे इयं चिन्ता कन्यापितॄणां न भवति। अत्र तु वराणामेव पितरः कन्यानां गृहे-गृहे गच्छन्ति, वरस्य च योग्यतां वर्णयित्वा कन्यापितरं प्रार्थयन्ते कन्यां च याचन्ते इति''। इदं श्रुत्वा मम सर्वापि चिन्ता व्यपगता, विस्मयश्च महान् संजातः एतादृशीं परम्परां ज्ञात्वा। मया च विचारितम्—यदि एतादृशी एव रीतिर्देशे सर्वत्र प्रचलिता अभविष्यत् तर्हि कन्यापितरः चिन्ताविरहिताः सुखं शय्यायां निशामगमयिष्यन्।

खादन्ति नैव यदि मांसमहो भवन्तः
पादप्रहारमनिशं खलु भक्षयन्तु।
एतद् वचः प्रकुपितैकभिषग्वराणाम्
अद्यापि लज्जयति मां च तनोति चिन्ताम्॥ ३॥

इदं मम शिमलागरस्य प्रथमयात्राया वृत्तं वर्तते। तदानीमहं सोलननगरात् शिमलां प्राप्तवानासम्। तेषु दिनेषु शिमलानगरे हिमाचलप्रदेशीय-संस्कृतपाठशालानां परीक्षाः प्रचलन्ति स्म। अतः हिमाचलप्रदेशस्य सर्वे संस्कृताध्यापकाः छात्राश्च एकत्र समवेता आसन् यैः सह साक्षात्कारस्य संभाषणस्य च मम आवश्यकता आसीत्। अतएव इयं मम यात्रा महत्त्वपूर्णा आसीत्।

अस्यां यात्रायां निवासाय मया शिमलास्थिते ब्राह्मण-संस्कृतमहाविद्यालये व्यवस्था विहिता। यद्यपि तत्र मत्कुणानां महान् उपद्रवः आसीत् तथापि अध्यापकानां, छात्राणां च सहवासलोभात् मया तत्र निवासं कर्तुं निश्चयः कृतः। मम भोजननिर्माणं च छात्राः कुर्वन्ति स्म। तेन मे सौविध्यं भवति स्म। एवं कतिपयदिनानि व्यतीतानि। अथ एकस्मिन् दिने तत्रत्यः एकः सुप्रतिष्ठितो, हिन्दुसमाजस्य हितचिन्तकश्च वैद्यो मत्समीपमागत्य स्वगृहे सायं भोजनार्थं मां साग्रहं निमन्त्रितवान्। मया च निमन्त्रणं स्वीकृतं, तेषां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृहे च सायं भोजनार्थमुपस्थितः। अनन्तरं वैद्यमहोदयो मन्निकटमागत्य एकां विस्मयकरीं वार्तां कृतवान्। स मां हिन्द्यां पृष्टवान्—"*पण्डितजी, आप लोग मांस खाते हैं या नहीं?*" मया उत्तरं दत्तम्—"*हमलोग तो मांस नहीं खाते।*" तदा तेन त्वरितमेव किञ्चित् विहसता कथितम्—"*आप लोग मांस नहीं खाते हैं तो लातं खाइये।*" इदं श्रुत्वा अहमाश्चर्यचकितो जातः। मया तस्य कोऽभिप्राय इति ज्ञातुं न पारितम्। ततः स मां विस्मितं दृष्ट्वा स्वकीयमभिप्रायं स्पष्टीकृतवान्। तस्य तात्पर्यमिदमासीत्–यदि वयं हिन्दवः पशूनां हत्यायाः मांसभक्षणस्य च अभ्यासं न करिष्यामः, स्वयं च मांसं नोत्पाद्य कसाईनिर्मितं मांसं भक्षयिष्यामः तदा ते सदैव मुस्लिमजनैः छुरिकादिभिः प्रपीडिताः, आहताः, हताः, मृताश्च भविष्यन्ति। अतो हिन्दुजनैः छुरिकाचालनस्य, मांसनिर्माणस्य, मांसभक्षणस्य च अभ्यासः कर्तव्यः। इदं सर्वं बोधयित्वा स महानुभावः स्वगृहाभ्यन्तरतः शताधिकाः बृहत्–छुरिका आनीय मां दर्शितवान्, कथितवांश्च यद् वयं सर्वे शिमलानिवासिनः इत्थं निर्णयं कृतवन्तः स्म। ततः स इमं प्रसङ्गं समाप्य मां सादरं सानुरोधं सानन्दं साग्रहं च बहु बहु भोजितवान्, बहूनि बहूनि च विविधानि च भोज्यवस्तूनि।

वैद्यमहोदयस्य सा वार्ता अद्यापि मम सदा स्मृतौ विराजते बहुत्र च मया अस्य चर्चा विधीयते।

अद्यापि लार्डभवने शिमलानगर्यां
कांग्रेस - लीगदलं - नेतृ - गतागतेषु।
जिन्ना - जवाहर - पटेल - महात्म - जिन्दा-
वादेति दारयति कर्णपुटीं निनादः॥ ४॥

१९४२ तमस्य खृष्टाब्दस्य मार्चमासे भारताय स्वातन्त्र्यप्रदानविषये वार्तां कर्तुं स्ट्राफोर्डक्रिप्स (Strafford Cripps)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महोदयः स्वप्रतिनिधिमण्डलेन सह ब्रिटेनतः भारतमागतवान् आसीत्। अस्या वार्तायाः कृते स्थानं शिमलानगरे वाइसराय-भवनं निर्धारितमासीत्। अतः वार्तायाः कृते निर्धारितेषु दिवसेषु नगरेऽस्मिन् कांग्रेसनेतॄणां मुस्लिमलीगनेतॄणां च महान् समुदायः उपस्थित आसीत्। नेतृभिः सह तत्समर्थकानामपि भूयान् समवायः सर्वत्र दृष्टिगोचरीभवति स्म। परन्तु एते समर्थकाः पक्षधराश्च यदा स्व-स्व-नेतॄणां गमनकाले, आगमनकाले, भ्रमणकाले च तारस्वरेण जयजयघोषं जिन्दाबादघोषं च कुर्वन्ति स्म तदा तत्र महती अशान्तिः, उपद्रवस्य च आशंका भवति स्म। प्रतिस्पर्धया उभयोः पक्षयोः समर्थकास्तथा निनादं कुर्वन्ति स्म यत् कर्णयोः महत् कष्टं ददाति स्म। तदद्यापि स्मृतिगतं मे तथैव कर्णविदारकं प्रतिभाति।

अद्यापि गान्धि-नेहरू-सरदारवर्गे
दूरस्थिते सदसि सान्ध्यविधौ स्तुतीनाम्।
सीमान्तगान्धि - सुगभीरतरस्वरेण
स्तोत्रं श्रुतं श्रुतिसुखं नहि विस्मृतं मे॥ ५॥

एतेषु दिनेषु प्रतिदिनं सायंकाले गान्धिमहोदयस्य प्रार्थनासभा प्रचलति स्म। गीतायाः स्तोत्राणां च पाठः भवति स्म। परन्तु एकस्मिन् दिने वाइसरायभवनाद् गान्धिमहोदयस्य प्रार्थनासभायामुपस्थितौ बहु विलम्बो जातः। ततः कः खलु अपरः प्रार्थनां कारयेत् इति सर्वेषां चिन्ता जाता। सरदारपटेलमहोदयः समीपे भ्रमन्नासीत् परं स तथा गम्भीरचिन्तने निमग्नः आसीत् येन कस्यापि जनस्य तत्समीपे गन्तुं साहसं नाऽभूत्। अतः सर्वे जनाः प्रार्थनास्थले तूष्णीं समुपविष्टस्य सीमान्तगान्धी श्रीअब्दुलगफ्फारखाँमहोदयस्य निकटे गत्वा तं प्रार्थनां कारयितुं प्रार्थितवन्तः। तदानीमहं खाँमहोदयस्य निकट एवासम्। ततो मम इदं दृष्ट्वा महदाश्चर्यमजायत यत् खाँमहोदयेन तेषां निवेदनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वीकृतम्, प्रार्थनासभायां मञ्चमारुह्य प्रार्थना कारिता। मेघनिर्घोषसदृशेन तेषां काबुलीस्वरेण श्लोकानां पाठं श्रुत्वा मम या सुखानुभूतिरभूत् सा कदापि विस्मृता न भवति।

अद्यापि शैलशिखरस्थितवद्गृहाणां
वातायनेषु विशतो जलदान् विचिन्त्य।
वस्त्रादि - वस्तुचय - संभवदार्द्रताया
भीतेः स्वशङ्कितमनः सततं स्मरामि॥ ६॥

शैलशिखरेषु निर्मितानि भवनानि तथा उच्चतमानि भवन्ति यथा तेषु वातायनद्वारा मेघानां प्रवेशो जायते, तेन तद्गृहस्थितानि पुस्तकपत्रादीनि वस्त्राणि च आर्द्रतां गच्छन्ति। तस्मात् तेषु गृहेषु सावधानतया स्थातव्यं भवति, वातायनानि अवसरानुसारं पिधातव्यानि भवन्ति, रात्रौ च सर्वं द्वारादिकं पिधायैव शयनीयं भवति। मयापि इदं सर्वं दृश्यं शिमलानिवासकाले धर्मशालानिवासकाले च पूर्णतया दृष्टमनुभूतञ्च। नूतनतया च अहं विशेषरूपेण शङ्कितः तिष्ठामि स्म, स्ववस्तूनि च अपसारयन् गोपयन् वा भवामि स्म। तत् सर्वं साम्प्रतमपि स्मृतिगतं मनो विनोदयति।

यात्रासु यः खलु कृतो हिमवत्प्रदेशे-
ष्वत्यन्तशीतलजले प्रथमोऽवगाहः।
अद्यापि स स्मृतिगतोऽतितरां तुषारा-
घातप्रघात इव कम्पयते शरीरम्॥ ७॥

हिमाचलप्रदेशे प्रायेण सर्वदैव शीतमयं वातावरणं भवति। विशेषतश्च प्रभातकाले। अस्यामवस्थायां यदि कश्चन नूतनः प्रवासी प्रथमतया शीतलेन जनेन स्नानं करोति, अथवा कर्तव्यं भवति तदा तस्य शरीरं न केवलं कम्पायमानं प्रत्युत आहतमिव जायते। इदं मया विशेषतः कश्मीरयात्रायां श्रीनगरे अनुभूतम्। तत्राहं यदा प्रथमरात्रौ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुप्त्वा प्रातःकाले जागरितस्तदा चायपानानन्तरं गृहपतिना पण्डित-परमानन्दमहोदयेन स्नानार्थं स्नानालयमहं प्रेषितः। यद्यपि स निदाघकाल आसीत् तथापि अस्माकं कृते स शीतकालसदृश एवासीत्। अतो मया यदा स्नानं कर्तुमारब्धं तदा प्रथमजलपात एव मम आघात इव क्लेशकरो जातः।

आच्छाद्य पुष्टतरवस्त्रचयैः समन्तात्
आपादमस्तकमशेषशरीरभागान्।
स्मृत्वा हिमावृतपथि व्रजतोऽतिकष्टात्
अद्यापि दूयत इवातितरां मनो मे॥ ८॥

परन्तु अयं प्रदेशस्य दोषो भवति अतः सर्वं सहनीयं भवति तथा तदनुकूलानि आवश्यकसाधनानि च संग्रहणीयानि भवन्ति। परं सर्वेषां तादृशं सामर्थ्यं न भवतीति बहवो वस्त्रहीना बालका वृद्धा युवानश्चापि क्लेशमनुभवन्त्येव यद् दृष्ट्वा मम काले-काले महत् कष्टं भवति स्म।

अद्यापि भारतभुवो हिमवत्प्रदेशे
दृष्ट्वा बहूनि सुमनोहर - मन्दिराणि।
श्रीकालिदासकथितं खलु "देवतात्मे"
त्येतत्पदं मम सदा प्रतिभाति सत्यम्॥ ९॥

स्पष्टार्थम्

वर्षाऋतौ गिरिषु कुञ्जवनेषु भूम्यां
उच्चैरधश्च परितस्तरुवल्लरीषु।
अद्यापि तं हरितिमानमवेक्ष्य हृद्यं
जातं स्मरामि हरितं स्वमपि प्रसङ्गात्॥ १०॥

वर्षाऋतौ समतलप्रदेशापेक्षया पर्वतीयप्रदेशाः कामपि अपूर्वां सुषमां भजन्ते। पर्वतीयप्रदेशेषु विविधरूपरङ्गसौन्दर्यभाजां तरु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लता-पुष्प-पल्लवप्रभृतीनां मनोहरं दृश्यं दृष्टिगोचरीभवति। वर्षाऋतौ च यदा इदं सर्वं हरितिमानमाधत्ते तदा सर्वोऽपि वनप्रदेशो हरितवर्णमय एव जायते। तादृशे च समये दर्शका अपि परितो हरितवस्तुबाहुल्येन तत्प्रतिबिम्बिता आत्मानमपि हरितायमानमिव अनुभवन्ति।

यथा राष्ट्रमहाकविना कालिदासेन कुमारसंभवे लिखितम्—

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥ ११॥

कुमारसंभवम्-१.१

संस्कृतं पठतां किन्नरच्छात्राणां सम्पर्केण एतद्विषये अन्यदपि बहु परिज्ञानं जातम्।

रम्यं मुखं, सुनयने, रमणीयनासा
ओष्ठौ प्रवालसदृशौ, विशदो ललाटः।
चित्राणि चापि वसनाभरणानि तेषा-
मद्यापि मे स्मृतिगतानि मनोहराणि॥ १२॥

हिमाचल-प्रशस्तिः—

सम्पूर्ण-भारतभुवः शिखरं सुरम्यं
सङ्घो विभिन्न-मत-जातिजुषां जनानाम्।
क्रीडाङ्गणं गिरिसुता - शिवयोश्चरित्नं
धन्यो हिमालय इति प्रथितः प्रदेशः॥ १३॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २० :

दक्षिणभारतीयप्रदेशानां संस्मरणेषु
आन्ध्रप्रदेशीयानि संस्मरणानि

अत्यायते निखिल - उत्तरभारते यत्
यत्किञ्चन भ्रमणमल्पमकारि योगात्।
तत्रापि यत् स्मृतिगतं मम चिन्त्यमानं
सर्वं तदत्र लिखितं खलु वृत्तजातम्॥ १॥

उल्लिख्यते सपदि दक्षिणभारतीय-
प्रान्तप्रवासगत - संस्मरणीय - वृत्तम्।
गत्वा न येषु सुशको न जनैः कथञ्चित्
सम्पूर्णभारतमही - महिमावबोधः॥ २॥

दिव्यानि मन्दिरशतानि बृहत्तराणि,
वेदादिशास्त्र-पठनं परिरक्षणं च।
साहित्यसंस्कृतिकला अतुलाः समृद्धाः
सर्वाणि दक्षिणभुवः परमाद्भुतानि॥ ३॥

तस्मादवाप्य समयं शुभदैवयोगाद्
भाग्योदयोऽयमजनि भ्रमणस्य योगे।
तस्येदमान्ध्रधरणीभ्रमणप्रसङ्गा-
दारभ्यते सपदि संस्मरणं मनोज्ञम्॥ ४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हैदराबाद—

अद्यापि भाग्यनगरे शकटालयस्थ-
रेक्सादिचालकमुखात् प्रथमं श्रुतानि।
विस्मापकानि मम "इक्कड़ रण्डि रण्डि"
स्वामीत्यपूर्ववचनानि मुदं वहन्ति॥ ५॥

दक्षिणभारतयात्राप्रसंगेन अहं कटनी, रायपुर, नागपुरमार्गेण सर्वप्रथमं ८.९.५९ दिनाङ्के हैदराबादनगरं प्राप्तवानासम्। इदं नगरं भाग्यनगरनाम्नापि प्रसिद्धं वर्तते। तत्र यानादवतीर्य यदा रेक्सादि-यानग्रहणाय शकटस्थानाद्बहिरागतस्तदा सर्वेषामपि रेक्साचालकानां मुखात् "रण्डि रण्डि, स्वामी, इक्कड़ रण्डि, इक्कड़ रण्डि" इति तेलगूभाषाया वाक्यानि श्रुतानि। तदवधि मम तेलगूभाषाया ज्ञानं नासीत्, न वा क्वचित् श्रुता आसीत्। तेन मम इमानि वाक्यानि नितान्तं नूतनानि अज्ञातार्थानि च आसन्। उच्चारणमपि तेषां विचित्रमासीत्। परं तेषां शब्दानामर्थस्तु स एव भवति यथा उत्तरभारते रेक्साचालका वदन्ति—"आइये आइये बाबू, इधर आइये, इधर आइये"। अतः एतदर्थज्ञाने जाते मम कुतूहलस्य शान्तिरभूत्।

अद्यापि साऽमृतमयी वचनावली मे
रात्रिन्दिवं श्रवणयोरनुगुञ्जतीव।
या भार्यया सममवोचि गयाप्रसाद-
श्रीशास्त्रिणा बुधवरेण सुबोधवत्या॥ ६॥

अस्मिन् नगरे मम कोऽपि पूर्वतः परिचितो नासीदिति हेतोः अत्रत्यस्यैकस्य सुजनस्य निर्देशने "चारमीनार" समीपवर्तिन्या-मेकस्यां धर्मशालायां गत्वा शुल्कं च दत्त्वा निशामतिवाहितवान्। ततः प्रातरुत्थाय नित्यक्रियाश्च निर्वर्त्य यावदहं स्थायिस्थानस्य अन्वेषणाय धर्मशालाया बहिरागतः तावन्मया एकश्चिकित्सालयो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टो यत्र एके वृद्धा वैद्यमहोदया विराजमाना आसन्। ते मया स्वप्रयोजनं पृष्टास्त्वरितमेवावोचन्—"अत्र नगरस्य मुरलीधरबाग-नाम्नि एकस्मिन् भागे वर्तन्ते एके पं० गयाप्रसादशास्त्रिनामानः सहृदया विद्वांसः। ते भवतः कृते सर्वविधां साधुव्यवस्थां विधास्यन्ति। इत्युक्त्वा ते तत्क्षणमेव एकं रेक्साचालकमाहूय, रेक्सायां च मां प्रतिष्ठाप्य रेक्साचालकं तत्र गमनाय प्रेरितवन्तः। ततः परं मुरलीधरबागं गतोऽहं प्रच्छं प्रच्छं वैद्यमहोदयानां गृहं प्राप्तवान्। उपरितले ते विराजन्ते स्म। तत्र गतं ते मामपरिचितं जनं ज्ञात्वा यावत् मम परिचयं ज्ञातुं वदनं व्यापारयितुमारब्धवन्तः तावन्मयैव स्वपरिचयो दत्तः आगमनप्रयोजनं च निवेदितम्। तदेतत् सर्वं ज्ञात्वा ते भृशं प्रसन्ना जाताः, ममापि च तैः सह मिलित्वा महान् प्रमोदः समजनि। "शास्त्रिणीजी" इति नाम्ना प्रसिद्धां स्वपत्नीं ततस्ते संबोध्य कथितवन्तः—"*शास्त्रिणीजी, आइये, देखिये, बनारससे एक पण्डितजी आये हैं। उन्हें क्या खिलाइयेगा? आज बड़े सौभाग्यकी बात है कि आप मेरे घर पधारे हैं।*" ततः परं शास्त्रिणीजी अपि समागता। तौ उभौ अपि दृष्ट्वा, उभौ मिलित्वा, उभाभ्यां सह संलप्य, उभयोश्च परस्परं माधुर्यमयीं वाणीं श्रुत्वा मम यथा आनन्दसन्दोहो जातः स सर्वथा अवर्णनीय एव वर्तते। अपरं च तेषां गृहस्य शुचिता, सुन्दरता, शान्तिमयं वातावरणं, सर्वेषां वस्तूनां सुसज्जितरूपेण संस्थापनं, अतिथीनां स्वागतस्य विसर्जनस्य च हृदयावर्जकः प्रक्रमश्चेत्यादिकमपि मम सर्वथा मोहकमेवासीत्। इदं सर्वमवलोक्य मया तेषां विषये एकं पद्यं लिखितम्। तदित्थं वर्तते—

रम्या शान्तिकुटी समस्तशुचिता-शृङ्गार-रङ्गस्थली
लीलाभूमिरुदारहारिवचसाम्, आतिथ्य-पुण्याश्रमः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्रामस्थलमेकमेव विदुषां माधुर्य-धारागृहं
श्रीमत्-शास्त्रिगयाप्रसादसदनं स्वर्गोपमं राजते ॥

ततः परं तैर्दिनत्रयं मम निवास-भोजनपान-शयनादिव्यवस्था अत्यन्तं समीचीनतया रोचकतया च सम्पादिता।

अद्यापि तस्य सुहृदो मम शास्त्रिणोऽहं
कार्तज्ञ्यभावमनिशं शिरसा वहामि।
यो मत्समस्त - सुसमीहित - कार्यसिद्ध्यै
प्रादान्मणिं प्रथितलक्ष्मणशास्त्रिवर्यम् ॥ ७ ॥

श्रीमद्भिः शास्त्रिमहोदयैः सर्वप्रथमं मम स्नेहसमादर-श्रद्धापूर्वकं या व्यवस्था विहिता, महीयानुपकारः साधितः स कथमपि विस्मर्तुं न शक्यते। परन्तु एतदपेक्षयाऽपि मम यो महत्तरः उपकारः साधितः स आसीत् श्री के० लक्ष्मणशास्त्रि-महोदयैः सह मम सम्बन्धयोजनम्। इमे शास्त्रिमहोदयाः कवयः, भाषणे प्रवीणा वक्तारः, संस्कृतभाषायाः प्रचारकाः, संस्कृतविदुषां सत्कर्तारः तथा तेलगू-तमिल-मराठी-अंग्रेजी-उर्दू-हिन्दी - संस्कृत - प्रभृतीनामनेकभाषाणां ज्ञातारः एके सहृदया रसिकस्वभावाश्च विद्वांसः आसन्। परन्तु एते तदानीं राजकीयसूचनाविभागस्य एकस्मिन् मुख्याधिकारिपदे कार्यं कुर्वन्ति स्म। श्रीमद्भिः गयाप्रसादशास्त्रिभिः तेषां परिचयं दत्त्वा तेषां सविधे गमनार्थमहं प्रेरितः, कथितं च यत् तैः सह परिचये सम्बन्धे च जाते सर्वाणि कार्याणि सेत्स्यन्तीति। ततोऽहं सूचनाकार्यालयं गतः। शास्त्रिमहोदयं च मिलित्वा सर्वमपि आगमनप्रयोजनं संस्कृतभाषया निवेदितवान्। तत् सर्वं श्रुत्वा शास्त्रिमहोदयाः भृशं प्रसन्नतां प्रकटीकृतवन्तः। कार्यालयस्य अवकाशे जाते ते मां मुरलीधरबागनिकटे तुलजागुडासंभागे विद्यमानं गृहं नीतवन्तः। तत्र तेषां ज्येष्ठपुत्री के० कमला

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आंग्लविद्यालये संस्कृतमधीयाना आसीत्। तया दाक्षिणात्यं स्वल्पाहारादिकं निर्माय मम आतिथ्यं सम्पादितम्। अनन्तरं शास्त्रिमहोदयैः स्वगृहे एव मम निवासाय व्यवस्था कृता। अहञ्च प्रसन्नो भूत्वा, त्वरितमेव च श्रीगयाप्रसादशास्त्रिणां गृहं गत्वा, तेभ्यश्च कृतज्ञतां विज्ञाप्य स्ववस्तुभिः सह श्री के० लक्ष्मणशास्त्रिणां गृहं समागतः। ततः परं हैदराबादनगरे तेषां गृहं मम गृहं, तेषां परिवारश्च मम परिवारः सञ्जातः। हैदराबादनगरस्य मम इयं प्रथमा यात्रा आसीत्। इतः परमपि मया त्रिचतुर्वारं हैदराबादस्य यात्रा कृता। तासु सर्वासु यात्रासु मम एतेषामेव गृहे निवासो भवति स्म। तेषां पत्नी अन्नपूर्णा देवी, ज्येष्ठपुत्री के० कमला, ज्येष्ठपुत्रः श्री के० प्रभाकरशास्त्री, कनिष्ठपुत्रः श्री के० कृष्णमूर्तिश्चेति सर्वेऽपि परिवारजनाः मम सेवां समादरं च कुर्वन्ति स्म। श्रीशास्त्रिमहोदयाः कालेन आन्ध्रप्रदेशे संस्कृतशिक्षाधिकारिपदे नियुक्ताः जाताः। ततस्तैः सह समग्रे आन्ध्रप्रदेशे अनेकधा यात्रा कृता, प्रचारकार्यं च सम्पादितम्। श्रीमन्तः शास्त्रिमहोदयाः मम संस्थाया अपि विकासाय बहु चिन्तयन्ति स्म, यतन्ते स्म, प्रयतन्ते स्म च। तैः बहुस्थानेभ्यः व्यक्तिभ्यश्च मम आर्थिकी सहायता कारिता, सम्मानः दापितः, पुस्तकानां च प्रकाशनं कारितम्। एवं च मया सह मम संस्थानेन च सह यथा तेषामात्मीयता, स्नेहः, सहानुभूतिः, शुभाकांक्षा च आसीत् तत् सर्वं कुत्रापि अन्यत्र मया कदापि न लब्धम्।

अद्यापि आन्ध्रधरणी-बुधमौलिरत्नं
सद्गद्य-पद्य-रचनाप्रवरं कवीन्द्रम्।
मज्जीवनैकसुहृदं हृदयं द्वितीयं
श्रीलक्ष्मणार्यविबुधं सततं स्मरामि॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशास्त्रिमहोदयानां परिचये तथा तैः सह घनिष्ठे सम्बन्धे जाते मया एकं पद्यं लिखितं तेषां स्वरूपस्वभावादिपरिचायकम्। तदिदं वर्तते—

मूर्तिर्मत्तगजेन्द्रगर्वदलिनी, वाणी विनोदप्रिया,
व्याख्या-लेख-कवित्वकौशलकला-पारंगता शेमुषी॥
शक्तिः संस्कृतभाषणेऽप्यनुपमा, विद्वज्जनेष्वादरः
श्रीमल्लक्ष्मणशास्त्रिणां गुणगणाः केषां न तोषावहाः॥

परन्तु एते सर्वे तेषां गुणा अन्येषां कृते आकर्षका आह्लादका वा आसन् परन्तु मत्कृते तेषां यद् अहैतुकं सौहार्दमासीत्, विचारेषु व्यवहारेषु भोजनपानादिषु च या समानता आसीत्, संस्कृत-प्रचारादिविषये यच्च समानं चिन्तनमासीत्, या च पारस्परिकी अविच्छेद्या विश्वसनीयता आसीत् तत्सर्वमावयोरेकसूत्रतायाः कारणमासीत्। तादृशः प्रगाढतरः सम्बन्धो दुर्लभ एव भवति। श्रीशास्त्रिमहोदयानां परिवारे निवसता मया यत् प्रतिदिनं त्रिचतुर्वारं काले काले काफी-चाय-दुग्धपानस्य अव्यवधानं सुखं समुपलब्धं तदपि एकस्मिन् लघुपद्ये वर्णितम्—

प्रातः काफी सायं चायं, रात्रौ क्षीरं पायं पायम्।
श्रीमत्-शास्त्रिकुटुम्बे वासः, आसीन्मम सरसः सोल्लासः॥

प्रातः प्रबुध्य ससुखं, परिहाय शय्यां
प्रक्षाल्य हस्तवदनादि, निपीय चायम्।
ध्यानासनस्थ-मुनिवत् सततं निमग्नान्
ताम्बूलवीटिरचने समुदं स्मरामि॥ ९॥

इदमेकं शास्त्रिमहोदयानां दैनिकं कौतुकङ्करं वृत्तमस्ति। प्रातःकालादारभ्य रात्रौ दशवादनपर्यन्तं प्रायः सर्वोऽपि कालः शास्त्रिमहोदयानां लेखने, अध्ययने, अध्यापने, अनुसन्धाने, सम्भाषणे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दूरवाणीद्वारा वार्तालापे च व्यतीतो भवति स्म। तथापि एतानि सर्वाणि कार्याणि सर्वथा नियतकालिकानि नासन्। तेषु काले काले व्यतिक्रमोऽपि भवति स्म। परन्तु तेषां यत् अपरिहार्यं नियतकालिकं कार्यमासीत् तत् प्रातःकाले उत्थाय, मुखमार्जनं कृत्वा, चायं निपीय, मुनिवत् एकासने स्थित्वा, निश्चलेन मनसा ताम्बूलवीटिकानां निर्माणं तथा तासां सम्पुटिकायां स्थापनमासीत्। अत्र किमपि व्यवधानं तेषां कृते असह्यम् अक्षम्यं चासीत्।

इयं तेषां दिनचर्या, तदानीमपि तथा इदानीमपि स्मृता मनोरञ्जनं करोति।

श्रीशास्त्रिभिः सह सदा समनोविनोदं
जाता विहार-शयनाशनपान-गोष्ठीः।
स्मृत्वा, न कः स दिवसो न च का निशा वा
अद्यापि यत्र न मनो मम मुह्यतीव॥ १०॥

आन्ध्रप्रदेशे श्रीशास्त्रिमहोदयैः सह विभिन्नकालिकयात्रासु मया निम्नलिखितेषु स्थानेषु भ्रमणं प्रचारकार्यं च सम्पादितम्।

हैदराबाद, शर्विपेट, सिकन्दराबाद, राजमहेन्द्री, काकिनाडा, भीमवरम्, उण्डी, कोब्बूर, अदिलाबाद, गुन्टूर, नरसारावपेट, तेनाली, पोन्नूर, विजयवाड़ा, वापट्ला, बारंगल, एर्पेड्डु, चित्तूर, तिरुपति, प्रोद्दटूर, वनपर्ती, कर्नूल, मन्त्रालय, अदौनी।

आन्ध्रप्रदेशीयनगरातिरिक्तम् उत्तरप्रदेशस्य देवरिया, भाटपार-रानी, लार, लखनऊ, अयोध्या, प्रयागप्रभृतिनगरेषु, दिल्ल्यां चापि तैः सह मया अनेकधा यात्रा कृता। वाराणस्यां तु ते अनेकवारं समागताः ममैव च संस्थाने निवासं कृतवन्तः। एतासु सर्वास्वपि यात्रासु तेषां सहवासे यादृशः मया आनन्दः सौख्यं चाधिगतं तत् स्मारं स्मारं सदैव मम मनो मोमुद्यते मोमुह्यते च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मत्पूर्वजन्मकृत-पुण्यलवेन लब्धान्
शश्वन्मदीयहितचिन्तन - सक्त - चित्तान्।
दुर्दैवतेन च ममैव पुनर्वियुक्तान्
अद्यापिताननुविचिन्त्य शुचं व्रजामि॥ ११॥

पूर्वश्लोकेषु शास्त्रिमहोदयानां चर्चा कृता मया। मया यत् बहुवर्षपर्यन्तं सान्निध्यं, सहयोगः, स्नेहः सद्‌भावना च शास्त्रि-महोदयानां प्राप्ता तत्सर्वमहं स्वपुण्योदयस्यैव फलं मन्ये। अहं यावन्ति दिनानि तेषां गृहे निवासं करोमि स्म तावन्ति दिनानि ते प्रतिदिनं प्रातःकालादारभ्य कदाचित् मम भाषणाय, कदाचित् मम सम्भाषणाय, कदाचित् मम सहायतायै, कदाचित् आकाशवाण्यां मम कार्यक्रमाय च ते बहुभिर्जनैः सह दूरवाणीद्वारा वार्तालापं कुर्वन्ति स्म। एवं सततमेव ते मम हितचिन्तने निरतास्तिष्ठन्ति स्म। परन्तु दुर्दैवात् कतिचिद् दिनानि रुग्णाः सन्तस्ते अन्ततः १० जनवरी ८१ दिनाङ्के दिवंगताः। तदानीमहं दिल्ल्यामासम्, अतो विलम्बेन सूचना प्राप्ता। अतोऽहं शास्त्रिमहोदयानां श्रद्धाञ्जलिसभायामुपस्थातुं नाशक्नुवम्। तस्य अद्यावधि मे पश्चात्तापो न व्यपगतः। परन्तु दिवङ्गतेष्वपि तेषु तेषां परिवारेण सह मम तादृश एव सम्बन्धो विद्यमान आसीत्। अद्यापि च स प्रचलत्येव। विशेषतस्तेषां ज्येष्ठकन्या डॉ० के० कमला, या इदानीमेव हैदराबादे उस्मानिया विश्वविद्यालयस्य संस्कृतविभागात् सेवानिवृत्ता, सम्प्रति संस्कृत-अकादमीसंस्थाने अध्यक्षपदे कार्यं सम्पादयन्ती विराजते, तस्या अद्यापि मम संस्थानेन सह घनिष्ठः सम्बन्धः, मयि महीयसी श्रद्धा च। सा "तातपादाः" इति सम्बोधनेन मां पत्रं लिखति, काले काले आर्थिकीं सहायतामपि च करोति। पुनश्च न केवलं सा एव अपितु तस्या महान् संस्कृतप्रणयी ज्येष्ठो जामाता श्री के. कृष्णफणीशशर्मा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बी. ई., एमं बी. ए, एल एल बी. (शारदायाः पतिः) अपिं मदीये संस्कृतप्रचारकार्ये, मयि च नितान्तं श्रद्धालुः संस्थानस्य हितचिन्तकश्च। परं शास्त्रि-महोदयानामभावस्तु सर्वथा अपूरणीय एव तथा अविस्मरणीय एव।

अद्यापि सस्मित - सकौतुकमन्नपूर्णा-
देव्याः कषायिततरे नयने स्मरामि।
या बाणभट्टकृतिपाठनतो विरक्ते
श्रीशास्त्रिणि प्रकुपिता भवति स्म नित्यम्॥ १२॥

श्रीशास्त्रिणां गृहस्य इदमेकं कौतुककरं वृत्तं वर्तते। तेषां पत्नी अन्नपूर्णा देवी संस्कृतज्ञा आसीत्, रघुवंश-कुमारसम्भव-मेघदूतादिकाव्यानि च किञ्चिदधीतवती आसीत्। परं कादम्बरी-पठनस्यापि तस्या बलवती आकांक्षा काले काले उदेति स्म। तदर्थं सा शास्त्रिमहोदयमेव अध्यापनाय निवेदयति स्म। परं शास्त्रिमहोदयैः कदापि तस्या निवेदने ध्यानं न दत्तम्। अतः सा यदाकदाचित् कुपिता तिष्ठति स्म। तदानीं यत् तस्याः कषायिततरे नयने, वदनं च विवर्णं पश्यामि स्म तत् अद्यापि मम कदाचित् स्मृतिपथं गच्छति कौतुकं च जनयति।

प्रायेण पण्डितानामयं स्वभावो मया बहुधा अवलोकितो यत्ते पत्नीनामध्यापने ज्ञानवर्धने वा ध्यानं न ददते। केवलं सेवामेव गृह्णन्ति।

अद्यापि भाग्यनगरस्य सुधीसमाजे
सम्मान - सौख्य - सुयशो - निरपेक्षमेकम्।
सारस्वते पथि सदा निभृतं चरन्तं
श्रीरामचन्द्रमवधूतमहं स्मरामि॥ १३॥

हैदराबादे श्रीशास्त्रिमहोदयानां गृहे मम निवासकाले तेषामेके श्रीरामचन्द्रशर्मनामानः संस्कृतविद्वांसः तेलगूभाषायाश्चापि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधिकरिण: पण्डिता, विख्याता लेखकाश्च निवसन्ति स्म। ते शास्त्रिमहोदयानां सतीर्थ्या: बालसखायश्च आसन्। तेन सम्बन्धेन शास्त्रिमहोदया: स्वगृह एव तेषां निवास-भोजन-पानादीनां व्यवस्थां कृतवन्त: आसन्।

श्रीरामचन्द्रमहोदयानामिदमेकं परमं वैशिष्ट्यमासीद् यत् तेषां समाजे समादरस्य, सम्मानस्य, पुरस्कारस्य, कीर्तेर्वा कापि अपेक्षा नासीत्। लौकिककलाभनिरपेक्षास्ते साहित्यसेवां कुर्वन्ति स्म। लार्ड लिटन (Lord Litton) महोदयेन स्वकीये (Elephants and Pandits) (हाथी और पण्डित) इति पुस्तके पण्डितानां लौकिकलाभ-नैरपेक्ष्येण शास्त्रसेवाया यन्महत्त्वं वर्णितं वर्तते तत् सर्वांशरूपेण शर्ममहोदये संघटते स्म। साधारणं वसनं, साधारणीं चर्मपादुकां च परिधाय ते भ्रमणं कार्यं वा कुर्वन्ति स्म। आडम्बरस्य प्रदर्शनस्य वा लेशमात्रमपि तेषु न कदाचिद् दृष्टम्। तानहं स्वरूपेण स्वभावेन च अवधूतमेव कथयामि स्म। ईदृशा: सारस्वतसेवासमर्पितात्मानो विद्वांसो नितरां दुर्लभा इति तेषु मम प्रगाढा श्रद्धा आसीत्। अतस्तेषां पुन: पुन: स्मरणं मे जायते।

अद्यापि संस्मरणमान्ध्रकिसानसंघे
जातस्य मे भवति संस्कृतभाषणस्य।
यत्रागतेषु कृषकेष्वपि देववाचं
श्रोतुं व्यलोकि बहुषु प्रबला समीहा॥ १४॥

हैदराबादनगरे लक्ष्मणकोंडाजीवापूनामका एके अत्यधिक-संस्कृत-प्रणयिनो मन्त्रिणो मम सरलसंस्कृतभाषणेन नितान्तं प्रभाविता मयि स्नेहभाजश्च आसन्। अत एव ते सदा मम भाषणं श्रोतुमिच्छन्ति स्म, अन्यांश्च श्रावयितुमिच्छन्ति स्म। एकदा हैदराबादनगरे आन्ध्रकिसानसंघस्य विशालमधिवेशनं समायोजितम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवत्। एतस्मिन् समारोहेऽपि ते मां संस्कृते भाषणं कर्तुं नितरामागृहीतवन्तः। परन्तु तेषामाग्रहोऽयं मम कृते महच्चिन्ताजनको जातः। एकन्तु श्रोतारः सर्वे तेलगूभाषिणः, द्वितीयं सर्वे कृषकाः, तृतीयं सर्वे ग्रामाञ्चलवासिनः। तत्र संस्कृत-भाषणमरण्यरोदनमेव मयाऽमन्यत। परन्तु इदं दृष्ट्वा मम सर्वा चिन्ता व्यपगता यत् सर्वेऽपि कृषकाः सश्रद्धं सानुरागं च भाषणं श्रुतवन्तः। मम जीवने कृषकसम्मेलने इदं भाषणं प्रथममुदाहरणमासीत्, मन्ये अन्तिमं च। २७.११.७३ दिनाङ्के मन्त्रिमहोदयैः सह मम सौहार्दपूर्णः परिचयो जात आसीत्।

अद्यापि भाग्यनगरे विजयानगर्याः
प्राचीन - सुप्रथित - राजसभाकवीनाम्।
याऽकर्णिताऽमृतझरी लहरी स्वराणां
सा नो कदापि न कदापि च विस्मृता मे॥ १५॥

आन्ध्रप्रदेशे विजयनगरसम्राजः आन्ध्रभोजेति विरुदेन विख्यातस्य श्रीकृष्णदेवरायस्य राजसभायामष्टौ सुप्रसिद्धाः कवयो विराजमाना आसन् येषां नामानि—अलसानि पेद्देन्ना, रामराजभूषण, पिंगलि सूरनार्य, तेनाली रामकृष्ण, धूर्जटि, नन्दि तिम्मन्ना, मादयगारि मल्लन्ना तथा अय्यलराडु रामभद्रुडु इत्यभूवन्।

एकदा मम हैदराबादनिवासकाले, तदानीमुत्तरप्रदेशस्य राज्यपालानां डॉ० वी० गोपालरेड्डीमहोदयानामाध्यक्ष्ये उपर्युक्तकवीनां कवितापाठस्य एकोऽभिनयात्मकः समारोहः समनुष्ठीयत। एतस्मिन् समारोहे श्री के० लक्ष्मणशास्त्रिमहोदयानां सान्निध्येन ममापि गमनस्य सौभाग्यमजायत। तद् दृष्ट्वा लखनऊनगरेऽपि इमं समारोहमायोजयितुं मया रेड्डीमहोदयाः प्रार्थिताः। कवितापाठे कवीनां या सङ्गीतमयी अद्भुता स्वरलहरी मया आकर्णिता सा कदापि विस्मृतिं न गच्छति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि बालजनसंस्कृतसङ्गमं तं
रामन्थनामपुरजातमहं स्मरामि।
यत्र श्रुतानि बहुबालकबालिकानां
संगीत - नाट्य - कविताऽमृतभाषणानि॥ १६॥

हैदराबादनगरान्नातिदूरवर्तिनि रामन्थपुरग्रामे संस्थापितया भारतीयविद्याविकाससमित्या सञ्चालिते सुरम्ये व्यासाश्रमनामके बालसंस्कृतविद्यालये १९८५ खृष्टाब्दे जनवरीमासस्य १३,१४,१५ दिनाङ्केषु एकं बृहत्तरं बालसंस्कृतसम्मेलनं समायोजितमासीत्। विद्यालयस्य सञ्चालकेन श्री ए० एन० वरखेड़करमहोदयेन तथा सम्मेलनस्य मन्त्रिपदमलङ्कुर्वाणया डॉ० के० कमलामहोदयया वाराणसीतः समाहूतोऽहं सम्मेलने भागं गृहीतवान्, दिनत्रयं च बालक-बालिकानां विविधान् मनोरञ्जकान् कार्यक्रमान्, बालकेषु अद्भुतमुत्साहं च दृष्ट्वा परमं प्रमोदमन्वभवम्।

अद्यापि ते हरिजना लघुबालका मे
नो यान्ति विस्मृतिमनेकसमान्तरेऽपि।
यैः स्तोत्र-गीत-कविताऽमरकोष-गीता-
पाठैः कृतः परिसरो भुवि देवलोकः॥ १७॥

हैदराबादनगरे एम० सौन्दरराजन् नाम्ना एके विख्याता वैष्णवमतानुयायिनः सुप्रतिष्ठिता नागरिका आसन्। ते मां सिकन्दराबादसमीपवर्ति सैदापुर-नामकं ग्रामं नीतवन्तः। अत्र हरिजनबालकानां संस्कृताऽध्ययनाय एका पाठशाला प्रचलति स्म। अत्रत्याः सर्वे बालकाः वैष्णवं वेषं वैष्णवांश्च सर्वान् आचारान् पालयन्ति स्म। आरम्भे विष्णुसहस्रनामस्तोत्रं पठित्वा एतेषां पाठारम्भो भवति स्म। मध्ये-मध्ये अन्येषां स्तोत्राणां, गीतानाम्, ललितकवितानाम्, अमरकोशस्य, गीतायाश्च पाठः प्रचलति स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्यन्तं मधुरेण स्वरेण संस्कृते भाषणस्यापि तेषामभ्यास आसीत्। अतस्तस्याः हरिजन-पाठशालाया वातावरणं सर्वथा संस्कृतमयं सदाचारमयं च दृष्ट्वा मम महान् प्रमोदो जातः। ईदृशी पाठशाला मया कुत्रापि न दृष्टा।

गुण्टूरनाभनगरस्थित - काशिकृष्णाऽ-
चार्यं स्मरामि निरतं सुरवाक्प्रचारे।
अद्यापि कर्णकुहरे मम यस्य मोदं
वीणा - मृदङ्ग - मधुरध्वनिरातनोति ॥१८॥

आन्ध्रप्रदेशस्य यथा चित्तूरनगरे तथा गुण्टूरनगरेऽपि संस्कृतप्रचारिणी सभा प्रचलति। तस्याः संस्थापका आसन् विद्यावयोवृद्धा विद्वांसः श्रीकाशीकृष्णमाचार्यमहोदयाः। तेषामिदं वैशिष्ट्यमासीद् यत्ते यथा शास्त्रीयपाण्डित्ये प्रवीणा आसन् तथैव वीणा-मृदङ्ग-वादनेऽपि पटीयांसः आसन्। तेषां दैनिकजीवने संस्कृतशिक्षणेन सह वीणामृदङ्गवादनमपि अनिवार्य्यं कृत्यमासीत्। २३.१०.६७ दिनाङ्के अहमत्र समागतः। एतादृशाः साहित्य-संगीतकला-प्रवीणा विद्वांसो विरला एव मयाऽवलोकिता भ्रमणकाले। बहवः संस्कृतपण्डिता गीतवादनादिकलासु प्रवीणा अपि तत्प्रयोगे अरतिं लज्जाञ्च अनुभवन्तीति दुःखस्य विषयो वर्तते।

नूनं नितान्तमृदु संस्कृतमस्ति लोके
नैतत्तथापि मृदुलं रसगोलतुल्यम्।
अद्यापि तत् प्रथित - तेलगुपण्डितस्य
वाक्यं स्मृतं जनयते हसितं मुदं च॥१९॥

एकदा १५.१०.६७ दिनाङ्के आन्ध्रप्रदेशस्य सिकन्दराबादनगरे संस्कृतशिक्षाशिविरस्य समापनसमारोहः प्रचलति स्म। तत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुख्यातिथिना एकेन तेलगुशिक्षाधिकारिणा उक्तम्—"संस्कृतं यद्यपि सरलं मृदुलं च भवति परं तथा न भवति यथा कलकत्तानगरस्य रसगोलकं (रसगुल्ला) भवति।" अत्र तस्य 'रसगुल्ला' इति शब्दो विस्मृतो जातः। ततस्तेन हस्तमेव गोलाकारं कृत्वा 'रसगुल्ला' कथनस्य चेष्टा कृता। इदं दृष्ट्वा सर्वेऽपि सभायामुपस्थिता जना हसितवन्तः परमं च प्रमोदमन्वभूवन्।

अद्यापि आन्ध्रधरणीविदुषां वराणां
तेषामुदारमहदाशयतां स्मरामि।
ये नारिकेल - फल - माल्य - युतोत्तरीयै-
रर्चन्ति वक्तृविबुधान् बहुमानपूर्वम्॥ २०॥

आन्ध्रप्रदेशीय-शिक्षाविदामियमेका महती उदारता महदाशयता च वर्तते यत् ते व्यक्तिगतरूपेण संस्थागतरूपेण वा यदि कामपि सभामायोजयन्ति तत्र च कस्यापि विदुषो भाषणं कारयन्ति तर्हि तस्य नारिकेलफलपुष्पमालोत्तरीयद्रव्यादिभिरवश्यमेव सम्मानं कुर्वन्ति। आन्ध्रप्रदेशे भ्रमणकाले मयापि बहुषु स्थानेषु सम्मानाः प्राप्ताः, व्यक्तिगतरूपेण संस्थागतरूपेण च। तेषु कानिचित् स्थानानि यथास्मरणं नीचैरुल्लिख्यन्ते—

१. अ० भा० संस्कृतप्रचारपरिषद्, राजमहेन्द्री।
२. श्रीवेणुगोपालसंस्कृतप्रचारसभा, काकिनाडा।
३. संस्कृतकलाशाला, गुन्टूर।
४. संस्कृतकलाशाला, तेनाली।
५. श्रीराम-मोहन-हायर-सेकेण्डरी स्कूल, गुण्टूर।
६. म्युनिसिपल हायर सेकेण्डरी स्कूल, नरसारावपेट।
७. सुब्बाराव एण्ड नारायण कालेज, नरसारावपेट।
८. संस्कृतविज्ञानवर्द्धिनीपरिषद्-वारंगल।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

९. श्रीमती लक्ष्मीकान्तम्मा, बापटला।

१०. श्रीवेदशास्त्रपरिषद्, भीमावरम्।

विजयवाड़ा—

अद्यापि आन्ध्रकविताव़रकान्त-सत्य-
नारायणं ऋविवरं बहुशः स्मरामि।
यस्तद्गृहं मयि गते प्रथमं सुपद्यै-
रेवार्घ्यपाद्यमकरोन्मम संप्रहृष्टः॥ २१॥

१६.९.६७ दिनाङ्के अहं अ० भा० संस्कृतप्रचारकसंघसमारोहे भागं ग्रहीतुं राजमहेन्द्रीनगरं गतवानासमिति पूर्वमुल्लिखितम्। तस्मिन्नेव प्रसङ्गे विविधनगरेषु परिभ्रमन् २६.१०.६७ दिनाङ्के विजयवाड़ानगरं समागतोऽहम्। अत्र कवि-सार्वभौम-श्रीविश्वनाथ-सत्यनारायणमहोदयैः सह मिलनं मे प्रधानं लक्ष्यमासीत्। तदनुसारं पूर्वसूचनां विना यदाऽहं तेषां गृहं गतवान् तदा ते कुत्रापि गमनार्थं सन्नद्धा आसन्। परन्तु मम परिचयं लब्ध्वा ते पुनरुपविष्टाः, ममागमनेन च भृशं प्रसन्ना अभूवन्। ततस्ते मम आतिथ्यकरणात्पूर्वं मां पण्डितं ज्ञात्वा बहूनि मनोहराणि संस्कृतपद्यानि स्वकीयेन विशिष्टेन आन्ध्रप्रदेशीयस्वरेण श्रावितवन्तः। कथितवन्तश्च-इदमेव विदुषां प्रथममातिथ्यम्। ततः परं ते मम हस्ते अर्घ्यजलं दत्त्वा काफीपानादिना स्वागतं कृतवन्तः, स्वरचितानि कानिचित् पुस्तकानि च समर्पितवन्तः। तस्मिन् दिने वस्तुतः कस्यापि महाकवेर्मम दर्शनं जातमिति मया अनुभूतम्।

अद्यापि दृश्यत इव प्रति काकिनाडां
श्रीशास्त्रिभिः सह मम व्रजतः समोदम्।
कृष्णानदीमुभयतोऽधिकशालिशस्यैः
पीताम्बरेव पृथिवी वितताऽतिदूरम्॥ २२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजमहेन्द्रीनगरस्य प्रचारकसंघे भागं गृहीत्वा परावर्तनकाले अहं श्रीशास्त्रिमहोदयैः सह काकिनाडानगरं प्रस्थितवान्। गमनकाले कृष्णानद्याः उभयपार्श्वे यत् सुदूरं यावद् विस्तृतानि शालिधान्यक्षेत्राणि दृश्यन्ते स्म तेन पृथिवी सर्वत्र पीताम्बरधारिणीव प्रतिभाति स्म। इदं दृश्यं दृष्ट्वा ऋतुसंहारस्य "सम्पन्नशालिनिचयावृतभूतलानि" इति पदं स्मृतिपथमागच्छति स्म महुर्मुहुर्मे। एवं प्राकृतिकदृश्यैर्मनो विनोदयन्तौ आवां काकिनाडां प्रासवन्तौ। तत्र च पण्डितप्रवराणां श्रीजटावल्लभपुरुषोत्तमशर्मणां प्रयासेन श्रीवेणुगोपालसंस्कृतप्रचार-सभायां तन्नगरनिवासिनां संस्कृतप्रणायिनामेका विचारगोष्ठी समायोज्यत। आन्ध्रप्रदेशस्य पूर्वदिशान्ते सागरतटवर्ति-प्रदेशमिमं विलोक्य मे महान् प्रहर्षः समजायत।

चित्तूर—

चित्तूरनामनगरे सुरवाक्प्रचारे
लग्नेऽपि, तस्य सुमहत्यपिं कार्यजाते।
विद्यालये पठति नैकजनोऽपि यत्, तत्
अद्यापि मत्-स्मृतिगतं विधुनोति चेतः॥ २३॥

आन्ध्रप्रदेशस्य चित्तूरनगरे संस्थापिता संस्कृतप्रचारिणी सभा बहोः कालात् प्रचार-शिक्षण-प्रशिक्षण-प्रकाशन-परीक्षादिमाध्यमैः संस्कृतक्षेत्रे उल्लेखनीयं कार्यं विदधती विराजते। अस्या एव रजतोत्सवसमारोहे मुख्यातिथिरूपेण समाहूतोऽहं १०.१०.७३ दिनाङ्के एतन्नगरं प्रासवान्, श्री के० लक्ष्मण शास्त्रिमहोदयैः सह च निवासः अभवत्। द्वितीयदिने श्रीमतां डॉ० वी० राघवन्महोदयानामाध्यक्ष्ये सभा आरभ्यत, मम भाषणञ्चाभूत्। सभाया दिनद्वयपर्यन्तं सर्वेऽपि कार्यकलापा नितरां मनोहरतया सम्पन्नाः। सांस्कृतिकान् कार्यक्रमांश्चापि दृष्ट्वा सुमहान् प्रमोदः सञ्जातः। परन्तु अन्ते इदं ज्ञात्वा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुमहत् कष्टमजायत यत् चित्तूरनगरस्य कलाशालायां (कालेज) संस्कृतस्य प्राध्यापकः आसीत् परं छात्रा न आसन्। यत्र संस्कृतप्रचारस्य तादृशी महती संस्था आसीत् तत्र कलाशालायां संस्कृताध्येतारश्छात्रा नाऽभूवन् इति ज्ञात्वा मम सर्वोऽपि प्रमोदः समाप्तिं गतः।

तिरुपति—

अद्याप्यहं तिरुमलैशिखरोपरिस्थं
तन्मन्दिरं नतशिराः सततं स्मरामि।
यत् स्वीयदृश्य-महिमामितवैभवेन
सन्मन्दिराणि सकलानि सदाऽतिशेते॥ २४॥

तिरुपतिक्षेत्रे अहं वारद्वयं गतवान्। प्रथमं १४-१५-१६.९.५९ दिनाङ्के यदा वेंकटेश्वरकलाशालायां वेंकटेशवेदपाठशालायां च मदीयं भाषणं जातम्। अनन्तरं द्वितीययात्रा १५.१०.७३ दिनाङ्के सञ्जाता यदा राष्ट्रियसंस्कृत-विद्यापीठे मदीयं भाषणमायोजितमासीत्। एतद्यात्राद्वयेऽपि अहं तिरुपतिदेवालयं गत्वा देवस्य दर्शनं कृतवान्। परन्तु देवदर्शनातिरिक्तं तस्य मन्दिरस्य यादृशे उत्तुङ्गशैलशिखरे तदवस्थानं वर्तते, या च तत्र सर्वतोमुखी समृद्धिरवलोक्यते, तेनापि तस्य मन्दिरस्य अधिकं गौरवं वर्द्धते। एतादृशं सर्वविधमहिममण्डितं मन्दिरं नान्यत्र कुत्रापि लब्धुं शक्यते इति मे मतिः।

अद्याप्यहं तिरुपतिस्थितमन्दिरस्थं
तत् क्षौरमण्डपमलं चकितः स्मरामि।
यत्राऽन्वहं शिशुशिरांसि शताधिकानि
सम्मुण्डितानि त्त्र भवन्त्यपि खण्डितानि॥ २५॥

तिरुपतिमन्दिरं गत्वा प्रायः सर्व एव जना बालकानां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिरोमुण्डनं कारयन्ति। तदर्थं तत्र एकं विशालं क्षौरमण्डपं निर्मितमस्ति यत्र शताधिका नापिता मुण्डनार्थं समुद्यतास्तिष्ठन्ति। परन्तु मुण्डनार्थिनां जनानां, विशेषतः बालकानां चाञ्चल्यात् मुण्डनेन सह तेषां शिरः अपि क्वचित् क्वचित् खण्डितं भवति स्म। अत्र बहवः पुरुषाः स्त्रियश्चापि मुण्डनं कारयन्ति।

अस्मिन् मन्दिरे तादृशं विशालं क्षौरमण्डपं, तादृशं नापितानां समूहं, मुण्डनार्थिनां तादृशं सम्मर्दं, मुण्डितानां केशानां तादृशं क्षणे क्षणे जायमानं निचयं दृष्ट्वा मम महान् विस्मयो भवति स्म। तादृशं दृश्यं मया अन्यत्र कुत्रापि मन्दिरे न दृष्टम्।

वारंगल—

अद्याप्यहं सुरगिरो गृहमद्वितीयं
वारंगलं पुरवरं नियतं स्मरामि।
यत्राधुना विजयसारथिपण्डितस्य
"मन्दाकिनी" वहति कापि नवा लसन्ती॥ २६॥

आन्ध्रप्रदेशस्य वारंगलनगरे ५.११.६७ दिनाङ्के तत्रत्यायाः संस्कृतविज्ञानवर्धिन्याः परिषदो वार्षिकोत्सवः समायोजित आसीत्। तदानीमहं हैदराबादनगरे श्री के० लक्ष्मणशास्त्रिणां गृहे निवसन्नासम्। इदं ज्ञात्वा ते शास्त्रिभिः सह मामपि विशेषरूपेण आमन्त्रितवन्तः "संस्कृतसाहित्ये विज्ञानम्" इति च विषये भाषणं कर्तुं निवेदितवन्तः। ततोऽहं यथासमयं गतवान्, स्वकीयं च सर्वं कार्यं सम्पादितवान्, तथा तत्रत्येन विद्वत्समुदायेन च मिलित्वा परमं प्रमोदमन्वभवम्। परन्तु मम प्रमोदस्य तत्र अन्यदपि एकं विशिष्टं कारणमासीत्।

अस्याः परिषदः मुख्यसमायोजकाः श्रीभाष्यं विजयसारथिमहोदया आसन्। तेषु प्रौढपाण्डित्यं काव्यकौशलञ्चेत्युभयमपि समानरूपेण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतास्पदमासीत्। तत्रापि तेषां काव्येषु "मन्दाकिनी" नामकं गङ्गाविषयकं कवितागुच्छकं सर्वथा नूतनायां शैल्यां, नूतनेषु छन्दस्सु, नूतनैर्भावैर्विभूषितं कविताजगति नूतनां शिल्पकल्पनामुपस्थापयति। विशेषतश्चात्र धातुरूपाणां गेयरूपेण विपुलः प्रयोगो वर्तते। विभक्तीनाञ्चाप्यत्र एकैकासां एकस्मिन्नेव पद्ये भूयान् प्रयोगो लभ्यते। एवञ्च मनोरंजनेन सह धातुरूप-शब्दरूप-परिज्ञानायापि इदं परमं सहायकं भवितुमर्हति।

राजमहेन्द्री—

सम्पूर्ण - संस्कृतप्रचारक - पण्डितानां
यत्राभवन्मिलनमेकमभूतपूर्वम् ।
अद्यापि मन्मनसि राजति सर्वदा तत्
स्थानं शुचि प्रथित-राजमहेन्द्र-संज्ञम्॥ २७॥

१३.६.६७ दिनाङ्काद् आरभ्य १६.९.६७ दिनाङ्कपर्यन्तं राजमहेन्द्रीप्रसिद्धेनगरे संस्कृतप्रचारकाणामेकं बृहत् सम्मेलनं समायोजितमासीत्। विभिन्नप्रदेशेभ्यो भूयांसः संस्कृतप्रचारकर्मणि निरता विख्याताश्च बुधा आहूता आसन्। वाराणसीतः, अहं च बटुकनाथशास्त्रीखिस्तेमहोदयश्चेति द्वौ जनौ आहूतौ आस्ताम्। सभायाः प्रमुखसंयोजकाः चिलकूरि रामभद्रशास्त्रिणोऽभूवन्, अध्यक्षपदं च काञ्चीकामकोटिपीठाधीश्वरा श्रीचन्द्रशेखरेन्द्रसरस्वती-महाराजा विभूषितवन्तः। सम्मेलनस्य मुख्यो विषयः संस्कृत-प्रचारोपाय-चिन्तनमासीत् परं वेद-शास्त्र-पुराणादिविषयाणामपि गोष्ठ्यः समायोजिता अभूवन्। सम्मेलने बहूनां विदुषां भाषणान्यभूवन् परं सरलताया दृष्ट्या मदीयं भाषणं बहूनां कृते अधिकं रुचिकरं समजायत। एतद्विषये सम्मेलनस्य विवरणपत्रे सम्पादकैरित्थं टिप्पणी कृता—

Shri Vasudeva Dwivedi Shastri of The Sarvabhauma

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Sanskrit Prachar Karyalaya, Varanasi, Pleaded That Sanskrit must be made a compulsory subject of study from the Primary school up to the Univercity. Shri Shastri's Speech Delivered in fluent and simple Sanskrit impressed the audience immensely and one felt that Sanskrit could really be a spoken language on having heard Shri Shastri.

"The first All India Sanskrit Pracharak Conference-report.")

18, september 1967

अस्मिन्नगरे सम्मेलनानन्तरमपि अहं कानिचिद् दिनानि तत्रत्यानां सुप्रसिद्धलेखकानां संस्कृतप्रणयिनां श्रीमहीधर-जगन्मोहनरावमहोदयानां गृहे सानन्दं निवासमकरवम्। एभिः संस्कृतसुभाषितानामेकः आन्ध्रभाषानुवादसहितः बृहत्संग्रहोऽपि प्रकाशितो वर्तते। एतेषां गृहस्य एका लघ्वी दासी बालिका स्वकीयं नाम "शेषाद्रि" इति कथितवती तदाऽहं चकितो जातः। तद् वृत्तं मम सदा स्मृतौ यथा विराजनं रञ्जयति।

अद्यापि तत् "कुचिपुडी" इति नृत्यमान्ध्रं
द्रष्टुं सदैव हृदयं परमोत्सुकं मे।
प्रश्नोत्तरी वहति यत्र झरीव रम्या
वेदान्तबोधभरिता परिरञ्जिका च॥ २८॥

यथा उत्तरभारते कत्त्थकनृत्यं, केरलेषु कथकलीनृत्यं तथैव आन्ध्रप्रदेशे 'कुचिपुडी' नृत्यं बहु लोकप्रियं वर्तते। अस्मिन् नृत्ये नर्तक्या सह एकस्य पुरुषस्य संवादो भवति, प्रश्नोत्तरं च। इदं च सर्वं संवादादिकं न केवलं मनोरञ्जकं प्रत्युत धार्मिकं दार्शनिकं आध्यात्मिकं च भवति। एतादृशं ज्ञानवर्द्धकं शिष्टतापूर्णं च नृत्यं मया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न क्वचिदन्यत्र अवलोकितमिति तस्य पुनः पुनः स्मरणं जायते। इदं नृत्यं मया राजमहेन्द्रीनगर एवावलोकितम्।

अद्यापि तेलगुगिरः कवितावलीनां
सम्पूर्ण - संस्कृत - पदावलि - गुम्फितत्वम्।
यद् यत् श्रुतं च पठितं च विचिन्त्य तत्तत्
नित्यं भवामि मुदितोऽपि च विस्मितोऽपि॥ २९॥

तेलगूभाषायाः पद्येषु गद्येषु च भूयांसः संस्कृतशब्दाः प्रयुज्यन्ते। कानिचित् ईदृशान्यपि पद्यगद्यानि उपलभ्यन्ते येषु त्रिचतुरा एव शब्दा आन्ध्रभाषाया भवन्ति, अन्ये पुनः संस्कृतभाषाया एव। कथमिदं जातम्? अयं तेलगूभाषाया उपरि संस्कृतस्य प्रभावो वर्तते, अथवा संस्कृतभाषया सह तेलगूभाषायाः स्नेहातिरेको वर्तते, उत तेलगूकवीनां संस्कृतशब्दानां प्रयोगे आनन्दानुभूतिरधिका जायते, अथवा ते संस्कृतशब्दानां प्रयोगे तेलगूकवितायामधिकं सौष्ठवं भावप्रकाशनक्षमतां वा मन्यन्ते इति न मया वक्तुं शक्यते। यत् किमपि कारणं भवेत्, स्थितिः सा यथार्था वर्तते। तेन च कारणेन तेलगूकवितानां श्रवणे, पाठे, वा मया महान् आनन्दोऽनुभूयते स्म। पाठकानां परिज्ञानाय मयात्र द्वित्राणि उदाहरणानि उल्लिख्यन्ते—

पद्यं यथा मनुचरिते हिमालयवर्णनम्—

अट चनि कांचि भूमिसुरडम्बरचुम्बि-शिरस्सरज्झरी-
पटल-मुहुर्मुहुर्लुठदभंग - तरङ्ग - मृदङ्ग - निस्वन-
स्फुट-नटनानुरूप-परिफुल्ल-कलापि-कलाप-जालमुल्
कटक-चटत्-करेणु-कर-कम्पितशालमु शीतशैलमुल्॥

अस्मिन् पद्ये "अटचनिकांचि" (तत्र गत्वा ददर्श) इति त्रय एव शब्दाः तेलगूभाषाया विद्यन्ते। अपरे पुनः संस्कृतभाषाया एव। अन्यत् पद्यं यथा सरस्वतीवन्दनायाः—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अम्ब नवाम्बुजोज्ज्वल-कराम्बुज-शारदचन्द्रन्द्रिका-
डम्बर-चारुमूर्ति-प्रकट-स्फुट-भूषणरत्न-दीपिका-
चुम्बित-दिग्विभाग-श्रुतिसूक्ति-विविक्त-निज-प्रभावभा-
वाम्बर-वीथि-विश्रुतविहारिणि नन् कृपचूडु भारती॥

पोतनामात्यविरचिते आन्ध्रभागवते, प्रथमस्कन्धः, श्लो०१/९

अस्मिन् पद्ये "नन् चूडु" इति शब्दद्वयमेव तेलगूभाषाया वर्तते यस्यार्थो भवति "अस्मान् पश्य" इति। अन्ये सर्वे शब्दाः संस्कृतस्यैव विद्यन्ते प्राशस्त्यवर्णनपराः।

अथ एकं गद्यस्योदाहरणम्—

विज्ञानकौमुदी यन पेरु वहिंचि परिव्राजिकावेषधारिणी यग्र विषधिकन्य युपन्यासचातुर्य बोध माधुर्यगुणधुर्यं बल मधुसमय-मन्थर-गद्यसारगिरिगन्धवाह नव प्रवाह-लहरिका स्फालनानन्दकन्दलित माकन्द घुसृण किसलय रसास्वादन कषाय कण्ठ कलकण्ठ कामिनीकोमल कुश्यमान कोलाहल पञ्चमम्बु ननुकरिञ्चु तिन्ननि यो लगुन.......

श्रीनाथकविप्रणीते काशीखण्डे पृ० ३५२

आन्ध्रप्रदेशप्रशस्तिः—

कृष्णापूतपयः-प्रवाह-विलसत्-शस्यावली-श्यामलः
पोतन्नादिकवीन्द्रकान्तकविताकल्लोललीलास्थलम्।
श्रीमद्वेंकटपादपद्मयुगलच्छायाभिसंवर्धितः
सिद्धिं सर्वविधामुपैतु विपुलामान्ध्रप्रदेशो महान्॥ ३०॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २१ :

कर्णाटकप्रदेशीयानि संस्मरणानि

अद्यापि माध्वमत-जन्म-विकास-पीठं
कर्णाटकं स्मरति मे हृदयं प्रदेशम्।
यत्र स्थितस्य परितो भवति स्म शश्वद्
द्वैतस्य मे श्रुतिगतः खलु शङ्खनादः॥ १॥

आद्यशङ्कराचार्यप्रवर्तितस्य अद्वैतवादस्य विरोधे द्वैतवाद-प्रवर्तकस्य श्रीमध्वाचार्यस्य जन्म कर्णाटकप्रदेशे सञ्जातम्। अतः प्रदेशेऽस्मिन् माध्वमतनाम्ना प्रसिद्धस्य द्वैतवादस्यैव सर्वत्र शङ्खनादः श्रूयते। विद्यालयेषु, मठेषु, मन्दिरेषु, छात्रावासेषु, पुस्तकालयेषु, सार्वजनिकस्थानेषु च मध्वाचार्यचित्राणां स्थापनं, माध्वस्तोत्राणां पाठस्तथा माध्वसिद्धान्तानां प्रवचनञ्चेत्यादयो बहवः कार्यक्रमाः प्रचलन्ति। विरुद्धमतावलम्बिभिः सह शास्त्रार्थस्यापि क्वचित् क्वचिद् आयोजनं भवति। इदं सर्वं साक्षाद् द्रष्टुं श्रोतुं च मया केरलप्रदेशस्य यात्रां समाप्य २९.१०.५९ दिनाङ्के कर्णाटकप्रदेशस्य यात्रा प्रारब्धा।

उडुपी—

अद्याप्यहं तदुडुपीनगरं वरेण्यं
दैव्या गिरः पठनपाठनसिद्धपीठम्।
नित्यं स्मरामि खलु यत्र वहन्ति पुण्याः
सत् - शास्त्र - तर्कयुत - वैष्णवभक्तिधाराः॥ २॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्णाटकप्रदेशस्य मंगलूरमण्डले उडुपीनामकं नगरं वर्तते। इदमेव १२९५ तमे वैक्रमाब्दे अवतीर्णवतः द्वैतमतप्रवर्तनाचार्यस्य भगवतः आचार्यश्रीमध्वाचार्यस्य जन्मभूमिरस्ति। अत एव नगरमिदं माध्वमतस्य आद्यपीठरूपेण विश्वे विख्यातिमापन्नं तीर्थरूपेण च प्रतिष्ठितं वर्तते एतन्मतानुयायिनां जनानां कृते।

अद्यापि मत्स्मृतिगता उडुपीस्थिताः श्री-
विश्वेशतीर्थयतयो विदुषां वरेण्याः।
येषां प्रचण्डमतिकर्कशतर्कघातान्
सोढुं क्षमाः कतिचिदेव बुधा भवन्ति॥ ३॥

माध्वसम्प्रदायस्य सुप्रसिद्धे तीर्थस्थानेऽस्मिन् अस्य सम्प्रदायस्य अष्टौ मठा वर्तन्ते अष्टौ च मठाधीशाः। तेषु अधमारुमठाधीशाः श्रीविबुधेशतीर्थस्वामिनस्तथा पेजावरमठाधीशाः श्रीविश्वेशतीर्थश्रीपादाः विशिष्टा विद्वांसः प्रवचनपटीयांसश्च। एतयोश्चापि श्रीविश्वेश-तीर्थमहोदयाः विशेषरूपेण शास्त्रार्थप्रियाः, स्वपक्षपोषणाय विरोधिनां पक्षखण्डनाय च सदैव बद्धपरिकरास्तिष्ठन्ति। अनेकधा एतैः माध्वमतप्रतिवादिनां कृते पुरस्कारघोषणाऽपि कृता। एतेषां तर्काः प्रतिवादिनां कृते भयङ्कराः प्रहाराः भवन्ति।

अद्याप्यहं तदुडुपीनगरस्य रम्य-
दीपावलीदिनमुदं सततं स्मरामि।
तैलानुलेपनबहुत्व - विपिच्छिलासु
यत्रापतं बहुषु कुट्टिमभूमिकासु॥ ४॥

३१.१०.५९ दिनाङ्के अहं अधमारुमठे आसम्। तस्मिन् दिने तत्र दीपावलीमहोत्सवः आसीत्। परन्तु अस्मत्प्रदेशीयदीपावल्यां ये आचाराः पाल्यन्ते तदपेक्षया तत्र इदमेकं वैशिष्ट्यं मया दृष्टं यत्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन् दिने तत्र सर्वे जनाः शरीरे प्रभूतं तैलानुलेपनं कुर्वन्ति। पादयोः प्रभूतं तैलमनुलिप्य यदा जनाः चलन्ति तदा भूमिः पिच्छिला जायते। तदानीं तत्र सावधानतया चलनीयं भवति। मम कृते तु इदं सर्वथा नवीनमासीदिति अहं कुट्टिमासु भूमिषु अनेकवारं न्यपतम्। तत्रत्यं तद्दिनं विविधविशिष्टस्वादिष्ठभोजन-पानादीनां प्रचुरतया महदानन्द-प्रदमासीत् परं बहुत्र पतिततया मत्कृते किञ्चित् कष्टकरं हास्यकरञ्चापि जातम्।

बैंगलोर—

अद्यापि विस्मृतिमुपैति न मे कदाचित्
बैङ्लूरवासिविदुषां बृहती सभा सा।
यत्र श्रुतोऽद्भुततरोऽश्रुतपूर्वशैल्या
श्रीवीरराघवसुधीकृत - पद्यपाठः॥ ५॥

उडुपी-प्रवासानन्तरं बैंगलोर-निवासकाले श्रीचामराजेन्द्र संस्कृतकलाशालायां मम भाषणार्थमेका विशिष्टा सभा समायोजिता अभवत्। सभायां बहूनां विदुषां महत्त्वपूर्णानि भाषणानि जातानि यानि मत्कृतेऽपि ज्ञानवर्द्धकानि मार्गप्रदर्शकाणि च आसन्। अन्ते ममापि भाषणं जातम्। परन्तु अस्याः सभायाः सर्वाधिकमाकर्षकम्, अविस्मरणीयं च यद् वृत्तमासीत्, तदासीत् विद्वद्वर्यश्रीवीरराघवा-चार्यमहोदयानां मङ्गलपद्यपाठः। तेषां पद्यपाठस्य मेघनिर्घोषोपमो गभीरो ध्वनिः, स्वरे मोहकं माधुर्यम्, प्रत्यक्षं प्रतिपदं च उच्चारणस्य वैशिष्ट्यमित्यादि सर्वमपि तेषां महदद्भुतमासीत्। तादृशः श्लोकपाठः ततः पूर्वं मया कदापि नाकर्णितः। अतस्तस्य ध्वनिः सर्वदा मम श्रवणयोः सुगुञ्जन्निव प्रतिभाति।

अद्यापि सा सुरगिरः सदनस्य पूर्ण-
प्रज्ञाभिधस्य वसतिर्नहि विस्मृता मे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्राभवत् सकल-वैष्णवनित्यकृत्ये-
ष्वाचारपालनकृता विषमा दशा मे॥ ६॥

बैंगलोरनगरं गत्वा आदौ मया माध्वमतानुयायिनि पूर्णप्रज्ञविद्यापीठे निवासाय स्थानं प्राप्तम्। तत्रत्यानामध्यापकानां, पण्डितानां, छात्राणाञ्च मयि महानादरभाव आसीत्। सर्वापि व्यवस्था मदनुकूला कृता अभवत्। परं तत् स्थानं वैष्णव-मतानुयायिनामासीत्। अतस्तत्र शौच-स्नान-भोजनपानादिषु, शयने जागरणे चापि अनेके कठोरा नियमाः पालनीया आसन्। अहञ्च तेषां स्थाने निवसन् कथं तेषामाचारोल्लङ्घनं करोमि? अतो मयापि सर्वेषामाचाराणां पालनं कर्तुमारब्धम्। परं तेन द्वित्रिदिवसानन्तरं मम स्वास्थ्यमशोभनं जातम्।

ततो मम अस्वास्थ्यस्य वृत्तं ज्ञात्वा मदीयाः सद्योजाताः सुहृदः श्रीवीराघवाचार्याः स्वकीयं गृहं नीतवन्तः, औषधप्रदानेन अनुकूलेन भोजनपानादिना च मम स्वास्थ्यं पुनः पूर्ववत् कृतवन्तः। यद्यपि तेऽपि वैष्णवा आसन् तथापि तेषां गृहे कश्चन कठोरः प्रतिबन्धः नासीत्।

विद्वज्जनैः सुरगिरः कविलेखकैश्च
प्रौढैः प्रचारकगणैश्च विभूष्यमाणम्।
अद्याप्यहं पुरमिदं नवशारदायाः
क्रीडाङ्गणोपममलं मुदितः स्मरामि॥ ७॥

बैंगलोरनगरे संस्कृतभाषायाः शास्त्राणां च भूयांसो विद्वांसः, सिद्धहस्ता लेखकाः, काव्यकलाप्रवीणाः कवयश्च प्रचुरसंख्यायां विराजन्ते। संस्कृतप्रणयिनां संभ्रान्तनागरिकाणां मठाधीशानाञ्चाप्यत्र भूयसी संख्या वर्तते। पुनश्च संस्कृतप्रचारकाणामपि अत्र महान् समुदायो वर्तते ये नगरेषु तथा ग्रामेष्वपि सभासम्मेलनद्वारा, शिविरसञ्चालनेन, सांस्कृतिक-कार्यक्रमैश्च गृहे-गृहे जने-जने च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतभाषां प्रापयितुं लोकभाषां च तां सम्पादयितुं प्रयतमाना विलोक्यन्ते स्म। एवञ्च नगरमिदं सुरसरस्वत्या नूतनं क्रीडाङ्गणमिव प्रतिभाति स्म। तेन नगरेऽस्मिन् मम परमा प्रीतिरजायत।

मैसूर—

श्रीमाध्वछात्रनिलये सुखदो निवासः
ग्रन्थालये महति पुस्तकदर्शनं च।
विद्यालये विविध-संस्कृत-शास्त्रचर्चा
अद्यापि मे स्मृतिरुदेति महीसुरस्य॥ ८॥

यदाहं मैसूरनगरं समागतस्तदा तत्रत्यैर्विद्वद्भिर्माध्वविद्यार्थिनिलये मम निवासाय व्यवस्था विहिता। विद्यार्थिनः प्रायेण सर्वेऽपि आचारपालनपरायणाः शीलसम्पन्नास्तथा अवस्थानुसारं संस्कृतभाषणेऽपि कुशला आसन्। अतस्तैः सह निवासे भोजनपाने च कापि असुविधा कष्टं वा किमपि नानुभूतम्। भोजनपानानन्तरं महाराजासंस्कृतमहाविद्यालयस्य विद्वद्भिः सह संस्कृतप्रचारविषयिणी गोष्ठी, तत्रत्ये विशाले पुस्तकालये ग्रन्थानां पत्रपत्रिकादीनाञ्च अवलोकनं तथा यदा कदा नगरस्थ-संस्कृतविद्वद्भिः सह समागमश्चापि प्रचलति स्म।

अद्यापि भारतमहीप्रथितं पुराणं
मैसूरराज्यनगरं हृदि राजते मे।
जातानि यत्र मम कन्नड-देवभाषा-
साहित्यसङ्गम - सुदुर्लभ - दर्शनानि॥ ९॥

मैसूरनगरे स्थितस्य मे अयमपि एको महान् लाभो जातो यत् संस्कृतग्रन्थैः सह कन्नडभाषाग्रन्थानामवलोकनस्यापि सुदुर्लभोऽवसरः सम्प्राप्तः। आन्ध्रप्रदेशे भ्रमतो मम तेलगूलिप्याः पठनस्य सम्यगभ्यास आसीत्। कन्नडलिपिश्चापि तेलगूसमाना भवतीति कन्नडलिप्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञानसम्पादने मम अधिकः परिश्रमो न जातः। पुनश्च तेलगूभाषावत् कन्नडभाषापि प्रचुरसंस्कृतशब्दसमन्विता भवति। अतः कन्नड-भाषाग्रन्थानां विषयबोधोऽपि किञ्चित् सुकर एव भवति। संस्कृतभाषायाः कन्नड़भाषायाश्च कियान् घनिष्ठः सम्बन्धो वर्तते इति विषये विशेषपरिज्ञानायं कन्नड़भाषाया निम्नलिखितं पुस्तकं द्रष्टव्यम्—

१. संस्कृत-कन्नड़गड़ बान्धव्य, ले. वी.एच.श्रीधर. प्रकाशन-अखिल कर्णाटक संस्कृत परिषद्, बैंगलूर-३ मूल्यम्-६.००

अद्यापि तत् खलु महीसुरराज्यरत्नं
वृन्दावनं नवमहं सततं स्मरामि।
यत् प्रेम-सौख्य-रस-केलि-कथाविनोदै-
र्जातं पुरातनवनादपि लोभनीयम्॥ १०॥

अर्थात् इदं नूतनं वृन्दावनं पुरातनवृन्दावनादपि अधिकं शोभनं लोभनीयं च जातमासीदिति तत्रापि मया यदाकदा भ्रमणार्थं गम्यते स्म।

मैसूरनगरे विशालं चामुण्डामन्दिरं विराजते यत्र सर्वदैव उभयोः सन्ध्ययोर्नागरिकनरनारीणां महान् समुदायः पूजा-पाठ-यज्ञ-हवनादि-विविधधार्मिकानुष्ठानानां सम्पादनार्थं समवेतो भवति। भगवत्या अनुग्रहेण तत्रत्यानां सर्वेषां कल्याणं संरक्षणं च भवतीति सर्वेषां द्रढीयान् विश्वास इदमेकं विशिष्टं दैवबलमस्य राज्यस्य।

अन्यच्च पुरन्दरदासप्रभृतिभिः कुमारव्यासप्रभृतिभिश्च कविवरैः काव्यनिर्माणक्षेत्रेऽपि अस्मै राज्याय विशिष्टं स्थानं प्रदत्तं वर्तते।

धारवाड—

श्रीधारवाडनगरे विदुषां गृहिण्या
अद्यापि तत् सुचरितं नहि विस्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्यौ पुरान्तरगतेऽपि मम प्रसन्ना
या स्वागतं कृतवती विविधोपचारैः ॥ १२ ॥

बैंगलोरनगरस्य भ्रमणं प्रचारकार्यं च समाप्य अहं ७.१२.५८ दिनाङ्के धारवाडनगरं प्राप्तवान्। अत्रागत्याहं सर्वप्रथमं देसाईगल्ली-निवासिनां श्रीबुर्लीबिन्दुमाधवाचार्यशास्त्रिणां गृहं गतवान्। एते महानुभावाः संस्कृतविदुषामग्रगण्याः, संस्कृतप्रचारकाणां सम्मान-कर्तारः स्वयं च संस्कृतप्रचारकार्येषु निरन्तरं संलग्ना एके प्रभावशालिनः पण्डिताः सन्तीति पूर्वत एव परिचयं ज्ञात्वा अहं तानेव मिलितुं, तेषामेव च गृहे स्थातुकामस्तेषां गृहं संप्राप्तः परन्तु दुर्दैववशात् ते गृहे न वर्तन्ते इति बहिरेव कस्यापि जनस्य मुखाद् ज्ञात्वा मम महती चिन्ता जाता। ततो द्वारे मां स्थितं दृष्ट्वा एका महिला गृहाद् निर्गत्य मम परिचयं ममागमनप्रयोजनं च पृष्टवती। सौभाग्यात् सा हिन्दीं जानाति स्म। अतस्तया सह वार्तालापे मम किमपि काठिन्यं नाभूत्। ततो मया परिचये दत्ते "पण्डितमहोदयास्तु अद्य न वर्तन्ते" इति दुःखे च निवेदिते तया कथितम्—"चिन्ता न कर्तव्या। भवन्तः अत्र सुखं तिष्ठन्तु। ते श्वः आगमिष्यन्ति। ततो मिलित्वा गन्तव्यम्।" एवमुक्त्वा तया मदर्थे सर्वापि भोजन-पान-विश्रामादिव्यवस्था महत्या प्रीत्या श्रद्धया च विहिता। मां पृष्ट्वा पृष्ट्वा च सर्वं मदनुकूलं सम्पादितम्। तस्या असौ सद्व्यवहारः, सत्कारः, प्रीतिपूर्णः संलापश्च सदैव मे स्मृतौ तिष्ठति। पश्चात् द्वितीयदिने पण्डितमहोदये समागते अन्यत् सर्वं प्रचारकार्यं प्रारब्धम्।

एतन्मया निखिलदक्षिणभारतीयं
संक्षिप्तरूपमिह संस्मरणं व्यलेखि।
अन्यानि कानिचन विस्तरशो मयादौ
ग्रन्थे व्यलेखिषत दक्षिणदर्शनाख्ये॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दक्षिणभारतस्य मया प्रथमयात्रा २५.८.५९तः प्रारभ्य २५.१२.५९ दिनाङ्क-पर्यन्तं विहिता। अस्या विस्तृतं विवरणं "दक्षिणदर्शनम्" इति नामके पुस्तके प्रकाशितं वर्तते। तदनन्तरमपि मया आन्ध्रप्रदेशस्य पञ्चवारं तमिलनाडुप्रदेशस्य च द्विवारं यात्रा कृता। आसां यात्राणां यत् संस्मरणीयं वृत्तमासीत् तदत्र किञ्चित्.संक्षिप्तरूपेण निरूपितम्। उत्तरभारतस्य दक्षिणभारतस्य च समस्तयात्राणां विस्तृतं विवरणं शीघ्रमेव (मम अभिनन्दनग्रन्थे) प्रकाशयिष्यमाणे प्रकाशितं भविष्यति।

मैसूरप्रशस्तिः—

चामुण्डया प्रतिपलं परिपाल्यमानं
ख्यातं पुरन्दर-कुमारमुखैः कवीन्द्रैः।
श्री - शारदोभयसमृद्धि - समेधमानं
मैसूरराज्यमनिशं भुवि बोभवीतु॥ ११॥

✰

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २२ :

केरलप्रदेशीयानि संस्मरणानि

त्रिवेन्द्रम्—

या केरलेषु प्रथमे गमने त्रिवेन्द्रम्-
विद्यालये सुरगिरो विदुषां समाजे।
वासाशनादि - विषये बहुमन्त्रणाऽभूद्
अद्यापि सा स्मृतिगता मम सर्वदैव॥ १॥

३०.१०.५९ दिनाङ्के कन्याकुमारीतः प्रातः प्रस्थाय मध्ये च शचीन्द्रदर्शनं विधाय मध्याह्नसमये निरुवनन्तपुरे (त्रिवेन्द्रम्) स्थितं संस्कृतमहाविद्यालयं सम्प्राप्तः। तत्र उपस्थितैरध्यापकैः सह परिचये जाते, मया स्वकीयभ्रमणोद्देश्ये च निरूपिते "अहमत्र पञ्च-सप्त वा दिनानि कस्यापि अध्यापकस्य गृहे निवासं कर्तुमिच्छामीति" मया विदुषां पुरस्तान्निवेदितम्। ततो बहुभिरध्यापकैः स्वगृहे स्थानदाने काश्चन बाधाः प्रदर्शिताः। कैश्चित् स्वगृहे स्थानाभावस्य परिवार-बाहुल्यस्य च समस्या उपस्थापिता। तदनन्तरं श्रीमता एम०एच० शास्त्रिमहोदयैः स्वगृहे स्थानदानं स्वीकृतम्, निवासभोजनादि-सर्वविधसौख्यप्रदानेन च नितरामनुगृहीतोऽहम्। सर्वा च मम चिन्ता व्यपगता।

अद्यापि भोक्तुमथ लुभ्यति मानसं मे
तन्नारिकेलरस - पायसमद्वितीयम्।
यद् भूयसा तिरुवनन्तपुरे बुधानां
भुक्तं गृहे तदवलेहयुतं यथेच्छम्॥ २॥

केरलेषु नारिकेलफलस्य बहुविधा उपयोगा भवन्ति। वल्कल-सहितस्य तस्य नैवेद्यरूपेण देवताभ्यः समर्पणम्, विशिष्टातिथीनां कृते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्मानरूपेण समर्पणम्, वल्कलरहितस्य तस्य भक्षणम्, तस्य रसस्य पानम्, रसेन पायसनिर्माणम्, तेन अवलेहनिर्माणम्, वल्कलस्य इन्धनरूपेण पाकनिर्माणे उपयोगः, तस्य विक्रयेण च द्रव्यलाभश्चेत्यादयो विविधा लाभा भवन्ति नारिकेलवृक्षस्य। अत एव केरलेषु प्रतिगृहं यथावकाशमनेके नारिकेलवृक्षाः प्राङ्गणेष्वपि रोप्यन्ते। केरलनिवासकाले मयापि नारिकेलफलानां भूयान् उपयोगः कृतः। केरलीयजीवनस्य इदमेकं विशिष्टं वस्तु विद्यते।

अद्यापि सुप्रथित - केरलराज्यपाल-
श्रीरामकृष्णमहनीयकृपां स्मरामि।
यल्लब्ध - वाहनबलेन मदीययात्रा
सर्वत्र केरलभुवः सुखदा सदाभूत्॥ ३॥

श्रीवरगुलरामकृष्णरावमहोदया हैदराबादनिवासिनः आसन्। ते राजनीतौ नेतृत्वं वहन्तोऽपि संस्कृतज्ञा आसन्, काव्यसाहित्यरसिकाश्च। यदाहं पूर्वं हैदराबादनगरं गतवानासम्, तदा श्री के० लक्ष्मणशास्त्रिमहोदयैस्तेषां कृते पत्रं लिखितमासीत्। तदेव पत्रमाधारीकृत्याहं तेषां सविधे गतः। स्वभावतस्ते अत्यन्तं सरलाः सहृदया मधुरभाषिणश्च आसन्। अतस्तैः सह संस्कृतविषये चिरं सविश्रम्भं वार्ता जाता। मध्ये-मध्ये काफीपानादिकमपि जातम्। अन्ते तैः सम्मानरूपेण कानिचित् रूप्यकाणि दत्त्वा मदर्थे एकस्य जीपयानस्य व्यवस्था कृता येन त्रिवेन्द्रम्-समीपवर्तिषु दर्शनीयस्थानेषु मम भ्रमणं संभवं सुखकरं च संवृत्तम्।

अद्याप्यहं तिरुवनन्तपुरस्य पिल्लै-
पोट्टीमुखैस्तदनु वारियरादिभिश्च।
गोष्ठीसुखं यदलभे विबुधैस्सदा तत्
स्मृत्वा तदेव मनसाऽनुभवामि भूयः॥ ४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिरुवनन्तपुरं केरलस्य राजधानी, तस्य प्रमुखं नगरं च विद्यते। तत्र विश्वविद्यालयः, संस्कृतकलाशाला, महाविद्यालयाः विद्यालयाः पुस्तकालयाश्चेति बहूनि शिक्षासंस्थानानि विद्यन्ते। अतः संस्कृत-विद्वांसः संस्कृतप्रणयिनश्चापि भूयांसः समुपलभ्यन्ते। यैः सह मम घनिष्ठः परिचयः संजातः, यैः सह गोष्ठी, संस्कृतचर्चा, संलापः, भोजनपानादिकं च भवति स्म। ते केचन मुख्यरूपेण निम्नलिखिताभिधानाः सन्ति—

१. डॉ० एन० गोपाल पिल्लै, संस्कृतकलाशालायाः सेवानिवृत्तः प्राचार्यः।

२. डॉ० पी० के० नारायण पिल्लै, संस्कृतकलाशालायाः वर्तमानः प्राचार्यः।

३. डॉ० ए० जी० कृष्ण वारियर, विश्वविद्यालये संस्कृतप्राध्यापकः

४. शूरनाडू पी० एन० कुंजन पिल्लै, मलयालमशब्दकोषसम्पादकः

५. श्री आर० वासुदेवन् पोट्टी, संस्कृतकलाशालायां प्राध्यापकः

अद्यापि यः श्रुतिगतो मम केरलानां
सङ्गीतसान्द्रसरसः खलु गद्यपाठः।
गद्यानि यानि पठितानि च तादृशानि
तत्सर्वमेव बहु मोदयते मनो मे॥५॥

प्रायः सर्वेष्वेव प्रदेशेषु पण्डितविद्यार्थिसमाजे पद्यानामेव पाठः किञ्चित् लयतालबद्धरूपेण सङ्गीतरूपेण च भवति न तु गद्यानाम्। परन्तु केरलेषु मया गद्यानामपि सङ्गीतमयेन मनोहरेण स्वरेण पाठः श्रुतः। मलयालमभाषायां भाषानैषधचम्पूनामकमेकं चम्पूकाव्यं वर्तते। त्रिवेन्द्रमनगरे मया एकस्मिन् विद्यालये एकेन अध्यापकेन तस्यैव ग्रन्थस्य एकः अंशः पठ्यमानः श्रुतः। स च ईदृश आसीत्—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सा ललित-तनु-कान्ति-सम्पदासुरसुन्दरीरपि जयन्ती, मन्मथमहावीरवैजयन्ती, निखिलयुवजनमनांसि मदयन्ती दमयन्ती....

यदि मादृशैरुत्तरभारतीयैरिदं गद्यं पठ्यते तर्हि न तत्र किमपि स्वरसौन्दर्यमनुभूयते परं केरलानां पाठं श्रुत्वा नूनमेव मनो मुग्धं जायते। तत् सर्वं स्मरन् स्वयं च तदनुकुर्वन् परमं प्रमोदमनुभवामि।

एर्नाकुलम्—

एर्नाकुलम् - नगरवर्तिनि भव्य "हिन्दी-
भाषाप्रचारभवने" निशि संस्थितेन।
याः केरलीयकविता ललिताः श्रुतास्ता
अद्यापि कर्णकुहरं मधुपानयन्ति॥ ६॥

त्रिपुनितुरानगरे संस्कृतशिक्षाया विषये विशेषख्यातिं श्रुत्वा तत्र गन्तुं मम बलवती आकांक्षा आसीत्। अतोऽहं त्रिवेन्द्रं नगरात् २४.१०.५९ दिनाङ्के प्रस्थाय सायंकाले एर्नाकुलं नगरं प्राप्तवान्। अस्मात् नगरात् त्रिपुनितुरा किञ्चिद्दूरे भवति अतः रात्रौ तत्र गमनं संभवं नासीदिति मया तत्रैव दक्षिणभारतहिन्दीप्रचारभवने तत्रत्यानामधिकारिणां सौहार्देन रात्रौ निवासं कर्तुं निश्चयः कृतः। मया तु तत्स्थानं रात्रियापनायैव स्वीकृतं परन्तु तत्र निवासेन ममायं महान् लाभो जातो यत् रात्रौ चिरकालं यावत् तत्स्थाननिवासिनां प्रचारकाणां कार्यकर्तृणाञ्च मधुरकण्ठेन केरलीय-कवितानां श्रवणस्य सुदुर्लभः अवसरः सम्प्राप्तः। ततः परं प्रातःकाले नित्यक्रियां निर्वर्त्य, काफीपानं विधाय, तत्रत्येभ्यश्च कृतज्ञतां विज्ञाप्य प्रसन्नमना बसद्वारा त्रिपुनितुरां प्रति प्रस्थानं कृतवान्।

त्रिपुनितुरा—

अद्यापि केरलमहीस्थ-त्रिपुन्तुराख्यं
पुण्यं तपःस्थलममर्त्यगिरः स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतानि यत्र नगरे मम "मञ्चि - ओण्ण-
म्पाट्टं" - मुखानि जनयन्ति मुदं स्मृतानि॥ ७॥

इदं स्थानं केरलप्रदेशस्य सुप्रसिद्ध-कोचीन-राज्यान्तर्गतम्। अत्र श्रीरामवर्मकलालयनाम्ना एकः सुप्रसिद्धः प्राचीनतमश्च संस्कृतमहाविद्यालयो वर्तते। अत्र हस्तलिखितसंस्कृतग्रन्थानामपि एको महान् संग्रहो वर्तते। इतः प्रतिवर्षं सुदुर्लभानि पुस्तकानि प्रकाश्यन्ते। इदानीमेका पूर्णत्रयीनाम्ना संस्कृताङ्गलोभयभाषामयी गवेषणात्मिका त्रैमासिकी पत्रिकापि प्रकाश्यते। अत्र मया मलयालमभाषायाः वञ्चिप्पाट्टम्, ओण्णम्पाट्टम्-प्रभृतीनि बहूनि गीतानि श्रुतानि। अस्मिन्नगरे अहम् उपर्युक्त-महाविद्यालयस्य प्राचार्याणां श्री टी०के०रामचन्द्र ऐय्यरमहोदयानां भवने त्रीणि दिनानि निवासमकरवम्। अत्राहं २५.१.५९ दिनाङ्के सम्प्राप्तः।

एतत्पुरस्थित - विपश्चिदपश्चिमं तं
भूपं परीक्षितमहं मुदितः स्मरामि।
तर्काऽम्बुधेरपि गिरः सरसा यदीया
अद्यापि चेतसि मुदं जनयन्ति नित्यम्॥ ८॥

अस्मिन्नगरे एतन्नगरालङ्कारभूता एके अपरेऽपि महाविद्वांसो विराजन्ते स्म। ते आसन् कोच्चीनराज्याधिपतयः श्रीरामवर्मपरीक्षित-तम्बुरानमहोदयाः। एते अन्यशास्त्रैः सह तर्कशास्त्रस्यापि विद्वज्जनमान्याः पण्डिता आसन्। अतएव एभिः सह मिलने ममेयं भावना आसीत् यदिमे कदाचित् वादविवादप्रिया रूक्षस्वभावाश्च भवेयुः। परन्तु मिलने एते परमसहृदया विनोदप्रियाश्च अवलोकिताः। वार्ताप्रसङ्गे एभिः एकं मनोरञ्जकं पद्यं श्रावितं यत्र "शिरस्तेदार" इति न्यायालयीयं पदनाम संस्कृते "शिरःस्थदार" इतिरूपे परिवर्त्य प्रयुक्तं वर्तते। तच्च पद्यमीदृशं वर्तते—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुखस्थदारो भगवान् प्रजेशः
उरःस्थदारो भगवान् रमेशः।
पार्श्वस्थदारो भगवान् उमेशः
शिरःस्थदारोऽयमभूतपूर्वः! ॥

एवमिमे श्रीहर्ष इव साहित्ये तर्कशास्त्रे चापि प्रावीण्यं भजमाना केरलेषु विशिष्टा विद्वांसोऽभूवन्। नैतादृशः कोऽपि अन्यो राजा विद्वान् भारते उपलभ्यते। महाराजः कर्णसिंहः काशिराजश्च अवश्यं संस्कृतज्ञौ परं न शास्त्रज्ञौ।

कालडी—

तत् कालडीस्थमतिविश्रुतमाद्यपीठं
स्मृत्वैकवादपरकं चकितो भवामि।
अद्यापि यस्य कणिका अपि कीर्तिगाथाम्
आचार्यशङ्करगुरोर्भुवि कीर्तयन्ति॥ ९॥

केरलप्रदेशस्य ऐतिहासिकं कालड़ीनामकं प्राचीनं स्थानमिदं जगद्गुरोराद्यशङ्कराचार्यस्य जन्मभूमिर्वर्तते। ७८८ तमे खृष्टाब्दे एतेषां जन्म अभूत्। पञ्चमे वर्षे उपनयनसंस्कारे सम्पन्ने अष्टमवर्षपर्यन्तमेते वेदवेदाङ्गानामध्ययनं विधाय संन्यासं गृहीत्वा सम्पूर्णे भारते भ्रामं भ्रामं वैदिकधर्मस्य अद्वैतवादस्य च प्रचारं प्रतिष्ठापनं च कृतवन्तः। सम्पूर्णे देशे वैदिकधर्मप्रचाराय चतुर्षु स्थानेषु चत्वारो मठाः स्थापिताः। ब्रह्मसूत्रम्, उपनिषदः, गीताचेति ग्रन्थानामुपरि भाष्याणि लिखितानि। अद्वैतमतप्रतिपादका अन्येऽपि अनेके प्रबन्धग्रन्थाः प्रणीताः। अनेकानि प्रौढपाण्डित्य-कवित्वकलालङ्कृतानि बृहन्ति स्तोत्राणि। गेयरूपाणि लघुस्तोत्राणि च रचितानि अद्वैतमतप्रचारार्थं शिष्याः संन्यासिनश्च प्रशिक्षिताः। एतावन्ति अद्भुतानि असाधारणानि च कार्याणि सम्पाद्य अतुलया प्रतिभया च सम्पूर्णं जगत् प्रभावितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधाय अल्पीयसि वयसि भगवत्पादा ब्रह्मीभूता अभूवन्। कालडीस्थाने इदं सर्वं विचिन्तयन् जनः रोमाञ्चितो भवति भावाभिभूतश्च जायते।

गुरुवायूर—

अद्यापि तस्य गुरुवायुपुरस्य वीतां
दीर्घां निशां खलु कदापि न विस्मरामि।
या यापितैकगृहिणो भवने कथञ्चित्
साह्नं यदाहमलभे नहि पण्डितानाम्॥ १०॥

कालडीनगरात् नातिदूरवर्ति गुरुवायुपुरं नाम तीर्थस्वरूपं नगरं वर्तते यत्र देवस्य विशालं मन्दिरं विराजते। श्रीनारायणभट्टतिरि प्रणीतस्य ''नारायणीयम्'' काव्यस्य अध्ययनात् स्थलमिदं तन्महत्त्वं च मम बहोः कालात् पूर्वत एव सम्यग् विदितमासीत्। ततः कालडीनिवासं समाप्य महत्या उत्कण्ठया सह इदं तीर्थस्थानमहं पूर्वाह्णसमये प्राप्तवान्। तत्र च तत्रत्यामर्चनां, स्तोत्रपाठं, भजनं, कीर्तनं, परिक्रमणं, गीतवाद्यादिकं च अदृष्टपूर्वं दृष्ट्वा अभूतपूर्व आनन्दः समजनि। अतस्तत्र दिनद्वयं स्थातुकामोऽहं कैश्चिद् अर्चकैः पण्डितैश्च सह परामर्शं कृतवान् परं पूजापाठादिषु बहुव्यस्ततया तेषु कोऽपि स्वगृहे निवासाय स्वीकृतिं दातुं स्वगृहं नेतुं च इच्छां न प्रकटीकृतवान्। ततोऽहं कस्यापि अर्चकस्यैव संकेतेन एकस्य सामान्यनागरिकस्य गृहे निवासं कृतवान्। तत्र च यद्यपि तैः मां काशीवासिनं पण्डितं ज्ञात्वा मम कृते सर्वविधापि सुविधा उपकल्पिता परं तत्र संस्कृतसम्बन्धि-वातावरणस्याभावात् कथमपि मया सा रात्रिरतिवाहिता।

अद्यापि तानि गुरुवायुपुरे श्रुतानि
ग्रामीण - नर्तक - लसद्वदनोद्गतानि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नारायणाख्यकविनिर्मित - रासलीला-
पद्यानि कर्णमधुराणि मुदं वहन्ति॥ ११ ॥

इदं नगरं केरलवासिभिस्तथाविधं सिद्धपीठं मन्यते सुप्रसिद्धम् अत्रत्ये मन्दिरे आगत्य ग्रामीणनर्तका अपि अतिश्रद्धया भक्त्या च श्रीनारायणभट्टप्रणीतस्य 'नारायणीयम्' इति ग्रन्थस्य रासलीला-सम्बद्धानि १० पद्यानि नृत्यवाद्यादिभिः सह महता उल्लासेन गायन्ति। तानि १० पद्यानि नितान्तं मधुराणि गेयानि च सन्ति। तेषामेकं पद्यमत्र निदर्शनाय अधस्ताल्लिख्यते-

केशपाशधृतपिञ्छिकावितति-सञ्चलन्मकरकुण्डलम्,
तारहारवनमालिका - ललितमङ्गरागघनसौरभम्।
पीतचेल - धृतकाञ्चिकाञ्चित-मुदञ्चदंशुमणिनूपुरम्,
रासकेलिपरिभूषितं तव हि रूपमीश कलयामहे॥

(नारायणीयम् ६९.१)

पावर्टी—

अद्यापि मत्स्मृतिगतः कुरियाक्कुसंज्ञो
विद्वद्वरः स खलु खृष्टमतानुयायी।
यः केरलेषु निज-पुत्र-सुता-समेतः
सर्वत्र संस्कृतसमुन्नयनैकसक्तः॥ १२ ॥

गुरुवायूरनगरात् चतुर्षु क्रोशेषु पावर्टीनामकं लघुनगरमवस्थितम्। अत्रैव पी०टी० कुरियाक्कुनामानः एके खृष्टमतानुयायिनो विद्वांसः संस्कृतदीपिकानाम्ना संस्कृतमहाविद्यालयमेकं सञ्चालयन्ति, अत्रैव प्रधानाध्यापकपदं च विभूषयन्ति। एतेषां ज्येष्ठपुत्रः श्री पी०के० फ्रान्सिस, कनिष्ठपुत्रः श्री पी० के० जोन्सश्चेति इमौ द्वावपि अत्र व्याकरण-साहित्यविभागे सहायकाध्यापकौ। श्रीकुरियाक्कुमहोदयेन संस्कृतशिक्षणार्थं मलयालमभाषायां "संस्कृतशिक्षाक्रम" इति नाम्ना चत्वारि पुस्तकान्यपि प्रकाशितानि। संस्कृतप्रचारकार्येष्वपि एतेषां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधीयसी प्रवृत्तिः। मन्ये, सम्पूर्णेऽपि भारते इदमेवैकं संस्कृत-शिक्षणकेन्द्रं खृष्टमतानुयायिभिः सञ्चालितं विराजते।

अद्यापि केरलभुवः कमनीयरूपे
नाट्योत्सवे कथकलीत्यभिधाप्रसिद्धे।
संस्मृत्य नर्तककृतान् चपलानपाङ्गान्
नित्यं विघूर्णत इवाक्षियुगं मदीयम्॥ १३॥

केरलेषु 'कथकलि' नामकमेकं सुप्रसिद्धं लोकप्रियं च विशिष्टनृत्यं भवति यत्र रामायण-महाभारतपुराणादिषु वर्णितानां कथानामभिनयद्वारा प्रतिबोधनं क्रियते। अस्मिन् नृत्ये नटा नर्तकाश्च यथा विविधा अङ्गुलिमुद्राः प्रदर्शयन्ति, अङ्गविक्षेपान्, विशेषतश्च अपाङ्गविक्षेपान् प्रदर्शयन्ति तदतीव मनोहरं नयनाकर्षकं च भवति। तादृशं नृत्यं देशस्यान्त्यभागेषु प्रचलितं नास्ति।

अद्यापि केरलभुवः कदलीद्रुमाणां
रक्ताऽतिदीर्घमधुराणि फलानि दृष्ट्वा।
अन्यप्रदेश - कदलीद्रुम - संभवानि
सर्वाणि तुच्छविरसानि फलानि मन्ये॥ १४॥

कदलीफलानि प्रायेण सम्पूर्णेऽपि भारते लभ्यन्ते परं प्रदेशभेदेन तेषामाकारे कश्चन भेदो दरीदृश्यते। यथा—बिहारप्रदेशस्य हाजीपुरमण्डले यानि कदलीफलानि जायन्ते तानि नितरां लघूनि भवन्ति, वारद्वयेनैव समापयितुं शक्यन्ते। परं बम्बई प्रदेशोद्भवानि कदलीफलानि-दीर्घाणि भवन्ति यानि 'बम्बैया केला' नाम्ना ज्ञायन्ते। परन्तु केरलप्रदेशस्य कदलीफलानि ततोऽपि दीर्घाणि किञ्चित् स्थूलतराणि च भवन्ति। तेषां वर्णोऽपि किञ्चिद् रक्तमयो भवति। एतेषामुपयोगः भरित्ररूपेणापि विधीयते। कन्याकुमारीतः केरलेषु यदा प्रवेशो मया विहितः तदा मे इमानि दृष्टिपथं गतानि, आश्चर्यजनकानीव च अभूवन्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि केरलभुवः सुखवर्षि वृत्तं
नो विस्मृतिं व्रजति नापि कदापि गन्तृ।
अङ्गैर्जनैरपि मिथः समुदीर्य्यमाणाः
शब्दाः श्रुताः सुरगिरो बहुशो मया यत्॥ १५॥

केरलप्रदेशस्य मलयालमभाषायां भूयांसः संस्कृतशब्दाः प्रचलिताः सन्ति। तत्रापि भूयांसः शब्दाः अकारान्तन-पुंसकलिङ्गशब्दवत् प्रचलन्ति। एतादृशान् बहून् शब्दान् अँशिक्षिता अपि जना वदन्तीति आश्चर्यवत् प्रतिभाति। केरलभ्रमणकाले त्रिवेन्द्रम् नगरात् एर्नाकुलम्गमनकाले मया रेलशकटे द्वयोः सामान्यजनयोः राजनीतिकविवादे निम्नलिखिताः शब्दा आकर्णिताः—

'प्राथमिक आवश्यकम्, आहारम्, वस्त्रम्, समुदायम्, जनाधिपत्यम्, विद्याभ्यासम्, उद्योगम्, कार्यम्, साधनम्, साम्प्रतिकम्, प्रयोगम्, सर्वाधिपत्यम्, स्थलदौर्लभ्यम्, प्रयोजनम्, प्रवर्तनम्, अनुष्ठेयम्, दैवम् इत्यादि।

प्रायेण नाम मलयालमपुस्तकानां
आकर्ण्य मान्तमधिकं निखिलेऽपि देशे।
एषा कृतिः सुरगिरः किमु कैरली वा?
अद्यापि याति हृदयान्नहि संशयोऽयम्॥ १६॥

मलयालमभाषाया बहूनां पुस्तकानां नामानि संस्कृतभाषाया अकारान्तनपुंसकलिङ्गशब्दानां प्रथमैकवचनरूपवत् मकारान्तानि भवन्ति। तेन इदं पुस्तकं संस्कृतभाषाया उत मलयालमभाषाया इति ज्ञाने महान् भ्रमो जायते। तादृशपुस्तकानां कानिचिन्नामानि अधस्तान्निर्दिश्यन्ते—

अनन्तपुरवर्णनम्	*कुमारहरणम्*
उण्णुनीलिसन्देशम्	*भजविलासम्*
कोटियविरहम्	*नलर्चाजम्*

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजरत्नावलीयम् *गन्धर्वविजयम्*
रामचरितम् *पाञ्चालीस्वयंवरम्*

अद्यापि केरलभुवः कविपण्डितताना-
मालोक्य सूक्तिकथने परमं प्रकर्षम्।
श्रीराजशेखरकवेः कथिता सदुक्तिः
सत्या विभाति, मुदितं च मनः करोति॥ १७॥

अद्यापि केरलभुवं परितः प्रकीर्णाः
चेतो हरन्ति मम ते खलु नारिकेलाः।
अत्युन्नताः स्थिरतराश्च दिवानिशायां
ये पर्यवेक्षणरता इव भान्ति भूमेः॥ १८॥

केरलेषु पूगीफलवृक्षाणां नारिकेलवृक्षाणामतीव बाहुल्यं वर्तते। तत्र न केवलं गृहाद्बहिः प्रत्युत गृहप्राङ्गणेऽपि बहवो नारिकेलवृक्षाः पूगीफलवृक्षाः भवन्ति येषां छायायामुपविश्य गृहजनाः सुखेन स्व-स्वकार्यं सम्पादयन्ति।

नारिकेलवृक्षाश्च अत्यन्तमुन्नताः स्थिरा दृढाश्च दृश्यन्ते। तान् दृष्ट्वा एवं प्रतिभाति यत् ते दिवानिशं शीते ग्रीष्मे वा तिष्ठन्तः रक्षापुरुषा इव केरलभुवः पर्यवेक्षणस्य कार्यं कुर्वन्ति।

अद्यापि केरलभुवः कमनीयभाषा-
सारल्यमद्भुततमं बहु रोचते मे।
यत्रैकमेव हि पदं सकल-क्रियाणा-
मन्वेति सर्वपुरुषेषु विना विभेदम्॥ १९॥

मलयालमभाषाया इदमेकं वैलक्षण्यं वर्तते यत् तत्र सर्वेषामपि प्रथममध्यमोत्तमपुरुषाणां कृते एकमेव समानं क्रियापदं प्रयुज्यते। यथा—

संस्कृतम्	मलयालम
सः अस्ति	*अवन आकुन्नु*

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वम् असि — निङ्डल आकुन्नु
अहम् अस्मि — ञान आकुन्नु
भवान् अस्ति — तांकल आकुन्नु
स आगच्छति — अवन् वरुन्नु
त्वम् आगच्छसि — निङ्डल वरुन्नु
भवान् आगच्छति — तांकल वरुन्नु

एवमेव सर्वेष्वपि कालेषु समानानि क्रियापदानि भवन्ति।

अद्यापि मे श्रवणयोः प्रबला समीहा
श्रोतुं पुनः पुनरुदेति मणिप्रवालम्।
क्रीडन्ति यत्र मिलिता रचनाविशेषे
स्नेहेन केरलगिरश्च गिरश्च दैव्यः॥ २०॥

केरलीयमलयालमसाहित्ये "मणिप्रवाल" नाम्ना एका विशिष्टा रचनाशैली प्रचलिता वर्तते यस्या गद्येषु पद्येषु च मलयालमशब्दानां विभक्त्यन्तसंस्कृतशब्दानां च सम्मिलितरूपेण प्रयोगो भवति। अस्यां शैल्यां विरचिता अनेके गद्य-पद्य-चम्पू-ग्रन्था उपलभ्यन्ते। यथा— रामायणचम्पू, नैषधचम्पू, राजरत्नावलीयम्, कोटिविरहम्, नारायणीयम् इत्यादयः। भाषानैषधचम्पूग्रन्थस्य एकमुदाहरणं यथा—

अलघु जलनभारं मन्दमन्दं वहन्ती
नडने वटिविलारापङ्गमिङ्गं चरन्ती।
चलधृति दमयन्ती हन्त कान्तं स्मरन्ती
व्यलपदथ किरन्ती वाष्पधारां स्वनन्ती॥

केषुचित् मणिप्रवालपद्येषु द्वित्राण्येव पदानि मलयालमभाषाया भवन्ति, अपराणि च सर्वाणि संस्कृतभाषाया, एव । यथा— रामायणचम्पू-पद्यमेकम्—

मन्दीभूते जनौघे परिमलबहलां कय्यिलादाय मालाम्
मन्दाराभोगमन्दस्मितमधुरमुखी मङ्गलस्त्रीसमेता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्दं मन्दं नयन्ती घनजघनभरप्राभृतप्रापमग्रे
मन्दाक्षालङ्कृताक्षी मनसिजकलिका मैथिली सा नटन्नात्॥

अस्मिन् पद्ये कय्यिल् तथा नटन्नाल् इति पदद्वयमेव मलयालमभाषाया वर्तते। तयोरर्थः क्रमशः "हस्ते तथा प्रस्थिता" इति वर्तते।

केरलेतरप्रदेशवासिभिः साहित्यरसिकैरियं शैली अवश्यं द्रष्टव्या। एतद्विषये विशेषपरिज्ञानार्थं निम्नाङ्कितं पुस्तकमवलोकनीयम्—

१–मलयालम साहित्य का इतिहास, साहित्य अकादमी, नई दिल्ली, मूल्यम् –१२ रु०

२–विराट्पर्वमणिप्रवालमंजरी (तमिल) अद्यार–मद्रास।

अद्यापि केरलभुवोऽभिनये नटानां
नो विस्मरामि मुखमण्डनमद्वितीयम्।
यन्नासिका - नयन - भाल - कपोल - कर्ण-
चित्राङ्कनं न खलु वर्णयितुं सुशक्यम्॥ २१॥

केरलेषु सुप्रसिद्धे सुमनोहरे च कथकलीनाट्ये नर्तकानां पात्राणां च विविधैः रागैर्यादृशं मुखमण्डनं विचित्रं क्रियते तत् प्रत्यक्षं दर्शनेनैव जनैर्ज्ञातुं शक्यते न तु वर्णनेन। अत्र एकैकस्य मुखस्य मण्डने चतस्रः होरा व्यतियन्ति। वेषभूषा, माला, तिलकं शिरोमुकुटादि-कञ्चापि तेषामत्यद्भुतं भवति। यथा साहित्ये मणिप्रवालं तथा नाट्ये कथकली केरलप्रदेशस्य स्वकीयमसामान्यं वैशिष्ट्यं वर्तते।

अद्यापि तं मलयशैलमनन्यशोभं
दृङ्मोहनं बहुकृतज्ञतया स्मरामि।
यच्चन्दनं प्रतिदिनं परिलिप्तमङ्गे
सर्वं गृहं परिसरं सुरभीकरोति॥ २२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत् केरलस्थित-वनोपवने विहारः
यन्मन्दमन्द - मलयानिल - सेवनं च।
यन्नारिकेलबहुलाऽशन - पान - सौख्यम्
अद्यापि तत् खलु कदापि न विस्मृतं मे॥ २३॥

सम्पूर्णोऽपि केरलप्रदेशः खलु पदे-पदे उपलभ्यमानैर्विविधैः विटपिभिः, वृक्षैः, कुसुमैः, फलैः, लताभिश्च परिव्याप्ततया वाटिका इव प्रतिभाति। यदाहं कन्याकुमारीतः केरलप्रदेशं प्रति प्रस्थानं कृतवान् तदा किञ्चिद् दूरं गत्वा केरलप्रदेशस्य प्रारम्भत एव किमपि भिन्नमेव दृश्यं दृष्टिगोचरमभवत्। एवं प्रतिभाति स्म यत् कस्मिंश्चित् श्यामलमेघावृते महारण्ये अथवा कस्याञ्चित् तरु-लता-मण्डितायां वाटिकायां वा प्रविशामि। सीमासुरक्षकैरिव गगनचुम्बिभिः पूगीफलवृक्षैः नारिकेलवृक्षैश्च प्रदेशः परितो व्याप्त इव दृश्यते। न केवलं गृहाद् बहिः प्रत्युत गृहाभ्यन्तरेऽपि अङ्गणे अनेके पूगीफलवृक्षा रोपिता दृश्यन्ते येषामधस्तात् उपविश्य सुखेन सर्वाणि कार्याणि सम्पाद्यन्ते। यतः एते खलु वृक्षा नितान्तं कृशकायाः, परन्तु अत्यन्तमुन्नतकायाः विस्तृतशाखा-प्रशाखारहिताः तथा स्वल्प-च्छायाप्रदा अपि भवन्ति। अतः अङ्गणेषु स्थितैरपि एभिः काचिद् बाधा न भवति, प्रत्युत सुखमेव जायते। प्रायेण प्रतिगृहं प्राङ्गणेषु त्रिचतुरा नारिकेलवृक्षाः पूगीवृक्षा वा भवन्त्येव। इदं सुखं सौविध्यं च अन्यप्रदेशेषु दुर्लभमेव।

केरलप्रशस्तिः—

अद्यापि केरलमही कदलीफलाढ्या
एला - लवङ्ग - लतिका - ललितान्तराला।
पूगीफलच्छद - सुशीतल - चत्वरा सा
सद्वाटिकेव सततं सुखदा स्मृता मे॥ २४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २३ :

तमिलनाडुप्रदेशीयानि संस्मरणानि

मद्रास—

सम्पूर्ण - दक्षिणभुवो महनीयभाषा-
साहित्य - संस्कृति - कलानिलयं पुराणम्।
मद्रासनामनगरं समुपेत्य जातं
हर्षप्रकर्षमधुनाप्यनुभावयामि ॥१॥

१६.९.५९ दिनाङ्के तिरुमलैक्षेत्रे विद्यमानायां वेंकटेशवेद-पाठशालायां गोष्ठीं समाप्य १७.९.५९ दिनाङ्के अहं सायंकाले मद्रासनगरं सम्प्राप्तः। भौतिकदृष्ट्या सुसमृद्धं, साहित्यसंस्कृतिकला-दृष्ट्या सुविख्यातं, द्रविडभाषायाः संस्कृतभाषायाश्च विकासे बद्धपरिकरं मद्रासनगरं भारते महत्त्वपूर्णं स्थानं बिभर्ति। इदं नगरं गन्तुं द्रष्टुं च मम बहोः कालाद् बलवती स्पृहा आसीत्। सौभाग्यवशाद् अस्मिन् दिनाङ्के तदवसरं लब्ध्वा मे महान् प्रमोदः समजनि।

पूर्वनिश्चयानुसारमहं स्टेशनस्थले अवतीर्य मैलापुर-स्थितां संस्कृतकलाशालां समागतः। अत्र छात्रावासे मम निवासस्य व्यवस्था जाता। मां संस्कृतप्रचारकं ज्ञात्वा तत्रत्या अध्यापका विद्यार्थिनश्च मया सह बहुस्नेहं सहयोगं च कृतवन्तः।

रात्रौ तैः सह भोजनपानादिकं विधाय, सुचिरं समालप्य, संस्कृतविषयिणीश्च विविधाश्चर्चाः सम्पाद्य सुखं सुप्तवान्।

कौशेयवस्त्रमथ हैमविभूषणं च
धृत्वैव भोजनमिहेति गिरं निशम्य।
यल्लज्जितं मम मनस्त्वनयोरभावाद्
अद्यापि लज्जयत् तत् खलु मानसं मे॥२॥

मद्रासनगरस्य मैलापुरक्षेत्रे एव "संस्कृत एजुकेशन सोसाइटी"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाम्ना एका संस्था प्रचलति यस्याः सचिवपदमलंकुर्वन्ति स्म मद्रासनगरस्य सुविख्याता अधिवक्तारः श्री टी.वी. विश्वनाथ-ऐय्यरमहोदयाः। हैदराबादनगरस्य सुप्रतिष्ठिता नागरिकाः श्री एम. सौन्दरराजन्महोदयाः श्री टी.वी. विश्वनाथ ऐय्यरमहोयदानां सुहृदः आसन्। अतस्तैः मद्रासनगरे मम निवासाय भोजनपानादिव्यवस्थायै च एकं पत्रं श्रीऐय्यरमहोदयानां सविधे लिखितम्। यदाहं तत्पत्रमादाय ऐय्यरमहोदयानां सविधे गतवान् तदा तैः तत्पत्रं पठित्वा स्वगृहे एव मम निवासाय सर्वविधव्यवस्थायै च सहर्षं स्वीकृतिः प्रदत्ता। परन्तु तेषां परिवारे संस्कृतज्ञः अन्यः कोऽपि नासीत्। अहं च तमिलभाषां न जानामि स्म। अतो मया निवासाय छात्रावास एव स्वीकृतः, परं भोजनाय तेषामेव व्यवस्था स्वीकृता, तस्मादेव च कालाद् भोजनं चापि तेषां गृहे प्रारब्धम्।

परं प्रथमदिने एव एका समस्या समुपस्थिता। भोजनात् पूर्वमेव श्रीऐय्यरमहोदयैः कथितम्—"अस्माकमियं रीतिरस्ति यत् भोजनकाले कौशेयं वस्त्रं धार्यते तथा किञ्चित् सुवर्णमयं भूषणमपि।" परन्तु मम समीपे उभयोरपि अभाव आसीत्। तस्मिन्नवसरे कौशेयवस्त्रस्य आनयनं तु संभवं नासीत् अतस्तत् सोढव्यं भवितुमर्हति स्म। परन्तु सुवर्णमयं भूषणमपि किमपि नासीत्। मया विवाहसमये अवश्यमेव अङ्गुलीयकं प्राप्तमासीत्। परं तत् एकस्य पुस्तकस्य क्रयणार्थं मया विक्रीतमासीत्। अतो मम अङ्गुलिस्तदानीं रिक्ता एव आसीत्। अतस्तैः तथा कथिते अहं क्षणमात्रं चिन्तयन्नेवासम् तावत् तैः एकं कौशेयं धौतवस्त्रं तथा एकम् अङ्गुलीयकं च आनीय मह्यं प्रदत्तं, कथितं च-इदं धारयित्वा भोजनं कुर्वन्तु इति। मया तथैवानुष्ठितम्। परं तस्मिन् समये मया या काचित् लज्जा अनुभूता सा अद्यापि मम मानसान्नापगता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि भारतसुधीजनमण्डनानां
श्रीराघवार्य्यविदुषां विदुषां वराणाम्।
नक्तन्दिवं श्रममखण्डमथाविरामं
स्मृत्वा भवामि मुदितश्चकितस्तथैव॥ ३॥

द्वितीयदिने अहं सुप्रथितनामधेयानां विद्वद्वरेण्यानां डॉ० वी० राघवन् महोदयानां गृहं गत्वा, तेषां चिराकांक्षितं दर्शनं कृतवान्, स्वकीययात्रायाः समस्तमुद्देश्यं च निवेदितवान्। तथा यथाभूतां निवासभोजनादिव्यवस्थां च सूचितवान्। इदं सर्वमाकर्ण्य ते भृशं प्रसन्ना अभूवन् तथा मम रात्रिकालीनां भोजनव्यवस्थां ते स्वगृहे एव कृतवन्तः। एवं च रात्रौ छात्रावासे निवासः, प्रातः श्रीविश्वनाथ ऐय्यर महोदयानां गृहे भोजनम्, दिने प्रचारकार्यम्, सायं श्रीराघवन्-महोदयानां गृहे भोजनं तथा प्रचारविषये दैनिक-कार्यक्रम-निर्धारणञ्चेति मम दैनिकं कार्यजातमासीत्। अत्र निवासकाले यानि कार्याणि मया साधितानि या कापि वा सफलता लब्धा तत्र श्रीराघवार्य्यमहोदया एव मुख्यरूपेण हेतुभूता आसन्। यद्यपि ते पठने, पाठने, लेखने, अनुसन्धाने, अनुवादे, सम्पादने, सभासम्मेलनादिषु भागग्रहणे, अन्यसंस्थानां कृते परामर्शदाने च निरन्तरं व्यापृतास्तिष्ठन्ति स्म तथापि औदार्यवशात् ते मदीयेषु कार्येषु निरन्तरं ध्यानं ददते स्म, मम कार्यनिर्देशनं च कुर्वन्ति स्म इति मम परमं सौभाग्यमासीत्।

मद्रासनगरे यथा मया दिनानि यापितानि तद्विषये एकं पद्यमिदं लिखितं मया-

वासो मद्रपुरीय - संस्कृतकलाशालेयशिष्यालये
श्रीविद्वद्वर-विश्वनाथ-भवने सुस्वादवद् भोजनम्।
कार्य्याकार्य्यविनिश्चयश्च सतत श्रीराघवार्ये गृहे
एवं मद्रपुरे गतागतशतैर्नीता मया वासराः॥

दक्षिणदर्शनम्-पृ०१७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याप्यहं बहुकृतज्ञतया स्मरामि
श्रीराघवार्य्यविदुषां विविधोपकारान्।
यत्पत्रलेख - धनसंग्रह - वाहनाद्यैः
सत्प्रेरणैश्च नितरामभवं कृतार्थः॥ ४॥

मद्रासनिवासकाले अनेके प्रभावशालिनः संस्कृतविद्वांसो मम परिचिता अभूवन् परं डॉ० वी० राघवन् महोदयैर्मम यथा साहाय्यं कृतं यथा च अनेके उपकाराः साधिता न तथा अन्येन केनापि। मम भ्रमणार्थं तैः सहायकस्य यानस्य वा व्यवस्था क्रियते स्म। दक्षिणभारत-हिन्दीप्रचारसंस्थाने, आड्यारपुस्तकालये, काञ्चीकाम-कोटिपीठसभायां तथा अन्येष्वपि विशिष्टस्थानेषु तैः मदर्थे स्वकीयं यानं दीयते स्म तथा डॉ० कुञ्चुण्णिराजामहोदयाः, मद्रास-विश्वविद्यालये संस्कृतप्रवक्तारः, सहायकरूपेण मया सह प्रेष्यन्ते स्म। आकाशवाण्यां मदीयः कवितापाठः कारितः। मम अग्रिमयात्रायै धनसंग्रहः कृतः। मम सुखसौविध्यसम्पादनार्थं सम्मानार्थं च बहूनि पत्राणि लिखितानि। मम ततो गमनकाले मम संस्थायाः पञ्जीकरणार्थञ्च परामर्शः प्रदत्तो येन मम केन्द्रीयसहायता सुलभा जाता। केन्द्रीयसहायताधिकारिणोऽपि अनेके दाक्षिणात्या आसन् ये डॉ० महोदयानामनुरोधेन मम ९४८५मितं द्रव्यराशिं शीघ्रमेव स्वीकृतवन्तः। किमधिकम्, तेषां स्नेहस्य, सहानुभूतेः सद्भावनायाः सौहार्दस्य सहयोगस्य च कापि इयत्तैव न निरूपयितुं शक्यते। तेषां प्रशस्तिविषये मया इमानि कानिचित् पद्यानि लिखितानि—

दिव्याकृतिः किमपि गौरवमुद्वहन्ती
स्वाभाविकी सरलता हृदयं विशालम्।
साहित्यवारिनिधि-मन्थन-पण्डिता धीः
श्रीराघवार्य्यविदुषामिह किं न धन्यम्॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काव्यालापकथा क्वचित् क्वचिदहो सङ्गीतचर्चा पुनर्
वेदे व्याकरणे पुराणविषये शश्वत् समालोचना।
नानावाङ्मयचिन्तनैश्च समयो यत्राखिलो नीयते
मन्ये राघवसूरिवर्य्यसदनं सारस्वतं मन्दिरम्॥

धन्या मद्रपुरी पुरीषु विलसद्रत्नाकराऽलङ्कृता
धन्यास्तत्र च भारतीप्रणयिनः श्रीविश्वनाथादयः।
तन्मध्येऽयमगाधवारिधितलस्पर्धालुना सद्गुणे-
नौदार्येण च भूषितो विजयते श्रीराघवार्य्यः सुधीः॥

दृष्टं सागरतीरवर्ति सकलं दृश्यं मनोमोहनं
दृष्टा सौधशतावली सुरुचिरा दृष्टः कपालीश्वरः।
दृष्टा पण्डितमण्डली च निपुणा सर्वं परं निष्फलं
दृष्टो मद्रपुरीमुपेत्य यदि नो श्रीराघवार्य्यः सुधीः॥

दृष्टा मया सुबहुशो भ्रमता समन्ता-
ल्लोकोत्तराः सकलशास्त्रविदो बुधेन्द्राः।
निर्हैतुकी परहितप्रवणा प्रवृत्ति-
र्दृष्टा तु केवलमियं ननु राघवार्ये॥

अद्यापि मद्रपुरवर्ति-विशिष्ट-कुप्पू-
स्वामी - रिसर्चसदनस्य सभां स्मरामि।
यत्रागता बुधजनाः कतिचिन् मदीयां
काञ्चिन्निशम्य कवितां कुपिता अभूवन्॥५॥

मद्रासनगरे निवासकाले माननीयैः श्री डॉ० वे० राघवन्-महोदयैः २०.९.५९ दिनाङ्के संस्कृतसेवाक्षेत्रे चिरात् सुप्रतिष्ठितायां तत्रत्यायां कुप्पूस्वामीरिसर्चइन्स्टीट्यूटसंस्थायां मम भाषणार्थमेका विद्वत्सभा समायोजिता। सभायां मदीयमेकं श्लोकं श्रावयितुं श्रीराघवन्महोदया मां भृशमनुरुद्धवन्तः। तेषामनुरोधपालने तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पण्डितानां प्रकोपमाशङ्क्य मम महती भीतिरासीत्। परं तेषामाग्रहाद् भाषणप्रसङ्गे स मया श्लोकः श्रावितः। स चेदृशो वर्तते-

कृत्वा भाले बृहट्टीकां धृत्वा च महतीं शिखाम्,
भवन्तो हन्त मन्यन्ते आत्मानं ब्राह्मणोत्तमम्।
ब्राह्मणत्वं न लब्धं स्यात् परं टीकाशिखादिभिः,
ब्राह्मणत्वं तु लब्धं स्यात् त्यागेन तपसा तथा॥

तस्यां सभायामुपास्थितेषु प्रायेण सर्व एव विद्वांसः बृहट्टीका-शिखाधारिण एवासन्। मदीयं पद्यद्वयं श्रुत्वा तेषां मुखमण्डलं किञ्चिदप्रसन्नं चेष्टाश्च आक्रोशपूर्णा अदृश्यन्त परं डॉ० राघवन् महोदयानामुपस्थित्या ते शान्ता एव अवातिष्ठन् परं तेषां मनसि या काचिद् दुर्भावना आसीत् तस्याः समाधानं सभाया आध्यक्ष्यं वहन्तः "हिन्दू" दैनिक पत्रिकाया, प्रधानसम्पादकाः साधु समापादयन्। तेन पण्डितानां किञ्चित् सन्तोषः समाधानं च जातम्।

लग्नो यथा खलु भवान् सुरगीः - प्रचारे
लग्नस्तथा नहि कथं तमिलप्रचारे।
एतद्वचांसि कतिचित्तमिलप्रियाणा-
मद्यापि मन्मनसि संजनयन्ति चिन्ताम्॥ ६॥

तमिलनाडुप्रदेशे एतादृशा अनेके शिक्षिता जना लभ्यन्ते ये तमिलभाषाया महत्त्वे प्रचारे च अतिशयाग्रहभाजो भवन्ति। न केवलमेतावदेव, अपितु ते संस्कृतभाषां प्रति हीनभावनामपि प्रकटयन्ति। तादृशा जना यदा-कदा माम् एवमाक्षिपन्ति स्म—"यथा भवान् संस्कृतप्रचारं करोति तथा तमिलभाषाया अपि प्रचारं कथं न करोति? का न्यूनता अस्ति तमिलभाषायाम्? एतादृशा विचाराः संस्कृततमिलभाषिणां मध्ये वैमनस्यवर्धका विरोधकारिणश्च भवन्ति स्मेति तत् श्रुत्वा मम महती चिन्ता जायते स्म।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्याप्यहं तमिलसंस्कृतवाग्विवादं
पूर्वापरत्व-गुरुताऽगुरुताप्रयुक्तम् ।
आकर्णितं च पठितं च विचिन्त्य भूयः
क्षुब्धो विषण्णहृदयश्च सदा भवामि ॥ ७ ॥

तमिलभाषा प्राचीनतादृष्ट्या साहित्यसमृद्धिदृष्ट्या च संस्कृतं विहाय अन्याः समस्ता अपि भारतीयभाषा अतिशेते। संस्कृतेन सह तस्याः सम्बन्धोऽपि स्वल्पमात्रायां पुरातन एव। संस्कृतशब्दानामद्यापि तमिलभाषायाः गद्य-पद्यरचनासु समाचारपत्रेषु च प्रयोगो विधीयत एव। तथापि केचन तमिल़विद्वांसः संस्कृतं द्विषन्ति संस्कृतप्रचारे च सहयोगं न कुर्वन्तीति चिन्ताया विषयो वर्तते। तमिलभाषायाः स्वरूपस्य इतिहासस्य च विशेषपरिज्ञानाय तथा संस्कृततमिलभाषयोः सम्बन्धविषयककतिपयविवादितविषयाणां सम्बन्धे च विशेषपरिज्ञानाय जिज्ञासुभिः निम्नलिखिता ग्रन्था अवलोकनीयाः—

१. तमिल और उसका साहित्य, ले. पूर्ण सोमसुन्दरम्, राजकमल प्रकाशन, नई दिल्ली, मू० ३.००

२. तमिलसाहित्य, दक्षिण भारत हिन्दीप्रचारसभा, त्यागराजनगर, मद्रास. मू० ५.००

३. Collected Papers on Dravidian Linguistics. लेखक- T. Burvow. अन्नामलाई विश्वविद्यालय अन्नामलाई नगर, मूल्य-२५.००

४. An Enqiry into The Relationsoip of Sanskrit and Tamil. लेखक-पी. एस. सुब्रह्मण्य शास्त्री, ट्रावनकोर विश्वविद्यालयः - मूल्य-२०.००

अद्यापि विश्रुत-पतञ्जलिशास्त्रिणोऽहं
न्यायाधिपस्य मतमुत्तममेव मन्ये।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिन्दीबुधा न यदि विघ्नकृतोऽभविष्यन्
नूनं तदाऽमरगिरः सुसमुन्नतिः स्यात् ॥ ८ ॥

एकदा सर्वोच्चन्यायालयस्य विद्वद्वरप्रधानन्यायाधीशानां डॉ० एम० पतञ्जलिशास्त्रिमहोदयानामहं गृहं गतवान्। तदानीं ते पूजां कुर्वाणा आसन्। पूजानन्तरं मम स्वागतमातिथ्यं च विधाय स्वयमपि च स्वल्पाहारं गृहीत्वा संस्कृतरक्षाविषयक-विविध-वार्ताप्रसङ्गे तैः कथितम्—"संस्कृतभाषाया अनिष्टस्याशङ्का हिन्दीसमर्थकानामेव पक्षतो भवति, न अन्यतः। अतो भवान् तानेव अनुकूलान् करोतु।"

सर्वार्थसाधनकरी प्रमिताक्षराऽपि
गीर्वाणवागिव वराऽखिलवाङ्मयाढ्या।
दिव्यप्रबन्ध - रुचिरा त्रिकुरल्-पवित्रा
दिव्या भुवस्तमिलवागपरा विभूतिः ॥ ९ ॥

तमिलभाषायां केवलं त्रिंशद् वर्णा भवन्ति। द्वादशस्वर-वर्णास्तथा अष्टादश व्यञ्जनवर्णाः। एवमन्यप्रादेशिकवर्णापेक्षयां परिमितवर्णापि इयं भाषा पठन - पाठन - लेखन - वाचन-गानादिसकलप्रयोजनानां साधने समर्थाऽस्ति। संस्कृतभाषेव श्रेष्ठा मन्यते। सर्वविधवाङ्मयैरियं परिपूर्णा। दिव्यप्रबन्धसदृशाः अनेके मनोहराः काव्यग्रन्था अस्यां विराजन्ते। सन्तश्रीतिरुवल्लुवरविरचितं, 'तमिलवेद' इति पवित्रनाम्ना अभ्यर्हितं, धर्माध्यात्म-भक्तिनीति-शृङ्गारवर्णनपरं 'तिरुक्कुरल' इतिनामकं ग्रन्थरत्नमस्यामेव भाषायां लिखितमिति तमिलभाषा विश्वभाषासु भारतीयभाषासु च महनीयं स्थानं बिभर्तीति निःसन्देहं वक्तुं शक्यते।

अद्यापि मद्रपुरि वैष्णव - शैव - गीता-
न्याकर्णितानि कविभक्तकृतानि यानि।
दिव्यप्रबन्धरचनाश्च नवाः श्रुता याः
सर्वाणि तानि धिषणां मम वर्द्धयन्ति ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तमिलनाडुप्रदेशस्य प्राचीनैः वैष्णवैः शैवैश्च भक्तकविभिः तमिलभाषायां विशालं भक्तिसाहित्यं पद्यसंगीतमयं लिखितं वर्तते। तमिलभाषायां वैष्णवभक्ताः "आलवार" शैवभक्ताश्च "नायन्मार" इति कथ्यन्ते। तत्र वैष्णवभक्ता द्वादश भवन्ति येषां नामानि- पेरियालवार, तिरुमोलि, आण्डाल (गोदा) कुलशेखर, भक्तिसार, भक्तांध्रेणु, पाण, मधुरकवि, तिरुमंगै आलवारेत्यादीनि सन्ति।

शैवभक्तकवीनां नामानि—तिरुज्ञानसम्बन्धर, तिरुनाक्कुरसु, सुन्दरमूर्ति स्वामिगल, मणिक्कवाचकर, तिरुमूलर, मेय्कण्डार, अरुणगिरितादर, रामलिङ्गस्वामी वल्ललार इति भवन्ति। एतेषां सर्वेषां रचंनाः देवनागरीलिप्यामपि अर्थसहिताः प्रकाशिताः सन्ति, उपलभ्यन्ते च विभिन्नेषु पुस्तकविक्रयस्थानेषु। इमा रचना भारतीय-साहित्यस्य अमूल्यनिधिस्वरूपाः सन्ति। तासां परिचयं विना भारतीयप्रतिभायाः पूर्णरूपेण परिज्ञानं न भवितुमर्हति। मद्रासनिवासकाले मया एतस्य अज्ञातपूर्वस्य साहित्यराशेः परिचयस्य तथा त्यागराजप्रभृतिकवीनां भक्तिगीतानां श्रवणस्य यः शुभावसरो लब्धस्तेन न केवलं मम मनः प्रसन्नतामगमत्, प्रत्युत ज्ञाने तथा दक्षिणभारतं प्रति श्रद्धायामपि वृद्धिरजायत।

अद्यार—

अद्यापि विस्मयकरं जगतोऽद्भुतं तं
वृद्धं विशालवटवृक्षमहं स्मरामि।
यो राजते परिवृतः शतशः प्ररोहै-
र्वृद्धो गृहीव परिवारशतैरुपेतः॥ ११॥

मद्रासनगरात् अदयारनगरगमने मध्येमार्गमेको महाविशालो वटवृक्षो विराजते। अयं वृक्षः संसारस्य विशालतमेषु वटवृक्षेषु अद्वितीयो भवतीति तत्र शिलापट्टे लिखितं वर्तते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्मिन्नेव नगरे विराजमानायाः केन्द्रीयथियोसोफिकल सोसाइटीनामकसंस्थायाः सुबृहत्तरं पुस्तकालयं द्रष्टुमहं मद्रासविश्वविद्यालयस्य संस्कृतविभागे प्राध्यापकेन डॉ० कुञ्जुण्णिराजामहोदयेन सह १०.९.५९ दिनाङ्के गतवानासम्। तस्मिन्नेव समयेऽहं विस्मयकरं वृक्षं दृष्टवान्, कञ्चित् कालञ्च तत्रैव स्थितस्तस्य विशालतां तद्दीर्घजीवनं च चिन्तयन्नासम्।

अद्यापि मे तमिलनाडुभुवो विचित्रं
वस्तुद्वयं मनसि विस्मयमादधाति।
श्रीविष्णुकाञ्चि-शिवकाञ्चिपुरीबुधानां
द्वन्द्वं मिथः कटुककुत्सितभाषणं च॥ १२॥

काशीनिवासिविदुषः खलु कस्य कर्तुं
शास्त्रार्थमद्य वदने समुदेति कण्डूः।
अद्यापि हास्ययुतदर्पमयं वचस्तद्
अण्णङ्गरार्यविदुषां नहि विस्मृतं मे॥ १३॥

मद्रासनगरात् नातिदूरे काञ्चीनाम्ना द्वे तीर्थस्वरूपे पुर्यौ विराजेते। तत्र एका शिवकाञ्ची तथा अपरा विष्णुकाञ्ची कथ्यते। तयोः शिवकाञ्ची श्रीमदाद्यशङ्कराचार्यप्रवर्तितस्य अद्वैतमतस्य काञ्चीकामकोटिपीठनाम्ना प्रसिद्धा वर्तते। मम काञ्चीगमनकाले तत्र श्रीस्वामिनः चन्द्रशेखरेन्द्रसरस्वती-महाराजाः पीठाधीश्वरपदे विराजमाना आसन्। तदासन्ना एव वर्तते विष्णुकाञ्ची यत् विशिष्टाद्वैतमतस्य सुप्रतिष्ठितं पीठं वर्तते। अस्याध्यक्षास्तदानीं श्रीकाञ्ची-प्रतिवादिभयङ्कराः-श्रीमदण्णङ्गराचार्यमहोदया अवर्तन्त। इमे शास्त्रार्थे, प्रतिवादिनां मुखमुद्रणे च परं प्रावीण्यं भजन्ते स्म। यदाहमेतेषां समीपे गतवान् स्वकीयं च परिचयं दत्तवान् तदा एभिः प्रथमः प्रश्नः अयमेव समुपस्थापितो यत् सम्प्रति वाराणसीस्थ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पण्डितेषु केषां केषां मुखे शास्त्रार्थस्य कण्डूतिरुद्भवतीति। इमां तेषां हास्ययुतां दर्पोक्तिं श्रुत्वा मम महदाश्चर्यमभूत् कष्टं च।

अद्यापि तानि मदुरांनगर - स्थिताभिः
कन्याभिरुत्तमतम - स्वर - सुन्दराणि।
स्तोत्राणि तानि मधुराणि च दण्डकानि
नानाविधानि पठितानि मनो हरन्ति॥ १४॥

७.१०.५९ दिनाङ्के मदुरानगरं गतेन मया तत्राष्टौ दिनानि स्थित्वा संस्कृतविद्वत्परिषत्, रामेश्वरदेवस्थान— संस्कृतमहा-विद्यालयः, भारतीयनिकेतनम्, मदुरैहिन्दीप्रचारपाठशाला, गोविन्द-दाससेवासमाजश्चेति विविधासु साहित्यिकसंस्थासु परिभ्रमणस्य, यत्र-तत्र भाषणदानस्य, विद्वद्भिः सह मिलनस्य च हृद्यतमोऽवसरः संप्राप्तः। तास्वेव संस्थासु कन्याभिः पठितानां स्तोत्राणां दण्डकानां श्रवणस्य च शुभावसरो लब्धः।

स्तोत्राणां पाठस्तु प्रायः प्रतिप्रान्तं देवालयेषु धार्मिकगृहेषु च प्रचलत्येव। परं दण्डकानां पाठः प्राचुर्येण दक्षिणभारत एव प्रचलितो दृश्यते। श्यामलादण्डकं तु नितरां सर्वत्र प्रसिद्धमेव। तत् मया बहूनां विदुषां गृहे बालकबालिकाभिः मधुरस्वरेण गीयमानं श्रूयते स्म।

मन्दं मुदा प्रियजनैः सह भाषितानि
प्रायेण बाल - वनिता - वदनोद्गतानि।
अद्यापि तानि मधुराण्यनुनासिकानि
रम्याणि तामिलपदानि मनो हरन्ति॥ १५॥

तमिलपरिवारे निवसता मया तत्र तत्र ये मधुरालापाः श्रुतास्तेषामेव पद्येऽस्मिन् चर्चा वर्तते।

अद्यापि दिव्य-मदुरास्थित-मन्दिरं तद्
अत्युच्चशिल्परचनारुचिरं स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्रागता नवजनाः परिहाय मूर्तिं
शिल्पैकदर्शनरताः परितो भ्रमन्ति ॥ १६ ॥
राज्येन दक्षिणभुवस्तमिलप्रदेशे-
ष्वध्यापने सुरगिरोऽध्ययने च रुद्धे।
अध्यापकास्तदवने निरताः स्वयं ये
तेऽद्यापि नम्रशिरसा मम वन्दनीयाः ॥ १७ ॥

एकदा तमिलप्रदेशे संस्कृतभाषाशिक्षाविरुद्धं वातावरणं शासने समाजे च भयंकररूपेण प्रसृतमासीत्। तदानीं शासकीयविद्यालयेभ्यः संस्कृतं निष्कासितमासीत्, तदध्यापकाश्च शासनेन हिन्दीभाषा-शिक्षणार्थमादिष्टा अभूवन्। तदानीं तमिलनाडुप्रदेशे संस्कृतशिक्षायाः सर्वत्र अपमानं, ह्रासं विनाशञ्च आशङ्क्य विद्यालयानां संस्कृताध्यापका अन्ये पण्डिताश्च सम्भूय संस्कृतरक्षायाः कृते स्थाने स्थाने स्वप्रयासेन अनेकाः पाठशालाः सञ्चालितवन्तो या मया स्वयं तत्र तत्र गत्वा अवलोकिताः।

रामेश्वर—

अद्यापि सिन्धुसुविशालतटस्थितं श्री-
रामेश्वरं सकलतीर्थवरं स्मरामि।
यत्पूर्वतो जलनिधिस्थितसेतुबन्धो
दैर्घ्येण यात्रिजनविस्मयमादधाति ॥ १८ ॥

रामेश्वरं नाम भारतस्य एकं सुप्रसिद्धं तीर्थस्थानमस्ति। अस्य गणना चतुर्षु धामसु भवति। इदं तमिलनाडुप्रदेशस्य रामनथपुरम्-मण्डले समुद्रस्य मध्ये द्वीप (टापू) रूपेण अवस्थितं वर्तते। अत्रैकं बहु विशालं मन्दिरं वर्तते यस्मिन् भगवतः शङ्करस्य मूर्तिः (लिङ्गं) विराजते। अस्य स्थापना भगवता रामचन्द्रेण कृता इति प्रसिद्धिर्विद्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र सर्वाधिकं विस्मयकरं वस्तु वर्तते समुद्रमध्ये निर्मितो सुदीर्घतमो सेतुः यदुपरि रेलयानं चलति। इदं दृश्यं सर्वेषां यात्रिणां कृते न केवलं विस्मयावहं प्रत्युत भयावहमपि प्रतिभाति स्म।

अत्राहं १६.१०.५९ दिनाङ्के मदुरैनगरात् समागतः रामेश्वरं मन्दिरस्य प्रधानार्चकाणां श्रीनीलकण्ठमहादेवजोशीमहोदयानां गृहे स्थितः। एते अस्य नगरस्य विशिष्टा विद्वांसो, विशेषतः तन्त्रशास्त्रस्य पारङ्गताः पण्डिता आसन्। संस्कृतप्रचारेऽपि एतेषां बलवती अभिरुचिरासीत्। तस्मादेतेषां गृहे, परिवारे निवासः मम अत्यन्तं सुखप्रदः आनन्दमयश्च आसीत्।

अत्र स्थितेन मया एतत्स्थानसमीपवर्तिनि धनुष्कोटिक्षेत्रेऽपि स्नानं कृतं तथा पण्डितैः सह संस्कृतप्रचारचर्चा विहिता।

कन्याकुमारी—

अद्यापि सिन्धु - परिचुम्बित - पादपीठं
कन्याकुमार्यभिधपुण्यभुवं स्मरामि।
यत्रागतो जलनिधित्रयनीलवारा-
मेकत्र पश्यति जनः सुषमामपूर्वाम्॥ १९॥

कन्याकुमारीनामकं स्थानमिदं भौगोलिकदृष्ट्या भारतस्य दक्षिणंदिशायाः अन्तिमे भागे अवस्थितं वर्तते। इदं "अरबसागर, हिन्दमहासागर, तथा बंगालकी खाड़ी" इति त्रयाणामपि सागराणां सङ्गमस्थाने विराजते। अतः स्थानमिदं यात्रिणां दर्शकानां च कृते विशेषरूपेण आकर्षणं दर्शनीयतां च आवहति। सायंकाले च स्थानमिदं समधिकसुषमामण्डितं भवति। अत्राहं २०.१०.५९ दिनाङ्के प्रातःकाले समागतः। सम्पूर्णे दिने च पर्यटनं कृत्वा मन्दिरस्य प्रधानार्चकाणां पण्डितश्रीलक्ष्मीनारायणपोट्टीमहोदयानां परिवारे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतप्रचारचर्चाभिः सह सानन्दं निशामतिवाहितवान्। तत्र कांश्चिद् बालकान् बालिकाश्च संस्कृतमपि पाठितवान्।

अत्रैव सा विजयतेऽथ शिला विवेका-
नन्दाभिधा जलधिमध्यगता विशाला।
अद्यापि या जलधिघोषमिषेण विश्वं
तत्त्वानि सन्दिशति मानवबन्धुतायाः ॥ २० ॥

द्वितीयदिने अत्रैव समुद्रस्य मध्ये एकस्या बृहच्छिलाया उपरि प्रतिष्ठापितस्य विवेकानन्दस्मारकप्रतिष्ठानस्य अवलोकनं तथा तत्र संगृहीतस्य विवेकान्दसाहित्यस्य च किञ्चिद् विहंगावलोकनं विहितम्। अत्र स्वामिविवेकानन्दस्य देशविदेशसम्बन्धीनि बहूनि बहुविधानि च चित्राणि दृष्ट्वा भावाभिभूतं मे मनः सञ्जातं, तथा संस्कृतभाषायाः, भारतीयसंस्कृतेः, विश्वबन्धुत्वस्य च प्रचाराय मया नवीना प्रेरणा, नवीना शक्तिः, नवीनः उत्साहश्च सम्प्राप्तः। तत्र एकस्मिन् शिलापट्टे लिखितं स्वामिनो वाक्यमेकं मम स्मृतिपटलात् कदापि नापयाति, हृदयं च सदा आन्दोलितं करोति। तत् सर्वैरेव भारतीयैर्मनसि अवधेयं कर्मणा च विधेयम्। तद् वचनमिदं वर्तते—

"Once more the world must be conquered by India ·" This is the dream of my life.

......We must go out, We must conquer the world through our Spirituality and Philosophy. there is no alternative: We must do or die"

India's Cultural Empire
And Her Future.
by-Sisir Kumar Mitra
Page-54

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्रिनिवेली—

अद्यापि तां ट्रिनिवेलीनगरीं स्मरामि
स्त्री यत्र नो पचति काऽपि कदापि रोटीम्।
रोटीं बुभुक्षति मयि प्रणयेन दत्ता
यत्तत्र गेहपतिना ननु "पावरोटी"॥ २१॥

रामेश्वरक्षेत्रात् वैष्णवानां परमप्रसिद्धं स्थानं तोताद्रिमठं द्रष्टुकामोऽहं "नाङ्गुनेरी" ग्रामाय प्रस्थानं कृतवान्। परं ततःपूर्वं ताम्रपर्णीनदीतीरस्थिते त्रिनिवेली नगरेऽपि एकदिनं निवासं कर्तुं मम समीहा समजायत। अतः १८.१०.५९ दिनाङ्के प्रातरेव अहं त्रिनिवेलीनगरे एकस्य संस्कृतानुरागिणो भद्रनागरिकस्य, यस्य परिचयः रामेश्वरनिवासिना एकेन विदुषा प्रदत्त आसीत्, भवनं सम्प्राप्तः। परिचये दत्ते स बहुस्नेहसमादरपूर्णं ममातिथ्यं कृतवान्। अनन्तरं भोजनसमये आसन्ने स मां भोजनविषये पृष्टवान्-भवन्तः किं भक्षयिष्यन्तीति। मया उत्तरे रोटिका इत्युक्तम्। ततः स त्वरितमेव आपणं गत्वा स्थूलाः स्थूलाः पञ्च पावरोटिका आनीतवान्। तद् दृष्ट्वा मया कथितम्—

अहमिमा रोटिका न भक्षयामि। ततः स किञ्चित् चिन्तयित्वा कथितवान्-आम्, ज्ञातम्, भवान् "चपातीं" भक्षयितुं कथयति। तत् स प्रतिवेशात् एकां महिलामन्विष्य आनीतवान् या बम्बईनिवासिनी आसीत्, रोटिकानिर्माणं च कर्तुं जानाति स्म। अतः सा यदा पाकनिर्माणं कृतवती, अहं भोजनं कृतवान्। तावत् मम भोजनसमस्या एव चर्चाया विषयः आसीत्। तदिदं श्रोतुं द्रष्टुं च अन्येऽपि अनेके जनाः सकुतूहलं समुपागताः। अहं गृहपतेः कृते समस्यारूपेण उपस्थित इति चिन्तयित्वा ममापि किञ्चित् कष्टं जातम्। यद्यपि इदं वृत्तं मत्कृते नवीनं नासीत्। गोहाटीनगरे, हैदराबादनगरे,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाण्डिचेरीनगरे चापि एतादृशी घटना जाता, तथापि "कथं रोटिकायाः कृते आग्रहः? पावरोटीभक्षणे कश्चिद् दोषो वर्तते वा? यदि आपणस्य चायं पीयते, बिस्कुटं च भक्ष्यते तर्हि पावरोटी किमपराध्यति?" इत्यादयः प्रश्नाः घटनामिमां विशिष्टां कृतवन्तः। मया तु सर्वं श्रुत्वा सस्मितं मौनमेवासितम्।

ततः परम् अपराह्णे तत्र विवेकवर्धन्यां परिषदि हिन्दुधर्म-परिपालनसभायां च भाषणं दत्त्वा संस्कृतपण्डितैः सह च तत्र संस्कृतप्रचारस्य योजनां निर्माय मया नाङ्गुनेरीं प्रति प्रस्थानं कृतम्।

तोताद्रिनामकमठस्य समीपवर्ति
दृष्टं सरः प्रचुरतैलजलाविलं यत्।
दृष्टाश्च यत् प्रचुरसाधुजनाः प्लवन्त-
स्तन्मेऽधुनापि बहु विस्मयमादधाति॥ २२॥

१९-१०-५९ दिनाङ्के यदाहं तोताद्रिमठं प्राप्तवान् तदा तत्र किमपि उत्सवमयं वातावरणं दृष्टं, बहूनां वैष्णव-साधुजनानां सम्मिलनं च। अत्र परं सर्वाधिकं विस्मयकरं वृत्तं यद् विलोकितं तदासीत् तत्र तस्मिन् दिने तत्रत्यानां सर्वेषां साधु-ब्रह्मचारिणां सर्वाङ्ग-शरीरे प्रचुरतैलमर्दनं कृत्वा सरोवरे स्नानं येन समस्तमपि सरोवरजलं तैलमयं जातमासीत्। पुनश्च साधुजनाः तत्र यत् चिरं प्लवनं कुर्वन्ति स्म तदपि एकं विस्मयावहं वृत्तमासीत्।

चिदम्बरम्—

अद्यापि विस्मरति नो हृदयं मदीयं
दृष्टं चिदम्बरपुरे यददृष्टपूर्वम्।
झङ्कारि दर्शकदृगञ्चलहारि भूयो
भूकम्पकारि शिवताण्डवगीतनृत्यम्॥ २३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिदम्बरम् दक्षिणभारतस्य एकं सुप्रसिद्धं तीर्थं वर्तते। अस्य प्रसिद्धिः भगवतः शिवस्य नटराजमूर्तेः कारणादस्ति। मन्दिरस्य परिसरोऽपि महान् विशालो विद्यते। गोपुरस्य उपरि नाट्यशास्त्रानुसारं नृत्यमुद्रायां मूर्तयः अङ्किताः सन्ति। आभ्यन्तरे सुवर्णमयी नटराजमूर्तिर्विराजते। तत्रैव समये समये शिवताण्डवश्लोकानां यद् अभिनयपूर्वकं गानं भवति तत् मत्कृते अदृष्टपूर्वमेव आसीत् रोमाञ्चकारि च। तस्य प्रत्यक्षदर्शनं विना शिवताण्डवस्तोत्रस्य चमत्कारः केनापि अनुमातुं न शक्यते।

एतदतिरिक्तं नटराजस्तोत्रस्यापि गानं किमपि अद्भुतमेव लालित्यमावहति। लयबद्धतया, सानुप्रासपदनिबद्धतया छन्दो-वैशिष्ट्येन च नटराजस्तोत्रं प्रायः उत्तरभारतीय-संस्कृतसमाजे प्रसिद्धं नास्ति। अत्र पाठकानां परिज्ञानाय उदाहरणरूपेण पद्यमेकं प्रस्तूयते—

सदञ्चितमुदञ्चित - निकुञ्चितपदं
झलझलज्झडित - मञ्जु - कटकम्
पतञ्जलि - दृगञ्जनमनञ्जनमचञ्चल-
पदं जनन-भञ्जनकरम्।
कदम्बरुचिमम्बरवसं परममम्बुद-
कदम्बक - विडम्बक - गलम्
चिदम्बुधि-मणिं बुध-हृदम्बुज-रविं पर-
चिदम्बर-नटं हृदि भजे॥

अत्राहं २८.९.५९ दिनाङ्के आगत्य भगवतो नटराजस्य मूर्तेः दर्शनस्य नृत्यगीतादिश्रवणस्य च सौभाग्यभाजनमभवम्। अत्र अन्नामलै विश्वविद्यलयस्य संस्कृतविभागाध्यक्षाणां गृहे निवासेनापि अहमत्यन्तमाह्लादित आसम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तञ्जौर—

तंजावरं - नगरवर्ति सुविश्रुतं तत्
सारस्वतं महलमेति सदा स्मृतौ मे।
ग्रन्था महाद्भुततमा बहु वीक्षिता ये
तेऽद्यापि मामकमनः परिलोभयन्ति ॥ २४ ॥

भारतस्य प्रसद्धतमेषु सुविशालतमेषु च पुस्तकालयेषु तंजोरनगरस्य सरस्वतीमहलपुस्तकालयोऽपि अतिमहत्त्वपूर्णं स्थानं भजते। अस्य ख्यातिर्बहुपूर्वत एव मम कर्णगोचरतां गता आसीदिति इमं पुस्तकालयं द्रष्टुं बलवती इच्छा जागर्ति स्म। अतोऽहं चिदम्बरात् १.१०.५९ दिनाङ्के अत्रागत्य दिनद्वयं सम्पूर्णं दिवसं पुस्तकालयस्यैवावलोकने, दुर्लभपुस्तकानां निरीक्षणे, अध्ययने, केषाञ्चित् पुस्तकानां नामपरिचयोद्धरणादिलेखने, किञ्चित् पुस्तकालयाधिकारिभिः सह संभाषणे च यापितवान्। अहं वाराणसीतो गतवानासम्, बहुविधपुस्तकावलोकनानुरागी, अनेक-विधलिपिज्ञश्चेति अधिकारिभिः इडली, दोसा, काफीपानादिभिश्च बहुधा आतिथ्यमपि मे सम्पादितमिति तद् दिवसद्वयं मम यात्रायां नितरामानन्दमयं व्यतीतम्। परन्तु कतिचित्पुस्तकानां पुनरवलोकनस्य लोभः अद्यापि मे नापगतः।

तमिलनाडु-प्रशस्तिः—

साहित्य-धर्म - मत - संस्कृति - लोकभाषा-
सङ्गीत-शिल्प-विषयानुगतैः विशेषैः।
प्रख्यापयन् निजविशिष्टतरं स्वरूपं
विश्वे सदा विजयते तमिलप्रदेशः ॥ २५ ॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २४ :

पाण्डिचेरीप्रदेशीयानि संस्मरणानि

पण्डिचेरी—

अद्यापि सा स्मृतिगता मम पाण्डिचेरी
पुण्या पुरी जनयते मनसः प्रमोदम्।
याऽनेकशासन - गतागत - भुक्तमुक्ता
राराज्यते सपदि भारतभागभूता॥ १॥

सर्वे इतिहासविदः जानन्ति इदं वृत्तं यत् पाण्डिचेरीनामकं नगरमिदं फ्रांसीसी-अंग्रेजीराज्ययोः संघर्षस्य अधिकारस्य च अनेकधा घातप्रत्याघातात् मुक्तं सत् १९५४ तमे खृष्टाब्दे भारतीयगणराज्यान्तर्गतं जातम्, फ्रांसीसीशासनेन च अस्य शासनसूत्रं भारतस्य हस्ते समर्पितम्। तदारभ्य अस्य प्रदेशस्य नगरस्य च सर्वविधा समुन्नतिर्जायमाना वर्तते। अस्य नगरस्य भवनानां शोभां, मार्गाणां स्वच्छतां, समुद्रतटस्य रमणीयतां च दृष्ट्वा महती प्रसन्नता जायते, तत्र निवासः परिभ्रमणं च पर्यटकानां कृते महदानन्दप्रदं भवति। अस्यां यात्रायां मम माननीयाः सुहृदः विख्यातसाहित्यकाराः शिक्षाविदश्च श्रीमदाचार्यसीतारामचतुर्वेदि-महोदया अपि पाण्डिचेरीं गतवन्तः आसन्। ते द्वित्राणि दिनानि स्थित्वा विविधगोष्ठीषु च भागं गृहीत्वा पुनरपि वाराणसीं निवृत्ताः।

अध्यापनाय वसतो मम पुडुचेर्या-
मद्यापि सिन्धुतटवर्तिविशालसौधे।
रात्रौ समुद्रतटघर्घरभीमघोषो
निद्रां भनक्ति बहुधा स्मृतिमागतो मे॥ २॥

पाण्डिचेरीनगरे अरविन्दाश्रमे एका निरञ्जनानाम्नी नववयस्का साधिका आसीत्, बी०ए० परीक्षोत्तीर्णा गुर्जरप्रदेशीया। तस्मिन् वर्षे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिष्ठापितस्य विश्वसंस्कृतप्रतिष्ठानस्य मुख्यं केन्द्रमासीद् अरविन्दाश्रमः, यस्य एका कार्यकर्त्री निरञ्जना निर्वाचिता आसीत्। अतस्तस्याः संस्कृताध्ययनं परमावश्यकमासीदिति अहं तस्या अध्यापनार्थं पाण्डिचेरीं गतवानासम्। विश्वसंस्कृतप्रतिष्ठानस्य संस्थापकेषु अहमपि अन्यतम आसमिति ममापि तत्र किञ्चिदुत्तरदायित्वमासीदिति मया मासद्वयस्य कृते पाण्डिंचेरीनिवासः स्वीकृतः।

पाण्डिचेर्यां समुद्रतटस्योपरि स्थिते यस्मिन् विशाले भवने मम निवासस्य व्यवस्था विहिताऽसीत् तत्र सर्वविधे सौख्ये विद्यमानेऽपि रात्रौ गाढनिद्रया शयनं सुदुर्लभं भवति स्म। तस्य कारणं मम पार्श्ववर्तिनः समुद्रस्य भयंकरो घोष एवासीत्।

अद्यापि संस्कृतपुरीमिव पाण्डिचेरीं
मन्येऽरविन्द-जननी-तपसः स्थलीं ताम्।
यस्मिन् पुरे लघुनि देवगिरोऽभिवृद्ध्यै
सर्वाऽतिगो बहुविधो विहितः प्रयासः॥ ३॥

मद्रासराज्यस्य अन्तर्वर्ति पाण्डिचेरी (पुंदुचेरी) नगरं पूर्वं फ्रान्सदेशस्य अधिकारे आसीत् परं बृटिशशासनानन्तरं तत् पुनः १९५४तमे ईसवीये वत्सरे भारतस्याधिकारे समागतम्। योगिराजः अरविन्दघोषः १९१०तमे ईसवीये वत्सरे राजनीतेरवकाशं गृहीत्वा अत्रैव एकमाश्रमं स्थापितवान् यः अरविन्दाश्रमनाम्ना विश्वे प्रसिद्धो वर्तते।

इदं स्थानं यद्यपि मूलतः भारतस्य एकं सुप्रतिष्ठितं विख्यातं च आध्यात्मिकं केन्द्रं वर्तते तथापि इदं संस्कृतप्रचारस्यापि एकं महत्त्वपूर्णं भारतप्रसिद्धं च केन्द्रं वर्तते। अत्र अरविन्दाश्रमे एकः संस्कृतकार्यालयनाम्नाऽपि विभागः प्रचलति। एतद्विभागद्वारा संस्कृतप्रचारोपयोगीनि संस्कृतशिक्षणोपयोगीनि च विपुलसंख्यायां सुन्दराणि सचित्राणि च पुस्तकानि प्रकाशितानि सन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाण्डिचेरीनिवासकाले मया तत्र नव सचित्राणि पुस्तकानि दृष्टानि यानि विषयदृष्ट्या भाषादृष्ट्या च बालकानां संस्कृतशिक्षणाय अत्यन्तमुपयोगीनि, आकर्षकाणि, मनोरञ्जकानि च आसन्। तेषां नामानि आसन्-१. चित्रपाठाः २. वार्ता-चटका, ३. रजनतूरम् ४. पुष्पावलि, ५. प्रश्नः ६. मोहनः ७. प्रहेलिका ८. अंकुरः ९. ९६पृष्ठात्मकं पुस्तकं यस्य नाम विस्मृतं मम। सर्वाण्यपि पुस्तकानि अद्भुतानि अनुपमानि च। ततः परं सरलसंस्कृतम् इति नाम्ना त्रिषु भागेषु एकं पुस्तकं प्रकाशितं दृष्टम्। एतदतिरिक्तं संस्कृतभाषया वार्तालाप-कथा-नाटक-स्तोत्र-कविता-गीतादिविविधविषयसम्बन्धि विपुलं साहित्यं प्रकाशित-मरविन्दाश्रमस्य संस्कृतकार्यालयेन। संस्कृतशिक्षण-प्रचार-विषयक-साहित्यातिरिक्तं वेद-भगवद्गीता-भारतीयसंस्कृति-आध्यात्मिकसाधना-सम्बन्धीनि अपि बहूनि बहुमूल्यानि च पुस्तकानि आश्रमतः प्रकाशितानि।

आश्रमतः प्रकाशिते साहित्ये मम सर्वाधिकं प्रियं पुस्तकं वर्तते "भवानी-भारती"। ९९ उपजाति च्छन्दोभिर्निबद्धमिदं पुस्तकं महर्षिणा अरविन्देनैव १९०४तः १९०८तमे खृष्टाब्दे रचितं प्रकाशितं च अरविन्दाश्रमतः। अत्र भवानीशब्देन अनन्तशक्तिमयी देवस्वरूपा भारतभूमिः अभिहिता अस्ति। एषु श्लोकेषु परतन्त्राया भारतमातुः स्वतन्त्रताप्राप्तये स्वदेशवासिनः प्रति क्रान्तिकारि उत्तेजनापूर्णं च उद्बोधनं वर्तते। इदं पुस्तकं भारतमातुः दासतामुक्तये लिखितः प्रथमः क्रान्तिकारी अभिलेख इति वक्तुं शक्यते। इदं पुस्तकं पठित्वा देशभक्तेः, देशस्य स्वाधीनतायै, बलिदानस्य च उत्कटभावना जागर्ति। एवं च लघीयसी अपीयं नगरी संस्कृत-संस्कृति-प्रचारक्षेत्रे मार्गदर्शकः महान् प्रकाशस्तंभ इव अस्तीति मया अनुभूतम्। तेनास्य स्थानस्य मम मुहुर्मुहुः स्मरणं जायते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद् विश्ववन्द्यमरविन्दमहर्षि-पीठं
तन्मातृमन्दिरमपि प्रणतः स्मरामि।
अद्यापि यस्य कणिकाः कुसुमानि वाता
अध्यात्मसौरभभरं परितः किरन्ति॥ ४॥

योगिवर्य्यः श्रीअरविन्दमहाभागः इंग्लैंडदेशे शिक्षां गृहीत्वा, भारते च प्रथमं बड़ौदानगरस्य राजकीयमहाविद्यालये, तदनु कलिकातानगरस्य राष्ट्रियमहाविद्यालये च अध्यापनं कृत्वा देशस्य स्वाधीनतायै राजनीतौ प्रवेशं कृतवान्। तस्य राजनीतिका विचारा अत्यन्तं वैदेशिकशासनविरोधिनः आसन्, अतः स कलिकातानगरे कारागारे निरुद्धः। तदानीमेव तस्य हृदये भगवत्साक्षात्कारस्य अनुभूतिर्जाता। ततः स कारामुक्तः सन् पुनरपि किञ्चिद् देशकार्यं सम्पाद्य ४.४.१९१० दिनाङ्के पाण्डिचेरीं प्राप्य आश्रमं च संस्थाप्य आध्यात्मिकसाधनायां संलग्नः तद्द्वारा च सम्पूर्णमानवजातेः कल्याणसम्पादनाय निश्चयं कृतवान्। तेषामाध्यात्मिका विचाराः "डिवाइन लाइफ" पुस्तके विस्तरेण प्रतिपादिताः सन्ति।

अद्यापि सा लघुतमापि पुरी प्रशस्या
भाषादृशा सुविपुला बहु रोचते मे।
या साम्प्रतं तमिल-संस्कृत-फ्रेंच-हिन्दी-
इंग्लिश्गिरां मिलन-नर्तन-रङ्गभूमिः॥ ५॥

पांडीचेरीनामकं नगरमिदं नितान्तं लघु वर्तते। अस्य क्षेत्रफलं केवलं "४९२ वर्ग किलोमीटर" परिमितं भवति। परन्तु लघुनगरेऽप्यस्मिन् शिक्षाक्षेत्रे व्यवहारक्षेत्रे च संस्कृतम्, तमिल, फ्रेञ्च, हिन्दी, इंग्लिश प्रभृतयः अनेका भाषाः प्रचलन्ति। तत्र एतासु सर्वास्वपि भाषासु मया छात्राणां भाषणानि गीतानि, अभिनयाश्च अवलोकिताः। फ्रेञ्चभाषायास्तु तत्र अनेके परिवारा निवसन्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतदतिरिक्तं तत्र आध्यात्मिक–साधनायाः कृते विभिन्नभाषा–भाषिणः अनेके भारतीय–परिवारा अपि मया दृष्टाः। संयोगवशात् तत्र एकः भोजपुरी भाषा–भाषी अपि परिवारो मया प्राप्तः। एकस्मिन् दिने एका तस्य परिवारस्य वृद्धमहिला आगत्य मां भोजपुरीभाषया उक्तवती—"*अरे, रउरा कहिया से ईहाँ आइल बानी, बाकी हमनी का कुछ जानते नइखी*"। तां दृष्ट्वा मम महदाश्चर्यं जातम्। नूनमयम् अरविन्दाश्रमस्य प्रभाव आसीत्। लघुनगरे एतादृशं विविध–भाषासङ्गमं दृष्ट्वा मम महती प्रसन्नता भवति स्म।

अद्यापि तान् बुधवरानिह पाण्डिचेरी–
पुण्याश्रमे निवसतो बहुशः स्मरामि।
येऽध्यात्म – योग – युत – संस्कृत – साधनायां
सक्ताः सदा विदधते निजजन्म धन्यम्॥ ६॥

पाण्डिचेरीनगरे यस्मात् कालाद् अरविन्दाश्रमस्य स्थापना जाता, शिक्षणस्य च कार्यक्रमः प्रारब्धः तस्मादेव कालात् तत्र संस्कृत–विदुषां समागमनस्य, संस्कृतशिक्षणस्य संस्कृतप्रचारस्य च परम्परा प्रारभ्यत। तत्रत्याश्च विद्वांसः न केवलं भाषाविदः शास्त्रविदो वा आसन् अपि तु ते अध्यात्मचिन्तने, योगसाधनायां चापि रुचिमन्तो भवन्ति स्म। तेषां जीवनञ्चापि सात्त्विकं, सरलं, तपोमयं च दृश्यते स्म। एतादृशेषु विद्वत्सु ब्रह्म श्री टी०वी० कपालिशास्त्री, जगन्नाथो वेदालङ्कारः, श्रीपूजालालः, श्रीविष्णुललितः, युवको संस्कृतमनीषी श्रीनरेन्द्रश्चेति प्रमुखाः आसन्। अध्यापिकानां नामानि मम विस्मृतानि।

अद्यापि तान् लघुशिशूनभिरम्यरूपान्
प्रीत्या स्मरामि च भृशं मुदितो भवामि।
यैः श्रावितानि पुरतो मम सुष्ठु "गन्त्री–
गीतानि" सम्यगभिनीय मधुस्वरेण॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाण्डिचेर्य्यां निवासकाले तत्र बालविद्यालयस्य एकं मनोरमं दृश्यं सदैव मम स्मृतिपथेऽवतिष्ठति। तच्चेदं वर्तते—मम बालक-वितावल्याः प्रथमे भागे संस्कृतहिन्दीमिश्रिता एका कविता वर्तते गन्त्री विषयिणी। तां कवितामन्यविद्यालयानां बालकाः केवलं कवितारूपेण पठन्ति परन्तु अत्रत्या बालकाः सर्वे गन्त्रीवत् लम्बायमाना भूत्वा अभिनयपूर्वकमिमां कवितां श्रावितवन्त इति दृश्यमिदं नितान्तं मनोहरं, विस्मयकरं, बालकानां कौशलप्रदर्शकं चासीदिति तत् कदापि मम विस्मृतं न भवति। मदीया सा कविता निम्नलिखिता वर्तते—

गन्त्री गच्छति – गाड़ी जाती
गन्त्री गच्छति – गाड़ी जाती।
अग्रे गच्छति – आगे जाती
पृष्ठे गच्छति – पीछे जाती
उच्चैः गच्छति – ऊँचे जाती
नीचैः गच्छति – नीचे जाती
गन्त्री गच्छति
गाड़ी जाती।
मन्दं गच्छति – धीरे जाती
शीघ्रं गच्छति – जल्दी जाती
वक्रं गच्छति – टेढ़ी जाती
सरलं गच्छति – सीधी जाती
गन्त्री गच्छति
गाड़ी जाती।
झक् झक् – झक् झक्
गानं गायति – गाना गाती
धक् धक् – धक् धक्
नादं कुरुते – शोर मचाती

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गन्त्री गच्छति
गाड़ी जाती।
अंगारं खादन्ती– कोयला खाती
जलं पिबन्ती – पानी पीती
धूमं ददती – धूँआ देती
रजः किरन्ती – धूल उड़ाती
गन्त्री गच्छति
गाड़ी जाती।
मध्ये मध्ये तिष्ठति– बीच बीच में रुकती
यदा कदाचित् युध्यति – कभी कभी लड़ जाती
पुनः उपरि उत्तिष्ठति – फिर ऊपर उठ जाती
गन्त्री गच्छति
गाड़ी जाती।
शीते वा उष्णे वा – सर्दी या गर्मी में
सदा सेवते – हरदम सेवा करती
दिवसं वा रजनी वा – दिन हो या रजनी हो
अवकाशं नो लभते – छुट्टी कभी न पाती
गन्त्री गच्छति
गाड़ी जाती।

अद्यापि सा सुरगिरोऽध्ययने प्रचारे
तद्भाषणे च सततं निरता नितान्तम्।
शिष्याऽरविन्दसदनस्य "निरञ्जनाख्या"
चित्ते सदा स्मृतिगता प्रमुदं विधत्ते॥८॥

निरञ्जना बी०ए०, एका गुजराती छात्रा, अरविन्दाश्रमस्य शिष्या आसीत्, स्वाध्याये साधनायां च निरन्तरं निरता। प्रयागे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुम्भमेलावसरे सम्पत्स्यमाने विश्वसंस्कृतसम्मेलने संस्कृतविदुषां स्वागतसत्कारार्थमियं नियुक्ता आसीत्। तदनुसारमेव, यदाहं मध्याह्नकाले अतिथिनिवासस्थलं प्राप्तस्तदा सा मत्समीपमागत्य स्वपरिचयं च दत्त्वा ममातिथ्यविषये किञ्चित् हिन्द्या पृष्टवती। तदा मया पृष्टम्—"भवती यदि संस्कृतविदुषां सेवायै नियुक्ता तर्हि हिन्द्या कथं वदति?" तदा सा- "अहं संस्कृतेन वक्तुं न शक्नोमीति" किञ्चित् लज्जया नम्रमुखी भूत्वा मामुक्तवती। तदा मया स्वकीयं संस्कृतवाक्यसंग्रहं लघु पुस्तकं दत्त्वा सा प्रोक्ता—इदं पुस्तकमद्य एकयैव रात्र्यात्र कण्ठस्थीकृत्य प्रातः कालात् संस्कृतगिरा सर्वैः पण्डितैः सह वक्तुं प्रयासं कुरु इति। ततः सा तत् पुस्तकं कण्ठस्थीकृत्य प्रातःकालादेव आवश्यकानि वाक्यानि संस्कृतेन एव वक्तुं प्रारब्धवती। इदं तस्या दृढसंकल्पस्य, परिश्रमस्य, प्रत्यक्षं प्रमाणमासीत्।

अनन्तरं तस्या एव विशेषशिक्षणार्थं संस्कृत-भाषणप्रचार-योग्यतासम्पादनार्थं च अहमेकंमासस्य कृते पाण्डिचेरीं गतवान्, तस्याश्च विशेषरूपेण वक्तुं, लिखितुं भाषणं च कर्तुमभ्यासं कारितवान्। तस्मिन् समये श्रीदेवदत्तमहोदया अपि मम सहयोगिनोऽभूवन्।

अंनन्तरं निरञ्जना कनाडादेशं गता। तत्रैव च सा दशवर्षेभ्यः संस्कृतं पाठयति, योगाभ्यासं शिक्षयति, भारतीयविद्यासंस्कृततत्त्वानि च प्रचारयति।

अद्यापि विप्रगुणकर्मभृतः सदाहं
तान् फ्रेञ्चपण्डितजनान् सुतरां स्मरामि।
येऽहर्निशं सुरगिरोऽध्ययनेऽनुवादे
ग्रन्थप्रकाशनविधौ च रता अभूवन्॥ ९॥

पाण्डिचेरीक्षेत्रं पूर्वं फ्रांसीसीशासनाधीनमासीत्। अतस्तत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शासने, शिक्षायां, समाजे, संस्कृतौ, व्यवहारे च सर्वत्र फ्रान्सनिवासिनां फ्रेञ्चभाषायाश्च विपुलः व्यापकः प्रभावः आसीत्। इदानीं भारतीयशासनान्तर्गतत्वेऽपि स प्रभावः तथैव विराजते। अद्यापि तत्र अनेके फ्रांसीसी-परिवारा निवसन्ति। विद्यालयेषु, पुस्तकालयेषु च फ्रेञ्चभाषायाः क्वचित् क्वचित् प्रामुख्यं दरीदृश्यते। एवमेव कानिचित् फ्रेञ्चमाध्यमेन शोधसंस्थानान्यपि प्रचलन्ति। एतादृशेष्वेव संस्थानेषु DEL, INSTITUT FRANCAIS D'INDOLOGIE" इति नामकं संस्थानं वर्तते यत्र महत्त्वपूर्णानां संस्कृतग्रन्थानामध्ययनम्, अनुसन्धानम्, फ्रेञ्चभाषया अनुवादः तथा प्रकाशनं च भवति। अस्याः संस्थापकाः सञ्चालकाः निर्देशकाश्चासन् श्री JEAN FILLIOZAT महोदया येषां सम्पूर्णः परिवारः कार्येऽस्मिन् निष्ठापूर्वकं संलग्न आसीत्। इदं संस्थानम्, अस्य पुस्तकालयम्, अस्य कार्यकलापं, कार्यकर्तॄंश्च स्मारं स्मारं मम महती श्रद्धा जायते। ते सर्वेऽपि संस्थासञ्चालकाः स्वरूपेण, गुणेन, कर्मणा, संस्कृतनिष्ठया च ब्राह्मणपण्डितसमाना एव दृश्यन्ते स्म।

पाण्डिचेरी-प्रशस्तिः—

सम्पूर्ण - मानवसमाज - समानतायै
आध्यात्मिकीं गिरमुदारतरां जगत्याम्।
सिन्धुस्वरैः सह सदैव निनादयन्ती
भेरीव राजतितरां भुवि पाण्डिचेरी॥ १०॥

✮

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २५ :

सामान्यत: समस्तदक्षिणभारतवर्तिनां वृत्तानां संस्मरणम्

सम्पूर्णदक्षिणभुवः परम-प्रसिद्धे
तद्दिव्यपोंगलशुभावसरे मया यत्।
भुक्तं च पीतमखिलं विविधं विचित्रं
अद्यापि तत् स्पृहयते हृदयं मदीयम्॥ १॥

इदं पोंगलनामकं पर्व दक्षिणभारतस्य सर्वेष्वपि प्रदेशेषु महता समारोहेण अनुष्ठीयते। इदं प्रतिवर्षं जनवरीमासस्य चतुर्दश-पञ्चदश-षोडशतारिकासु च दिनत्रयं प्रचलति। अस्मिन् पर्वणि गृहे गृहे नवीनवस्त्राणां धारणस्य, पूजापाठाद्यनुष्ठानस्य, विविध-स्वादिष्ठ-भोज्यवस्तूनां सामूहिकभोजनस्य, गीतवाद्यादीनां तत् सर्वं साक्षाद् दृष्टम्, अनुभूतम्, आस्वादितं च।

अद्यापि दक्षिणभुवोऽमरमन्दिराणां
स्तोत्राणि रम्य-मधुरध्वनि-मञ्जुलानि।
सन्ध्याद्वये स्मृतिगतानि ममान्तरङ्गम्
आनन्दयन्ति मदयन्ति तरङ्गयन्ति॥ २॥

दक्षिणभारतस्य येषु मन्दिरेषु मया सविशेषं श्रोत्राभिरामाः स्तोत्रपाठा आकर्णितास्तेषु केचन इमे निम्नलिखिता अतिशयमानन्द-दायका हृदयाकर्षकाश्च आसन्। यथा—

१. केरलप्रदेशीये गुरुवायूरस्थ-मन्दिरे 'नारायणीयम्' ग्रन्थस्य रासस्तोत्राणि।

२. तमिलप्रदेशे चिदम्बरम्-नगरस्थे नटराजमन्दिरे नटराजस्तोत्राणि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३. तमिलप्रदेशस्य शिवकाञ्चीमन्दिरे विष्णुकाञ्चीमन्दिरे च दक्षिणे विशेषरूपेण प्रचलितानि शिवविष्णुस्तोत्राणि, संस्कृते तमिलभाषायां च निबद्धानि। एवमेव मध्यप्रदेशे उज्जयिन्यां महाकालमन्दिरे शिवस्तोत्राणि पुर्यां जगन्नाथस्तोत्राणि च।

अद्यापि विस्मरति नो रसना मदीया
तान् दाक्षिणात्यसुहृदां व्रतपर्वयज्ञान्।
यत्रातितिक्त - कटुकाम्ल - रसाढ्यमन्नं
नैवोपभोक्तुमशकं न च मोक्तुमेव॥ ३॥

दक्षिणभारते भ्रमता मया प्रायः सर्वेष्वेव प्रदेशेषु स्वमित्राणां गृहे व्रतपर्वयज्ञाद्यनुष्ठानावसरे समायोजिते विशेषभोजनसमारोहे इदं बहुशोऽनुभूतं यत् तत्रत्यानि भोज्य-पेय-चोष्य-लेह्यवस्तूनि अत्यन्तं तिक्ततया कटुतया च सहजतया भोक्तुं न शक्यन्ते परं स्वादिष्ठतया मोक्तुमपि न शक्यन्ते।

अद्यापि दक्षिणभुवो गृहिणीजनानां
सौहार्दमार्द्रमधिकं परिकल्पयामि।
या नूतनानपि जनान् भवनं प्रपन्नान्
सन्तोषयन्ति सुदृशा सुवचोभिरद्भिः॥ ४॥

उत्तरभारतस्य उत्तरप्रदेशे, बिहारे, मध्यप्रदेशे च महिलाः प्रायेण कस्मिंश्चिदपरिचिते आगते तेन सह कपाटार्धं पिधाय, अवगुण्ठनं वा मुखे निधाय, संकेतेन वा, किञ्चिद् वार्तां कुर्वन्ति। तेन तत्रागतानां जनानां बहु असौविध्यं भवति। परन्तु एतादृशमसौविध्यं दक्षिणभारते नाऽनुभूयते। तत्रत्या महिलास्तु स्नेहार्द्रचक्षुषा, मधुरवचसा, स्वादुजलेन च अपरिचितमपि जनं प्रीणयन्ति। इदं मया बहुशोऽनुभूतम्। तत्रत्या महिला वृद्धा वा युवतयो वा कस्मिंश्चिदपि अपरिचिते जने समागते तेन सह निःसंकोचमालपन्ति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आगमनप्रयोजनं पृच्छन्ति, उपवेष्टुं, जलं चायं वा पातुमनुरुन्धन्ति, स्नेहसमादरपूर्वकं च व्यवहरन्ति। तेन नवागता अपि सन्तुष्टा निवर्तन्ते जनाः। दक्षिणभारते भ्रमता मया सर्वत्र इदं वैशिष्ट्यमनुभूतम्।

अद्यापि आन्ध्र - मलयालम - कन्नडीनां
काव्यानि संस्कृतपदावलिगर्भितानि।
तत्तत्प्रदेश - कविकण्ठ - समीरितानि
तानि स्मृतानि मदयन्ति मनः सदैव॥ ५॥

तमिलभाषां विहाय दक्षिणभारतस्य अन्यासु तिसृष्वपि भाषासु संस्कृतशब्दानां विपुलः प्रयोगो दृश्यते। गद्य-पद्यरचनासु क्वचित् कांश्चित् भाषाशब्दान् विहाय सर्वेऽपि शब्दाः संस्कृतभाषाया एव भवन्ति। बृहत्सु बृहत्सु समस्तपदेषु प्रयुक्ताः संस्कृतशब्दाः- ''सा रचना भाषाया वा उत संस्कृतस्ये''ति भ्रान्तिमपि जनयन्ति श्रोतॄणाम्। मया आसां भाषाणां लिपयो ज्ञायन्त इति तादृशगद्य-पद्यरचनानां वाचनस्य श्रवणस्य च मम भूयांसः सुखप्रदा अवसराः प्राप्ता दक्षिणभारतभ्रमणे। अत्र तादृशसंस्कृतबहुलानां पद्यरचनानां कानिचिदुदाहरणानि प्रदीयन्ते पाठकानां प्रमोदाय। आन्ध्रभाषाया यथा—

शारदनीरदेन्दु - घनसार - पटीर - मराल - मल्लिका -
हार-तुषार-फेन-रजताचल-काश-फणीश-कुन्द-मन्-
दार - सुधापयोधि - सित - तामरसामर - वहिनी - शुभा
कारत-नोप्पु-निम्म-मदिगानगा-नेत्रडु गलगु भारती॥

श्रीमदान्ध्रभागवत. पु. स्कन्धम् प्रथम भाग उ. ८

अथैकमुदाहरणं कन्नडभाषायाः-

...गशत कूजन मुखरित वनदलि
पल्ल... मुद्रित विजय विपिन दलि,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शामल शाद्वल भुवन शयन दलि
पीत अरुण तपनापदि,
अर्धनिमीलित अर्धोन्मीलित
सन्ध्यातायसियिरे तपदि॥

के०वी० पुट्टप्पा-

खगशतकूजनमुखरिते वने, पल्लवमुदि‌ते विजने विपने, श्यामलशाद्वलभुवने शयने, पीतारुणे नयनातपे यदा अर्धनिमीलिता अर्धोन्मीलिता च सन्ध्यातापसी विराजते तदा (हे मम मनोमयूर! नर्तनं कुरु)।

मलयालमभाषाया एकमुदाहरणम्—

तस्मिन् काले बद्धाभोगं मध्येगगनमिहाध्यारूढे मध्याह्नार्के खरतर-दिनकर-चिरतर-परिगत-गुरुतर-वरकरजाले वियति विशाले हन्त दिगन्तर-सन्तत-मेदुर-तरुवर-सन्ततिसङ्कर-बन्धुरितान्तर-कान्ताराध्व-विशृंखल-चंक्रम-संकट-संकुल-मेंगलमात्री धात्री देशे केण्णु विषण्णा दमयन्ती पुरनेन्तुं खेदात्......।

भाषानैषधचम्पू, उत्तरभाग,

अद्यापि तीव्रतरतिक्तरसान्वितानि
भोज्यानि दक्षिणभुवो नहि विस्मृतानि।
एकेन भोजनमथान्यकरेण चाक्ष्णो-
रश्रुप्रमार्जनमहो क्रियते नु यत्र॥ ६॥

भारते प्रायः सर्वेष्वेव प्रदेशेषु भोज्यवस्तुषु मरिचादीनां तिक्तपदार्थानां न्यूनाधिकरूपेण प्रयोगः भवत्येव। परन्तु दक्षिणवासिनां तिक्तप्रियता सर्वानपि इतरप्रदेशवासिनः अतिशेते। दक्षिणे तत्रत्यानां सामूहिकभोजनावसरे, पर्वादिषु, सभासम्मेलनादिषु वा मया इदं सविस्मयं दृष्टं यद् भोक्तारः एकेन हस्तेन भोजनं कुर्वन्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपरेण च अश्रुप्रमार्जनं कुर्वन्ति। एकदा मया इदं दृश्यं गुन्टूरनगरस्य एकस्मिन् समारोहे तथा नरसारावपेटे एकस्य विदुषो गृहे विशेषरूपेण दृष्टं, मयापि तत् किञ्चिदनुभूतं च।

एवं च श्रुतं मया यद् दक्षिणे गृहिण्यः मरिचस्य आसुतं (अचार) निर्माय तद् घटे स्थापयन्ति, घटस्य च मुखं पिधाय भूमौ गर्तं कृत्वा स्थापयन्ति। ततश्च द्विवर्षानन्तरं स घटः निस्सार्यते तदा तत्रत्यं मरिचस्य आसुतं तीव्रात् तीव्रतरं भवति। तच्च तत्रत्यैः बहु उपयुज्यते।

अद्यापि दक्षिणभुवो निखिलाञ्चलेषु
भोज्यः पदार्थ उपमा विदितः समेषाम्।
तद्भोजनस्य समये हृदये मदीये
श्रीकालिदास-उपमा स्मृतिमेति नूनम्॥ ७॥

यथा उत्तरप्रदेशादिषु संयावकं (हलुआ) शर्करायुक्तं बहु प्रचलितं वर्तते तथैव दक्षिणभारते तादृशमेव खाद्यं लवणमरिचादियुक्तं 'उपमा' इत्युच्यते। तच्च गृहे-गृहे उपयुज्यते। दक्षिणभारते भ्रमणकाले मयाऽपि प्रायस्तत् प्रतिदिनं गृह्यते स्म। तस्मिन् समये 'उपमा कालिदासस्य' इति पदं प्रायेण मम स्मृतिपथमागच्छति स्म।

अद्यापि दक्षिणभुवो वरवैदिकानां
चञ्चत्सुवर्णमय - कङ्कण - कुण्डलानाम्।
कौशेयवस्त्र - भसितोच्चशिखान्वितानाम्
स्मृत्वा स्वरूपमुपयाति मनः प्रमोदम्॥ ८॥

दाक्षिणात्यवैदिकानामेतादृशमनितरसाधारणं भव्यं स्वरूपं मया दक्षिणभारतभ्रमणकाले विशेषतश्च काञ्चीकामकोटिपीठाधीश्वराणां श्रीचन्द्रशेखरेन्द्रस्वामिपादानां सन्निधाने बहुधाऽवलोकितम्-काञ्चीपुरे, सिकन्दराबादे, विजयवाडानगरे तथा राजमहेन्द्रीनगरे च। तादृशं किमपि विशिष्टं रूपमिह उत्तरभारतीयवैदिकविदुषां न भवतीति मे मनसि खेदो जायते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि दक्षिणभुवोऽखिलकन्यकाभिः
नारीजनैश्च नियमेन विभूष्यमाणम्।
शीर्षं प्रफुल्लकुसुमैस्तिलकैश्च भालं
स्मृत्वाऽनुभूयत इवातितरां प्रमोदः॥९॥

दक्षिणभारतस्य सर्वा अपि कन्यका नार्यश्च गृहे वा बहिर्वा यात्रायां वा कुसुममाल्यैः शीर्षं मण्डयन्ति सर्वदैव। अतः प्रातःकाल एव ता माल्यानां क्रयणं कुर्वन्ति। तेषु प्रदेशेषु शकटस्थानेष्वपि सर्वत्र प्रातः पुष्पमालानां विक्रयो भवति, स्त्रियश्च ताः क्रीत्वा केशप्रसाधनानन्तरं धारयन्ति। यदि कुत्रापि समारोहेषु मन्दिरेषु वा माल्यं लभ्यते तदा ताः अतीव प्रीता भवन्ति स्म। उत्तरभारते यदि कैश्चित् पण्डितैः सभासु माला लभ्यते तदा ते तां तत्रैव त्यजन्ति। यतस्तेषां गृहे नासां मालानां कश्चिदुपयोगो भवति।

अद्यापि दक्षिणभुवो नवनर्तकीनां
तन्नृत्यमद्भुततमं नहि विस्मरामि।
यद् - भ्रूविलास - नयनाञ्चलनर्तनैश्च
ताः नर्तयन्ति नयनान्यपि दर्शकाणाम्॥१०॥

दक्षिणभारतभ्रमणकाले मया प्रायेण बहुषु सांस्कृतिक-समारोहेषु भरतनाट्यस्य अभिनयो दृष्टः। विशेषतश्च डॉ० वी० राघवन् महोदयानां सान्निध्ये मद्रासनगरे। 'नृत्यरत्नकोष' नामके ग्रन्थे भ्रूविक्षेपस्य नेत्रविक्षेपस्य च यावन्तः प्रकाराः प्रदर्शिताः सन्ति तेषां प्रत्यक्षीकरणाय दक्षिणभारते प्रसिद्धस्य भरतनाट्यस्य अवश्यमवलोकनं कर्तव्यम्। नाट्ये नर्तक्यः सर्वान् नर्तयन्तीति प्रतिभाति।

अद्यापि दक्षिणभुवो महिलामणीस्ताः
श्रद्धानतेन शिरसां सततं स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

या मामवेत्य दयितारहितं दयार्द्राः
सेवाविधौ मम बहु व्यदधुर्विशेषम्॥ ११॥

प्रवासकाले कस्यापि मनीषिणः संस्कृतप्रणयिनो वा गृहे मम निवासो भवति स्म। तत्र काश्चन महिला मम पत्नीविषये भाषया संकेतेन वा प्रश्नं कुर्वन्ति स्म-वर्तते न वेति। आन्ध्रप्रदेशभ्रमणसमये एकदाहं तिरुपतिक्षेत्रे डॉ॰ अर्क सोमयाजिमहोदयानां गृहे आसम्। ते आङ्गलभाषा-संस्कृत-हिन्दी-तेलगू-तमिलादिभाषाणां विशिष्टा विद्वांसः आसन् परं तेषां पत्नी तेलगूं विहाय अन्यां कामपि भाषां न जानाति स्म। अतः सा शिरसि सिन्दूरं दर्शयन्ती सङ्केतेन मां पृष्टवती—"उन्नदी"? अर्थात् पत्नी वर्तते? मया तस्यामेव भाषायामुत्तरितम्-"लेदु" अर्थात् नहि, पत्नी नास्तीत्यर्थः। ततः सा शिरसि हस्तं निधाय, "ऐय्यो ऐय्यो" इति कथयित्वा बहु दुःखं व्यक्तवती, तस्मादेव च दिनात् मम भोजनपानादौ सुखसौविध्ये च विशेषं कृतवती।

एवमेव पूनानिवासकाले येषु दिनेषु अहं श्रीगणेशशास्त्री शेण्डे महोदयानां गृहे आसं तदा तेषामपि पत्नी मां पत्नीविरहितं ज्ञात्वा बहुदुःखिता अभूत्, ममादरे सत्कारे च बहु वृद्धिं कृतवती। एवमेव अन्येष्वपि अनेकेषु स्थानेषु मम पत्नीविरहः मयि विशेषस्नेहस्य सहानुभूतेश्च कारणमभूत्। परं दक्षिणभारतीयमहिलासु एतादृशी सहृदयता मया विशेषरूपेण अनुभूता।

अद्यापि दक्षिणभुवो महतां बुधानां
श्रद्धा परा मम हृदि स्मयमादधाति।
ये स्वामिपादनिकटे धृतधौतवस्त्रा-
स्तिष्ठन्ति केवलमनावृतभूतलस्थाः॥ १२॥

दक्षिणभारतभ्रमणकाले बहुधा मयाऽयमनुत्तमो विदुषां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सदाचारो दृष्टो यत्ते शङ्कराचार्यपादानां निकटे अन्यानि वस्त्राणि अवतार्य केवलं धौतवस्त्रं धारयित्वा उत्तरीयं च कटितटे निबध्य गच्छन्ति, अनावृतायां भूमौ तिष्ठन्ति तथा साष्टाङ्गप्रणामं विदधति। इदं दृश्यं मया बाहुल्येन काञ्चीकामकोटिपीठाधीश्वराणां काञ्चीकाम-कोटिपीठे तथा तेषां यात्राकाले अवलोकितम्। काञ्ची, सिंकन्दराबाद, राजमहेन्द्री, कोव्वूरु, भीमावरम्-प्रभृतिषु स्थानेषु स्वामिपादानां सान्निध्ये अवस्थानस्य मया बहुधा सौभाग्यमधिगतम्। उत्तरभारते एतादृशमुदाहरणं दुर्लभं भवति।

अद्यापि दक्षिणभुवोऽमरमन्दिराणां
स्मृत्वा विशालतमतां चकितो भवामि।
सर्वाणि यान्यनवलोक्य न कोऽपि शक्तो
ज्ञातुं कलाकुशलतां ननु भारतस्य॥ १३॥

एतादृशेषु सुप्रसिद्धेषु महनीयमन्दिरेषु आन्ध्रप्रदेशस्य तिरुपतिबालाजीमन्दिरम्, तमिलनाडुप्रदेशस्य तंजौरनगरस्थितं बृहदीश्वरमन्दिरम्, मदुरैनगरस्थितं मीनाक्षीमन्दिरम्, मैसूरराज्यस्य सोमनाथपुरस्थितं चेन्नकेशवमन्दिरम्, केरलप्रदेशस्य त्रिवेन्द्रम्-नगरस्थितं पद्मनाभमन्दिरम् चेत्यादीनि मन्दिराणि विशेषरूपेण दर्शनीयानि सन्ति येषा विस्तारः, विशालता, अत्युन्नतानि गोपुराणि, शिल्पकलासौन्दर्यम्, पूजाविधानम्, स्तोत्रपाठः, गीतम्, वाद्यम्, उत्सवादीनि चापि अद्भुतानि अनुपमानि च भवन्ति। मन्दिराणां कलाकौशलं तु साक्षाद् दर्शनं विना अनुमातुमेव न शक्यते।

भाषासु दक्षिणभुवः सुबहून् विलोक्य
प्रौढान् बृहत्तर-समस्तपद-प्रयोगान्।
स्पर्धालुतां सुरगिरा च विचिन्त्य तासा-
मद्यापि नन्दति च विस्मयते च चेतः॥ १४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दाक्षिणात्यासु भाषासु तमिलभाषां विहाय शेषासु सर्वासु तेलगू-मलयालम-कन्नडभाषासु संस्कृतरचनासु इव बृहतो बृहतः संस्कृतसमस्त-पदप्रयोगा दृश्यन्ते। तत्रापि तेलगूभाषा सर्वा अपि इमा भाषा अतिशेते विषयेऽस्मिन्। न चेत् समासबाहुल्यं प्राचीनरचनास्वेव दृश्यते प्रत्युत आधुनिकरचनास्वपि।

यथा ताजमहलवर्णनपरं पद्यमेकम्—

अप्पल वीर वेंकट जोगरय शास्त्रिणः
ललितकलालताङ्गिसुविलास लसन्नवहेमकिंकिणी-
कलित पदद्वयी चलन कल्पित सुन्दर नाट्यवैखरी-
विलसनमुल रचिंचु कनविदगु, निन्दु मरन्द माधुरी
कलरवमुल् चलेंग दिरुगाडु शकुन्तमुलुर्विजालपै॥

पद्यं तरङ्गितमधुस्वर-रञ्जितं यत्
गद्यं च गीतसदृशं मधुरं श्रुतं यत्।
दीर्घाणि दण्डसदृशानि च दण्डकानि
अद्यापि दक्षिणभुवो मम मोहनानि॥ १५॥

दक्षिणभारतीयानां विदुषां पद्यपाठस्य गद्यपाठस्य च शैली अत्यन्तं मनोहरा कर्णप्रिया च भवति। तेषां पद्यपाठः विशिष्टारोहा-वरोहयुक्ततया, तरङ्गितध्वनि-संवलिततया, शुद्धस्पष्टोच्चरिततया च श्रोतॄणां नितान्तमाकर्षको भवति। तेषां गद्यपाठोऽपि यदा कदाचिद् गीतसदृशो जायते। दण्डकपाठे तु दाक्षिणात्यानामेकाधिकारो वक्तुं शक्यते। सम्पूर्णे दक्षिणभारते भ्रमता मया विद्यालयेषु विविधप्रसङ्गेषु च येयमनन्यप्रदेशसाधारणी पाठशैली श्रुता सा पाठकैः वर्णनेन अनुभवितुं न शक्यते अपितु साक्षात् श्रवणेनैव।

संस्मृत्य दक्षिणवचःसु गिरः सुराणां
भिन्नार्थकं प्रचलितं खलु शब्दराशिम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषागतान् व्यतिकरांश्च विलोक्य चित्रान्
अद्यापि शाम्यति कुतूहलि मे न चित्तम्॥ १६॥

दक्षिणभारतस्य सर्वप्रमुखायां तमिलभाषायां संस्कृतशब्दानां संख्या अल्पीयसी भवति परन्तु अन्यासु तेलगू-कन्नड़-मलयालमभाषासु भूयांसः संस्कृतशब्दा उपलभ्यन्ते। तेषां गद्यपद्यरचनायां सामान्यव्यवहारे च विपुलः प्रयोगोऽपि दृश्यते। परं तत्र अयमेको विशेषो वर्तते यद् बहूनां संस्कृतशब्दानां मूलार्था आसु भाषासु भिन्नतां भजन्ते। तादृशाः केचन संस्कृतशब्दाः तेषां भाषागता भिन्ना अर्थाश्च अत्र उदाह्रियन्ते। यथा—

संस्कृतशब्दाः	*भिन्ना अर्थाः*	*संस्कृतशब्दा*	*भिन्ना अर्थाः*
असम	*असहिष्णु*	*उपन्यास*	*भाषण*
कल्याण	*विवाह*	*परिणाम*	*परिवर्तन*
चरित्र	*इतिहास*	*प्रसंग*	*भाषण*
यजमान	*स्वामी*	*विलास*	*पता*
व्यग्रता	*शीघ्रता*	*शाठ्य*	*हठ*
सम्पादन	*अर्जन*	*साहस*	*अनुचितकार्य*
प्रभुत्व	*शासन*	*शिक्षा*	*दण्ड*

आसु भाषासु परस्परमेवंविधान् उच्चारणे, अर्थे, लिङ्गे, कारके, सन्धौ, समासे, धातुषु च विविधान् भेदान् विलोक्य बहु कुतूहलं जायते तथा तेषां यथार्थकारणज्ञानस्य च उत्कण्ठा शान्ता न भवति।

अद्यापि दक्षिणनिवासिनृणामपूर्वा
सैषा प्रथा मम हृदि प्रमुदं तनोति।
यत् पट्टवस्त्र-दधि-चन्दन-हेम-सर्पिः-
संयुक्तमेव सततं खलु भुञ्जतेऽन्नम्॥ १७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दक्षिणवासिनां भोजनरीतिर्न केवलमन्यप्रदेशेभ्यो भिन्ना अपितु विशिष्टाऽपि भवति। तैर्भोजनसमये कौशेयं वस्त्रं धार्यते, ललाटे चन्दनं धार्यते तथा शरीरे किमपि सुवर्णमयं भूषणं धार्यते। आदौ च ओदने अधिकम्, अल्पं स्वल्पं वा घृतमवश्यं गृह्यते तथा अन्ते दधि तक्रं वाऽपि अवश्यं गृह्यते। न्यूनाधिकरूपेण दक्षिणे सर्वेषु गृहेषु इयं रीतिः प्रचलति, उत्तमा च मन्यते। एतस्य चर्चा पूर्वमपि पद्ये विहिता। एतादृशी सम्पन्नता अन्यत्र कुत्रापि न दृश्यते।

अद्यापि दक्षिणभुवः प्रतिगेहमादौ
प्रातः सदैव रचिता खलु रङ्गवल्ली।
नानास्वरूप - बहुवर्ण - कलामयी सा
चेतोऽतिरञ्जयति मोहयति प्रकामम्॥ १८॥

दक्षिणभारते प्रायः सर्वत्रैव अयमाचारः प्रचलति यत् तत्र प्रतिगृहं प्रातःकाले द्वारे द्वारे रङ्गवल्लीनिर्माणं क्रियते। गृहद्वारस्य एक लघुभागं जलेन अभिषिच्य तदुपरि विविधवर्णैः पिष्टक-चूर्णैर्विविधाकारा रेखा निर्मीयन्ते। तदिदं रङ्गवल्ली इति कथ्यते। इदं शुभलक्षणं मन्यते। अत एव मृतकाशौचकाले इदं न निर्मीयते।

द्वारे-द्वारे इदं कलामयं दृश्यं बहु रमणीयं भवति। एषा प्रथा अन्येषु प्रदेशेषु न दृश्यते। परन्तु अन्येष्वपि प्रदेशेषु यत्र यत्र दाक्षिणात्या निवसन्ति तत्र तत्र तेषां गृहे अयमाचारः परिपाल्यते एव।

यद् दक्षिणेषु 'इडली' 'उपमा' च 'दोसा'
'सांभार'-तक्र-घृत-शाक - रसाढ्यमन्नम्।
आस्वादितं प्रतिदिनं, तदभुक्तपूर्वम्
अद्यापि वाञ्छति मनः स्वदितुं पुनर्मे॥ १९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि इमानि दाक्षिणत्यभोजनानि सम्प्रति प्रायः सर्वत्रैव विशिष्टस्थानेषु सुलभानि तथापि दक्षिणप्रदेशेषु दाक्षिणत्य-पाचकैर्निर्मितानि भवन्ति तानि किञ्चिदपरमेव वैशिष्ट्यं भजन्ते। परं मया तु वाराणस्यां निवसतां मम मित्राणां दाक्षिणात्यविदुषां गृहे-गृहे यथेच्छं विशिष्टदाक्षिणात्यभोजनलाभात् दक्षिणभारतभ्रमण-परित्यागस्य न किमपि दुःखमनुभूयते पश्चात्तापो वा।

अद्यापि दक्षिणभुवो भवनेषु नित्यं
द्वारे स्थितान् भसितभूषितभालदेशान्।
विद्वत्समानवपुषः प्रविलोक्य विप्रान्
यन्मुह्यति स्म हृदयं नहि विस्मृतं तत्॥ २०॥

दक्षिणभारतस्य चतुर्ष्वपि प्रदेशेषु यदा मया ब्राह्मणबहुलेषु ग्रामेषु भ्रमणं विधीयते स्म तदा बहुषु द्वारेषु यज्ञोपवीतधारिणो, बद्धबृहच्छिखाः भस्मविभूषितभालाश्च वृद्धजना उपविष्टा दृश्यन्ते स्म। तेषु भूयांसो विद्याविहीना आसन् परं ते स्वरूपेण महापण्डिता इव प्रतीयन्ते स्म। इदं दृश्यं मम बहु प्रियं भवति स्म। तद्दर्शनार्थं मया बहुधा ग्रामेषु भ्रमणं विधीयते स्म।

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २६ :

सर्वप्रदेशसामान्यानि संस्मरणानि

तद् विश्वहिन्दुपरिषत्प्रमुखप्रयुक्तं
नो विस्मरामि सुखदं भ्रमणं स्वकीयम्।
यत्कारणात् सुरगिरो विहितः प्रचारो
लब्धं च सौख्यमखिलं विपुलं यशश्च॥ १॥

१९७९ तमे खृष्टाब्दे जनवरीमासस्य चतुर्विंशतारिकायां तीर्थराजे प्रयागे कुम्भमेलायां विश्वसंस्कृतसम्मेलनं समायोजितमासीद् विश्वहिन्दुपरिषदा अरविन्दाश्रमस्य सहयोगेन। परन्तु एतद्विश्वसंस्कृतसम्मेलनस्यायोजनात् पूर्वमरविन्दाश्रमस्य श्रीमातुर्जन्मशतीमभिलक्ष्य देशे विभिन्नेषु नगरेषु शतसंख्याकानां सम्मेलनाना-आयोजनस्य परिकल्पना विहिता आसीद् विश्वहिन्दुपरिषदः प्रमुखैरधिकारिभिः। एतदर्थं च तेषु तेषु सम्मेलनेषु परिषत्पक्षतः कस्याप्येकस्य प्रमुखभाषणकर्तुः प्रेषणं परमावश्यकमभूत्। अस्मिन्नेव सन्दर्भे वि०हि० परिषदः महामन्त्रिणां श्री मा०पां० डेग्वेकर महोदयानामनुरोधेनाहं दिल्ल्यां करोलबागस्थिते वि०हि० परिषत्कार्यालये श्रीडेग्वेकरमहोदयैः सह एकमासाधिकं कालं स्थितस्तेषामेव च निर्देशानुसारमहं विभिन्नसम्मेलनेषु भाषणं कर्तुं, समायोजयिष्यमाणस्य विश्वसंस्कृतसम्मेलनस्य च उद्देश्यादिकं बोधयितुं अनेका यात्रा विहितवान्। अस्मिन् क्रमे बीकानेर (राजस्थान) भिवानी (हरियाणा) जबलपुर (मध्यप्रदेश) कानपुर, इलाहाबाद (उत्तरप्रदेश) राँची, चाईबासा (बिहार) अमृतसर (पंजाब) प्रभृतिषु नगरेषु तत्समीपवर्तिषु अन्येष्वपि लघुनगरेषु भ्रमणं कृतवान्। श्लोकेऽस्मिन् तस्यैव प्रसङ्गस्य चर्चा विद्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि ये क्वचन मुख्यपुरेषु दृष्टाः
शिक्षालयाः बहुविधाः खलु मुस्लिमानाम्।
तेषाञ्च गौरवमयं सकलं स्वरूपं
आकर्षतीव हृदयं बहु तत् पुनर्मे॥ २॥

संस्कृतप्रचारमुद्दिश्य भारतभ्रमणकाले मया विभिन्ननगरेषु विद्यमाना अनेका मुस्लिमशिक्षणसंस्था अपि अवलोकिताः। तासु देवबन्द (उ०प्र०) लखनऊ, पटना, दिल्ली, हैदराबाद, टांक (राजस्थान), भोपाल, मद्रासप्रभृतिनगरेषु विद्यमानाः संस्था विशेष-रूपेण उल्लेखनीयाः सन्ति। एतासु प्रायः सर्वेऽपि आधुनिकविषयाः अपि पाठ्यन्ते। क्वचित् क्वचित् संस्कृतविभागोऽपि वर्तते यत्र हिन्दवः मुस्लिमजनाश्च अध्यापका वर्तन्ते। धार्मिकशिक्षणदृष्ट्या निम्नलिखिता विषया पाठ्यन्ते—

तफसीर (कुरानगतानां महत्त्वपूर्णविषयाणां विस्तृता चर्चा), तजवीद (कुरानस्य उच्चारणशिक्षणम्), किरान (कुरानपाठकला), हदीश (पैगम्बरशिक्षाणां संग्रहः), फिकह (इस्लामी विधिशास्त्रम्), कलाम (मध्यकालीनं दर्शनम्), तसछ्युफ (रहस्यवादः), तबालीग (धर्मप्रचारशिक्षणम्) इत्यादयः। एतासु संस्थासु बहुत्र शिक्षकाः भूमौ अपि प्रार्दिकासु उपविश्य पाठयन्ति।

अनेकासु संस्थासु विशालाः पुस्तकालया अपि विद्यन्ते यासु अरबी-फारसी-उर्दूग्रन्थानां सुमहान् संग्रहो विद्यते। हस्तलिखित-पुस्तकविभागे अत्यन्तं सूक्ष्मैः सुन्दरैः कलापूर्णैश्च वर्णैः अरबी-फारसी-लिपिषु लिखिता अनेके ग्रन्थाः विशेषतः कुरानग्रन्थस्य अनेकाः प्रतयः नितान्तं दर्शनीयाः अद्भुता मनोहराकृतयश्च दृश्यन्ते।

अद्यापि तत्र महनीयकुरानपाठ-
श्चेतोहरं गजलगीतमनेकरूपम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'यन्मर्सिया' 'मसनवी' च मनोज्ञरूपा
अद्यापि तत् सकलमेव मुदं तनोति॥ ३॥

प्राय: सर्वेष्वपि मुस्लिममहाविद्यालयेषु शुद्धरूपेण सुस्वररूपेण च कुरानपाठस्य सविशेषं शिक्षा प्रदीयते। एवमेव समये समये गजलगीतानाम्, कव्वालीगीतानां, मर्सिया (शोकसूचक) गीतानां तथा मसनवी (सानुप्रास) गीतानां च अनेके मनोहरा: कार्यक्रमा आयोज्यन्ते येषु यदा कदा मुस्लिममित्राणां सहयोगेन मयापि सम्मिलनस्य उर्दूसंगीतरसास्वादस्य च अविस्मरणीयो रमणीयोऽवसर: सम्प्राप्त:।

उर्दूगीतानां विविधताया: विशेषपरिज्ञानाय निम्नलिखित: ग्रन्थ: द्रष्टव्य:—

उर्दू शायरीका मिजाज, ले० वजीर आगा, सीमान्त प्रकाशन, दरियागंज, नई दिल्ली-२, मूल्यम्-१७५.००

अद्याप्ययं जगति सुप्रथित: प्रवाद:
श्री: शारदेति च परस्परवैरभाजौ।
दृष्ट्वा परं नवयुगे मिलिते नु मन्ये
श्रीकालिदासकविता भविता यथार्था॥ ४॥

अयमेक: समाजे चिरन्तन: प्रवाद: प्रचलति यत् लक्ष्मी: सरस्वती चेति उभे अपि परस्परविरोधिन्यौ वर्तेते। यत्र लक्ष्मीस्तिष्ठति तत्र सरस्वती न तिष्ठति, यत्र च सरस्वती तिष्ठति तत्र लक्ष्मी: न तिष्ठति। लक्ष्मी: कथं न सरस्वतीसमुपासकानां ब्राह्मणानां गृहं न गच्छति इति विषये एकस्मिन् पद्ये त्रीणि कारणान्यपि उल्लिखितानि सन्ति। तद् यथा—

नाथे कृतपदघात: चुलकिततात: सपत्निकासेवी।
इति दोषादिव रोषान् माधवयोषा द्विजं त्यजति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत एव ब्राह्मणाः प्रायेण दरिद्रा भवन्ति, लक्ष्मीवन्तश्च विद्याहीनाः। परन्तु एष विरोधःकस्यापि कृते हितकरः नास्ति। अत एव राष्ट्रकविना कालिदासेन लक्ष्मीसरस्वत्योः सङ्गमस्य आकांक्षा प्रकटीकृतास्ते। यथा—

परस्पर - विरोधिन्योरेकसंश्रय - दुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्॥

विक्रमोर्वशीयम्, ५, २४

मन्ये, नवयुगेऽस्मिन् अनेके विद्वांसोऽपि लक्ष्मीवन्तः, लक्ष्मीवन्तश्चापि अनेके विद्वांसः कवयः लेखका रचनाकाराश्च विलोक्यन्ते। अतश्च कालिदासस्य आकाङ्क्षा, सम्प्रति पूर्यमाणा दृश्यते इत्यहं बहु प्रसन्नतामनुभवामि। कालिदासेनापि सा अनुभूयमाना स्यात्।

अद्यापि भारतभुवां बहु वेषभूषा
भिन्ना विलोक्य, सदृशाश्च विदेशजानाम्।
किं वा तयोः समुचितं, समता भिदा वा
तन्निर्णयं न खलु गच्छति चिन्तना मे॥५॥

भारते प्रायेण भिन्न-भिन्न—प्रदेशवासिनां जनानां भिन्ना भिन्ना वेषभूषा भवन्ति। पुरुषाणां स्त्रीणां च। विशेषतः दाक्षिणात्यानां, गुर्जरनिवासिनां, मारवाड़ीजनानां, कश्मीरनिवासिनां, पर्वतवासिनां च वेषभूषासु अधिकं वैभिन्र्यं दरीदृश्यते। वाराणस्यां पर्वादिषु वयं सर्वदैव इदं प्रत्यक्षीकुर्मः। न च केवलं वेषभूषासु एव भिन्नता भवति प्रत्युत तद्धारणविधौ अपि महान् भेदो भवति। विशेषतो धौतवस्त्रधारणे उष्णीषधारणे च। पादुका अपि कदाचित् भिन्ना भवन्ति। परन्तु वैदेशिकानां वेषभूषासु ईदृशो भेदो न परिदृश्यते। अतस्तेषां दृष्टौ भारतीयवेषभूषाणां बिभिन्नता एकः कौतूहलस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयो भवति। चीनदेशे भारतीयराजदूतस्य पदमुद्वहन्त्या परमविदुष्या श्रीमत्या राज़ननेहरुमहोदयया लिखिते *"बीती यादें"* *(पृष्ठ १२५)* इति पुस्तके मया पठितं यद्—एकदा लोकसभा-सदस्यानामेकं प्रतिनिधिमण्डलं चीनदेशं गतमासीत्। तेषां प्रतिनिधीनां स्वागतार्थं पीकिङ्स्थिते विमानस्थाने बहवः चीनी-अधिकारिणो नागरिकाश्च उपस्थिता आसन्। यथासमयं भारतीयाः समागताः। प्रतिनिधयो विमानात् क्रमशः अवतीर्णाः। तदानीमिदं दृष्ट्वा चीनीजनानां बहु विस्मयो जातो यत् प्रतिनिधीनां कोऽपि एकः समानो वेषो नासीत्। उपानत्, धौतवस्त्रं,कञ्चुकम्, उत्तरीयम्, उष्णीषमित्यादि सर्वमपि नानाविधमासीत्। कश्चन जनः शिरसि एकं तौलियावस्त्रमेव धारितवानासीत्। एतद्विपरीतं चीनीजनाः सुसज्जितायां समानवेषभूषायां पंक्तिबद्धा उपस्थिता आसन् यदतितरां शोभनीयं प्रतिभाति स्म। ईदृशमुत्कर्षापकर्षसूचकं वैभिन्न्यमालोक्य भारतीयदूतावासस्य अधिकारिणोऽपि भृशं दुःखिता लज्जिताश्चाभूवन्।

एवमेव ममापि भ्रमणकाले विभिन्नप्रदेशवासिनां विशेषतश्च ग्रामाञ्चलनिवासिनां नानाविध-विचित्र-वेषभूषां दृष्ट्वा अयं विचारः समुदेति स्म यद् यदि अन्यदेशवत् सर्वेषां भारतीयानामपि समाना वेषभूषा अभविष्यत् तर्हि देशस्य एकताया भानमभविष्यत्। परं तदा भिन्नप्रदेशानां स्वकीयमभिज्ञानं लुप्तमजनिष्यत् इत्येषापि चिन्ता जागर्ति स्म। अत्र किं खलु उचितं किं वा अनुचितं, किं वा देशस्य कृते हितकरं, किं वा अहितकरमिति विषये अद्यापि मम संशयो न निवृत्तः।

यत् केरलस्थित - पि० टी० कुरियाक्कुगेहे
यत् श्रीपुरे च खलु मुस्लिमपण्डितस्य।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उक्त्वापि नैव जलपानमकारि रूढे-
रद्यापि खेदयति तत् खलु चिन्तितं मे॥ ६॥

केरलेषु गुरुवायूरसमीपवर्तिनि पावर्टीग्रामे निवसतः तत्रत्य-संस्कृतविद्यालयप्रधानाध्यापकस्य क्रिश्चियन श्री पी०टी० कुरियाक्कु महोदयस्य तथा कश्मीरेषु श्रीनगरविश्वविद्यालये संस्कृतविभागा-ध्यक्षस्य मुस्मिमविदुषो गेहे चायपानस्य निमन्त्रणं स्वीकृत्यापि अहं तद् धर्मविरुद्धं मत्वा तयोर्गेहं न गतवानिति मे मनसि अद्यापि पश्चात्तापो जायते। यतो हि यो नीचोऽपि श्रद्धया भोजयते तस्य गृहे अवश्यं भोक्तव्यमिति मनोर्वचनात् तदानीं मया तत्र गन्तव्यं चायादिकं च ग्राह्यमासीदिति मे इदानीं प्रतिभाति।

अद्यापि उत्तर-बिहार-बुधाङ्गनानां
लज्जालुतामतिशयां बहुशः स्मरामि।
याभिः सहालपनमप्यति - कष्टसाध्यम्
का वा पुनः कुशल-भोजन-पान-वार्ता?॥ ७॥

प्रचारकाले मया नारीणां लज्जालुता प्रान्तभेदेन पृथक् पृथक् रूपेण अनुभूता। दक्षिणभारतस्य सर्वेषु प्रदेशेषु असम-बङ्गोत्कलप्रदेशेषु च नार्यो गृहं समागतैः अपरिचितैरपि जनैः सह सुखं वार्तालापं कुर्वन्ति तेषामातिथ्यं च विदधति। परन्तु उत्तर-मध्य-बिहारप्रदेशानां नारीषु लज्जालुता मया अधिका अवलोकिता। ता मुखमण्डले अवगुण्ठनं निधाय, कपाटं च किञ्चित् पिधाय कञ्चिदपरिचितं जनं काठिन्येनैव काञ्चित् सूचनां दातुं प्रभवन्ति। किं पुनः कुशल-प्रश्न-भोजन-पानादि-विषये वक्तव्यम्? इयं स्थितिर्मया बहूनां शिक्षितानां पण्डितानाञ्चापि गृहे स्वयमेवानुभूता।

अद्यापि ताः सुललिताः कविता विचित्राः
पद्यानि हास्यरस - कौतुक - संभृतानि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नानास्थलेषु समये समये श्रुतानि
चेतो विषादसमयेऽपि विनोदयन्ति॥ ८॥

भ्रमणकाले मया बहुषु स्थानेषु तादृशानि अनेकानि पद्यानि श्रूयन्ते स्म येषां ग्रन्थेषु उल्लेखो नास्ति परं समाजे प्रचलितानि सन्ति। तेषु कानिचित् शुद्धसंस्कृतमयानि भवन्ति, कानिचित् अन्यभाषा-मिश्रितानि भवन्ति। कानिचिद् व्याकरणदृष्ट्या शुद्धानि भवन्ति कानिचिच्च अशुद्धान्यपि। प्रायः सर्वाण्यपि तानि मनोरञ्जकानि भवन्तीति सर्वदैव मम स्मृतिपथे विराजन्ते। तादृशानि कानिचित् पद्यान्यत्र पाठकानां मनोरञ्जनाय लिख्यन्ते—

१-उत्कलप्रदेशे श्रुतानि पद्यानि—

(क) हुक्कापान-दुष्परिणामवर्णनम्—

अफीमनिर्मितां हुक्कां ये पिबन्ति दिने-दिने।
जन्मान्तरेषु कालेषु हूआँ हूआँ वदन्ति ते॥

(ख) कण्डूयनस्य चत्वारि चरणानि—

प्रथमे सुलुसुलु कृत्वा द्वितीये नखघातनम्।
तृतीये सुखमाप्नोति चतुर्थे हुहुहु कृता॥

(ग) दरिद्रताया वर्णनम्—

स्थानं नास्ति कुटी, व्ययाय न वटी, नास्ति जने कर्पटी
तैलाभाव-जटी, सखा रटरटी, सर्वत्र मानत्रुटिः॥
शय्या भूमितटी, कटी लघुपटी, पात्रं च मे मृद्घटी
किं राजन् प्रकटीकरोमि निकटे भिक्षा न लभ्या मुटिः॥

अत्र विषयस्य अनुप्रासस्य च संयोगः प्रभूतं मनोरंजनं जनयति।

२-अहमदाबादनगरे एकं चटनी (अवलेह) निर्माणं पठितम्—

आदुं च मरचा लसणं च निम्बुं धाणाश्च जीरुं मिठु नाखि देवुं।
पाषाणखण्डे परिमर्दयामि एवं प्रकारे चटनी भवन्ति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३-एकं पद्यं केरलेषु श्रुतम्। एतदपि अतीव मोदावहम्। विषयस्तु तस्य ईदृशः—न्यायालयेषु केचन अधिकारिणो भवन्ति ये उर्दूभाषायां "शिरस्तेदार" इति कथ्यन्ते। अत्र शिरस्तेदारशब्दस्य "शिरःस्थदार" इति रूपं कल्पयित्वा कविना हास्यरसस्य शोभना सृष्टिर्विहिता। तत् पद्यं खलु इत्त्थं प्रवर्तते—

उरःस्थदारो भगवान् रमेशः
मुखस्थदारो भगवान् प्रजेशः।
पार्श्वस्थदारो भगवान् उमेशः
शिरःस्थदारोऽयमभूतपूर्वः ॥

उरसि, मुखे, पार्श्वे वा नारीणां स्थितिः कथञ्चित् सोढव्या भवितुमर्हति परं शिरसा वहनं तु सर्वथा अशोभनं हास्यकरञ्चेति भावः।

४-कलिकातानगरे एका सरस्वतीवन्दना श्रुता। कीदृशी आनन्ददायिनी इयं रचना वर्तते?

लुची कचूरी मोतीचूर शोभितं
जिलेबि सन्देश गजा विराजितम्।
यस्याः प्रसादेन फलान्यवाप्नुमः
सरस्वती सा जयतान्निरन्तरम् ॥

इयं रचना ईश्वरचन्द्रविद्यासागरमहोदयानां वर्तते या मया "विद्यासागरेर छेलेवेला" इति नामके बङ्गभाषायाः मनोरञ्जनात्मके पुस्तके पठिता। पृष्ठसंख्या-५९

प्रत्येक - पान्थजन - मानस - मोहनानि
क्रीडन्मनोज्ञतर - शावक - शोभनानि ।
अद्यापि मन्नयनयोरतिलोभनानि
स्मृत्वा रमे मृगविहारवनानि नित्यम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारतस्य प्रायः सर्वेष्वपि प्रदेशेषु मृगाणां तथा तज्जातीयानामन्येषां च पशूनां परिरक्षणाय मृगवननाम्ना, मृगविहारनाम्ना, अभयारण्यनाम्ना च सुबहूनि स्थानानि शासनद्वारा परिचालितानि सन्ति। एतेषु मृगवनानि अनेकानि दृष्टानि मया येषां स्मरणमात्रेणापि मनसि महती प्रसन्नता जायते, तान् प्रति च महान् मोहः स्नेहश्च समुत्पद्यते।

या दक्षिणेषु रचना खलु दण्डकानां
बङ्गेषु या च रचना विरुदावलीनाम्।
एतद्द्वयोर्मृदु - मिलन्मधुराक्षराणा-
मद्यापि नृत्यति मनः स्मरणेन मुग्धम्॥ १०॥

संस्कृतभाषाया गद्यपद्यमयीषु रचनासु दण्डकम्, विरुदावली चेति इमे द्विविधे रचने छन्दोदृष्ट्या विलक्षणे पदयोजनादृष्ट्या च नितान्तं मधुरे ललिते च। अनयोः दण्डकानां रचना प्रयोगश्च बाहुल्येन दक्षिणभारते उपलभ्यते परं विरुदावलीनां रचना प्रयोगश्च बाहुल्येन बङ्गेष्वेव उपलभ्यते। दण्डकेषु प्रसिद्धं श्यामलादण्डकम्, त्रिपुरसुन्दरीदण्डकम्, श्रीहयग्रीवदण्डकम्, शेषाद्रिपद्मालया-दण्डकम्, आर्यतारादण्डकञ्चेत्यादि, विरुदावलीषु च श्रीकृष्ण-विरुदावली, निकुञ्जकेलिविरुदावली, जहाँगीरविरुदावली, शाह-जहाँविरुदावली चेत्यादि च विद्वत्समाजे प्रायेण न बहुलप्रचारं परं संस्कृतज्ञैरेतत्साहित्यस्य संग्रहः, अध्ययनं, पाठः, प्रचारश्चावश्यं विधेय इति मे विनम्रनिवेदनम्। एतासां रचनानां संस्कृतप्रचारेऽपि साधीयानुपयोगो भवितुमर्हति।

अद्यापि विस्मरति नो हृदयं ममोभे
दृष्टे सुभाष - सरदारपटेल - मूर्ती।
ये दर्शनात् सकृदपि प्रसभं जनानां
चेतोबलं प्रतिपलं प्रबलं विधत्तः॥ ११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशे बहूनां नेतॄणां विशाला भव्यतमाश्च अनेका मूर्तयो नगरे नगरे संस्थापिताः सन्ति। परन्तु मम दृष्टौ द्वे एव मूर्ती विशेषरूपेण दर्शनीये प्रभावोत्पादिके अनन्तशक्तिप्रदे च वर्तेते। एका कलकत्तानगरे संस्थापिता सुभाषचन्द्रबोसस्य मूर्तिः, अपरा च हैदराबादनगरे संस्थापिता सरदारवल्लभभाईपटेलस्य मूर्तिः।

बङ्गेषु भुक्तममलं रसगोलकं यद्
या दक्षिणेषु 'उपमा' 'इडली' च 'दोसा'।
यच्चोत्कलेषु कृशरान्नमभुक्तपूर्वम्
अद्यापि तन्मम मनस्तरलीकरोति॥ १२॥

बङ्गीयानां रसगोलकं (रसगुल्ला) दाक्षिणात्यानां च उपमा, इडली, दोसा चेति इदानीं प्रायः सर्वत्र प्रसिद्धं सुलभं च वर्तते। परन्तु उत्कलीयानां कृशरान्नं सर्वत्र प्रसिद्धं सुलभं च नास्ति अतस्तस्य वैशिष्ट्यं सर्वे जना न जानन्ति।

अद्यापि तां जगति सुप्रथितां विशालां
लोकत्रयीमिव सदा त्रिपुरीं स्मरामि।
यस्यां बहु भ्रमणतोऽपि मुहुर्मुहुर्मे
जातः कदाचिदपि नो हृदयस्य तोषः॥ १३॥

अत्र त्रिपुरीशब्देन कलकत्ता, मुम्बई, मद्रास इति तिस्रो महानगर्यः अभिप्रेताः सन्ति। यासु भ्रमणं निवासश्च मम अत्यधिकं प्रियं समुल्लासवर्धकञ्च आसीत्। एतेषु नगरेषु बहुधा भ्रमणेनापि मम कदाचित् सन्तोषो न जातः इयमेव स्थितिर्दिल्लीनगरस्यापि विद्यते।

अद्यापि तान् विविधतीर्थपथेषु दृष्टान्
नागाजनान् भसितलिप्ततनून् स्मरामि।
अत्युग्ररूपवचनेक्षण - तर्जनाद्यै-
स्ते साधवोऽपि बहुधा भयदा भवन्ति॥ १४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतादृशा बहवो नागासाधवः तीर्थेषु कुम्भमेलादिषु यदा कदा नगरेषु ग्रामेषु च दृष्टिपथमायान्ति। तेषां मुखाकृतिः,जटा, चन्दनम्, दृष्टिः, आलापशैली, याचनारीतिः, वेषः अस्त्रं वा सर्वमपि किञ्चित् विलक्षणं, विस्मयकरं, भयावहं च भवति। एतत् स्वरूपं साधु-शब्दोपयुक्तं न भवति। अतः अत्र अ०भा० साधुसमाजेन ध्यानं देयं तथा किञ्चित् परिवर्तनं च विधेयम्।

तद् दक्षिणोत्तरदिशोर्वसतां बुधानाम्
उष्णीषवस्त्रमतिजीर्णमहं स्मरामि।
अद्यापि ते दधति मूर्ध्नि सदा सतर्का
यच्चारुदत्तसदृशं कृशवित्तभाजः॥ १५॥

दक्षिणभारतस्य चतुर्षु प्रदेशेषु, महाराष्ट्रे तथा बिहारप्रदेशे मिथिलायां विशिष्टाकारमुष्णीषं धारयितुं पण्डितसमाजे प्रथा अस्ति। तच्च उष्णीषं सामान्यं न भवति। विशिष्टाकारं भवति, विशेषविधिना च निर्मितं भवति। किञ्चिन्महर्घं च भवति। अत एव अल्पवृत्तिभाजः पण्डिताः तद् गृहे बहुसुरक्षया स्थापयन्ति, सभादिषु च बहु सावधानतया मूर्ध्नि धारयन्ति। इदं दृष्ट्वा मृच्छकटिके वर्णितं चारुदत्तस्य वस्त्रधारणं बहुधा मम स्मृतिपथमागच्छति स्म। मृच्छकटिकस्य पद्यमिदं वर्तते—चारुदत्तः कथयति—

अयं पटः सूत्रदरिद्रतां गतः
पितामहाद्यैरुपभुक्त - यौवनः।
अलङ्करिष्यत्यथ पुत्रपौत्रकान्
मयाधुना पुष्पवदेव धार्यते॥

अद्यापि मत्स्मृतिगताः कतिचिन्मठानां
ते ते कठोरनियमाः खलु पीडयन्ति।
ये स्नान-शौच-शयनासन-भोजनादौ
सर्वेऽभवन्नतिथिभिः परिपालनीयाः॥ १६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मम भ्रमणकाले येषु येषु स्थानेषु मठेषु वा विशेषरूपेण कठोरा नियमा आचाराश्च पालनीया अभूवन् तेषु निम्नाङ्कितानि स्थानानि सविशेषमुल्लेखनीयानि सन्ति—

१. तिरुपति बालाजी मन्दिर, तिरुपति।

२. माध्वमतानुयायि पूर्णप्रज्ञविद्यापीठम्, बैंगलूर।

३. बड़उड़िया मठ, जगन्नाथपुरी।

४. प्रतिवादिभयङ्कराणां श्रीअण्णङ्गराचार्यमहोदयानां मठः, विष्णुकाञ्ची।

एतेषु स्थानेषु भयंकरशीतकालेऽपि वस्त्राण्यवतार्य शौचालये गमनम्, शीतलेन जलेन स्नानम्, भुक्त्वा दूरे हस्तमुखप्रक्षालनम्, दूरे क्षौरकर्म, दूरे पादुकापरित्यागः, आसनं विनैव भूमावुपविश्य भोजनम्, उच्छिष्टपात्रमार्जनम्, उच्छिष्टपत्रावलीनां दूरे दूरे निक्षेपणञ्चेत्यादयः।

अद्यापि ते परमविस्मयमावहन्तो
विश्वेऽवधानिपुरुषा धियमेधयन्ति।
प्रश्नान् बहूनपि जनैः सकृदेव पृष्टान्
ये तत्क्षणं खलु समादधते क्रमेण॥ १७॥

भारतीयपण्डितसमाजे विशेषतश्च दाक्षिणात्यविद्वत्सु जैनमुनिषु च एवं विधा अनेके विद्वांसो दृश्यन्ते ये अनेकैर्जनैः पृष्टान् अनेकान् प्रश्नान् मनसि अवधाय तेषां तत्कालमेव तेनैव क्रमेण च सर्वेषामुत्तराणि ददते। न तत्र प्रश्नानां विस्मरणं भवति न वा क्रमभङ्ग एव। येषु विद्वत्सु ईदृशी असामान्या अद्भुता च स्मृतिशक्तिर्भवति ते अवधानिपण्डिताः कथ्यन्ते। एतादृशेषु विद्वत्सु केचन अष्टावधानिनः, केचन दशावधानिनस्तथा केचन शतावधानिनोऽपि श्रूयन्ते। मया छात्रावस्थायां ब्यावरनगरे (राजस्थान) अनेके ईदृशा जैनमुनयो दृष्टाः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमेव आन्ध्रप्रदेशस्य राजमहेन्द्रीनगरे १६.९.६७ दिनाङ्कात् दिनत्रयं सम्पन्ने अ०भा० संस्कृतप्रचारकसम्मेलनेऽपि केचन अवधानिपुरुषा दृष्टाः। ते तत्सम्मेलनाध्यक्षाणां श्रीकाञ्चीकामकोटिपीठाधीश्वराणां दर्शनार्थं समागता आसन्। ईदृशं वैशिष्ट्यं भारतीयपण्डित-परम्परायामेव दृश्यते न तु क्वचिदन्यत्र।

ईदृशमेकं जैनमुनिकृतं प्रदर्शनं मया वाराणस्यामपि अवलोकितं यत् तदानीन्तनानां वाराणसीजिलाधिकारिणां संस्कृतविदुषां श्रीमहेश-प्रसादमहोदयामध्यक्षतायां समायोजितमासीत्।

अद्यापि कुत्रचन सिन्धुतटप्रदेशे
स्थित्वा दिगन्तमवलोक्य नितान्तशून्यम्।
तस्मात् परं ननु किमस्ति च कीदृशं वा
तच्चिन्तनं सुबहु विस्मयमातनोति॥ १८॥

जगन्नाथपुरी-रामेश्वरं-कन्याकुमारी-प्रभृतिषु स्थानेषु समुद्रतटे कञ्चित्कालं स्थित्वा मया बहुधा एवं चिन्तितम्, एवमनुभूतम्।

अद्यापि नित्यमटतो भवने कवीना-
मेतन्न याति मनसो मम कष्टमेकम्।
यद् राजशेखरकवेः कलनानुसारं
कस्यापि संस्कृतकवेर्भवनं न दृष्टम्॥ १९॥

सुप्रथितयशाः कविः समालोचकश्च श्रीराजशेखरः काव्य-मीमांसायां कवेर्भवनस्य स्वरूपं निम्नलिखितरूपेण वर्णयामास—

"तस्य (कवेः) भवनं सुसंमृष्टं, ऋतुषट्कोचित-विविध-स्थानम्, अनेक-तरुमूल-कल्पितापाश्रय-वृक्षवाटिकं, सक्रीडा-पर्वतकं, सदीर्घिका-पुष्करिणीकं, ससरित्समुद्रावर्त्तकं, स-कुल्याप्रवाहं, सबर्हिणहरिणहारीतं, ससारसचक्रवाकहंसं, स-चकोरक्रौञ्चकुररशुकसारिकं, श्रर्मक्लान्तिचौरं, सभूमिधारा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृहयन्त्रलतामण्डपकं, सदोलाप्रेङ्खं च स्यात्। काव्याभिनिवेशखिन्नस्य मनसस्तद्विनिर्वेदच्छेदायाज्ञामूकपरिजनं विजनं वा तस्य स्थानम्। अपभ्रंशभाषणप्रवणः परिचारकवर्गः, समागधभाषाभिनिवेशिन्यः परिचारिकाः। प्राकृतसंस्कृतभाषाविद् आन्तःपुरिका, मित्राणि चास्य सर्वभाषाविदो भवेयुः।''

काव्यमीमांसा, दशम अ०

देशे बृहत्सु कतिचित् शकटालयेषु
दृष्ट्वा विभिन्नमुख-वस्त्र-विभूषणान् नॄन्।
अद्याप्यहं सकल - जन्तुगृहानिवैतान्
मन्ये, दिदृक्षति च तान् सततं मनो मे॥ २०॥

देशस्य विभिन्नेषु बृहत्सु शकटालयेषु एकत्र नानाविधस्वरूपवेषभूषाधारिणो विविधवाचश्च सहस्राधिकान् जनान् वीक्षमाणस्य मे जन्तुगृहाणामवलोकनस्य विस्मयः प्रमोदश्च भवति स्म। तेन शकटालयेषु स्वल्पकालिकमपि अवस्थानं मम महत् प्रीतिकरमजायत उत्कण्ठितं च तिष्ठति स्म। एतेषु शकटालयेषु हावड़ा (कलकत्ता) दिल्ली, मद्रास, बम्बई, कटिहार (बिहार), टाटानगर (बिहार) मुगलसराय (उ.प्र.) इणुसी (मध्यप्रदेश) प्रभृतिस्थानानि मुख्यानि सन्ति येषु अल्पकालिकेन अवस्थानेन मम सन्तोषो न भवति स्म।

आवास - वस्त्र - धन - मान - विपन्नताया
ग्रामेषु दृश्यमतहीनतरं बहूनाम्।
अद्यापि वीक्ष्य जनतन्त्रयुगे नवीने
चेतो विषीदति यथा तदवर्णनीयम्॥ २१॥

संस्कृतवाङ्मये वेदेभ्य आरम्भ काव्यनाटकपर्यन्तं सर्वत्र समस्तजनतायाः कृते सुख-समृद्धि-सौभाग्यसदारोग्यसम्मानादीनां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुशल-कामना विहिता वर्तते। "सर्वे भवन्तु सुखिनः" इत्यादिं पद्यं सर्वत्र समाजे सुप्रसिद्धं वर्तते। तथापि समाजे दीनदीनानां दरिद्राणां परिवाराणां संख्या अल्पीयसी नास्ति। इयं च स्थितिः धार्मिकदृष्ट्यापि अत्यन्तं शोभनीया लज्जावहा चेति नितान्तं विषीदति मे चेतः।

अद्यापि विस्मरति नो हृदयं मदीयं
दुर्भिक्षकालजनितामशनादिबाधाम्।
यत्राभवन्मम सुहृद्भवनेष्वपीषत्
सुस्वागते शिथिलताऽन्यमनस्कता च॥ २२॥

इदं संस्मरणं गाजीपुर, बलिया (उ०प्र०) छपरा, मुजफ्फरपुर (बिहार) एतेषु चतुर्षु नगरेषु घटितानां वृत्तानां वर्तते। एकदा संभवतः १९३०तमे ई० संवत्सरे देशे दुर्भिक्षमापतितम्। परं तस्मिन्नपि काले मम संस्कृतप्रचारकार्यं प्रचलति स्म एव। तदानीमहमेकदा गाजीपुरनगरं गतवान् एकस्मिन् संस्कृतसम्मेलने भागं ग्रहीतुम्। तत्र यस्य गृहे निवास-भोजन-पानव्यवस्था आसीत् तस्य एको बालक आगत्य मा भोजनार्थं निवेदितवान्। तदा मया कथितम्—"*अभी तो मुझे भूख नहीं है बाद में खा लूँगा।*" ततः स बालको मत्सविधे आगत्य मां कर्णे उक्तवान्—"*दादाजी! ऐसा मत कहिए। जो कुछ इच्छा हो, अभी खा लीजिए। नहीं तो लोग बाद में नहीं पूछेगें। आजकल की हालत आप नहीं जानते हैं?*" ततोऽहं तस्य अभिप्रायं ज्ञात्वा त्वरितमेव गत्वा किञ्चिद् भुक्तवान्। ततश्च परस्मिन् दिने अन्यत्र गतवान्।

इदानीमेकमपरं वृत्तम्। एकदाऽहं बलियानगरे एकस्य मित्रस्य गृहं गतो दिने दशवादने। तदानीं ते दालिं स्थाल्यामारोप्य तण्डुलं शोधयन्तः आसन्। अहं तदानीमेव तत्र उपस्थितः। कुशलप्रश्नानन्तरं तेषां मुखमुद्रां किञ्चित् चिन्तायुतां दृष्ट्वा अहं पृष्टवान्-किं चिन्तयति भवान्? तदा तैर्हसद्भिः कथितम्। मम समीपे तण्डुलं सम्प्रति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतावन्मात्रमेव वर्तते। इदं च आवयोरेकतरस्यैव भोज्यं भविष्यति। अतः पुनर्विपणिं गत्वा अन्यत् तण्डुलमानयामि इति चिन्तयामि। तिष्ठतु भवान्। अहं शीघ्रमेव विपणिं गत्वा अपरमपि तण्डुलमानयामि। एवमुक्त्वा ते विपणिं गताः। अहं तावत् कार्यान्तरे संलग्नः। परं तेषामागमने किञ्चिद्विलम्बो जातः। अतः यावत् ते तण्डुलं गृहीत्वा आगच्छन्ति तावद् दालिर्ज्वलित्वा भस्मतां गता। ततस्तैः कथितम्। चिन्ता माऽस्तु। वयं शाकेन दध्ना च ओदनं भक्षयिष्यामः। अनन्तरं च तदेव सुखेन भुक्तवन्तौ आवाम्। परं सर्वमिदं प्रकरणं मम कृते किञ्चित् कष्टकरमेव जातम्। अतस्तद्दिने एव अन्यत्र गतवान्। यतः अत्रापि दुर्भिक्षस्यैव छाया विद्यमाना आसीत्।

ईदृशी एव घटना छपरानगरे मुजफ्फरनगरे चापि जाता। इदं सर्वं स्मृत्वा अद्यापि किञ्चित् कष्टं जायते किञ्चित् मनोरञ्जनं च।

पुच्छेषु कर्णविवरेष्वपि विद्यमानाः
यूकाः करैः सुनिपुणं परिमार्गयन्त्यः।
एकत्र सन्निपतिता वनिताः कपीना-
मद्यापि मत्स्मृतिगता जनयन्ति मोदम्॥ २३॥

इदं दृश्यं मया वाराणसी–अयोध्या–चित्रकूट–रामगिरि–प्रभृतिषु स्थानेषु बहुधा सकौतुकमवलोकितम्। तादृशो मनोयोगः, तादृशी सूक्ष्मदर्शिता, तादृशी सहानुभूतिश्च न कस्याञ्चिदन्यस्यां पशुजातौ दृश्यं भवति। विशेषतः पुच्छेषु कर्णविवरेषु च यूकान्वेषणमत्यन्तं मोदावहम्।

अद्यापि तान् मधुरया मृदुसौम्यमूर्त्या
स्निह्यद्दृशा मधुमुचा वचसा स्मितेन।
सुस्वागतेषु किरतः परितोऽमृतानि
वन्द्यान् जनान् कतिपयाननिशं स्मरामि॥ २४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतादृशेषु सौजन्यमूर्तिषु विद्वत्सु निमङ्क्ता विद्वांसो मम हृदये विशेषरूपेण सदा विराजन्ते—

१. आचार्य श्रीकेशवचन्द्रमिश्रमहोदयाः, भाटपाररानी, देवरिया।

२–डॉ० रामकरणशर्ममहोदयाः, कुलपतिः सं: सं. वि. वि. वाराणसी।

३–वैद्य श्री गयाप्रसाद शास्त्रिमहोदयाः, (सपत्नीकाः), हैदराबाद।

४–मा० डॉ० श्रीकिरीटजोशीमहोदयाः, शिक्षामन्त्रालय, दिल्ली।

५–श्रीमन्तो वामनकेशव लेले महोदयाः (सपत्नीकाः) पूना।

६–डॉ० परमहंसमिश्रमहोदयाः (सपत्नीकाः), वाराणसी।

अद्यापि तानि तटिनीजलबन्धनार्थं
सृष्टानि सूक्ष्म-सुगुरूणि महाऽद्भुतानि।
यन्त्राणि धातुरपि दम्भहराणि सृष्टौ
दृष्ट-स्मृतानि बहु विस्मयमावहन्ति॥ २५॥

पद्येऽस्मिन् भारते कृषिसम्पन्नतायै या जलविद्युद्योजनाः प्रदेशे प्रदेशे प्रचाल्यन्ते तासां चर्चा वर्तते। आसु योजनासु पंजाबप्रदेशस्य भाकड़ा–नांगलयोजना, उत्कलप्रदेशस्य हीराकुण्डयोजना, बिहारप्रदेशस्य कोसीबंधयोजना, आन्ध्रप्रदेशस्य तुंगभद्रायोजना तथा राजस्थान–मध्यप्रदेशयोः चम्बलयोजना मया प्रत्यक्षीकृता भ्रमणकाले। तासां साक्षादवलोकनं विना अतिविस्मयावहं विशालं स्वरूपं न ज्ञातुं शक्यते।

हस्तौ प्रसार्य परितः पथि वीक्ष्य बाबू-
भैय्येति जल्पनपराः स्थविराः क्षुधार्ताः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गं च वस्त्ररहितं समवेक्ष्य जाता
पीडाऽधुनापि नहि गच्छति नापि गन्ता॥ २६॥

देशे प्रायः सर्वेषु नगरेषु विशेषतो धर्मनगरेषु, तीर्थेषु, मठमन्दिराणां परिसरेषु, बस-रेलवे-स्थानेषु, पर्वोत्सवादिषु च अनेका वृद्धमहिला जीर्णशीर्णवस्त्रैः कथमपि अङ्गानि गोपयन्त्यः, हस्तौ प्रसार्य गच्छतः आगच्छतश्च जनान् "*बाबू भैय्या*" इति वारं वारं वदन्त्यो भिक्षां याचन्ते। इदमेव दयनीयं लज्जाकरं च दृश्यमस्मिन् श्लोके वर्णितम्।

अद्यापि तानि विनतः संततं स्मरामि
विश्वप्रसिद्ध - सुमहत्तर - मन्दिराणि।
यत्रातिदीर्घ - जनपंक्तिमलङ्घयित्वा
नो कोऽपि दर्शनमहो लभते मनुष्यः॥ २७॥

एतादृशेषु मन्दिरेषु काश्याः श्रीविश्वनाथमन्दिरम्, आन्ध्रप्रदेशस्य श्रीतिरुपतिबालाजीमन्दिरम्, असमप्रदेशे गोहाटीनगरस्थितं कामाख्या-देवीमन्दिरम्, पुर्यां जगन्नाथमन्दिरम्, कलकत्तायां कालीघट्टस्थितं श्रीकालीमन्दिरञ्चैत्यादीनि मन्दिराणि मद्दृष्ट्या विशेषरूपेण उल्लेखनीयानि सन्ति।

नानाप्रदेशगत - राग - लयाश्रितानि
नानाविधावसर - सौख्य - विवर्धनानि।
अद्यापि मुग्धरमणीकलकण्ठजानि
गीतानि मे श्रवणयोर्नहि विस्मृतानि॥ २८॥

अस्मिन् पद्ये भोजपुरी-गीतानि, मैथिली-गीतानि, मगही-गीतानि, कश्मीरी-गीतानि, असमप्रदेशस्य बिहू-गीतानि, नेपालस्य झावरे-गीतानि, व्रज-गीतानि च रसिया नाम्नः संगीतकानि मम विशेषरूपेण अभिप्रेतानि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मार्वाड-गुर्जरमहीगृहिणां जनानां
उष्णीष - धौत - परिधानविधिं विचित्रम्।
अत्युन्नतं च लघुकञ्चुकमप्यपूर्व-
मद्यापि चेतसि कुतूहलमातनोति॥ २९॥

एवमेव कश्मीरप्रदेशस्य, नागालैण्डस्य, वनवासिक्षेत्राणां तथा पर्वतीयक्षेत्राणां च निवासिनां जनानां परिधानानि आभरणानि च विचित्राणि भवन्ति परन्तु ते अद्यापि तत्र परिवर्तनं कर्तुं न समीहन्ते।

अद्यापि दीर्घतरसैकिलयान-यात्राः
नानास्थलेषु विहिता नहि विस्मृता मे।
याः श्रान्तिदा अपि सुहृज्जनसाहचर्याद्
वार्ताविनोदबहुलाः सुखदा अभूवन्॥ ३०॥

अस्यां सुदीर्घसंस्कृतप्रचारयात्रायां मया वायु-रेल-बस-कार-जीपयानाद्यतिरिक्तं समयानुसारं साइकिलयानस्यापि भूयान् उपयोगः कृतः। न च केवलं समतलप्रदेशेषु, अपितु शिमला-धर्मशाला-नैनीताल-बदरिकाश्रमशिलांगप्रभृतिषु विषमतलप्रदेशेषु पर्वतीयक्षेत्रेषु च ग्रामाञ्चलवर्तिनां तीर्थानां संस्कृतविद्यालयानाञ्च अवलोकनार्थं तथा तत्रत्यैः संस्कृतसेवापरायणैर्विद्वद्भिश्च सह मिलितुं मया बहुधा सौविध्यार्थं विनोदार्थं च साइकिलयानस्य उपयोगः क्रियते स्म। इयं यात्रा यद्यपि ग्रामीणमार्गाणां दुर्गमतया, अपरिचिततया, अधिकसाइकिलचालनेन च श्रान्तिकरी भवति स्म तथापि मया सह अन्येऽपि तत्तत्प्रदेशीया अध्यापकाः छात्रा वा चलन्ति स्म। ते अपरं तेषां हास्यविनोदपूर्णैः संलापैः तथा यदा कदा मार्गे विभिन्न-भोजनपानादि-ग्रहणैश्च भूयान् आनन्दोऽपि अनुभूयते स्म। पुनश्च तत्तत्प्रदेशगत-नवनववेषभूषा-भाषा-गीतव्यवहारा-दिदर्शनजनितः प्रमोदः अपरोऽप्येकः सायकिलयात्राया लाभो भवति स्म। मया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कृतप्रचारयात्राया आरम्भकाले स्वकीये देवरियाजनपदे गोरखपुरे च येषु येषु स्थानेषु साइकिलयात्रा कृता तस्या विवरणं मया पूर्वमेव पूर्णतया प्रदत्तं वर्तते।

नानाप्रदेशगत - चित्रविचित्र - रम्यो-
द्यानस्थ - पुष्पनिकरेषु विलोकितेषु।
अद्यापि मुह्यति मनः प्रकृतेरनन्तान्
आलोक्य रञ्जनकलाकुशलप्रयोगान्॥ ३१ ॥

अस्मिन् पद्ये मया यात्रायां प्रसङ्गवशादवलोकितानि श्रीनगर-मैसूर-वृन्दावन-रांची-उज्जयिनी-कलकत्ता-मुम्बई-मद्रास-प्रभृतिस्थानेषु विद्यमानानामुद्यानानां अनन्तविधानि मनोहारीणि पुष्पाणि अभिप्रेतानि सन्ति। एतेषु मैसूरनगरस्थितं वृन्दावन-नामकमुद्यानं मम दृष्टौ सर्वाधिकं सुन्दरं विद्यते।

अद्यापि संस्कृतगिरं मम बाल्यकाले
श्रोतुं जनैर्निजगृहं प्रणयेन नीतः।
यन्मिष्ट - पेय - घृतलड्डुक - चूषणाद्यै -
राप्यायितश्च तदहं सतृषः स्मरामि॥ ३२ ॥

मातुः पितुश्च प्रेरणया, मम अभिरुचेः प्राबल्यात्, परिश्रमात्, मम सौभाग्यवशाच्च यदाऽहं नवदशवर्षीय आसं तदैव संस्कृतेन वक्तुं मम कार्यक्षमा योग्यता सम्पन्ना आसीत्। बहूनि शोभनानि रोचकानि च पद्यान्यपि मम कण्ठस्थितानि आसन्। अश्वधाटी-कुसुममञ्जरी-प्रभृतीनि अप्रसिद्धान्यपि छन्दांसि अहं सुन्दरस्वरेण श्रावयामि स्म। तस्माद् अनेके पण्डिताः, संस्कृतप्रणयिनः नागरिकाश्चापि मम संस्कृतं श्लोकपाठं च श्रोतुं मां स्वस्वगृहं नयन्ति स्म। तेषु दिनेषु भुक्तानि विविधानि मिष्टान्नानि अद्यापि मम यदाकदाचित् स्मृतिपथमायान्ति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बालकेन परिश्रमे कृते, मात्रा पित्रा च सविशेषं ध्याने दत्ते सर्वेऽपि संस्कृतपाठिनो लघुबालकाः अद्यापि इमं लाभं प्राप्तुं शक्नुवन्ति।

मम कनिष्ठपौत्र्याः प्रियंवदायाः (साहित्याचार्या, शिक्षाशास्त्री) नववर्षीयो बालकः पतञ्जलिः अस्यामेव अवस्थायां सम्यक् संस्कृतं वदति, वेदमन्त्रान्, श्लोकांश्च श्रावयति, संस्कृतगीतानि च गायति। तेन तस्य वाराणस्यां सर्वत्र प्रसिद्धिर्वर्तते, पुरस्कारं च प्रभूतं प्राप्नोति। तथाविधा अन्येऽपि बहवो बालका भवितुमर्हन्ति।

***धर्मशाला*—**

अद्यापि रुद्रपुरतो मम धर्मशालां
संप्रस्थितस्य मुदभूत् हृदये पुरा या।
या चापि भीतिरभवत् पथि वेपयित्री
तन्मे द्वयं मनसि विस्मयकारि नित्यम्॥ ३३॥

२२.५.८९तमे दिनाङ्के अहं, मम संस्थानस्य प्रधानमन्त्रिणः सुहृद्वर्यस्य आचार्यश्रीकेशवचन्द्रमिश्रस्य यः मध्यमपुत्र आसीद् अवनीशचन्द्रमिश्रः, तस्यैव विवाहोत्सवे सम्मिलितुं रुद्रपुरं गतवान् आसम्। तत एव च पूर्वनिश्चयानुसारं २५.५.८९ दिनाङ्के रुद्रपुरात् मध्याह्नकाले बसयानेन दिल्लीं प्रति प्रस्थानं कृतवान्। ततश्च रात्रौ दिल्लीतः पठानकोटं रेलमार्गेण गतवान्। एतत्स्थानपर्यन्तं मम मनसि धर्मशालायात्रानिमित्तको महान् उत्साहो हर्षश्च आसीत्। परन्तु अस्मात् स्थानात् यदा बसयानेन धर्मशालां प्रति यात्रा प्रारब्धा, बसयानं च पर्वतीयमार्गे क्वचित् अत्युन्नतमार्गेण, क्वचित् निम्नतममार्गेण, क्वचित् वक्रमार्गेण, क्वचित् सरलतममार्गेण, क्वचित् वाममार्गेण, क्वचिद् दक्षिणमार्गेण च चलितुं प्रारब्धवत् तदा मम भीतेः आशङ्कायाश्च सीमा नासीत्। कदा यानं गंभीरतमे गर्ते पतिष्यति कदा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च मृत्युमुखे प्रवेक्ष्यामीति पदे पदे चिन्ता भवति स्म। हृदयं च कम्पते स्म। एवं च कदाचित् चिन्तयामि स्म—वृथैव इयं यात्रा मया स्वीकृता। परन्तु यदा कियता कालेन बसयानं शनैः शनैः समतलम् अवतर्तुं प्रारब्धवत् तदा कथञ्चित् चिन्ता व्यपगता, आश्वासनं च कथञ्चित् पुनर्लब्धम्। अस्मिन्नेवं समये यदा यदा यात्रायाः प्रारम्भिकस्य महतः आनन्दस्य तथा मार्गे जायमानायाः भीषणाया भीतेश्च युगपत् स्मरणं जायते तदा मनसि महान् विस्मयो भवति स्म।

ततोऽहं धर्मशालाबसस्टेशने किञ्चित् स्थित्वा चायपानादिना च श्रान्तिमपनीय धर्मशालानगरसमीपवर्ति तिब्बतीसंस्थानं प्राप्तवान्। अत्र मम सहायकाः श्रीलोसंगनोर्बूशास्त्रिणः, सारनाथस्थतिब्बती-संस्थानस्य अध्यापकाः, पूर्वत एव मम सहयोगार्थं समुपस्थिता आसन्। इयं मदीया यात्रा तत्रत्यानां तिब्बतीछात्राणां संस्कृतशिक्षार्थं निर्धारिता आसीत्। तदारभ्य संस्कृतशिक्षणं प्रारब्धं यत् सप्ताहद्वयं प्राचलत्।

अस्यां सम्पूर्णयात्रायां मम संस्थानस्य वरिष्ठप्रचारकाः श्रीसुरेन्द्रमोहनत्रिपाठिनः मम अङ्गरक्षकरूपेण सदैव मम सौविध्य-सम्पादने संरक्षणे तथा दुर्गमयात्रासु च दत्तावधानास्तिष्ठन्ति स्म।

अत्रागतस्य मम तिब्बतिभिः सहासीत्
यत् शिक्षण-भ्रमण-भाषण-भोजनादि।
या बन्धुता च समजायत तत् समस्तं
स्मृत्वाऽधुनापि हृदयं बहु मोदते मे॥ ३४॥

२५-४-८९ दिनाङ्के अहं सायं बसस्थानात् तिब्बतीसंस्थानं सम्प्राप्तः। तत्र नोर्बूशास्त्रिणां सहयोगेन एकस्मिन् सुरम्ये भवने निवासव्यवस्था जाता। भोजनव्यवस्था एकस्य प्रतिवेशिनः तिब्बतीजनस्य गृहादभवत्। एवं च अहं तथा सुरेन्द्रमोहनत्रिपाठी चेति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उभावपि सुखं सुप्त्वा निशां यापितवन्तौ। तरुलताकुसुमादिमण्डितं स्थानं, शीतलमन्दसमीरमनोहरं वातावरणं, परितो नूतनं रमणीयं च दृश्यजातमिति सर्वमपि आवयोः कृते अकल्पितमेव परमप्रमोदावहं सम्प्राप्तम्।

ततः परं द्वितीयदिनात् शिक्षणकार्यं प्राचलत्। श्रीनोर्वूशास्त्रिणः मम सहायका आसन्। ते कमपि जटिलं विषयं तिब्बतीभाषया छात्रान् बोधयन्ति स्म। शिक्षणं यथाकालं नियमितरूपेण प्रचलति स्म। अतिरिक्ते समये तत्रत्येषु विभिन्नेषु वनाञ्चलेषु, पर्वतशिखरेषु, शिक्षा-संस्थानेषु, धार्मिकस्थानेषु, विदुषां गृहेषु च भ्रमणस्य प्रमोदा-वहोऽवसरो लभ्यते स्म। तत्रत्यैः जनैः सह भाषणं तत्रत्य-खाद्यवस्तूनां भोजनं जलपानं चापि मनोरञ्जकं भवति स्म। तत् सर्वं स्मृत्वा इदानीमपि मे महान् हर्षो जायते। पुनश्च तत्र जिगमिषा भवति।

अद्यापि भोटजनधर्मगुरुं दलाई-
लामाख्य-दिव्यपुरुषं सततं स्मरामि।
यद्दर्शनेन मृदु-संलपित-स्मितेन
तृप्तिर्भवत्यतितरां खलु काऽप्यपूर्वा॥ ३५॥

अस्मिन्नेव प्रसङ्गे विश्वस्य समग्र-तिब्बतीजन-धर्मगुरूणां सिद्धपुरुषाणां परमपावनश्रीदलाईलामामहोदयानामपि साक्षात्कारस्य तथा तैः सह सम्भाषणस्य च सुदुर्लभतमः अवसरः सम्प्राप्तः। ते तदानीं तत्रैव तिब्बतीसंस्थानात् किञ्चिद् दूरे स्वकीये विशालतमे सुरम्ये भवने विराजमाना आसन्। तैः सह मिलितुं प्रत्यहमेव देशविदेशवासिनो भूयांसो विद्वांसः राजपुरुषाश्च समागच्छन्ति स्म। तदानीमेव एकस्मिन् दिने श्रीलौसंग-नोर्बूशास्त्रिणा तथा श्रीसुरेन्द्रमोहनत्रिपाठिना च सह अहमपि पूर्वतो निर्धारिते समये मिलितुं गतवान्। ते अत्यन्तं प्रसन्नमुखमुद्रायां मिलिताः। सामान्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्टाचारानन्तरं संस्कृतशिक्षा-प्रचार-विषयिण्यः विविधा वार्ता जाताः। परन्तु आवामुभौ अपि अन्योन्यभाषाऽनभिज्ञौ। अहं तिब्बतीं न जानामि स्म। ते संस्कृते वक्तुमसमर्था आसन्। अतः श्रीनोर्बूशास्त्रिणः आवयोर्वक्तव्यस्य अनुवादं कुर्वन्ति स्म। मम संस्कृतस्य तिब्बतीभाषायां, तेषां तिब्बतीभाषायाः संस्कृते च। तस्मिन् दिने तेषां मधुरेण व्यवहारेण, मृदुना संभाषणेन, सस्मितेन आलापेन, किञ्चिदपूर्वं ज्योतिर्बिभ्रता मुखमण्डलेन च अहं तथा प्रभावितो जातो यत् कदापि विस्मर्तुं न शक्यते।

द्वारं गृहं परिसरो वसनासनानि
पात्राणि तल्पमथ छत्रमुपानहौ च।
सर्वं कलाकृतिमयं खलु तिब्बतीना-
मद्यापि दृष्टमखिलं प्रमुदावहं मे॥ ३६॥

धर्मशालाप्रवासकाले यत्र यत्राहं तिब्बतीजनानां गृहं गतवान् तत्र तत्र सर्वत्रापि सर्वेषु वस्तुषु कलात्मकतां रमणीयतां च विलोक्य मम महती प्रसन्नता भवति स्म। धर्मशालायास्तिब्बतीसंस्थाने तु भवनानां भित्तिषु, कपाटेषु, गवाक्षेषु, आसनेषु, पात्रेषु, पादुकासु, छत्रेषु, व्यजनेषु, कप-केटलीप्रभृतिषु च या कलात्मकता, मनोहरता च मया दृष्टा सा तु वर्णनातीतैव आसीत्।

अद्यापि नीरवतया खलु तिब्बतीनां
ग्रन्थालयेषु महतीमुपलभ्य शान्तिम्।
दृष्ट्वाऽतिशायि-शुचितां रमणीयतां च
तत्रैव गन्तुमसकृत् पठितुं समीहे॥ ३७॥

प्रायेण सर्वासां तिब्बतीसंस्थानां पुस्तकालयेषु मया महती शान्तिरुपलब्धा। कपाटानामुद्घाटनं पिधानं, पुस्तकानामादानं प्रदानं, जिज्ञासासमाधानम्, पुस्तकानां निष्कासनं, स्थापनं, गमनम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आगमनम्, परस्परं वार्तालापश्चेति सर्वोऽपि कायिको वाचिको वापि व्यवहारः सर्वथा तेषु पुस्तकालयेषु शान्तिपूर्वकं निर्बाधं निरुद्वेगं च प्रचलति स्म। तादृशी शान्तिः अन्येषु पुस्तकालयेषु नैवोपलभ्यते।

अद्यापि तानि मनसो मम मोहनानि
उत्फुल्ल - कोमल - कपोलदलान्वितानि।
ईषद्विकासि - लघुलोचन - मञ्जुलानि
भोटीय - बाल - शिशु - मुग्धमुखाम्बुजानि॥ ३८॥

धर्मशालायां तिब्बतीसंस्थाने निवसता मया प्रायेण प्रतिदिनं श्रीलोसंगनोर्बूशास्त्रिणा सह तथा श्रीसुरेन्द्रमोहनत्रिपाठिना सह समीपवर्तिषु दर्शनीयस्थानेषु भ्रमणं विधीयते स्म। तस्मिन् प्रसङ्गे एकं तादृशं स्थानमवलोकितं यत्र एकस्मिन् विशाले भवने उभयोः पार्श्वयोः दोलायमानासु, अत्यन्तं कोमलास्तरणवतीषु शताधिकासु पर्यङ्किकासु द्वि-त्रि-चतुः-पञ्चवर्षीया बालकाः-केचन शयानाः, केचन अर्धशयानाः, केचन खेलन्तः, केचित् किञ्चित् खादन्तः पिबन्तश्च मम दृष्टिपथं गताः। तेषां यादृशं मनोहरं रूपमासीत् तत् सर्वथा अदृष्टपूर्वमासीत्। तेषां समीपे गमने कृते सति यदा ते सस्मितेन वदनेन किञ्चिद् वक्तुकामा इव प्रतिभान्ति स्म, विस्मितेन चक्षुषा च पश्यन्ति स्म तदा तदतीव हृदयाकर्षकं भवति स्म। एवमेव एकदा कलिकातानगरस्य अंग्रेजजनबहुले वेलन्टाइनस्ट्रीट-सम्भागे गतवानासम् तदा तत्रापि ईदृशा एव बहवो लघुलघुबालका अदृश्यन्त। परं तेषां नयनानि तिब्बतीबालकवत् लघुलघूनि न आसन्। मम भ्रमणे एतद् दृश्यद्वयं स्मृतं सत् सर्वदा मां मोहयति इव।

अद्यापि हैमगिरिवर्ति-वनप्रदेशे
प्रातः सदैव खलु चंक्रमणे रतस्य।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मत्वा भ्रमेण निकटे धवलागिरिं तम्
आरोढुमुच्छलितुमिच्छति मानसं मे॥ ३९॥

धर्मशालायां तिब्बतीसंस्थाने यदा मम निवास आसीत् तदा प्रातः चंक्रमणकाले धवलागिरिपर्वतो यथानाम धवलोत्तरीयाच्छादित इव तथा समीपतर एव प्रतिभाति स्म यथा अल्पकालेनैव अल्पश्रमेण च प्राप्तुं शक्यते। परं तत् कल्पनामात्रमेवासीउत्। यथार्थता इयमासीद् यत् तत्र गमनाय मासाधिकः काल अपेक्षित आसीत्। तथापि तदुपरि आरोहणं सम्भवमासीन्नवा इति सन्देह एवासीत्। प्रायेण पर्वतानां स्थितिरेतादृशी एव भवति। ममापि तत्र ईदृशः एव भ्रमो जातः।

अद्यापि मत्स्मृतिगताः शिमलानगर्या-
स्ते ते क्षणा बहु मनः परिरञ्जयन्ति।
आकर्णितानि मृदुकण्ठ - विनिःसृतानि
गीतानि येषु नव-किन्नर-किन्नरीणाम्॥ ४०॥

शिमलानगर्याः उत्तरदिशायाम् एकशत-माइलदूरे "कनोर" नामकः एकः प्रदेशो वर्तते यस्य पुरातनं नाम किन्नरदेश इति अस्ति। एतत्प्रदेशवासिनां स्त्रीपुरुषाणां रूपलावण्यस्य संगीतमाधुर्यस्य च मनोरमं वर्णनं रामायण-महाभारत-पुराणादिग्रन्थेषु च लभ्यते। परन्तु मम जीवनस्य इदमेकं पश्चात्तापकरं वृत्तं वर्तते यन्मया किन्नरदेशे गमनस्य तन्निवासिनां साक्षात्कारस्य च कदाचिदवसरो न लब्धः। प्रथमशिमलानिवासकाले धर्मशालानिवासकाले चापि यद्यपि किन्नरदेशयात्रायाः सुयोगो मम आसीत् परन्तु ऋतोः प्रतिकूलतया स्वास्थ्यस्यापि च किञ्चिद् दुर्बलतया मम यात्रां कर्तुं साहसं न जातम्। परन्तु अयं सौभाग्यस्य विषयो वर्तते यद् द्वितीय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिमलायात्रायां मम सर्वा अपि ता वाञ्छिता आकांक्षाः परिपूर्णतां गताः। शिमलानगरे किनोरवासिनामपि अनेके परिवारा निवसन्ति। काले काले तेषां तत्र अनेके धार्मिकाः लौकिकाश्च समारोहा अपि आयोज्यन्ते येषु गीतनृत्यवाद्यादीनामाकर्षकरूपेण प्रदर्शनं भवति। एतेषु समारोहेषु अहमपि यदा कदा संस्कृतज्ञैः किन्नरमित्रैः सह सम्मिलितो भवामि स्म। अतः किनौरप्रदेशे अगमनस्य मम सर्वोऽपि पश्चात्तापो व्यपगतः। अनन्तरं वाराणस्याः संस्कृतविश्वविद्यालये सारनाथतिब्बतीसंस्थाने च संस्कृतं पठतां किन्नरच्छात्राणां सम्पर्केण एतद्विषये अन्यदपि बहु परिज्ञानं जातम्।

रम्यं मुखं, सुनयने, रमणीयनासा
ओष्ठौ प्रवालसदृशौ, विशदो ललाटः।
चित्राणि चापि वसनाभरणानि तेषा-
मद्यापि मे स्मृतिगतानि मनोहराणि॥ ४१॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २७ :

नेपालदेशीयानि संस्मरणानि

अद्यापि डांगनगरस्य कुमार्गहेतो-
र्यात्राऽतिकष्टबहुला नहि विस्मृता मे।
यत्रोच्छलत् परिपतत् प्रलुठत् प्रधावत्-
मत्कारयानमगमज्जनयत् प्रकम्पम्॥ १॥

नेपालदेशस्य पश्चिमे भागे डांगजनपदं वर्तते यत्र विजौरीनामके ग्रामे एकः जनता-संस्कृतमहाविद्यालयः प्रचलति। इममेव महाविद्यालयं विश्वविद्यालयरूपे परिणमयितुं १९६७ तमस्य खृष्टाब्दस्य मार्चमासे दिनत्रयव्यापि एकं बृहत् संस्कृतसम्मेलनं समायोजितमासीत् यस्मिन् अनेकेभ्यः प्रदेशेभ्यो भूयांसः संस्कृतविद्वांसः धर्माचार्याश्च समाहूता आसन्। समारोहस्य उद्घाटनं स्वयं नेपालनरेशः श्रीमहेन्द्रवीरविक्रमशाहदेवः कृतवान्।

सम्मेलनेऽस्मिन् वाराणसीतः स्वामिश्रीकरपात्रमहाभागास्तथा अन्येऽपि सर्वे प्रमुखा विद्वांसः सम्मिलिता अभूवन्। सम्मेलनसमायोजकैः श्रीगङ्गाधरपराजुलीमहोदयैः साग्रहमाहूतः अहमपि तत्र सम्मिलितुं निश्चयं कृतवान्। वाराणसेयाः सर्वेऽपि विद्वांसः वायुयानेन नेपालं गतवन्तः परन्तु अहं नेपालप्रदेशान्, तत्रत्यान् जनान्, मार्गस्थितान् आपणान् विपणींश्च द्रष्टुकामस्तथा तत्रत्यां जनभाषां च श्रोतुकामो वायुयानं विहाय कारयानेनैव गन्तुं निश्चयं कृतवान्, तदर्थं च सम्मेलनसमायोजकान् पत्रं लिखितवान्, तैश्च ममानुरोधं स्वीकृत्य तादृशी एव व्यवस्था विहिता। ततश्चाहं वाराणसीतः बस्तीजनपदस्य तुलसीपुरस्टेशनं गत्वा ततः नेपालराज्यान्तार्गतं कोइलावास. स्थानं गतवान्, यत्रत्यः एकः राज्याधिकारी मम सभायां गमनाय कारयानस्य व्यवस्थां कर्तुमादिष्ट

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आसीत्। तदनुसारं स मयि तत्र गते मम भोजनादि-व्यवस्थां कारयित्वा दशवादने मां कारयानात् प्रेषितवान्। अहं च दिने इतो दशवादने चलितः रात्रौ दशवादने विजौरीग्रामे सभास्थलं प्राप्तवान्। एका च इदं महती ऐतिहासिकी यात्रा सम्पन्नतामगात्।

परन्तु सभास्थलं प्राप्य अहं न केवलमत्यन्तं परिश्रान्त एव परं नितान्तमस्वस्थोऽपि जातः। तस्य कारणमिदमासीत् यत् नेपाल-राज्यस्य मार्गाणामुच्चावचतया, कारयानस्य गतिवेगे तीव्रतया च मम कारयानं क्वचित् उच्छलत्, क्वचित् परिपतत्, क्वचित् प्रलुठत्, क्वचित् च प्रधावत् तथा भयंकररूपेण प्राचलत् यथा मम उदरे बहुबाधा जाता, पाचनं च मे सर्वत्र विकृतं जातम्। तेन तावत् दिनत्रयं सभा प्राचलत् तावदहं नितरामस्वस्थ एव दिनानि अतिवाहितवान्। सभायां च कस्मिन्नपि कार्यक्रमे मया भागो न गृहीतः न वा कदापि भाषणं कृतम्। एतेन मम तथा तत्रत्यानां समायोजकानां च महत् कष्टं जातम्। तत्र आमन्त्रितेषु विद्वत्सु ममैव नाम द्वितीयमासीत् तथापि सभायां ममानुपस्थित्या सभासदः खिन्ना आसन्।

अद्यापि तानि दिवसानि न विस्मृतानि
जातानि यानि विफलानि कुदैवयोगात्।
हित्वा विमानमभवन्मम कारयानात्
यानेन यत् त्रिदिवसं महती व्यथा मे॥ २॥

सोऽयं प्रसङ्गः पूर्वश्लोकस्यैव विवरणे पूर्णतया प्रपञ्चितः।

अद्यापि मत्स्मृतिमुपैति सदा विजौरी-
ग्रामस्य संस्कृतमहासमितिर्बुधानाम्।
यद्-हेतुना समभवन्नयपालवर्ति-
ग्रामापणाऽञ्चल-नदी-जन-दर्शनं मे॥ ३॥

कोइलावासा-स्थानादारभ्य विजौरीपर्यन्तं गमने मध्येमार्गं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रामाणाम्, आपणानाम्, लघु-लघुशैलानां, नदीनां दर्शनस्य, मध्ये-मध्ये चायपानस्य, विजौरीग्रामे महतः नरनारीसमुदायस्य च अवलोकनस्य यः दुर्लभोऽवसरः प्राप्तः स संस्कृतसम्मेलनस्य समायोजकानां कृपयैव उपलब्ध इति तानहं सदैव कृतज्ञतया स्मरामि।

सम्मेलनदिनेषु च अस्वास्थ्येऽपि एकदा नेपालमहाराधिराजानां मन्नैकट्येन दर्शनं जातं तथा तैः सह या संस्कृतविषयिणी वार्ता जाता तदपि सर्वं सम्मेलनस्यैव कारणात् सम्भवं जातमिति यात्रेयं मत्कृते अनेकलाभकरी संवृत्ता।

अद्यापि संस्कृतगिरः समितौ समेतां
स्मृत्वा भवामि चकितो जनतामपाराम्।
यत्र प्रयाग-परिकल्पित-कुम्भमेला-
दृश्यं मया पुनरदृश्यत दृष्टपूर्वम्॥ ४॥

बिजौरीग्रामस्य सम्मेलनं न केवलं महासम्मेलनं प्रत्युत महामहासम्मेलनमासीत्। यतः सम्मेलनेऽस्मिन् न केवलं डांगजनपदात् अपितु रासी, लुम्बिनी, मेरी, कर्णाली, नारायणी, अञ्चलेभ्योऽपि संस्कृतानुरागेण, धर्मानुरागेण, विदुषां दर्शनेच्छया, महाराजस्य दर्शनेच्छया, समारोहस्य दर्शनेच्छया वा यद् असंख्या नरा, नार्यः, वृद्धाश्चापि महिलाः समागतास्तेन सम्मेलनमिदं कुंभमेलारूपमधारयत्। संस्कृतसम्मेलने एतादृशः जनसम्मर्दः मया ततः पूर्वं कुत्रापि नावलोकित आसीत्। महिलानां बाहुल्यं तु विशेषरूपेण मम विस्मयकरमासीत्। अतस्तत्सम्मेलनं यदैव स्मृतिपथमागच्छति, तदैव मम हर्षप्रकर्षं परममुत्साहं च जनयति, तदायोजकान् प्रति च मम महती श्रद्धा सद्भावना च जागर्ति।

अद्यापि संसदि मुदा समुपागतांस्तान्
नेपालवासि-विदुषः प्रणतः स्मरामि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ये जीर्ण-शीर्ण-शिथिला गलितत्वचोऽपि
सेवारताः सुरगिरो नितरामभूवन्॥ ५॥

बिजौरीग्रामे जनतासंस्कृतमहाविद्यालयसमीपे एव समागतानां विदुषां विशिष्टातिथीनां च निवासाय बहूनि पटमण्डपानि सज्जीकृतान्यासन्। तत्रैव ममापि एकस्मिन् पटमण्डले निवास-व्यवस्था विहिता आसीत्। अतोऽहं तत्रस्थितैः निखिलैरपि नेपाल-वासिभिर्विद्वद्भिः सह सम्पर्कं साधयित्वा तेषां परिचयं पृच्छामि स्म, तैः सह वार्तालापेऽपि कञ्चन कालं नयामि स्म। तत्र इदं विलोक्य मम महान् विस्मयो, महती श्रद्धा चापि जायते स्म यत् तत्र अनेके नितान्तं वृद्धा दुर्बलाः शीर्णकलेवरा गलितत्वचः, नित्यक्रिया अपि कर्तुमशक्ता विद्वांसः समागता आसन् ये तस्यामवस्थायामपि स्वे-स्वे गृहे संस्कृतं पाठयन्ति स्म तथा संस्कृतोन्नतेराशया नितान्तं प्रसन्नाः सन्तः समारोहे सम्मिलितुमागता अभूवन्। अनेन वैशिष्ट्येन ते मम दृष्टौ अतितरां प्रणम्या अभिनन्दनीयाश्च आसन्।

अद्यापि विज्ञवरपण्डितसोमनाथं
तं शब्दशास्त्रविदुषां प्रवरं स्मरामि।
यः कौमुदीमभिनवां प्रतिसंस्कृताख्य-
व्याख्यां विरच्य बहुबोधकरीमकार्षीत्॥ ६॥

पण्डितप्रवराः श्रीमन्तः सोमनाथसिग्देल शर्माणो नेपालदेशस्य विद्वत्सु, विशेषतो वैयाकरणेषु, विशिष्टं स्थानमभजन्त। तैः सिद्धान्तकौमुद्या एकं नूतनं संस्करणं प्रकाशितं यत् कौमुदीमाध्यमेन व्याकरणाध्येतॄणां छात्राणां बहु उपकारं करोति। तत् सर्वं यथा सिग्देलमहोदयेन भूमिकायां स्वयमेव लिखितं तत् पाठकैः तत्रैव द्रष्टव्यम्। पुस्तकमिदं "नेपाल एकेडमी, काठमांडू, नेपाल" द्वारा प्रकाशितं तत एव च लब्धुं शक्यते। पुस्तकमिदं व्याकरणशास्त्रस्य,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषतश्च सिद्धान्तकौमुद्याः विश्लेषणात्मकं व्युत्पत्तिवर्धकं च ज्ञानं प्राप्तुमिच्छद्भिः छात्रैराध्यापकैश्च अवश्यमध्येतव्यमिति मे साग्रहं निवेदनम्।

नेपाल भारतमही-बुधवृन्दमान्यः
सम्मानितो विविधशासनसंसदाद्यैः।
दीप्यत्यसौ स्वकविताप्रतिभाविभाभिः
कृष्णप्रसादघिमिरे तिमिरे प्रकाशः॥ ७॥

'श्रीकृष्णप्रसाद शर्मा घिमिरे' महोदयः नेपालदेशस्य एकस्तादशो विद्वान् वर्तते यः न केवलं नेपालदेशे एव प्रत्युत सम्पूर्णे भारते सुप्रसिद्धो वर्तते। एष महानुभावः महाकाव्यानां, काव्यानां, नाटकानां, स्तोत्राणां तथा गीतानां प्रणयनेन, काव्यपाठेन, भाषणेन, सम्पूर्णे भारते भ्रमणेन तथा महापुरुषाणां सम्पर्केण च सर्वत्र बहूनि सम्मानपत्राणि, अभिनन्दनपत्राणि नानाविधान् उपाधीन् प्राप्तवानस्ति। एतेषां जीवनस्य योग्यतायाश्च सम्पूर्णपरिज्ञानाय एभिरेव हिन्द्यां विनिर्मितो ग्रन्थः अवलोकनीयो निम्नलिखितः—

गतिविधियों की रूपरेखा, प्रकाशक-काव्यप्रासाद, टंगाल, गौरीधारा, काठमांडू, नेपाल, मूल्यम्-२०१.००

अद्याप्यहं नरहरिं कवियोगि-वर्यं
तं कर्मवीरविबुधं सुहृदं स्मरामि।
धर्मस्य संस्कृतगिरश्च हिताय देशे
वात्येव योऽभ्रमदहो जनयन् प्रकम्पम्॥ ८॥

नेपाले "योगी नरहरिनाथ" इति नाम्ना एके सुप्रसिद्धाः कर्मवीराश्च साधु-विद्वांसः सन्ति। एते न केवलं नेपाले प्रत्युत भारतेऽपि गोरखपुर, वाराणसी, अयोध्या, हरिद्वार प्रभृतिषु स्थानेषु अनेकवारं संस्कृतभाषायाः हिन्दुधर्मस्य च रक्षायै प्रचाराय च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कठोरं प्रयासं परिश्रमं च कुर्वन्तो मया दृष्टाः। एतेषां च प्रचारस्य अभियानं न शनैः शनैः न वा शिथिलया गत्या प्रचलति स्म अपितु वात्या (आँधी) इव महता प्रकम्पकारिणा वेगेन सह प्रचलति स्म।

प्रचारातिरिक्तं बहूनि बृहन्ति च पुस्तकान्यपि अनेकानि लिखितानि प्रकाशितानि च एभिः। एतेषां कर्ममये जीवने कुत्रापि नैराश्यस्य, आलस्यस्य, शैथिल्यस्य, अनुत्साहस्य वा प्रवेशो नासीदिति संस्कृतप्रचारसमाजे एते आदर्शभूता आसन्।

बिजौरीसभायामेतेषां कर्तृत्वं व्यक्तित्वं, व्यवहारकौशलं च सम्यगवलोकितम्।

अद्याप्यहं तममितप्रतिमं प्रपन्ना—
चार्यं स्मरामि बहुशोऽप्यभिनन्दयामि।
येनोद्धृतं सकल - वैदिकवाङ्मयाब्धे-
वैज्ञानिकं नवनवं बहु तत्त्वजातम्॥ ९॥

नेपालदेशे वेदान्ताचार्याः, पी-एच.डी. इत्युपाधिधारिणः एके स्वामिरामकृष्णप्रपन्नाचार्यमहोदया नेपालिविद्वांसः सर्वत्र संस्कृतसमाजे सुविख्याताः संस्कृतसंस्कृतिप्रचारका विराजन्ते। वैदिकवाङ्मये यानि वैज्ञानिकानि तत्त्वानि निगूढानि वर्तन्ते तेषामनुसन्धानम्, उद्धरणं, लेखनं प्रकाशनं प्रचारश्च स्वामिवर्याणां जीवनस्य प्रधानं लक्ष्यमासीत्। इमं विषयमभिलक्ष्य नेपालीभाषायां तैः पुस्तकद्वयं लिखितं प्रकाशितं च। तद्द्वयं निम्नाङ्कितं वर्तते—

१. प्राचीन हिन्दू विज्ञान, पृष्ठ-२४० मूल्यम्-४४.००

२. वेदमां के छ? पृष्ठ-३४७ मूल्यम्-३६.२५, प्रकाशक-प्रेमराई, श्रीदन्तकाली, वेकरी सदर रोड घटरन ३, नेपाल

एतयोर्द्वयोरपि पुस्तकयोः यदि हिन्द्यां, संस्कृते अंग्रेजी-भाषायां च अनुवादः स्यात्तर्हि संस्कृतमहत्त्वप्रचारकारणं महत् सौविध्यं स्यात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि थारु - जनजाति - नितम्बिनीनां
भिक्षाकृते प्रतिगृहं भ्रमणे रतानाम्।
रम्याण्यपूर्वमधुरध्वनिझंकृतानि
गीतानि मां स्मृतिगतानि विमोहयन्ति॥ १०॥

नेपालदेशस्य पूर्वदिशाया मेचीनदीतः आरम्भः पश्चिमदिशाया महाकालीनदीपर्यन्तं सुविस्तृते भारतसंलग्ने तराईक्षेत्रे थारूजना निवसन्ति। एते भारतसीम्नः संबद्धतया मैथिली, भोजपुरी अवधी इत्यादिभाषा अपि वदन्ति। एतज्जातीयाः स्त्रियः अत्यन्तं मधुरस्वरेण गीतानि गायन्ति। निर्धनाः स्त्रियो भिक्षाटनं कुर्वत्यो, जन्मोत्सवादिषु माङ्गलिकेष्ववसरेषु तथा नारीणामङ्गेषु "गोदना" नाम्ना प्रसिद्धं चित्राङ्कनं नामाङ्कनं वा उल्लिखन्त्यो यानि गीतानि गायन्ति तानि नितान्तं मोहकानि भवन्ति।

बिजौरीयात्रायां मया संयोगवशात् एतज्जातीयजनानां साक्षात्कारस्य गीतानां श्रवणस्य च एकः सुदुर्लभः अवसरः सम्प्राप्तः।

अद्यापि कौशलमिदं बहु रोचते मे
नेपालिवासिविदुषां व्यवहारपक्षे।
देश्यं ककारमुपयुज्य कमप्यजन्तं
शब्दं पदं विदधते खलु संस्कृतं ते॥ ११॥

नेपालीविदुषामियं पद्धतिर्मम नितान्तमुपयुक्ता चमत्कारपूर्णा च प्रतिभाति यत् ते कस्मिन्नपि अजन्ते देशजे शब्दे "स्वार्थे कन्" प्रत्ययमुपयुज्य तं च अकारान्तं संस्कृतपदं निर्माय तस्य संस्कृतलेखने व्यवहारं कुर्वन्ति, देशजशब्दान्तं च संस्कृते प्रयोगस्य काठिन्यं दूरीकुर्वन्ति। यथा—

१. स्वयस्ति श्री स्वामीज्यूकस्य पत्रम्

२. जंगबहादुर राणाजिकस्य पत्रम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३. श्री खजांची उदैगिरिकस्य पत्रम्

४. कमांडर इन चीफकस्य पत्रम्

५. स्वस्तिश्री जनरल भीमसेनथापाकस्य पत्रम्

सन्दर्भग्रन्थ—इतिहासप्रकाशमा सन्धिपत्रसंग्रह, भाग-प्रथम, सम्पादक-योगी नरहरिनाथ, प्राप्तिस्थान-सिद्धाचल मृगस्थली, गोरक्षनाथपीठ, काठमांडू नेपाल-पृष्ठसंख्या ७८४ मूल्यम्-

अद्याप्यहं जनकनाम्नि पुरे विशालं
तन्मन्दिरं जनकजामहितं नमामि।
यद्दर्शनेन हृदये स्मृतिमेति सर्वं
सीताचरित्रमतुलं जगदेकवन्द्यम्॥ १२॥

१९.३.८२ दिनाङ्के अहं बिहारप्रदेशस्य सीतामढ़ीनगरे समायोजिते संस्कृतसम्मेलने भागं ग्रहीतुं सीतामढ़ीं गतवान् आसम्। तत एव च जनकपुरमपि गन्तुं मया महनीयोऽवसरः विशालं श्रीसीतामन्दिरं च द्रष्टुं सौभाग्यमधिगतम्। तस्मिन् नगरे मम एकदिनमेव निवास आसीत्, सम्पूर्णं च दिनं सीतायाश्चरित्राणां चिन्तने, कदाचित् हर्षमये कदाचित् च विषादमये एव व्यपगतम्। अयोध्यायां निवासकाले मम श्रीरामस्य चरित्रविषये तथा न तीव्रा भावा उदयन्ति स्म यथा जनकपुरे जगज्जनन्याः सीताया विषये।

नेपालदेशप्रशस्तिः—

विश्वेऽतितुङ्गतम-शृङ्ग-सुविश्रुतो यः
पूतश्चिरात् पशुपतेश्चरणाम्बुजेन।
तं सर्व हिन्दुजनताहृदयैकबन्धुं
नेपालदेशमजरामरमानतोऽस्मि ॥ १३॥

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २८ :

पर्वतपरिभ्रमणसम्बन्धीनि संस्मरणानि

अद्यापि तं गिरिनिवाससुखं स्मरामि
छात्रैर्यदा निजनिजे भवनेऽशनार्थम्।
'ग्रामः समीपतर एव' इतीरयित्वा
ग्राम्येष्वहं बहुलदूरतमेषु नीतः॥ १॥

इयं सोलन-शिमलानगरनिवासकालिकी वार्ता अस्ति। सोलननगरमहं म०म० श्रीपण्डित मथुराप्रसाददीक्षितमहोदयैः सह तेषां प्राकृतमहाकोषस्य निर्माणकार्ये सहयोगप्रदानार्थं गतवानासम्। तत्र संस्कृतमहाविद्यालये मम निवास आसीत्, तत्रैव च भोजनपानादिकं भवति स्म। एवमेव शिमलाख्ये नगरेऽपि एकदा मम स्थितिः तत्रत्ये ब्राह्मणसंस्कृतमहाविद्यालये आसीत्। एतयोर्द्वयोरपि विद्यालययोश्छात्राः, पण्डिताश्च स्वगृहे भोजनार्थं मां निमन्त्रयन्ति स्म, कथयन्ति स्म च—गुरुवर, अस्माकं ग्रामीणं भोजनं साधारणमपि यथा स्वादिष्ठं भवति न तथा नागरिकम्। अतोऽद्य कृपया अस्मद्गृहस्य भोज्यवस्तूनां स्वादमनुभवन्तु। एवमुक्त्वा ते स्वकीयं दूरतरवर्ति अपि गृहं समीपतरं कथयित्वा मां नयन्ति स्म।

अद्यापि शैलशिखरस्थितवक्रमार्गान्
तान् दर्शनेऽपि भयदान् सततं स्मरामि।
ईषत्प्रमादवशतो भविता जनाना-
मेकक्षणेन खलु येषु महाविनाशः॥ २॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शैलेन्द्र - शृङ्ग - सुषमा - समलङ्कृतानि
स्वच्छानि शान्त-रमणीय-मनोहराणि।
अद्यापि योगि-कवि-चिन्तक-चेतनानि
स्थानानि तानि हृदयं मम लोभयन्ति॥ ३॥

पर्वतीयानि स्थानानि न केवलं रमणीयानि भवन्ति प्रत्युत योगिनां तपस्विनां कवीनां चिन्तकानां वैज्ञानिकानां चापि कृते लक्ष्यसिद्धौ साधकानि सहायकानि च जायन्ते। ऋग्वेदे लिखितम्—
"उपह्वरे गिरीणां सङ्गमे च नदीनां धिया विप्रो अजायत"।
कविवरेण्यः श्रीसुमित्रानन्दनपन्तः स्वजीवनविषये लिखितवान्—

"मेरी माँ की मृत्यु मेरे जन्मके छः-सात घण्टों के भीतर ही हो गयी थी। मैंने प्रकृति की गोद में पलकर ही, प्रारम्भ में, अपनी रचनाओं के लिए कौसानी के सौन्दर्यपूर्ण वातावरण से प्रेरणा ग्रहण की।" अग्रे पुनरुक्तम्—
"संयोगवश मेरा जन्म हिमालय के अंचल में कूर्माचल की सौन्दर्यस्थली कौसानी में हुआ जो अपनी नैसर्गिक शोभा के कारण प्रसिद्ध है।..... उस पर्वत-प्रदेश के सौन्दर्य तथा हिमालय की विराट् उच्च चोटियों ने जैसे मेरे भीतर एक कभी न मिटने वाले उदात्त सौन्दर्य की गहरी नींव डाल दी, जिस पर मैं आगे चलकर अपने जीवन-अनुभवों का संसार निर्मित कर सका।............ मेरे भीतर सौन्दर्य का संस्कार प्रबल रहा होगा; जिसे प्रस्फुटित करने में कौसानी के दिक्चुम्बी सौन्दर्य ने मेरी सहायता की और कल्पना के जगत् को मेरे लिए वास्तविकता के जगत् से अधिक मोहक तथा सत्य बना दिया"?

—सुमित्रानन्दनपन्त-ग्रन्थावली, खण्ड ६, पृष्ठ. १७७, १८६

स्वल्पान्नभोजनकृशा धृतजीर्णवस्त्रा
नव्ये वयस्यपि च भुग्नकटिप्रदेशाः।
भारांस्तथापि शिखरेषु गुरून् वहन्तो
नाद्यापि विस्मृतिमिताः श्रमिका गिरीणाम्॥ ४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पर्वतीयनगरेषु भ्रमणकाले भारवाहकानां श्रमिकाणामिदं दुःखदं दृश्यं मया बहुधाऽवलोकितम्। यात्रिणां द्वित्राः पेटिका रज्ज्वा बद्ध्वा ते पृष्ठे स्थापयन्ति स्म। तदुपरि कदाचित् आस्तरणादिकमपि। ततस्ते भाराधिक्यात्, उपरि आरोहणकारणाच्च भृशमवनतकायाः, भृशं उच्छ्वसन्तः, मध्ये च परिश्रान्ताः सन्तः, स्यूते (पाकेट) स्थापितं सलवणं रोटिकाखण्डं भुक्त्वा निर्झरजलं च पीत्वा पुनरग्रे चलितुं प्रवर्तन्ते। पर्वतीयश्रमिकाणामियं दयनीया दैनिकी दशा सदैव मे स्मृतिपटले तिष्ठति व्यथयतितराञ्च अद्यापि मे मानसम्। यौवनेऽपि तेषां शरीरं भुग्नं जीर्णमिव च जायते।

गर्तानधः समवलोकयतोऽतिनिम्नान्
ऊर्ध्वं तथोच्चशिखराणि च पश्यतो मे।
उच्चैरधः प्रतिपलं बहु दृष्टिपातात्
अद्यापि घूर्णति गिरौ व्रजतः शिरो मे॥ ५॥

अद्यापि तेषु लघुषु प्रियदर्शनेषु
नानालता - कुसुम - राजि - विभूषितेषु।
रोहावरोहसुखदेषु नतोन्नतेषु
रम्येषु शैलभवनेषु विहर्तुमीहे॥ ६॥

सोलन, शिमला, धर्मशाला, नैनीताल शिलांगप्रभृतिषु पर्वतीयनगरेषु भ्रमणकाले तत्रत्यानि भवनानि दृष्ट्वा तत्र कञ्चित् कालमुषित्वा च मम महान् प्रमोदो भवति स्म।

भूयः स्खलत्पदयुगेषु विशृङ्खलेषु
अत्युन्नतेषु शिखरेषु महीधराणाम्।
अद्यापि साहसबलादुररीकृतानि
आरोहणानि भयदानि न विस्मरामि॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्युन्नतासु बहुधाऽहमधित्यकासु
यानैर्व्रजन् परित ऊर्ध्वमधश्च तिर्यक्।
दृश्यं यदैक्षिषमनेकविधं मनोज्ञम्
अद्यापि तन्नयनयोर्मम नृत्यतीव॥ ८॥

दूरस्थमेति निकटे, निकटस्थितं यत्
दूरं प्रयाति हि पलेन विवर्तते च।
यानस्य च प्रतिपलं पतनस्य चिन्ता
यात्राऽधुनापि भयदा खलु पर्वतेषु॥ ९॥

अद्यापि शैलशिखरे वसता मया यत्
सामीप्यमापि सरसं चरतां घनानाम्।
स्पर्शेण चाऽप्यकरवं बहुधा विनोदं
तन्मानसे कुतुकमातनुते सदैव॥ १०॥

पर्वतानामुच्चतमशिखरस्थितेषु भवनेषु निवासकाले वर्षर्तौ प्रायेण गृहं परितः सञ्चरतां घनानां सामीप्यं सम्पर्कश्च भवति। यदा कदाचित् गवाक्षद्वारेण घना गृहाभ्यन्तरे अपि प्रविशन्ति निखिलानि च वस्तूनि आर्द्रीकुर्वन्ति। एषा स्थितिरत्यन्तं विनोदकरी कौतुककरी च भवति। इदं मया शिमला-धर्मशालादिस्थानेषु निवसता सम्यगनुभूतम्।

अद्यापि शैलशिखरोपवने प्रभाते
लब्धं सुदुर्लभसुखद्वितयं स्मरामि।
तन्मन्दमन्दमृदुशीतलगन्धवाहः
फुल्ल - प्रसून - कलिकामलसौरभं च॥ ११॥

शैलस्थितेषु शैलशिखरस्थितेषु वा भवनेषु निवासकाले यदा प्रातरुत्थाय तत्समीपवर्तिनि उपवने कञ्चित् कालं भ्रम्यते उपविश्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वा तदा मन्दमन्द-मृदु-शीतल-वायुसेवनस्य विभिन्नकुसुमानां सौरभाघ्राणस्य च सुदुर्लभ आनन्दोऽनुभूयते।

श्रान्तिश्च या विषमवर्त्म-गतागतेषु
क्लान्तिश्च याऽसुलभ-भोजनपानहेतोः।
एतद्द्वयं यदपि कष्टकरं तदाऽभूत्
किन्त्वद्य तत् स्मृतिगतं सुखमेव सूते॥ १२॥

यत्र क्वचिद् गिरिगुहाभ्रमणे नदीभ्यो
यो भूरिशो निपतति स्म जलप्रपातः।
अद्यापि स स्मृतिगतो मम घोरघोषैः
कर्णद्वयं कलकलैर्बधिरीकरोति॥ १३॥

अद्यापि वाञ्छति मनो वनपर्वतानां
लब्धान्ययत्नसुलभानि सुखानि भूयः।
सन्नीर - वायु - फल - मूल - चयाभिरामा
यात्रा नु कस्य मनसो न भवेदभीष्टा॥ १४॥

★

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २९ :

वनपरिभ्रमण-सम्बन्धीनि संस्मरणानि

अद्यापि मुक्तपवने सततं निवासः,
स्नानादि निर्झरजलेषु, फलोपभोगः।
शय्या सुकोमल-सुशीतल-शाद्वलेषु
धन्यं नु वन्यजनजीवनमेव मन्ये॥ १॥

शुद्धजलवायुसेवनेन फलादीनामधिकोपभोगेन च शरीरं सदा स्वस्थं रोगरहितं च तिष्ठतीति सर्वसम्मतः सिद्धान्तो वर्तते। अनया दृष्ट्या वनजीवनं सर्वथा समीचीनमिति मया वनवासे बहुशोऽनुभूतम्। भीलजनेषु एका उक्तिः श्रुता मया—

"सेर नी दवा, जंगला नी हवा"। अर्थात् नगरस्य (सेरनी) औषधं तथा वनस्य वायुः एतद् द्वयमपि समानरूपेण लाभकरं भवति।

अद्यापि सा वनमही कविमोहयित्री
नो विस्मृतिं व्रजतिं जातु निसर्गरम्या।
यस्या लता - कुसुम - निर्झर - राजि - मुग्धे
चित्ते स्वयं सुललिताः कविताः स्फुरन्ति॥ २॥

अद्यापि ता वनभुवो ललिता लताभि-
र्दूर्वादलैर्मृदुपदा वितता वनान्ताः।
मन्दोऽल्पशीतपवनो भ्रमणं स्वतन्त्रं
चेतः स्मृतानि रमयन्ति विनोदयन्ति॥ ३॥

सुश्यामला द्रुमलताः, चकिता हरिण्यो
नृत्यन्मयूरमिथुनानि मनोहराणि।
एते त्रयो वनभुवः खलु चाटुकारा
अद्यापि मामिव पुनः पुनराह्वयन्ति॥ ४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि वायुलव-लोल-लतावलीभि-
र्गुञ्जद्द्विरेफनिवहैः मधुपानमत्तैः।
गन्धं किरद्भिरभितश्च सुमैर्वनानां
रम्याणि कुञ्जभवनानि सदा स्मरामि॥ ५॥

अद्यापि दूरतरवर्ति-वनाञ्चलेषु
ग्रामेषु चातिविरलेषु निशि स्थितेन।
काश्चिन्मया मशक - मत्कुण - दंश - भीते-
र्निद्रां विनैव गमिता रजनीः स्मरामि॥ ६॥

आघूर्णमाननयनैर्हरिणाङ्गनानां
केकिस्वनैर्मधुलिहां मृदुगुञ्जनैश्च।
अद्यापि मेऽक्षियुगलं युगले श्रुती च
मोमुह्यमान इव नित्यमहोऽवभातः॥ ७॥

अद्यापि पक्वमधुराणि फलानि भुक्त्वा
स्त्रोतोजलं च विमलं परिपीय मिष्टम्।
प्रच्छाय-शीतलतमेषु शिलातलेषु
पादौ प्रसार्य शयितुं स्पृहये प्रकामम्॥ ८॥

अद्यापि भूरिसुखदान्यपि तानि किञ्चित्
क्लेशप्रदानि विपिनानि न विस्मरामि।
यत्रोच्चशैलशिखरादनिशं पतन्तः
कर्णौ सदा बधिरयन्ति जलप्रपाताः॥ ९॥

अद्यापि मूर्ध्नि वलयीकृतपिञ्छकानां
कण्ठे लसद्विविधवर्णवराटकानाम्।
कट्यां धृतैकलघु-लम्बित-कर्पटानां
विस्मापिका स्मृतिरुदेति वनौकसां मे॥ १०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि भाति मम भूरि विचित्रमेतद्
वन्या जना यदतिनव्ययुगेऽपि सन्तः।
दृष्ट्वापि नव्यतर-नूतनवेषभूषा
इच्छन्ति नैव निजवेषमहो विहातुम्॥ ११॥

भारतस्य प्रायः सर्वेष्वपि प्रदेशेषु विविधा वन्यजातयो निवसन्ति इति विदितमेव बहूनां भ्रमणशीलानां जनानाम्। मयाऽपि भ्रमणकाले वन्यप्रदेशेषु विविधा जनजातीयाः स्त्रियः पुरुषाश्च दृष्टाः। तेषाञ्च वस्त्राणि, वस्त्रपरिधानरीतयः, आभरणानि, आभरणधारण-प्रकाराः, केशप्रसाधनानि, पल्लव-पुष्प-मयूरपिच्छादिभिः शरीरा-लङ्करणञ्चेति सर्वमपि विचित्रं, विस्मयावहं च भवति। परं सर्वतोऽधिकमाश्चर्यजनकस्तेषामयं मनोभावो भवति यत् ते आधुनिके युगे निवसन्तोऽपि प्रायेण तदनुरूपं परिवर्तनं कर्तुं न समीहन्ते। यदि कश्चित् आधुनिकसभ्यताप्रणयी जनस्तान् परिवर्तनं कर्तुं बोधयति तर्हि ते कुपिता अपि भवन्ति। एतादृशं दृश्यं मया बहुधा नागालैण्डप्रदेशे तथा सन्थालपरगनाक्षेत्रेऽपि अवलोकितम्।

अद्यापि वन्यबदरी - लकुचाम्र - जम्बु-
मालूर-पेरुक-कपित्थ-फलानि खादन्।
गृह्णन् प्रसेवकयुगे च वनेऽभ्रमं यत्
तन्मे स्मृतं जलमयं वदनं विधत्ते॥ १२॥

✯

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिशिष्ट-१

जन्मभूमि-वंश-परिवार-परिचयः

जन्मभूमिः

अस्त्युत्तर-प्रदेशे पूर्वदिशायां तदन्तिमे भागे।
बहु-विद्वज्जन-मण्डित-देवरियामण्डलं ख्यातम्॥
तस्यापि पूर्वभागस्याऽ-न्त्ये क्षेत्रे विहारसंलग्ने।
अस्ति ''भवानीछापर'' नामा ग्रामो सुविख्यातः॥
इयमेव जन्मभूमिर्मम जननीवातिगुरुतरा पुण्या।
यत्र मदीया न्यवसन् पूर्वजना बहुचिरात् कालात्॥

वंशपरम्परा

आसन् पितामहा मम 'रामाज्ञा' इत्यभिधया ख्याताः।
पण्डितवर्या ज्यौतिष-शास्त्रे लोके च सम्मान्याः॥

: १ :

१. पं. लक्ष्मीनारायणद्विवेदी, (ज्येष्ठपितृव्यः) ज्यौतिषशास्त्रस्य धर्मशास्त्रस्य कर्मकाण्डस्य च विद्वान्।
२. पं. यमुनाप्रसादद्विवेदी (पिता) व्याकरणशास्त्रे, साहित्ये, जैनसाहित्ये च निष्णातः। प्रायेण जैनमहाविद्यालयेषु अध्यापकः।
३. पं. मथुराप्रसादद्विवेदी, ज्यौतिषे, कर्मकाण्डे, गृहकार्यसम्पादने च कुशलः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

: २ :

विश्वनाथद्विवेदी, जगन्नाथद्विवेदी च कनिष्ठपितृव्यौ।

: ३ :

जन्मकुण्डली

संवत् १९७० फल्गुनशुक्ल ११रवौ पुष्ये ३ चरणे सूर्योदयादिष्टम् ५०/१०।

तेषां त्रयस्तनूजा लक्ष्मीनारायणाभिधः प्रथमः।
मध्यो "यमुना" नाम्ना अन्त्यो मथुरा-प्रसादश्च॥
तत्र पितृव्यः प्रथमः पुत्रविहीनोऽभवद् दैवात्।
मध्यमतो जातोऽहम् अन्त्याज्जातौ तथा द्वौ च॥

जन्मसमयः

सप्तत्युत्तर एकोनविंशशतके च फाल्गुने शुक्ले।
एकादश्यां च रवौ मम जननं पुष्यनक्षत्रे॥

गोत्रनाम

गर्गेति गोत्रजाता शुक्लेत्याह्वा वयं प्रथमम्।
पश्चात् द्विवेदिसंज्ञा स्थाने परिवर्तनाज्जाता॥

बाल्यकालः

अथ च मदीयं जीवनमाबाल्यादेव चञ्चलं जातम्।
भिन्ने भिन्ने नगरे मात्रा पित्रा सहाऽऽवासे॥
मम पितुरेषा प्रकृतिर्यत्ते नैकत्र बहुदिनान्यवसन्।
तस्मात्तैः सह यातो ममाऽपि कालो महान् भ्रमणे॥
वाराणसी-अयोध्या-जब्बलपुर-चित्रकूटनगरेषु।
जयपुर-ब्यावर-इन्दौरादिपुरेष्वपि गतं बाल्यम्॥

अध्ययनम्

एतस्मिन् खलु काले पठितुं लिखितुं च संस्कृते वक्तुम्।
जाता काचित् शक्तिः श्लोका बहवस्तथा रचिताः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदाहं द्वादशवर्षीय आसं तदा मम पितृपादाः ब्यावर-नगरस्थिते दिगम्बरजैनमहाविद्यालये पाठयन्ति स्म। अहं च तन्नगरस्यैव सनातनधर्म हाईस्कूलस्य संस्कृतविभागे प्रथमकक्षायां पठामि स्म। तत्रैव च श्रीचन्द्रशेखरशर्मा अपि, यः पश्चात् गोवर्धनपीठस्य शङ्कराचार्यपदे अभिषिक्तो जातः, पठति स्म मध्यमाकक्षायाम्। स संस्कृतभाषणे अत्यन्तं पटुः आसीत्। स्वभावतश्चाञ्चल्यात् बहुवेगेन च संस्कृतं वदति स्म। तस्य तादृशीं योग्यतां दृष्ट्वा मम महती ईर्ष्या भवति स्म। अतो मयापि तादृशीं योग्यतां प्राप्तुं कठोरः परिश्रमः प्रारब्धः। दिने, रात्रौ, द्वयोः सन्ध्ययोश्च शब्दरूपाणां, धातुरूपाणां (सन्नन्त-यङन्त-यङ्लुगन्तपर्यन्तानां) रटनम्, अनुवादरचना, गृहे पितृपादैः सह संस्कृते वार्तालापश्चेति सर्वेऽपि उपायाः प्रारब्धाः। एतेन स्वल्पकालेनैव ममापि संस्कृतस्य सम्यग् ज्ञानं जातं संस्कृतभाषया वक्तुं च सामर्थ्यं जातम्। एवं च स्पर्धायाः कारणात् मम योग्यतावृद्धिः, संस्कृतसमाजे सम्मानस्तथा बहूनां विदुषां गृहेषु द्रव्यमिष्टान्नादि-प्राप्तिश्चेति बहवो लाभा अजायन्त।

विवाहः पितुः स्वर्गमनं च

पश्चात् पञ्चदशे मे वर्षे जाते विवाहसंस्कारे।
वाराणस्यामभवत् स्वर्गमनं पितृपादानाम्॥
तदनु ज्येष्ठपितृव्यः माता मम चापि पोषकौ जातौ।
उभयोः संरक्षणतो जातं भूयो ममाध्ययनम्॥

अध्ययनम्, अध्यापनस्थानानि च

कोइलादेवा-ग्रामे हथुवाराज्ये च भाटपारे च।
बरहज-वाराणस्योराचार्यान्तं मयाऽधीतम्॥

पितृपादेषु दिवंगतेषु मातुरनुरोधात् मया समीपवर्तिषु एव विद्यालयेषु नियमितरूपेण अध्ययनमारब्धम्। तत्र सर्वप्रथममहं मम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रामात् क्रोशद्वयदूरवर्तिनि कोइलादेवाग्रामे सञ्चाल्यमाने विद्यालये मध्यमापर्यन्तं पठितवान्। तदनन्तरं क्रोशचतुष्टयदूरवर्तिनि हथुवाराज्ये विद्यमाने श्रीछत्रधारीसंस्कृतमहाविद्यालये साहित्यविषयमादाय आचार्यान्तमध्ययनं कृतवान्। एतत् स्थानद्वयमपि बिहारप्रदेशस्य छपरामण्डलान्तर्गतमासीत्। परन्तु उत्तरप्रदेशस्य आचार्यपरीक्षां दातुं मम समीहा आसीत् अतः उत्तरप्रदेशस्य देवरियामण्डलान्तर्गते भाटपारग्रामे स्थितायां पाठशालायामहं वर्षद्वयं पठित्वा सम्पूर्णमध्यमां परीक्षां च उत्तीर्य देवरियाण्डलस्यैव बरहजनामके सुप्रतिष्ठिते नगरे विद्यमाने परमहंसाश्रमसंस्कृतमहाविद्यालये व्याकरणशास्त्रिकक्षायां प्रवेशं गृहीतवान्। परं तत्र एकवर्षमेव स्थित्वा द्वितीये वर्षे वाराणस्यां राजकीयसंस्कृतमहाविद्यालये प्रविष्टः। तत्र च व्याकरणविषयं परित्यज्य वेदविषयं च गृहीत्वा आचार्यकक्षाया द्वितीयवर्षपर्यन्तं वेदाध्ययनं कृतवान्। अनन्तरं च १९४२ तमे खृष्टाब्दे कांग्रेसद्वारा सञ्चालिते स्वतन्त्रतान्दोलने भागग्रहणात् तृतीयवर्षस्य परीक्षामहं परित्यक्तवान्। अत्रैव मम अध्ययनस्य च समासिर्जाता।

भाटपारस्य पाठशालायामध्ययनकाले भाटपारसमीपवर्तिनि 'पिपरहिया' नामके ग्रामे मम पितुःस्वसुः वसुमतीदेव्या गृहे वर्षद्वयं मम निवास आसीत्।

उपर्युक्तेषु विद्यालयेषु ये मम मुख्या गुरुवर्या आसन् तेषां संक्षिप्तः परिचयः निम्नांकितो विद्यते—

कोइलादेवा : श्री पं. हरिहरपाण्डेयमहोदयाः, वैयाकरणाः।

हथुवा : श्री पं. जाह्नवीप्रसादशास्त्रिमहोदयाः, साहित्यशास्त्रे निष्णाताः।

भाटपार : (१) श्री पं. बालमुकुन्दपाण्डेयमहोदयाः-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(२) श्री पं. राजवंशीमिश्रमहोदयाः उभौ व्याकरण-साहित्याध्यापकौ

बरहज : पं. श्रीमुनिवरमिश्रमहोदयाः, व्याकरणाचार्याः, व्याकरण-शास्त्रस्याध्यापने शास्त्रार्थे सर्वत्र च विख्यातकीर्तयः।

वाराणसी : १. श्री पं. सूर्यनारायणशुक्लमहोदयाः, व्याकरण-शास्त्रस्य, न्यायशास्त्रस्य च सुप्रसिद्धा विद्वांसो, वक्तारः, लेखकाश्च।

२. श्री पं. भगवत्प्रसादमिश्रमहोदयाः, सुविख्याता वेदाचार्याः।

३. डॉ. श्री मङ्गलदेवशास्त्रिमहोदयाः। वेदे नैरुक्त-प्रक्रियाया ममाध्यापकाः (तदानीन्तन - संस्कृत - कालेजस्याध्यक्षाः विख्याता भाषाशास्त्रविदश्च)

एते सर्वे न केवलं मामध्यापितवन्तः अपितु स्नेहेन, वात्सल्येन, सदुपदेशदानेन, सन्मार्गप्रदर्शनेन, मम योग्यतासंविधेन आशीर्वादेन, प्रोत्साहनेनापि च मां नितरामनुगृहीतवन्त इति तेषां चरणयोरहं सर्वदैव हार्दिकीं कृतज्ञतामावहामि।

अध्ययनानन्तरं मम जीविकायै येषां हृदये विशेषचिन्ता आसीत् ते त्रयो निम्नाकिताः मम हितचिन्तका उदारहृदयाश्च विद्वांसः आसन्।

१. श्रीनारायणशास्त्रीखिस्तेमहाभागाः, सरस्वतीभवनपुस्त-कालयाध्यक्षाः।

२. पं. त्रिभुवनप्रसादउपाध्यायमहोदयाः, उत्तरप्रदेशीय-संस्कृत-पाठशालानां प्रधाननिरीक्षकाः।

३. पण्डितराजश्रीकालीप्रसादमिश्रमहोदयाः हिन्दूविश्व-विद्यालये व्याकरंणविभागाध्याक्षाः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अध्ययनसमाप्तिः

द्व्यधिके, चत्वारिंशे वर्षे कांग्रेसचालिते महति-
आन्दोलने समाप्ता वाराणस्यां ममाधीतिः ॥
तदनु च मम गुरुवर्यैः श्रीमद्भगवत्प्रसाद इत्याख्यैः।
आदिष्टोऽहं प्रेम्णा पुनरध्ययनं समारब्धुम् ॥
किन्तु प्रचारं कर्तुं यो हि मया निश्चयो विहितः।
तस्मात् पुनरध्ययने कथमपि नहि मे रुचिर्जाता ॥

अध्ययनानन्तरम्

सेवावृत्तिं परित्यज्य देशसेवायाः संकल्पः

अथ मे प्रवृत्तिरासीत् छात्रावस्थात एव सेवायाम्।
देशस्येति न सेवा-वृत्तिं कर्तुं कदाऽप्यैच्छम् ॥
पश्चात् संस्कृतसेवाकार्यं धर्मप्रचारकार्यं वा।
उभयोरेकं कर्तुं निर्णयमहमन्तिमं कृतवान् ॥
माता मामुक्तवती बहुधा सेवां कुरुष्वेति।
कथमन्यथा भविष्यति तव परिवारस्य निर्वाहः ॥
परमेतन्मम मनसि स्थानं न प्राप्तवद् वचस्तस्याः।
निर्वाहस्तु कथञ्चिद् भवितैवेत्यादि बोधिता माता ॥
भार्याऽप्यस्मिन् कार्ये प्रीत्या मम सह मता जाता।
साधारणतमजीवन-यापनमङ्गीकृतं च तया ॥

संस्कृतप्रचारारम्भः

पश्चाद् विहाय चिन्तां संस्कृतभाषैव धर्मसाधनकृत्।
इति मत्वा तत्कालं-प्रचारकार्येषु संलग्नः ॥

प्रथमं गृहे पाठशालायाः स्थापना

मम बाल्ये मद्गेहे पूर्वं चलति स्म पाठशालैका।
यत्राऽगत्य सुदूरात् छात्रा बहवः सुपण्डिता जाताः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पश्चात् तच्छालायामुच्छिन्नायां युगप्रभावेण।
भूयो नवपद्धत्या शालाऽन्या चालिताथ मया॥

स्थापनासमयः

पाठशालां सञ्चाल्य प्रचारकार्यारम्भः

संस्थाप्येमां शालां तत्राध्याप्य च कियत्कालम्।
आरब्धवान् स्वकीयं संकल्पं सार्थकं कर्तुम्॥
पुण्ये स्वतन्त्रतायाः प्राप्तिदिनाङ्के महोत्सवावसरे।
एतत्संस्थानाम्ना विधिवत् कार्यं मयाऽऽरब्धम्॥
परमं मे सौभाग्यं यदिदं कार्यं सदा चलति सम्यक्।
पुत्रः पौत्रौ पौत्री सर्वेऽप्येते सहायका जाताः॥

अवशिष्ट-परिवार-परिचयः

अथ च मदीयः पुत्रः श्रीविद्यानन्दनामैकः।
यो ब्रह्मचारिनाम्ना लोके सर्वत्र विख्यातः॥

अयं विद्यानन्दः यज्ञोपवीतात् परं विवाहकालात् पूर्वं यावत् च ब्रह्मचर्यव्रतं धारितवान्। नियमानुसारं ब्रह्मचारिवेषं धारयति स्म। आचारपालनं करोति स्म, दण्डधारणं करोति स्म तथा ग्रामे ग्रामे भिक्षाटनमपि करोति स्म। तेन सर्वे जना ब्रह्मचारी इति कथयन्ति स्म। पश्चात् समावर्तने जाते विवाहो जातस्तथापि जनाः पूर्वाभ्यासात् अद्यापि ब्रह्मचारीजी इत्येव कथयन्ति।

अनन्तरं मैट्रिकपर्यन्तमांग्लभाषां पठित्वा, संस्कृते साहित्याचार्यपरीक्षां च उत्तीर्य "काचित् जीविकाप्रदायिनी विद्या पठनीया" इति मातुरनुरोधेन पूर्वं वाराणस्यां तत्पश्चात् पीलीभीतनगरे ललितहरि आयुर्वेदिक-महाविद्यालये आयुर्वेदरसशिक्षां गृहीतवान्, आयुर्वेदाचार्य, बी.आई. एम.एस. इति उपाधिं च लब्ध्वा गृहे एव चिकित्साकार्यं प्रारब्धवान्। कतिपयवर्षानन्तरं भाटपारनगरस्थिते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आयुर्वेदिकमहाविद्यालये अध्यापनकार्यमपि कतिचिद् वर्षाणि कृतवान्। इदानीं च गृहे स्थितः गृहकार्याणि सम्पादयति, गृहस्य विद्याधर्मप्रचारक-संस्कृत-महाविद्यालयं सञ्चालयति तथा काले काले अस्य संस्थानस्य मम चापि सहायतां सेवां च विदधाति।

अथ मम पूज्या जननी पवधारी व्याख्यया ज्ञाता।
मम पितरि स्वर्याते या पालनपोषणां व्यधात्॥
अथ च मदीया गृहिणी विदिताऽसीद् रुक्मिणीनाम्ना।
स्वर्यातायां मातरि या मे परमावलम्बनं जाता॥
पुत्रवधूः सावित्री सौम्या, कुशला गृहस्य कार्येषु।
आसीत्,किन्तु दिवं सा गताऽसमय एव दौर्भाग्यात्॥
पूर्वं चिकित्सकोऽयं पश्चाद् लग्नश्च सेवायाम्।
सम्प्रति गृहपतिरूपे सर्वकुटुम्बस्य कर्णधारोऽयम्॥
पौत्रौ द्वौ, तत्राद्यः प्राचार्यः पाठशालायाम्।
यो भारतीप्रकाशद्विवेद इति नामतः ख्यातः॥
अन्यो द्वितीयपौत्रो विदितो यः श्रीनिवास इति नाम्ना।
संस्थानस्य विकासे कार्यं कर्तुं स कटिबद्धः॥
पौत्र्यौ द्वे, तत्राद्याऽभवत् जयन्ती गृहे कुशला।
अन्या प्रियंवदाख्या लग्ना संस्कृतप्रचारकार्ये सा॥
एका मम प्रपौत्री नाम्ना या सुष्मिता, प्रपौत्रौ द्वौ।
आद्यस्तु ऋषिकुमारः अपरः श्रीविश्वरञ्जनो ज्ञेयः॥
पौत्र्याश्च मे जयन्त्या देवव्रतनामकः सुतस्त्वेकः।
द्वे च सुते तत्राद्या जया द्वितीया च विजयेति॥
जामातरौ च मे द्वौ शिक्षणकार्ये रतौ, तयोराद्यः।
दीक्षितदीनदयालः अन्यस्त्ववधेशपाण्डेयः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

या तु प्रियंवदाख्या पौत्री तस्याः पतञ्जलिः पुत्रः।
बालोऽपि देववाचो वदने शक्तः प्रगल्भश्च॥
अथ लघुपितृव्यजातो भ्राता मे विश्वनाथाख्यः।
ज्यौतिषशास्त्रे निपुणः विख्यातः कर्मकाण्डे च॥
मम पितरि मत्पितृव्य-द्वयोश्च दैवाद् दिवं गते, पश्चात्।
अयमेवैकः सर्वं सञ्चालितवान् गृहोचितं कार्यम्॥
तस्यापि पुत्र-पुत्री-पौत्राद्याः सन्ति शोभना बहवः।
तेऽपि विभिन्ने कार्ये संलग्नाः शिक्षणे चापि॥

चत्वारः पुत्राः श्रीविद्यापतिद्विवेदी, अध्यापकः, श्रीचन्द्रकिशोर-द्विवेदी, अधिवक्ता, श्रीकमलकिशोरद्विवेदी, गृहसंचालकः, माधवमुकुन्द-द्विवेदी, चिकित्सकः तथा अनेके पौत्राश्च।

☆

मम अन्तिमा इच्छा

इति लिखितमशेषं मत्कुटुम्बस्वरूपं
अयमिह च विशेषो मामकीनोऽभिलाषः।
भवतु मम कुटुम्बं संस्कृतज्ञं समस्तं
भवतु च मम गेहो देववाणीविहारः॥
अहमपि च सुखी वा दुःखितो वा रुजार्तो
यदवधि निजशेषं जीवितं धारयेयम्।
तदवधि सुरवाचः सर्वथा गद्यपद्यैः
स्तुतिभिरपि च विज्ञैः मानसं नन्दयेयम्॥

तिरोधानम्—७ ज्येष्ठ शुक्ल २०६१ वि०सं० (२६ मई २००४)

इति शुभम्

☆

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिशिष्टं-२

डॉ० कपिलदेवपाण्डेयस्य (सम्पादकस्य) परिचयः

जगद्गुरुरूपेण विख्यातस्य भारतवर्षस्य विशालतमे राज्ये उत्तरप्रदेशे बलियामण्डले भृगुक्षेत्रनाम्नाऽभिहिते स्वातन्त्र्यसंग्रामे लब्धयशसि रतसर-नामा ग्रामो वर्तते। तत्र श्री पं० रघुनन्दनपाण्डेयवर्याः मम पूज्याः पितामहाः पराशर-गोत्रीये सरयूपारीणे ब्राह्मणकुले स्वजन्मना स्वकीयां पवित्रकुलपरम्परां समलञ्चक्रुः। ते विद्यया वाचा वपुषा च प्रथितप्रकर्षा आसन्। तेषां पुत्रद्वयमासीत्—

१. श्री पं० श्रीकृष्णपाण्डेयः (मम ज्येष्ठ पितृव्यः)—व्याकरणाचार्यः, कर्मकाण्डधुरीणः, साहित्यमर्मज्ञश्चासीत्।

२. श्री पं० विश्वनाथपाण्डेयः (मम पूज्यः पिता)—रामायणकथा-वाचकः, ज्यौतिषे कर्मकाण्डे च लब्धकीर्तिः।

मम पितुः स्व० श्रीविश्वनाथपाण्डेयस्य, मातुः स्व० श्रीमत्याः लक्ष्मीदेव्याश्च द्वौ पुत्रौ—

१-डॉ० कपिलदेव पाण्डेयः २-श्रीव्रजभूषणपाण्डेयश्च

कनीयसः श्रीव्रजभूषणपाण्डेयस्य त्रयः पुत्राः स्वग्रामेऽधीयानाः वर्तन्ते। ज्यायसः डॉ० कपिलदेवपाण्डेयस्य (मम)—द्वे पुत्र्यौ त्रयः पुत्राश्च सन्ति—

१-पुत्री—डॉ० मीनाक्षीपाण्डेया-संस्कृतप्रवक्त्री, हरियाणाप्रदेशे, महेन्द्रगढ़-डिग्रीकालेजे (शासकीये)। तस्याः द्वे सन्तती प्रकर्षः पाठकः, ईशानी च। तत् पतिः श्रीविद्याप्रकाशपाठकः, एच्०आर्०डी० अधिकारी, हरियाणा।

२-पुत्रः-डॉ० विवेकपाण्डेयः संस्कृतप्रवक्ता, हंडिया स्नातकोत्तर-महाविद्यालये, हंडिया, प्रयागे। पुत्री-अन्वीक्षानामधेया। तत्पत्नी श्रीमती डॉ० मधवीपाण्डेया, प्रवक्त्री, चकिया-स्नातकोत्तर-महाविद्यालये।

३-पुत्री-डॉ० चेतनापाण्डेया-गुर्जरप्रदेशे, सूरतनगरे, विद्यालये अध्यापयन्ती। तस्याः एका पुत्री-विश्रुतिनामधेया। तत्पतिः डॉ० अनिल-कुमारपाण्डेयः, राजकीय-चिकित्सकः, सूरतनगरे, गुर्जरप्रदेशे।

४-श्रीविमर्शपाण्डेयः-एम्०एस्-सी० (गणिते), संगणके एम्० टेक०, टी०सी०एस्० (लखनऊ) कार्यरतः। सम्प्रति असोसियेट-कैन्सल्टेण्ट अमेरिकादेशे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५-श्रीविवर्तपाण्डेयः-गाजियाबादनगरे, अभियान्त्रिके (संगणके) अधीयानः शिक्षारतः।

मम सम्प्रतिको निवासः—फ्लैट-सं०-३, प्रिया अपार्टमेण्ट, कमच्छा, वाराणसी-२२१०१०

* जन्मतिथिः —१ सितम्बर १९३६ ई०
* उत्तरप्रदेशे निवासः —जन्मतः। * राष्ट्रीयता —भारतीया।
* शिक्षा — १. प्रारम्भिकी शिक्षा (हाईस्कूलपर्यन्तम्)-स्वग्रामे।
  २. इण्टरमीडिएट शिक्षा-वाराणस्यां क्वींसकालेजे।
  ३. बी०ए०, गोरखपुरविश्वविद्यालयेन सम्बद्धे हरिश्चन्द्रमहाविद्यालये।
  ४. एम्०ए० (संस्कृते)-भारतीयदर्शने विशेषीकरणम्।
  ५. पी-एच्० डी० संस्कृते (मीमांसादर्शने)। एम्०ए०, पी-एच्० डी० इति उपाधिद्वयं काशीहिन्दू-विश्वविद्यालयात्।
* भाषाज्ञानम्- १. संस्कृत, हिन्दी-आंग्लभाषासु भाषणे लेखने च क्षमता
  २. फ्रेञ्च-कन्नड़, बाँगलाभाषासु पठने बोधे च क्षमता
* अध्यापनम्—काशीहिन्दूविश्वविद्यालयेन सह सम्बद्धे आर्यमहिला-डिग्रीकालेजे, वाराणसीस्थे अष्टविंशतिवर्षाणि संस्कृताध्यापनम्। ततः १९९७ ई० वर्षे जूनमासे संस्कृतविभागाध्यक्षरूपेण सेवानिवृत्तः।
* सम्पादनम्—१. 'सूर्योदयः' इति संस्कृतमासिकपत्रिकायाः सप्तवर्षाणि। २. 'आर्यमहिला' इति हिन्दीमासिकपत्रिकायाः सम्पादनम्। ३. जनवरी १९८७तः वाराणसीतः प्रकाशितायाः 'प्राच्यविद्या' इति संस्कृतमासिकपत्रिकायाः सम्पादनम्। ४. साहित्य-अकादमी दिल्ली द्वारा तत्कालिकसम्पादकेन प्रो० विद्यानिवासमिश्रेण सम्पादितायाः संस्कृत-प्रतिभायाः सहायकसम्पादकः। ५. "शिक्षा का शुक्लपक्ष" इत्यस्य सम्पादकमण्डले एकः सम्मानितः सदस्यः।
* प्रकाशनम्— १. शोधनिबन्धाः—विविधासु अधोलिखितासु पत्रपत्रिकासु प्रकाशिताः शोधपरकाः निबन्धाः—

(१) पुराकल्प, (२) सूर्योदयः, (३) ज्योतिष्मती, (४) गाण्डीवम्, (४) परिशीलनम्, (६) संस्कृतमञ्जरी, (७) संस्कृतप्रतिभा, (८) उत्तरप्रदेश (काशीअङ्क), (९) प्रतिभा, (१०) संस्कृतसाधना, (११) आर्यमहिला,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१२) पश्यन्ती, (१३) अरुणिमा, (१४) कबीरशान्तिसन्देश, (१५) आज, (१६) सारस्वतीसुषमा, (१७) संस्कृतविद्या चेति, (१८) परमार्थसुधा।

२. डॉ० के० एच्० पॉटरमहोदयानां सम्पादकत्वे न्युयार्कात् प्रकाशितस्य 'इन्साइक्लोपीडिया ऑफ इण्डियन फिलास्फी' ग्रन्थस्य सांख्य-योगखण्डे प्रविष्टिद्वयं मम प्रकाशितम्।

❋ ३. प्रकाशितानि पुस्तकानि—

१. रूद्रटकृतस्य शृङ्गारतिलकस्य सानुवाद-सम्पादनम्, १९६८ ई०वर्षे।
२. छन्दोऽलङ्कारविमर्शः १९८४ ई० वर्षे।
३. 'संस्कृतज्ञान के बिना कोई भी शिक्षा अधूरी' १९९९ ई० वर्षे।
४. पाथेय (हिन्दीकवितासंग्रहः) २००१ ई० वर्षे।
५. मीमांसा-न्यायप्रकाश-विमर्शः २००१ ई० वर्षे।
६. 'काव्यप्रपानिका' (संस्कृतकवितासंग्रहः) २००३ ई० वर्षे।

❋ ४. प्रकाशनाधीनाः कृतयः—

१. एकमासेन (एकत्रिंशत्पाठैः) संस्कृतशिक्षणम्।
२. हिन्दी-संस्कृत-आंग्लभाषासु विरचितानां शास्त्रीयनिबन्धानां संग्रहः।

❋ काव्यरचना— १-संस्कृत—

१. सन् १९८४ ई० वर्षे गणतन्त्रदिवसस्य पूर्वसन्ध्यायां आकाशवाण्याः महानिदेशालयेनायोजिते सर्व-भाषा-कविसम्मेलने संस्कृतकविरूपेण काव्यपाठं कृतवान्।

२. 'भारतीयज्ञानपीठद्वारा' भारतीय कवितायें १९८९-९०-९१ संग्रहे मम कविता संगृहीता।

३. विविधासु संस्कृतपत्रिकासु (लोकसुश्रीः, गाण्डीवम्, अर्वाचीन-संस्कृतम्, सूर्योदयः, संस्कृतमञ्जरी, संस्कृतप्रतिभा, प्राच्यविद्या-प्रतिभासु) मम अनेकाः कविताः प्रकाशिताः।

४. 'उत्तरप्रदेश-संस्कृत-संस्थाम्', 'संस्कृत-अकादमी-दिल्ली', आकाश-वाणी (वांराणसी-इलाहाबाद, लखनऊ प्रभृतिकेन्द्रेषु) दूरदर्शनस्य (वाराणसी, गोरखपुर, लखनऊ प्रभृतिषु) कविसम्मेलनेषु काव्यपाठः।

५. 'राज्यशैक्षिक-अनुसन्धान-प्रशिक्षणपरिषद्', वाराणसीद्वारा प्रकाशिते 'राष्ट्रीय एकताविषयक कविताएँ' संग्रहस्य संस्कृभागे कवितानां परामर्शः सन्निवेशश्च।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२. हिन्दी—

१. 'काशी के कवि और उनका काव्य' इति संग्रहे मम हिन्दीकवितानां संग्रहः प्रकाशितः (१९८२)

२. 'हिन्दुस्तानी बिरादरी' द्वारा हिन्दीकविरूपेण सम्मानितः (१९८१-८२)

३. 'आज' प्रभृतिषु वृत्तपत्रेषु यथासमयं कविताः प्रकाशिताः।

४. विभिन्नेषु कविसम्मेलनेषु कवि-अध्यक्ष-मुख्यातिथिरूपेण काव्यपाठाः।

३. लोकभाषा (भोजपुरी)—

१. 'समकालीन भोजपुरी साहित्य' इत्यत्र मम कथाः (कहानी) कविताः प्रकाशिताः। २. पटना-बिहारतः प्रकाशितायां 'भोजपुरी सम्मेलन-पत्रिकायां यथासमयं कविताः प्रकाशिताः।'

* अभिनयो नाट्यनिर्देशनञ्च—

१. 'मालविकाग्निमित्रम्', 'उत्तररामचरितम्', 'मुद्राराक्षसम्', 'यौतुकम्', प्रभृतिषु नाट्येषु सशक्ता भूमिका।

२. वाराणसीकेन्द्रस्य आकाशवाणीतः 'भरतभारती' द्वारा नाट्येषु निर्देशनम्।

३. विश्वसंस्कृतसम्मेलने (नवदिल्ल्यामायोजिते भासकृते) 'पञ्चरात्रे' अभिनयः।

* आकाशवाणीमाध्यमेन दूरदर्शनमाध्यमेन च हिन्दीसंस्कृतयोः सेवा—

१. ३०.०६.८१ दिनाङ्कात् अद्य यावत् आकाशवाण्याः वाराणसीकेन्द्रात् काव्यपाठाः, संस्कृतवार्ताः, नाट्याभिनयाः विचार-विमर्शाश्च यथावसरं प्रसारिताः।

२. आकाशवाण्याः दिल्लीस्थमहानिदेशालय-निर्देशानुसारेण संस्कृत-भाषाशिक्षा-पाठयोजनान्तर्गतं साक्षात्पद्धत्या (by direct method) २६ संस्कृतपाठाः निर्मिताः प्रसारिताश्च।

३. दूरदर्शनस्य वाराणसी-गोरखपुर-केन्द्राभ्यां संस्कृतकार्यकमाः बहुशः प्रसारिताः।

* अध्यापनात् सेवानिवृत्त्यनन्तरं सम्प्रति—

१. राष्ट्रियसंस्कृतसंस्थानस्य योजनानुसारेण सं०सं० विश्वविद्यालयस्य साहित्यविभागे 'शास्त्रचूडामणि' विद्वद्रूपेण वर्षत्रयं कार्यरतः।

२. चत्वारि वर्षाणि PHISPC द्वारा परिचालितायां Purāṇic

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Historiography परियोजनायां पद्मभूषणपदभाजां प्रो० विद्यानिवासमिश्रवर्याणां निर्देशने शोधसहायकरूपेण कार्यम्।

✱ विदेशयात्रा—

१. ६–७ नवम्बर दिनाङ्कयो: १९९८ ई० वर्षे Eastern Illinois, U.S.A. विश्वविद्यालये सम्पन्ने समारोहे Transcendental States of Cesciouness विषयमधिकृत्य भाषणं कर्तुं विदेशगमनम्।

२. विदेशयात्राप्रसङ्गे जर्मनीदेशे हैम्बर्गविश्वविद्यालयस्य संस्कृत-विभागाध्यक्षेण प्रो० वेसलरमहोदयेन सह संस्कृतप्रचार-प्रसारविषये विचारविमर्शो जातः।

विविधाभिः संस्थाभिः सह विविधैः रूपैः सम्बद्धता—

१. आजीवनसदस्यः – 'लिंग्विस्टिक सोसायटी ऑफ इण्डिया', पुणे।
२. आजीवनसदस्यः – 'नागरी-प्रचारिणी सभा', वाराणसी
३. मन्त्री – 'सार्वभौमसंस्कृतप्रचारसंस्थानम्', वाराणसी
४. संस्थापक-सदस्यः – 'अभिनयभारती', नाट्यसंस्था, वाराणसी
५. संस्थापक-सदस्यः – 'भरतभारती' नाट्यसंस्था, वाराणसी।
६. उपाध्यक्षः – 'कविभारती', वाराणसी
७. संरक्षकमण्डल-सदस्यः – गोकुल आर्ट्स, वाराणसी
८. अध्यक्षः – 'पं० महादेवमिश्र स्मृति संगीत संस्थान', वाराणसी
९. अध्यक्षः – 'साहित्यसंघः', वाराणसी
१०. संरक्षकः – 'बनारस नाट्य अकादमी', वाराणसी
११. एकेडेमिक कमेटी (साहित्य) के सदस्य –'ज्ञानप्रवाहः' सांस्कृतिक केन्द्र, वाराणसी

वर्तमानं निवासस्थानम्

फ्लैट संख्या–३, प्रिया अपार्टमेन्ट,
कमच्छा, वाराणसी–२२१०१०
दूरभाष:–०५४२–२४५४८१४,
मोबाइल–३१२६१९०

इति शम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्पादकस्य संक्षिप्त-परिचयवृत्तम्

डॉ० कपिलदेवपाण्डेयः

नाम – डॉ० कपिलदेवपाण्डेयः

पित्रोर्नामनी – स्व० श्रीमती लक्ष्मी देवी, स्व० श्री पं० विश्वनाथपाण्डेयः

जन्मतिथिः – ०१.०९.१९३६ ई०

उत्तरप्रदेशे निवासः – जन्मतः, गोत्रम्–'पराशर' इति

जन्मस्थान – रतसर, बलिया, उ०प्र०

शिक्षा– १. हाईस्कूलपर्यन्तं स्वग्रामे
२. इण्टरमीडिएट, क्वींसकालेजे, वाराणस्याम्
३. बी०ए० (गोरखपुर विश्वविद्यालयः)
४. एम्० ए० (संस्कृते) पी-एच्० डी० (का०हि०वि०वि०)
५. नव्यव्याकरणशास्त्री (सम्पूर्णानन्द संस्कृत विश्वविद्यालयः)

भाषाज्ञानम्– १. संस्कृत–हिन्दी–आंगलभाषासु भासणे लेखने च
२. बाँगला–कन्नड–फेञ्चभाषासु सामान्यं ज्ञानम्।

अध्यापनम्– काशीहिन्दूविश्वविद्यालयेन सह सम्बद्धे 'आर्यमहि[illegible] अष्टा[illegible] ति (२८) वर्षाणि संस्कृताध्यापनम्। ततः १९९७ वर्षे जूनमासे सं[illegible] सेवा[illegible] निवृत्तः।

सम्पादनम्– 'सूर्योदयः' इति संस्कृतमासिक पत्रिकायाः [illegible] 'अ[illegible] गा' [illegible] हिन्दी मासिक पत्रिका

ततः परम्– १. विदेशयात्रा–सन् १९९८ तमवर्षस्य नव[illegible] E[illegible]stern illinois विश्वविद्यालये (U.S.A.) सम्पन्ने द[illegible] T[illegible]s[illegible] dent[illegible] States of Consciousness विषयमधिकृत्य भाषणम्।
२. राष्ट्रिय–संस्कृत–संस्थानस्य योजनानुसारेण स०सं० [illegible] लयस्य साहित्यविभागे 'शास्त्रचूडामणि विद्वद्सम्मानेन वर्षत्रयं कार्यरतः।
३. चत्वारि वर्षाणि Phispc द्वारा परिचालितायां प[illegible] प्रो० विद्यानिवासमिश्राणां निर्देशने कार्यम्

प्रकाशनम्– १. देशस्य विविध विद्यासंस्थोभ्यः प्रकाशितासु शोधपत्र–पत्रिकासु अनेके शोधनिबन्धाः प्रकाशिताः।
२. प्रकाशिताः कृतयः– १. रुद्रटकृतस्य 'शृङ्गारतिलक'स्य सानुवादं सम्पादनम् १९६८ वर्षे।
२. छन्दोऽलङ्कारविमर्शः १९८४ ई० वर्षे
३. 'संस्कृतज्ञान के बिना कोई भी शिक्षा अधूरी' १९९९ ई० वर्षे।
४. 'पाथेय' (हिन्दीकवितासंग्रहः) २००१ ई० वर्षे
५. 'मीमांसा–न्यायप्रकाश–विमर्शः' नामकः शोधप्रबन्धः २००१ ई० वर्षे।
६. 'काव्यप्रनपानिका' (संस्कृतकवितासंग्रहः) २००३ ई० वर्षे।
७. डॉ० के० एच्० पॉटरमहोदयस्य सम्पादकत्वे न्यूयार्कात् प्रकाशिते 'इन्सानक्लोपीडिया ऑफ इण्डियन फिलास्फी' इत्यस्य सांख्ययोग खण्डे प्रविष्टिद्वयम्।
३. प्रकाशनाधीनाः कृतयः– १. हिन्दी–संस्कृत–आंग्लभाषासु विरचितानांशास्त्रीय निबन्धानां संग्रहः।
२. एकमासे संस्कृतशिक्षणम्।

सम्मानः – २००३ तमे वर्षे, कालिदासपुरस्कारेण सम्मानितः, उ०प्र० संस्कृतसंस्थानद्वारा।

विविधाभिः विशिष्टसंस्थाभिः सह आजीवनसदस्यरूपेण, संस्थापकसदस्यरूपेण, अध्यक्षरूपेण, संरक्षकरूपेण, मन्त्रिरूपेण वा सम्बद्धः। आकाशवाण्याः दूरदर्शनस्य च विविधेभ्यः केन्द्रेभ्यः वार्ताः काव्यपाठाश्च यथासमयं प्रसारिताः।

डॉ० कपिलदेवपाण्डेयः
फ्लैट सं० ३ प्रिया अपार्टमेण्ट, कमच्छा, वाराणसी
दूरभाष : २४५४८१४ मोबाइल–९३३६९२६१९०

Dr. Urmila Sharma Collection, Varanasi